Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sa i475.8 Kridanta Rupamala

RaSa Ramasubha Sastri

II.204

*But thought nor word can seize eternal truth*

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

# KṚDANTARŪPAMĀLĀ

## A CONCORDANCE OF VERBAL DERIVATIVES


BEGUN BY

*Sastraratnakara, Kulapati late* Pt. S. RAMASUBBA SASTRI
*First Head of the S. E. Society Teaching Centre, Pettai*
*and completed by his students*

V. SRIVATSANKACHARYA & T. K. PRANATARTIHARAN
*Pandits of the S. E. Society's Teaching Centre*


WITH THE PREFACES OF

**Dr. C. P. Ramaswami Aiyar**, *Founder–President and*
**Dr. V. Raghavan**, *Professor of Sanskrit, University of Madras*

*and the Foreword of* **Sri K. Balasubramanya Iyer**, B.A., B.L., M.L.C.
*President of the Society*

VOLUME FOUR

RELEASED BY

HIS HOLINESS
JAGADGURU SRI CHANDRASEKHARENDRA
SARASVATI SANKARACHARYA SWAMIGAL
*of Kanchi Kamakoti Pitha*

**on the occasion of His 75th Birthday (10-6-68)**


*Published by*

SRI T. V. VISWANATHA AIYAR, *Secretary*

**The Samskrit Education Society, Madras**

14, EAST MADA STREET, MYLAPORE, MADRAS-4

1968


CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

# कृदन्तरूपमाला

मद्रपुरी-संस्कृतविद्यासमिति-कलाशालायाः प्रथमप्रधानाध्यापकैः
शास्त्ररत्नाकरादिबिरुदालङ्कृतैः पण्डितवर्यैः
श्रीमद्भिः श. रामसुब्रह्मण्यशास्त्रिभिरारब्धा
तच्छिष्याभ्यां श्री श्रीवत्साङ्काचार्य-श्री प्रणतार्तिहरशर्मभ्यां पूरिता

श्रीमतां डा० चे. प. रामस्वाम्यार्याणां, डा० वे. राघवार्याणां च
आमुखाभ्यां
तथा श्रीमतां कृ. बालसुब्रह्मण्यार्याणां प्रस्तावोक्त्या च सहिता

137

चतुर्थभागात्मिका

श्रीकाञ्चीकामकोटिपीठाधीश्वरजगद्गुरुश्रीशंकराचार्यैः
श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणैः
तेषां ७५-तम-जयन्ती-महोत्सवावसरे सानुग्रहं प्रकाशिता

SRI AUROBINDO LIBRARY PONDICHERRY (India)

मद्रपुरीसंस्कृतविद्यासमितिसचिवैः
श्री. ति. वे. विश्वनाथार्यैः
(14, पूर्वमाडवीथी, मद्रास्-4)
प्रकाशिता

१९६८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमावृत्तिः १९६८

© Samskrit Education Society, Madras-4

Sa i 73-040.

Published with the aid of
Govt. of India, Ministry of Education.

Rs. 10/- each volume
Rs. 50/- advance price for full set.

मूल्यम् : प्रतिभागं १० रू.
सर्वभागानां प्राक्प्रकाशनमूल्यं ५० रू.

श्री भारती विजयम् प्रेस, मद्रास्-५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

## GENERAL PREFACE

The Samskrit Education Society is one of the latest efforts made by lovers of Sanskrit in Madras to check the erosion or elimination of Sanskrit which is imminent in the different sectors of its studies in this part of the country, notwithstanding that South India has been a stronghold of this language in the past amongst all those who prize intellectual stimulation and spiritual inspiration. The Society was started with the blessings of H. H. Sri Chandrasekharendra Sarasvati, Sankaracharya of Kanchi Kamakoti Peetha, on the oecasion of the Golden Jubilee of his accession to the Peetha. I have had the pleasure and privilage of being connected with its management from the inception.

In spite of the difficulties of the present situation and the many causes demanding the help and patronage of the philanthropists, we may assert that during the short period of our existence, we have made fairly steady progress, although it is not spectacular. In Pettai, near Madras, we have a large area of land where our buildings are coming up and a Sanskrit advanced study centre is functioning. We have been concentrating in training young Pandits already qualified in one Sastra to become equipped in another Sastra. We have started a few research projects and publication schemes: a *Concordance of Verbal Derivatives*, a *New Model Sanskrit Grammar* and a *Dictionary of Indeclinables*. Another undertaking of ours is the book on *The Teaching of Sanskrit*. This and the *Concordance of Verbal Derivatives*, I am happy we are sble to release to the public now.

The maintenance and promotion of Sanskrit study in the schools face two difficulties today, one stemming from the language formulae of the Government which is explicitly unfavourable to Sanskrit and secondly, the lack of improved methods of making its learning easy and popular. The Society may well congratulate itself in having addressed itself to the latter problem and brought out these books written by able and experienced scholars, Pt. S. Ramasubba Sastrigal and Prof. K. Rama Varma Raja. On behalf of the Society, I must also express my appreciation of the services rendered to the Society by Dr. V. Raghavan who has been in general charge of these and other research projects and publications of the Society. What he and others have been

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



doing in this part of the country, in the midst of all sorts of difficulties, must evoke the admiration of Sanskritsits all over the country.

These and other research projects and the teaching work of the Society have been receiving assistance from the Central Sanskrit Board which deserves all praise for its efforts to rehabilitate in the country Sanskrit, the bedrock of Indian culture.

I wish all success to Sri T. V Viswanatha Aiyar, Secretary of the Society, who has been building up the resources of the Society and managing its affairs so well. I am quite sure that the Samskrit Education Society will ere long emerge as an active advanced Centre of a University type for Sanskrit in the South.

C. P. RAMASWAMI AIYAR
*Founder-President, The Sanskrit Education Society, Madras.*

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

# FOREWORD

We have great pleasure in placing in the hands of the Scholars and students of Samskrit the Fourth Volume of the KRIDANTA ROOPAMALA, the Concordance of Verbal derivatives undertaken by our Society. This volume was formally released by HIS HOLINESS JAGADGURU SRI SANKARACHARYA SWAMIGAL OF KANCHI KAMAKOTI PEETAM on 10th June 1968, at Secunderabad, Andhra Pradesh, where His Holiness at present stays.

The Fourth Volume covers 540 roots beginning from घूर्ण् to रौड़ according to the Dhatupata. All the four volumes therefore cover 1445 roots.

After the demise of Sastraratnakara Kulapati S. Rama Subba Sastrigal, who was chiefly responsible for the preparation of this work, his disciples, especially, Sri Srivatsankacharya, have been working in accordance with the plan formulated by the late Ramasubba Sastrigal.

As scholars are aware this is a very difficult work which requires a thorough knowledge of Vyakarana and the details connected with it; fortunately the disciples of Sastrigal have imbibed very well the lessons given by their master, and they have accomplished this work with diligence and industry.

The fifth volume is also contemplated to be published as early as possible. That volume will carry the coverage of roots upto 1980 omitting those which are derived from the Pratipadikas.

On behalf of the Samskrit Education Society, I have to express our appreciation of the good work done especially by Sri Srivatsankacharya.

We are very grateful to Dr. V. Raghavan, Professor of Sanskrit, University of Madras for his guidance and advice in the preparation and publication of this work.

This is a monumental work. We hope and trust that all scholars and lovers of Samskrit will find it very useful to them.

"Ashrama",
Luz, Mylapore,
18th July 1968.

K. BALASUBRAHMANYA IYER
*President.*

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

# PREFACE

The Samskrit Education Society, Madras has been able to bring out the fourth, the penultimate, volume of the *Kṛdantarūpamālā* comprising 342 pages and dealing with 540 Roots in a year's time after the publication of the third volume. It is a matter for gratification that following in the footsteps of their teacher, the late Sri S. Ramasubba Sastrigal, his two S'iṣyas, Pts. V. Srivatsankacharya and T.K. Pranatartiharan, have maintained the standard of the earlier volumes. The present volume includes some Roots the citation of the correct forms of whose derivatives, with the requisite authorities, entailed diligent search on the part of the compilers. The strain of seeing through the orderly presentation of the diversified material in the main body of the work and in the supporting rules and illustrations in the footnotes is offset by the revelation at each step of the wondrous richness of the language and the beauty of its structure.

Thanks are due to Pt. A. M. Srinivasachariar, who has, as in the case of the earlier volumes, assisted us in the checking of the references and the correction of the proofs.

The authorities of the Society feel very much encouraged by reviews and notices of the earlier Volumes of this work, such as the one in the *Journal of the American Oriental Society*, Volume 87, April—June 1967.

V. RAGHAVAN.

SRI AUROBINDO LIBRARY PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(906) "धूञ् कम्पने" (V-स्वादिः-1255. अक. वेट्. उभ.)

'धूनयति धवति धवते, धुनोति धुनुते, धुनाति च धुनीते।
धूनोति धूनुते स्युः पदानि कम्पे, विधूनने धुवति॥' (श्लो. 26) इति देवः।

धावकः-विका, [1]धूनकः-निका, [2]दुधूषकः-षिका, दोधूयकः-यिका;
[3]धोता-धविता-त्री, धूनयिता-त्री, दुधूषिता-त्री, दोधूयिता-त्री;
[4]धून्वन्-ती, [5]धूनयन्-न्ती, दुधूषन्-न्ती; —
धोष्यन्-धविष्यन्-न्ती-ती, दुधूषिष्यन्-न्ती-ती; —
धून्वानः, — दुधूषमाणः, [A]दोधूयमानः;
धोष्यमाणः-धविष्यमाणः, — दुधूषिष्यमाणः, दोधूयिष्यमाणः;
प्रधूः-प्रध्वौ-प्रध्वः; — —
[6]धूतम्-[B]धूतः-धूतवान्, धूनितः, दुधूषितः, दोधूयितः-तवान्;
[7]धवः, [8]धवनः, [9]परिधावी, धूनः, दुधूषुः, दोधुवः;
धोतव्यम्-धवितव्यम्, धूनयितव्यम्, दुधूषितव्यम्, दोधूयितव्यम्;

---

1. 'धूञ्प्रीञोर्नुग्वक्तव्यः' (वा. 7-3-37) इति ण्यन्ते सर्वत्र नुगागमः। लघूपधत्वाभावान्न गुणः।
2. पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात्' 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः। 'इको झल्' (1-2-9) इति सनः कित्वान्न गुणः। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
3. 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इति वलादेरार्धधातुकस्येड्विकल्पः। एवं तव्यदादिष्वपि ज्ञेयम्।
4. शतरि, 'स्वादिभ्यः—' (3-1-73) इति श्नुप्रत्ययः। 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यण्। एवं धून्वानः इत्यत्रापि प्रक्रिया ज्ञेया।
5. ण्यन्तात् 'निगरणचलनार्थेभ्यः—' (1-3-87) इति नित्यं शतैव। न शानच्।
6. निष्ठायाम्, 'श्र्युकः किति' (7-2-11) इति नित्यमिण्निषेधः।
7. धूनयति = कम्पयतीत्यर्थेऽन्तर्भावितण्यन्तादस्मात् कर्तरि पचाद्यचि रूपमेवम्।
8. निमित्तभेदेनास्य धातोरकर्मकत्वे, 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति तच्छीलादिषु कर्तृषु युच्प्रत्ययः।
9. ताच्छील्ये णिनिप्रत्यये रूपमेवम्।

A. 'दोधूयमानं विविधोर्मियोगात् छायागरुत्मन्तमवेक्ष्य भीताः।' या.अ. 18. 96.

B. 'कुब्जा कृतारिबलमैक्षत शृण्वती सा
पात्रं समीरधुतसौरभधूतभृङ्गम्॥' धा. का. 2. 68.

101

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| धवनीयम्, | धूननीयम्, | दुधूषणीयम्, | दोधूयनीयम्; |
| धव्यम्-अवश्यधाव्यम्, | धून्यम्, | दुधूष्यम्, | दोधूय्यम्; |
| ईषद्धवः-दुर्धवः-सुधवः; | | — | — |
| धूयमानः, | धून्यमानः, | दुधूष्यमाणः, | दोधूय्यमानः; |
| [1]धवः, | धूनः, | दुधूषः, | दोधूयः; |
| धोतुम्-[A]विधवितुम्, | | दुधूषितुम्, | दोधूयितुम्; |
| धूतिः, | धूनना, | दुधूषा, | दोधूया; |
| धवनम्, | धूननम्, | दुधूषणम्, | दोधूयनम्; |
| धूत्वा, | धूनयित्वा, | दुधूषित्वा, | दोधूयित्वा; |
| विधूय, | विधून्य, | विदुधूष्य, | विदोधूय्य; |
| धावम् २, धूत्वा २, | धूनम् २, धूनयित्वा २, | दुधूषम् २, दुधूषित्वा २, | दोधूयम् २; दोधूयित्वा २. |

### (907) "धूञ् कम्पने" (IX-क्र्यादिः-1487. सक. वेट्. उभ.)

### प्वादिः ल्वादिश्च ।

'धूनयति धवति धवते, धुनोति धुनुते, धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे, विधूनने धुवति ॥' (श्लो. 26) इति **देवः** ।
धावकः-विका, धूनकः-निका, दुधूषकः-षिका, दोधूयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि पूर्वोक्तधूञ्धातुवत् (906) बोध्यानि । [2]धुनन्-ती, [B]धुनानः, धूनः, [3]धूनिः, इमानि रूपाणि अस्य धातोः भवन्तीति विशेषः ।

---

1. भावे, 'ऋदोरप्' (3-3-57) इत्यप्प्रत्ययः ।
2. शतरि, '**क्र्यादिभ्यः**—' (3-1-81) इति श्नाप्रत्यये, '**प्वादीनां** ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपम् । एवं शानजन्तेऽपि प्रक्रिया ज्ञेया ।
3. '**ऋल्वादिभ्यः** क्तिन् निष्ठावद् वक्तव्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नकारः ।

A. 'स मायानामगात् सोता कपेर्विधवितुं द्युतिम् ॥' भ. काः 9. 28.

B. 'नागं ददर्श पटपूर्णमुखं **धुनानं** कर्णौ श्वणन्तमखिलानभिपूर्तरोषम् ॥' धा.का.3.6.

Sa i 73-040

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (908) " धूञ् कम्पने " (X-चुरादिः-1836. अक. सेट्. उभ.)

### आधृषीयः ।

' धूनयति धवति धवते, धुनोति धुनुते, धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे, विधूनने धुवति ॥' (श्लो. 26) इति देवः ।

धूनकः-निका, [1]धावकः-विका, दुधूनयिषकः-षिका ; धूनयिता-त्री, दुधूनयिषिता-त्री ; धूनयन्-न्ती, दुधूनयिषन्-न्ती ; धूनयिष्यन्-न्ती-ती, दुधूनयिषिष्यन्-न्ती-ती ;धूनयमानः, दुधूनयिषयमाणः, धूनयिष्यमाणः, दुधूनयिषिष्यमाणः, धूनितम्-धावितम्[A]-तः-तवान्, दुधूनयिषितः-तवान्; धूनः, दुधूनयिषुः ; धूनयितव्यम्, दुधूनयिषितव्यम्; धूननीयम्, दुधूनयिषणीयम्, धून्यम्, दुधूनयिष्यम् ; ईषद्धूनः-दुर्धूनः-सुधूनः ; धून्यमानः, दुधूनयिष्यमाणः ; धूनः, दुधूनयिषः ; धूनयितुम्, दुधूनयिषितुम् ; धूनना, दुधूनयिषा ; धूननम्, दुधूनयिषणम्, धूनयित्वा, दुधूनयिषित्वा, प्रधून्य, प्रदुधूनयिष्य, धूनम् २-धूनयित्वा २, { दुधूनयिषम् २ ; दुधूनयिषित्वा २. }

## (909) " धूप सन्तापे " (I-भ्वादिः-396. अक. सेट्. पर.)

'धूपायतीति सन्तापे भाषार्थे धूपयेदिति ।' (श्लो. 130) इति देवः ।

[2]धूपायकः-यिका, धूपकः-पिका, [3]धूपायकः-यिका, धूपकः-पिका,

---

1. 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा. 7-3-37) इत्यत्र प्रीञा साहचर्यात् क्र्यादेरेव ग्रहणमिति पक्षे, 'हेतुमण्ण्यन्तादेव नुगागमः, न तु स्वार्थण्यन्तात्' इति पर्यवसानात्, अस्य धातोः स्वार्थण्यन्तत्वात् नुगभावे रूपमेवम् । एवमेव तृजादिष्वपि । अत्र पक्षे **धावयिता-त्री**, इत्यादीनि रूपाणि ज्ञेयानि ।

2. 'गुपूधूपविच्छिपणिपनिभ्य आयः' (3-1-28) इति आयप्रत्ययः । स च, 'आयादय आर्धधातुके वा' (3-1-31) इति विकल्पेन भवति । तेन आयप्रत्ययपक्षे रूपमेवम् । तदभावपक्षे **धूपकः** इति । एवं आर्धधातुके सर्वत्रायप्रत्ययो ज्ञेयः ।

3. ण्यन्तेऽपि सर्वत्रायप्रत्ययविकल्पः । तेन सर्वत्र रूपद्वयम् ।

A. 'कूटायेषु हतेषु **धावितम**तिष्वन्येषु धावत्सु च
स्वैरं तत्र जनान् प्रयन् विगलितश्रन्थान् कचान् ग्रन्थयन् ॥' धा. का. 3.51.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]दुधूपायिषकः-दुधूपिषकः-षिका, [2]दोधूपकः-पिका ;
धूपायिता-त्री, धूपिता-त्री, धूपाययिता-धूपयिता-त्री, दुधूपायिषिता-दुधूपिषिता-त्री, दोधूपिता-त्री ;
[3]धूपायन्-न्ती, धूपाययन्-धूपयन्-न्ती, दुधूपायिषन्-दुधूपिषन्-न्ती ; —
धूपायिष्यन्-धूपिष्यन्-न्ती-ती, धूपाययिष्यन्-धूपयिष्यन्-न्ती-ती, दुधूपायिषिष्यन्-दुधूपिषिष्यन्-न्ती-ती ;
— धूपाययमानः-धूपयमानः, दुधूपायिषमाणः-दुधूपिषमाणः, दोधूप्यमानः ;
— धूपाययिष्यमाणः-धूपयिष्यमाणः, दुधूपायिषिष्यमाणः-दुधूपिषिष्यमाणः, दोधूप्यमानः ;
[4]प्रधूपाः-प्रधूपौ-प्रधूपाः, प्रधूप्-प्रधूब्-प्रधूपौ-प्रधूपः ; —
धूपायितम्-[A]धूपितम्, धूपायितः-धूपितः, दुधूपायिषितः-दुधूपिषितः, दोधूपितः-तवान् ;
धूपायः-धूपः, प्रधूपी, धूपायः-धूपः, दुधूपायिषुः-दुधूपिषुः, दोधूपः ;
धूपायितव्यम्-धूपितव्यम्, धूपाययितव्यम्-धूपयितव्यम्, दुधूपायिषितव्यम्-दुधूपिषितव्यम्, दोधूपितव्यम् ;
धूपायनीयम्-धूपनीयम्, धूपायनीयम्-धूपनीयम्, दुधूपायिषणीयम्, दुधूपिषणीयम्, दोधूपनीयम् ;
धूपाय्यम्-धूप्यम्, धूपाय्यम्-धूप्यम्, दुधूपायिष्यम्-दुधूपिष्यम्, दोधूप्यम्;
ईषद्धूपायः-दुर्धूपायः-सुधूपायः, ईषद्धूपः-दुर्धूपः-सुधूपः ; —
धूपाय्यमानः-धूप्यमानः, धूपाय्यमानः-धूप्यमानः, दुधूपायिष्यमाणः, दुधूपिष्यमाणः, दोधूप्यमानः ;
धूपायः-धूपः, धूपायः-धूपः, दुधूपायिषः, दुधूपिषः, दोधूपः ; -

---

1. आयप्रत्ययान्तात् सनि रूपमेवम्। तदभावे **दुधूपिषकः** इत्यादीनि रूपाणीति ज्ञेयम्।
2. आर्धधातुकविवक्षायामायप्रत्ययस्य वैकल्पिकत्वात्, आयप्रत्ययान्तस्य अनेकाच्त्वात् आयप्रत्ययविवक्षायां यङ् न। आयाभावपक्षे तु यङि **दोधूपकः** इत्यादीनि रूपाणि ज्ञेयानि।
3. शतुः सार्वधातुकत्वेन नित्यमायप्रत्ययः।
4. आयप्रत्ययान्तात् क्विपि, अल्लोपयलोपयोः, सोः रुत्वविसर्गयोश्च रूपमेवम्।

A. 'गोपायतां धर्मसंधूपितात्मनां जल्पान् विमुच्याभवदुद्यमो जपे॥' धा. का. 1.51.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



धूपायितुम्-धूपितुम्, धूपाययितुम्-धूपयितुम्, दुधूपायिषितुम्-दुधूपिषितुम्, दोधूपितुम्;
धूपाया-धूपा, धूपायना-धूपना, दुधूपायिषा-दुधूपिषा, दोधूपा;
धूपायनम्-धूपनम्, धूपायनम्-धूपनम्, दुधूपायिषणम्-दुधूपिषणम्, दोधूपनम्;
धूपायित्वा-धूपित्वा, धूपाययित्वा-धूपयित्वा, दुधूपायिषित्वा-दुधूपिषित्वा, दोधूपित्वा;
प्रधूपाय्य-प्रधूप्य, प्रधूपाय्य-प्रधूप्य, प्रदुधूपायिष्य-प्रदुधूपिष्य, प्रदोधूप्य;
धूपायम् २-धूपम् २, धूपायित्वा २-धूपित्वा २, } धूपायम् २-धूपम् २, धूपाययित्वा २-धूपयित्वा २, }
दुधूपायिषम् २-दुधूपिषम् २, दुधूपायिषित्वा २-दुधूपिषित्वा २, दोधूपम् २; दोधूपित्वा २. }

(910) "धूप भाषार्थः" (X-चुरादिः-1773. सक. सेट्. उभ.)

आस्वदीयः।

'भासार्थ इत्येके' इति मैत्रेयः। तथा च क्षीरस्वामी—'भासा दीप्तिरर्थो येषां ते भासार्थाः।' इति मा. धा. वृत्तिः।

'धूपायतीति सन्तापे भाषार्थे धूपयेदिति।' (श्लो. 130) इति देवः। धूपकः-पिका, दुधूपयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि कूटयतिवत् (240) ऊह्यानि। धूपयन्-न्ती, दुधूपयिषन्-न्ती-ती, धूपयिष्यन्-न्ती-ती, दुधूपयिषिष्यन्-न्ती-ती; इति शतृप्रत्ययेऽत्र विशेषः।

(911) "धूरी हिंसागत्योः" (IV-दिवादिः-1153. सक. सेट्. आत्म.)

धूरकः-रिका, धूरकः-रिका, दुधूरिषकः-षिका, दोधूरकः-रिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकगूर्यतिवत् (419) ऊह्यानि। विघूर्णम्[A]-कर्मणि क्तः।

(912) "धूस कान्तिकरणे" (X-चुरादिः-1640. अक. सेट्. उभ.)

'दन्त्योष्मान्तः' इति श्रीभद्रमैत्रेयादयः। 'मूर्धन्योष्मान्तः' इति स्वामी।

---

A. 'धर्मविसायजनदः खलु योऽजनिष्ट
दीप्तोष्मपूर्णभुजतूर्णविघूर्णवैरी॥' धा. का. 2. 59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



तथा च मैत्रेयोऽपि 'धूष इत्येके' इति पपाठ। काश्यपस्तु तालव्योष्मान्तमाह' इति मा. धा. वृत्तौ।

धूसकः-सिका, दुधूसयिषकः-षिका, धूसयिता-त्री, दुधूसयिषिता-त्री, इत्यादीनि सर्वाणि रूपाणि कूटयतिवत् (240) ज्ञेयानि। धूसयन्-न्ती, दुधूसयिष्यन्-न्ती-ती; धूसयिष्यन्, दुधूसयिषिष्यन्-न्ती-ती; इति शतृप्रत्ययेऽत्र विशेषः। धूसितम्[A]।

(913) "धृङ् अवध्वंसने" (I-भ्वादिः-960. अक. अनि. आत्म.)

'अविध्वंसने' इति क्षीरस्वामी।

'ध्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः।
धरते धारणेऽर्थे तु धरते धरतीत्युभे ॥' (श्लो. 29) इति देवः।

धारकः-रिका, धारकः-रिका, [1]दिधीर्षकः-षिका-[2]देध्रीयकः-यिका;
धर्ता-त्री, धारयिता-त्री, दिधीर्षिता-त्री, देध्रीयिता-त्री;
—, धारयन्-न्ती, धारयिष्यन्-न्ती-ती; —
धरमाणः, धारयमाणः, दिधीर्षमाणः, देध्रीयमाणः;
[3]धरिष्यमाणः, धारयिष्यमाणः, दिधीर्षिष्यमाणः, देध्रीयिष्यमाणः;
सुधृत्-सुधृद्-सुधृतौ-सुधृतः; — —
धृतम्-तः-तवान्, धारितः, दिधीर्षितः, देध्रीयितः-तवान्;
[4]धरः, [5]धरणः, धारः, दिधीर्षुः, देध्रीयः;
धर्तव्यम्, धारयितव्यम्, दिधीर्षितव्यम्, देध्रीयितव्यम्;
धरणीयम्, धारणीयम्, दिधीर्षणीयम्, देध्रीयणीयम्;

---

1. सन्नन्ताण्वुलि 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'ऋत इद्धातोः' (7-1-100) इति इत्त्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे च रूपमेवम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. यङन्ते, 'रीङ् ऋतः' (7-4-27) इति रीङ्। गुणोऽभ्यासे। एवं सर्वत्र ज्ञेयम्।
3. 'ऋद्धनोः स्ये' (7-2-70) इतीडागमः।
4. पचादित्वादच्प्रत्ययः कर्तरि।
5. 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति ताच्छीलिको युच्।

A. 'सौधे विटङ्कजुषि पश्यति धूसितोऽयं राजारिकीढवलचूर्णनयातिपूज्यः।'
धा. का 3. 27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]धार्यम्, | धार्यम्, | दिधीर्ष्यम्, | देध्रीय्यम्; |
| ईषद्धरः-दुर्धरः-सुधरः; | | — | — |
| [2]ध्रियमाणः, | धार्यमाणः, | दिधीर्ष्यमाणः, | देध्रीय्यमाणः; |
| धारः, | धारः, | दिधीर्षः, | देध्रीयः; |
| धर्तुम्, | धारयितुम्, | दिधीर्षितुम्, | देध्रीयितुम्; |
| [3]धारा-धृतिः, | धारणा, | दिधीर्षा, | देध्रीया; |
| धरणम्, | धारणम्, | दिधीर्षणम्, | देध्रीयणम्; |
| धृत्वा, | धारयित्वा, | दिधीर्षित्वा, | देध्रीयित्वा; |
| प्रधृत्य, | प्रधार्य, | प्रदिधीर्ष्य, | प्रदेध्रीय्य; |
| धारम् २, धृत्वा २, | धारम् २, धारयित्वा २, | दिधीर्षम् २, दिधीर्षित्वा २, | देध्रीयम् २; देध्रीयित्वा २. |

(914) "**धृङ् अवस्थाने**" (VI-तुदादिः-1412. अक. अनि. आत्म.)

किरादिः। '**धारणे च**' इति द्रुमे।

'ध्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः।
धरते धारणेऽर्थे तु धरते धरतीत्युभे॥' (श्लो. 29) इति **देवः**।

धारकः-रिका, धारकः-रिका, [4]दिधरिषकः-षिका, देध्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकधरतिवत् (913) ऊह्यानि। [5]पुरन्ध्री[A],

---

1. 'ऋहलोः—' (3-1-124) इति ण्यत्प्रत्ययः।
2. 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशे रूपम्।
3. '**धारा** प्रपाते' (ग. सू. 3-3-103) इति भिदादिपाठात् अङि, 'ऋदृशोऽङि गुणः' (7-4-16) इति गुणः। निपातनाद् दीर्घः। अन्यत्र **धृतिः**। असि**धारा** इत्यादिषु प्रपातसाम्यात् लक्षणया प्रयोगः।
4. अस्य धातोः किरादित्वात् '**किरश्च** पञ्चभ्यः' (7-2-75) इति सनि इडागमो भवति। द्वित्वादिकम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
5. पुरं धारयतीत्यर्थे 'संज्ञायां भृ—' (3-2-46) इति खचि, पृषोदरादित्वात् उपधा-लोपे साधुः। स्त्रियाम्, गौरादित्वात् ङीष्।

A. 'ह्रीणां नवोढां जगतोऽभिनन्द्यां तां पर्यगृह्णन् मुदिताः **पुरन्ध्रयः**॥' वा.वि. 1·60.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]महीध्रः-कुध्रः, [2]आधारः, [3]धर्मः, इमानि रूपाणि अस्य धातोरिति विशेषः ।

(915) "धृज् गत्यर्थः" (I-भ्वादिः-217. सक. सेट्. पर.)

'धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि ।' (श्लो. 60) इति देवः ।

धर्जकः-र्जिका, धर्जकः-र्जिका, दिधर्जिषकः-षिका, दरीधृजकः-जिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्जतिवत (422) ऊह्यानि । ल्यपि—प्रधृज्य[A] इति ।

(916) "धृजि गत्यर्थः" (I-भ्वादिः-218. सक. सेट्. पर.)

'धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि ।' (श्लो. 60) इति देवः ।

धृञ्जकः-ञ्जिका, धृञ्जकः-ञ्जिका, दिधृञ्जिषकः-षिका, [4]दरीधृञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि गृञ्जतिवत् (423) बोध्यानि ।

(917) "धृञ् धारणे" (I-भ्वादिः-900. सक. अनि. उभ.)

'धरते धारणेऽर्थे तु धरते धरतीत्युभे ॥' (श्लो. 29) इति देवः ।

धारकः-रिका, धारकः-रिका, दिधीर्षकः-षिका, देध्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिधरतिकवत् (913) ज्ञेयानि । [5]युगन्धरः-

---

1. 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5) इति कः। एवं कुं धरतीति **कुध्रः** इत्यत्रापि ज्ञेयम् ।

2. 'अवहाराधारावायानामुपसंख्यानम्' (वा. 3-3-122) इति घञन्तः निपात्यते । आध्रियतेऽस्मिन्नित्यर्थे = **आधारः** ।

3. 'अर्तिस्तुसुहुसृधृ—' (द. उ. 7-26) इति मन्प्रत्यये रूपमेवम् । धरति ध्रियते वाऽस्मिन्नाचार इति **धर्मः** = न्यायः ।

4. 'रीगृत्वत इति वक्तव्यम्' (वा. 7-4-90) इति यङन्ते अभ्यासस्य रीगागमः । एवं यङन्ते सर्वत्र बोध्यम् ।

5. 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' (3-2-46) इति कर्मण्युपपदे ण्यन्तात् खच्-प्रत्ययः । युगं धारयतीति **युगन्धरः** = पर्वतविशेषः । 'खचि ह्रस्वः' (6-4-94) इति ह्रस्वः, 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम् । एवं **जलन्धरः**, **पुरन्धरः**, **श्रुतन्धरः**, **वसुन्धरा** इत्यादिषु ज्ञेयम् ।

A. '**प्रधृज्य** मोदं स दधृञ्ज तद्वनं ध्वजोद्गतिध्वञ्जितकूजदण्डजम् ।' धा. का. 1.30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



जलन्धरः-पुरन्धरः-श्रुतन्धरः-वसुन्धरा, [1]धनुर्धरा, [2]महीध्रः[A], [3]कर्णधारः, [4]आधारः, [5]धारा, [6]धारयः[B], [7]धारयन्, [8]धुरन्धरः, धर्मः; इमानि रूपाणि अधिकान्यत्रेति विशेषः। अस्य धातोः उभयपदित्वात् शतरि—धरन्-न्ती, धरिष्यन्-न्ती-ती, इति विशेषः।

**(918) "धृष प्रसहने"** (X-चुरादिः-1851. सक. सेट्. उभ.)

**आधृषीयः।**

'अप्रसहने' इति क्षीरस्वामी। आदित् इति **शाकटायनः**। 'एधु पश बन्धने इति केचित् पठन्ति। तदुक्तं मैत्रेयेण—' पश बन्धने ' इत्यत्र 'पश बन्धने' इति युजादौ इति' **मा. धा. वृत्तौ।**

'धृषेः प्रसहने यौ स्तां धर्षयेद् धर्षतीत्युभे॥' (श्लो. 181) इति **देवः**।

धर्षकः-र्षिका, दिधर्षयिषकः-षिका, धर्षकः-र्षिका, दिधर्षिषकः-षिका, दरीधृषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचृपधातुवत् (554) ज्ञेयानि। 'धृषा' इति **शाकटायनपक्षे**—धृष्टम्-धृष्टः-धृष्टवान्, इति निष्ठायां विशेषः। कर्मणि क्तप्रत्यये धर्षितः[C] इति भवति।

---

1. **धनुर्धरा** इत्यत्रापि खजेव। अजन्तत्वाभावात् मुमागमो न।
2. महीं धरतीति **महीध्रः**=पर्वतः। एवं **कुध्रः** इत्यपि। 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5)इति कप्रत्यये पृषोदरादित्वात् उपधालोपे साधुः।
3. 'कर्मण्यण्' (3-2-1) इत्यणि रूपम्। एवं **सूत्रधारः** इत्यादिष्वप्यण्।
4. '°अवहाराधारावायानामुपसंख्यानम्' (वा. 3-3-122) इति संज्ञायां घापवादो घञ्।
5. '**धारा** प्रपाते' (ग. सू. 3-3-103) इति भिदादिपाठादङ्। 'ऋदृशोऽङि—' (7-4-16) इति गुणः। निपातनाद् दीर्घः। अन्यत्र **धृतिः** इत्येव।
6. 'अनुपसर्गाल्लिम्पविन्दधारिपारि—'(3-1-138) इत्यादिना ण्यन्तादस्मात् शप्रत्ययः। गुणायादेशौ। कर्तरि प्रत्ययोऽयम्।
7. ण्यन्तादस्मात्, '**इङ्धार्योः** शत्रकृच्छ्रिणि' (3-2-130) इति शता। '**धारयन्** पारायणम्' इत्यत्र क्लेशं विना धारणस्य द्योतनात् शता। कृच्छ्रार्थे तु **धारयमाणः** इति शानजेव।
8. धुरं धरतीत्यर्थे संज्ञात्वाभावेऽपि बाहुलकात् खचि, 'वाचंयमपुरन्दरौ च' (6-3-69) इत्यत्र चकारात् अमागमः इति **प्र. सर्वस्वे**।

A. 'ययासतस्तस्य **महीध्र**रन्ध्रभिदापटीयान् पटहप्रणादः।' शि. व. 3. 24.

B. 'सुखजातः सुरापीतो नृजग्धो माल्य**धारयः**।' भ. का. 5.38.

C. 'त्रियश्चोत्कण्ठन्त्यो ददृशुरजितं मृष्टतनवः नृपस्त्वेतन्नामर्षत रिपुजना**धर्षित**बलः॥' धा. का. 3. 52.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(919) "ञि धृषा प्रागल्भ्ये" (V-स्वादिः-1269. अक. सेट्. पर.)

'प्रागल्भ्यार्थे तु धृष्णोति परस्मैपदिनावुभौ ॥' (श्लो. 182) इति देवः ।

धर्षकः-र्षिका, धर्षकः-र्षिका, [1]दिधर्षिषकः-षिका, [2]दरीधृषकः-षिका ;
धर्षिता-त्री, धर्षयिता-त्री, दिधर्षिषिता-त्री, दरीधृषिता-त्री ;
[3]धृष्णुवन्-ती, धर्षयन्-न्ती, दिधर्षिषन्-न्ती ; —
धर्षिष्यन्-न्ती-ती, धर्षयिष्यन्-न्ती-ती, दिधर्षिषिष्यन्-न्ती-ती ; —
— धर्षयमाणः, धर्षयिष्यमाणः, — दरीधृष्यमाणः, दरीधृषिष्यमाणः ;
[4]दधृक्[A]-दधृषौ-दधृषः ; — — —
[5]प्रधृष्टम्-प्रधृष्टः-प्रधृष्टवान्, प्रधर्षितः-तवान्, धर्षितः, दिधर्षिषितः, दरीधृषितः-तवान् ;
[6]धृषः, [7]धृष्णक्-धृष्णजौ-धृष्णजः, [8]धृष्णुः,[B] [9]धर्षणः, प्रधर्षी, धर्षः, दिधर्षिषुः, दरीधर्षः ;

---

1. सन्नन्ताण्वुलि रूपम् । सेट्त्वात् गुणः । एवं सर्वत्र सन्नन्ते ज्ञेयम् ।
2. 'रीग् ऋत्वत इति वक्तव्यम्' (वा. 7-4.40) इति रीगागमो यङन्ते सर्वत्र ।
3. शतरि, 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः । 'अचि श्नु—' (6-4-77) इति उवङादेशः ।
4. 'ऋत्विग्दधृक्–' (3-2-59) इत्यादिना क्विन्प्रत्ययसन्नियोगेन धातोः द्विर्वचनं निपात्यते । धृष्णोतीति दधृक् । 'क्विन्प्रत्ययस्य कुः' (8-2-62) इति कुत्वम् ।
5. 'आदितश्च' (7-2-16) इति, 'विभाषा भावादिकर्मणोः' (7-2-17) इति च अस्य धातोः नित्यम्, अर्थविशेषे विभाषया च यथाक्रममिड्विकल्पयोः प्राप्तयोः सत्योः, 'धृषिशसी वैयात्ये' (7-2-19) इति नित्यमिडभावो वैयात्ये गम्यमाने निपात्यते । वैयात्यम् = वियातस्य भावः-धृष्टता । प्रागल्भ्यार्थे तु इट् भवत्येव । तदानीं 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः' (1-2-19) इति निष्ठायाः कित्त्वनिषेधाद् गुणः । 'ञीतः क्तः' (3-2-187) इति वर्तमानेऽप्यस्य धातोः क्तप्रत्ययो भवति ।
6. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः ।
7. 'धृषेश्चेति वक्तव्यम्' (वा. 3-2-172) इति ताच्छीलिके नजिङ्प्रत्यये रूपम् । 'नेड् वशि कृति' (7-2-8) इतीण्निषेधः । धृष्णक् = निर्लज्जः ।
8. 'त्रसिगृधिधृषिक्षिपेः क्नुः' (3-2-140) इति तच्छीलादिषु कर्तृषु क्नुप्रत्ययः । 'नेड् वशि कृति' (7-2-8) इतीण्निषेधः ।
9. नन्द्यादित्वात् (3-1-134) ण्यन्तादस्मात् कर्तरि ल्युप्रत्ययः ।

A. 'तामातिक्य पदे पदेन चिबुके चातिग्नुवन् पाणिना
चक्रे सघ्नुवतां वधे दधृगसौ ऋज्वीं मनोज्ञाकृतिम् ।' धा. का 2.70.

B. 'वसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत् ॥' भ. का. 7. 4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| घर्षितव्यम्, | घर्षयितव्यम्, | दिघर्षिषितव्यम्, | दरीधृषितव्यम्; |
| घर्षणीयम्, | घर्षणीयम्, | दिघर्षिषणीयम, | दरीधृषणीयम्; |
| [1]धृष्यम्, | घर्ष्यम्, | दिघर्षिष्यम्, | दरीधृष्यम्; |
| [2]ईषद्धर्षणः-दुर्धर्षणः-सुधर्षणः; | | — | — |

इत्यादीनि सर्वाण्यपि रूपाणि तर्षतिवत् (775) ज्ञेयानि। क्त्वायाम्—[3]घर्षित्वा इति।

(920) "धॄ वयोहानौ" (IX-क्रयादिः-1494. अक. सेट्. पर.)

प्वादिः ल्वादिश्च। 'जॄ' इत्यस्य पाठभेदोऽयम्।

'आत्रेयमैत्रेयदैवपुरुषकारादिषु दर्शनादिहास्माभिर्लिखितः' इति मा. धा. वृत्तौ।

धारकः-रिका, धारकः-रिका, दिधरीषकः-दिधरिषकः-षिका, दिधीर्षकः-र्षिका; धरीता-धरिता-त्री, ईषद्धरः-[A]दुर्धरः-सुधरः; इत्यादीनि सर्वाण्यपि रूपाणि जॄधातुवत् (618) ज्ञेयानि।

(921) "धेक दर्शने" (X-चुरादिः-1914. सक. सेट्. उभ.) अदन्तः।

केषाञ्चित् पक्षमनुसृत्य लिखितः।

क्षीरतरङ्गिणीमाधवधातुवृत्त्यादिषु तु न दृश्यते।

धेककः-किका, दिधेकयिषकः-षिका; 'इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककेतयतिवत् (260) बोध्यानि।

(922) "धेट् पाने" (I-भ्वादिः-902. सक. अनि. पर.)

'धेटो धयति पानार्थे, धाञो धत्ते दधात्यपि।' (श्लो. 6) इति देवः।

---

1. 'ऋदुपधात्—' (3-1-110) इति क्यप्।
2. 'भाषायां शासियुधिदृशिधृषिमृषिभ्यः—' (वा. 3-3-130) इति खलपवादो युच्।
3. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद् गुणः।
A. 'जगत् पिपविषुर्वायुः कल्पान्त इव दुर्धरः॥' भ. का. 9. 53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]धायकः-यिका, [2]धापकः-पिका, [3]धित्सकः-त्सिका, [4]देधीयकः-यिका ;
[5]प्रणिधाता-त्री, धापयिता-त्री, धित्सिता-त्री, देधीयिता-त्री ;
[6]प्रणिधयन्-न्ती, [7]धापयन्-न्ती, धित्सन्-न्ती ; —
प्रणिधास्यन्-न्ती-ती, धापयिष्यन्-न्ती-ती, धित्सिष्यन्-न्ती-ती ; —
— धापयमानः, धापयिष्यमाणः, — देधीयमानः, देधीयिष्यमाणः ;
[8]धाः-धौ-धाः ; — — —
[9]धीतम्-धीतः-धीतवान्, धापितः, धित्सितः, देधीयितः-तवान् ;
[10]उद्धयः[A]-धयः, [11]नासिकन्धयः-[B]स्तनन्धयः, स्तनन्धयी, [12]नाडिन्धयः-

---

1. 'आदेच उपदेशेऽशिति' (6-1-45) इत्यात्त्वे, 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः । एवं घञि णमुल्यपि ज्ञेयम् ।

2. ण्यन्ते सर्वत्र आत्त्वे, आदन्तलक्षणः पुगागमो ज्ञेयः ।

3. धारूपत्वेनास्य घुसंज्ञकत्वात्, 'सनि मीमाघु—' (7-4-54) इत्यादिना इस्. 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः । 'सः स्यार्धधातुके' (7-4-49) इति तकारः । एवं सन्नन्ते सर्वत्र प्रक्रिया ।

4. यङन्ते सर्वत्र, 'घुमास्था—' (6-4-66) इत्यादिना ईत्वे, अभ्यासे गुणः ।

5. 'नेर्गदनदपतपदघु—' (8-4-17) इत्यादिना नेर्णत्वम् ।

6. शतरि, 'एचोऽयवायावः' (6-1-78) इत्ययादेशः ।

7. 'न पादम्याङ्—' (1-3-89) इत्यत्र, 'धेट उपसंख्यानम्' (वा. 1-3-89) इति वचनात् उभयपदित्वमस्य ; तेन ण्यन्तात् शतृशानचौ ।

8. क्विपि, आत्त्वे रूपमेवम् ।

9. निष्ठायाम्, 'घुमास्था—' (6-4-66) इति ईत्वे, रूपम् । एवम्, क्त्वाप्रभृतिष्वपि ज्ञेयम् ।

10. सोपसृष्टात्, निरुपसृष्टादपि, 'पाघ्राध्माधेट्दृशः शः' (3-1-137) इति शप्रत्यये, शित्त्वेन सार्वधातुकत्वात् शप्प्रत्यये, पररूपे, अयादेशे च रूपमेवम् । केचित्तु निरुपसृष्टादेवायं प्रत्यय इति साधयन्ति ।

11. 'नासिकास्तनयोर्ध्माधेटोः' (3-2-29) इति खश्प्रत्ययः । 'खित्यनव्ययस्य' (6-3-66) इति ह्रस्वः, 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम् । धेटष्टित्त्वात् अवयवेऽचरितार्थस्य टित्करणस्य समुदाय उपयोगात् स्त्रियां ङीप् ।

12. 'नाडीमुष्टयोश्च' (3-2-30) इति खश् । पूर्ववत् मुम् ।

A. 'ध्वनीनामुद्धमैरेभिर्मधूनामुद्धयैर्भृशम् ।' भ. का. 6. 78.

B. 'सत्त्वमेजयसिंहाढयान् स्तनन्धयसमत्विषी ।' भ. का. 6. 95.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[A]मुष्टिन्धयः, [1]शुनिन्धयः, [2]घटिन्धयः-खारिन्धयः-खरिन्धयः- [3]वातन्धयः, [4]धारुः,[B] [5]धात्री, [6]पुष्पन्धयः,[C] मुञ्जन्धयः-कूलन्धयः-आस्यन्धयः, [7]क्षीरधाः,
धापः, धित्सुः, देध्यः ;

| | | | |
|---|---|---|---|
| धातव्यम्, | धापयितव्यम्, | धित्सितव्यम्, | देधीयितव्यम् ; |
| प्रणिधानीयम्, | धापनीयम्, | धित्सनीयम्, | देधीयनीयम् ; |
| प्रणिधेयम्, | धाप्यम्, | धित्स्यम्, | देधीय्यम् ; |
| [8]ईषद्धानः-दुर्धानः-सुधानः ; | | — | — |
| धायः, [9]सन्धिः, धापः, | | धित्सः, | देधीयः ; |
| धातुम्, | धापयितुम्, | धित्सितुम्, | देधीयितुम् ; |

---

1. 'खश्प्रकरणे—वातशुनीतिलशर्धेषु अजधेट्तुदजहातीनां खश उपसंख्यानम्' (वा. 3-2-28) इति वार्तिकात् खश् । 'खित्यनव्ययस्य' (6-3-66) इति ह्रस्वः ।
2. 'घटीखारीखरीषु—' (वा. 3-2-30) इति खश् । वार्तिकमिदं भाष्ये न दृश्यते । 'नाडीमुष्ट्योश्च' (3-2-30) इत्यत्र विद्यमानश्चकारोऽनुक्तसमुच्चयार्थकः इति मत्वा सिद्धान्तकौमुद्यादिषूक्तः स्यात् ।
3. अत्रापि, बाहुलकात् खश् । वातन्धयः=सर्पः ।
4. 'दाधेट्सिशदसदो रुः' (3-2-159) इति ताच्छीलिको रुप्रत्ययः ।
5. 'ध्यः कर्मणि ष्ट्रन्' (3-2-181) इति कर्मण्यर्थे ष्ट्रन् । षित्वात् स्त्रियां ङीष् ।
'तत्र बाला धयन्त्येनामिति धात्र्युपमातरि ।
भैषज्यार्थं दधत्येनामिति स्यादामलक्यपि ॥' इति प्र. सर्वस्वे ।
6. पुष्पशब्द उपपदे धातोरस्य खश्प्रत्ययविधानाभावात् पृषोदरादित्वेन वा, 'नाडी-मुष्ट्योश्च' (3-2-30) इत्यत्र अनुक्तसमुच्चयार्थकचकारेण वा साधुत्वमिति ज्ञेयम् । एवमेव मुञ्जन्धय इत्यादिष्वपि । पुष्पन्धयः=भ्रमरः । कूलन्धयः=नदी-वेगः । मुञ्जन्धयः=क्रिमिविशेषः । आस्यन्धयः=कामुकः ।
7. क्षीरं धयतीति क्षीरधाः । 'आतो मनिन्—' (3-2-74) इति विट् ।
8. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच् ।
9. 'उपसर्गे घोः किः' (3-3-92) इति किप्रत्यये, 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे रूपमेवम् ।

A. 'किमत्र बहुना भजद्भवपयोधिमुष्टिन्धयः
त्रिविक्रम भवत्क्रमः क्षिपतु मङ्क्षु रङ्गद्विषः ॥' अभीतिस्तवे 27.

B. 'श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम् ॥' भ. का. 7. 21.

C. 'चक्राङ्गीमदपश्यतोहरचलच्छम्पासमुन्मेषणः
पुष्पत्केतकगन्धसिन्धुविलुठत्पुष्पन्धयान्धीकृतैः ।' च. भारते 3. 53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| घीतिः, [1]सुघा, | घापना, | घित्सा, | देघीया ; |
| घयनम्, | घापनम्, | घित्सनम्, | देघीयनम् ; |
| घीत्वा, | घापयित्वा, | घित्सित्वा, | देघीयित्वा ; |
| प्रघाय, | प्रघाप्य, | प्रघित्स्य, | प्रदेघीय्य ; |
| घायम् २ } घीत्वा २ } | घापम् २ } घापयित्वा २ } | घित्सम् २ } घित्सित्वा २ } | देघीयम् २ ; } देघीयित्वा २; } |

[2]घेनुः.

(923) "घोर्ऋ गतिचातुर्ये" (I-भ्वादिः-553. अक. सेट्. पर.)

घोरकः-रिका, घोरकः-रिका, दुघोरिषकः-षिका, दोघोरकः-रिका ; [A]घोरन्-न्ती, [3]आघोरणः, [4]घौरितकम्, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखोरतिवत् (363) ज्ञेयानि ।

(924) "ध्मा शब्दाग्निसंयोगयोः" (I-भ्वादिः-927. सक. अनि. पर.)

'अग्निसंयोगश्च मुखवायुना। लक्षणया विधूनने, सन्तापेन पूरणे च ।' इति धा. का. व्याख्यायाम् (2-33) ।

[5]ध्मायकः-यिका, [6]ध्मापकः-पिका, दिध्मासकः-सिका, [7]देध्मीयकः-यिका ;
ध्माता-त्री, ध्मापयिता-त्री, दिध्मासिता-त्री, देध्मीयिता-त्री ;
[8]धमन्[B]-न्ती, ध्मापयन्-न्ती, दिध्मासन्-न्ती ; —

---

1. 'आतश्चोपसर्गे' (3-3-106) इति स्त्रियामङ् ।
2. 'घेट इच्च' (द. उ. 1-145) इति नुप्रत्यये इकारश्चान्तादेशः । घेनुः=नवप्रसूता गौः ।
3. ण्यन्तात् नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्ययः । आघोरणः=हस्तिपकः ।
4. निष्ठान्तात् संज्ञायां कन्प्रत्ययः । घोरितकमेव घौरितकम्=अश्वानां गतिविशेषः । कनन्तात् प्रज्ञाद्यण् ।
5. 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः । एवं घञ्णमुलादिषु ।
6. ण्यन्ते सर्वत्र पुगागमो ज्ञेयः ।
7. 'ई घ्राध्मोः' (7-4-31) इति यङि ईकारः । अभ्यासे गुणः । एवं यङन्ते सर्वत्र ।
8. शतरि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधम—' (7-3-78) इत्यादिना धमादेशः । अदन्तोऽयमादेशः । पररूपे रूपमेवम् ।

A. 'अखोरघोरत्पतगेन्द्रवाहनं स्वसेविनां तित्सरिषां निराडिनम् ।' धा. का. 1·71.
B. 'स्नातावदातः स पिबंस्तदाभां जिघ्रन् सुगन्धं विधमन् अघानि ।' धा. का. 2. 33.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ध्मास्यन्-न्ती-ती, ध्मापयिष्यन्-न्ती-ती, दिध्मासिष्यन्-न्ती-ती; —

[1]व्यतिधममानः, ध्मापयमानः, [2]व्यतिदिध्मासमानः, देध्मीयमानः;

व्यतिध्मास्यमानः, ध्मापयिष्यमाणः, व्यतिदिध्मासिष्यमाणः, देध्मीयिष्यमाणः;

शङ्खध्माः-ध्मौ-ध्मः; — — —

ध्मातम्-तः-तवान्, ध्मापितः, दिध्मासितः, देध्मीयितः-तवान्;

[3]उद्धमः[A]-धमः, [4]नासिकन्धमः, [5]नाडिन्धमः[B]-मुष्टिन्धमः, [6]पाणिन्धमः,[C]

[7]शुनिन्धमः, [8]करन्धमः, वातन्धमः-घटिन्धमः-खारिन्धमः-खरिन्धमः,

ध्मापः, दिध्मासुः, [9]दाध्माः;

ध्मातव्यम्, ध्मापयितव्यम्, दिध्मासितव्यम्, देध्मीयितव्यम्;

---

1. 'कर्तरि कर्मव्यतीहारे' (3-1-14) इति शानच्।
2. 'पूर्ववत् सनः' (1-3-62) इति सन्नन्तादात्मनेपदम्।
3. 'पाघ्राध्माधेट्दृशः शः, (3-1-137) इति उपसृष्टान्निरुपसृष्टादपि शप्रत्यये धमादेशे च रूपम्। निरुपसृष्टादेवायं शप्रत्यय इति **केचित्**।
4. '**नासिकास्तनयोर्ध्माधेटोः**' (3-2-29) इति खश्प्रत्ययः। 'खित्यनव्ययस्य' (6-3-66) इति मुम्। शूत्कारैः नासिकां शब्दयतीति **नासिकन्धमः**=वराहः।
5. 'नाडीमुष्ट्योश्च' (3-2-30) इति खश्, ह्रस्वः, मुम्। **नाडिन्धमः**=स्वर्णकारः। वेण्वादिनाडिं मुखवायुना धमतीति **नाडिन्धमः**।
6. 'उग्रम्पश्येरम्मद**पाणिन्धमा**श्च' (3-2-37) इति सूत्रेण निपातनात् साधुः। पाणयः ध्मायन्ते एषु इति **पाणिन्धमः**=पन्थाः। 'सर्पास्पृश्यादिरोधार्थं ध्मायन्ते यत्र पाणयः। सोऽध्वा **पाणिन्धमो**ऽत्राधिकरणार्थो निपातनात्॥' इति **प्रक्रिया-सर्वस्वे**।
7. 'नाडीमुष्ट्योश्च' (3-2-30) इत्यत्र चकारात् अत्रापि खश्। एवं **घटिन्धमः**, **खारिन्धमः**, **खरिन्धमः**, **वातन्धमः** इत्यादिष्वपि खश् ज्ञेयः। **वातन्धमः**=पर्वतः। **घटिन्धमः**=आमः।
8. 'उग्रम्पश्य—' (3-2-37) इत्यत्र पाणिपदेन पर्यायस्यापि ग्रहणमिति **प्रक्रिया-कौमुद्या**शयात् तन्मते **करन्धमः** इत्यपि साधुः।
9. 'यङोऽचि च' (2-4-74) इति यङो लुकि, ईत्वाभावे रूपमेवम्।

A. 'ध्वनीना**मुद्धमै**रेभिर्मधूनामुद्धयैर्भृशम्।' भ. का. 6. 78.

B. 'प्राचीं वासकसज्जिकामुपगते भानौ दिशावल्लभे
पश्यैता रुचयः पतङ्गदृषदामाग्नेय**नाडिन्धमाः**।' अनर्घराघवे 4. 2.

C. 'शस्त्राशस्त्रिकथैव का नवभवद्गीर्वाण**पाणिन्धमाः**
पन्थानो दिवि सङ्कुचन्ति वसुधा वन्ध्या न सूते भटान्।' अनर्घराघवे 4. 20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| ध्मानीयम्, | ध्मापनीयम्, | दिध्मासनीयम्, | देध्मीयनीयम्; |
| ध्मेयम्, | ध्माप्यम्, | दिध्मास्यम्, | देध्मीय्यम्; |
| ध्मायमानः, | ध्माप्यमानः, | दिध्मास्यमानः, | देध्मीय्यमानः; |
| ध्मायः, | ध्मापः, | दिध्मासः, | देध्मीयः; |
| ध्मातुम्, | ध्मापयितुम्, | दिध्मासितुम्, | देध्मीयितुम्; |
| ध्मातिः, [1]आध्मा, | ध्मापना, | दिध्मासना, | देध्मीया; |
| ध्मानम्, | ध्मापनम्, | दिध्मासनम्, | देध्मीयनम्; |
| ध्मात्वा, | ध्मापयित्वा, | दिध्मासित्वा, | देध्मीयित्वा; |
| आध्माय, | आध्माप्य, | प्रदिध्मास्य, | प्रदेध्मीय्य; |
| ध्मायम् २, ध्मात्वा २, | ध्मापम् २, ध्मापयित्वा २, | दिध्मासम् २, दिध्मासित्वा २, | देध्मीयम् २; देध्मीयित्वा २; |

[2]धमकः, [3]धमनिः.

(925) "ध्यै चिन्तायाम्" (I-भ्वादिः-908. सक. अनि. पर.)

| | | | |
|---|---|---|---|
| ध्यायकः-यिका, | ध्यापकः-पिका, | दिध्यासकः-सिका, | दाध्यायकः-यिका; |
| ध्याता-त्री, | ध्यापयिता-त्री, | दिध्यासिता-त्री, | दाध्यायिता-त्री; |
| ध्यायन्-न्ती, | ध्यापयन्-न्ती, | दिध्यासन्-न्ती; | — |
| ध्यास्यन्-न्ती-ती, | ध्यापयिष्यन्-न्ती-ती, | दिध्यासिष्यन्-न्ती-ती; | — |
| ध्यापयमानः, | ध्यापयिष्यमाणः, | — दाध्यायमानः, | दाध्यायिष्यमाणः; |
| [4]सुधीः[A]-सुधियौ-सुधियः; | | — | — |

1. स्त्रियाम्, '**आत**श्चोपसर्गे' (3-3-106) इत्यङ्।
2. '**ध्मो धम च**' [द. उ. 3.7] इति क्वुन् प्रत्यये धमादेशे च रूपम्। धमतीति **धमकः**=अग्निध्मापकः।
3. 'अर्तिसृधृ**धमि**भ्यश्च' [द. उ. 1-2] इति अनिप्रत्यये बाहुलकात् धमादेशे च **धमनिः**=नाडी। अत्र '**धमिभ्यः**' इत्युक्तत्वात्, '**विधमिष्यामि** जीमूतान्—' (रामायणे सुन्दरकाण्डे-67-12) '**धान्तो** धातुः पावकस्येव राशिः' इत्यादिप्रयोगानुसाराच्च **धमिः** प्रकृत्यन्तरम् इति **केचित्**। धातुपाठकोशेषु तु **धमि**रन्यो नोपलभ्यते।
4. '**ध्यायतेः** सम्प्रसारणं च' (वा. 3-2-178) इति तच्छीलादिषु कर्तृषु क्विप्प्रत्ययः, सम्प्रसारणम्, पूर्वरूपादिकं च। द्विवचनादिषु '**न भूसुधियोः**' (6-4-85) इति यणो निषेधात् 'अचि श्नुधातु—' (6-4-77) इति इयङ्।

A 'निद्रायदिन्दीवरभाजि मज्जन्**घ्राणधी**स्तत्र च तं ददर्श ॥' धा. का. 2.30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]ध्यातम्-तः, | ध्यापितः, | दिध्यासितः, | दाध्यायितः-तवान् ; |
| [2]दूढ्यः, मध्यः, [3]धीवा-धीवरी, | [4]आढ्यः, ध्यापः, | दिध्यासुः, | दाध्यः ; |
| ध्यातव्यम्, | ध्यापयितव्यम्, | दिध्यासितव्यम्, | दाध्यायितव्यम् ; |
| ध्यानीयम्, | ध्यापनीयम्, | दिध्यासनीयम्, | दाध्यायनीयम् ; |
| [5]ध्येयम्, | ध्याप्यम्, | दिध्यास्यम्, | दाध्याय्यम् ; |
| [6]ईषद्ध्यानः-दुर्ध्यानः-सुध्यानः ; | | — | — |
| ध्यायमानः, | ध्याप्यमानः, | दिध्यास्यमानः, | दाध्याय्यमानः ; |
| ध्यायः, | ध्यापः, | दिध्यासः, | दाध्यायः ; |
| ध्यातुम्, | ध्यापयितुम्, | दिध्यासितुम्, | दाध्यायितुम् ; |
| ध्यातिः, सन्ध्या, | ध्यापना, | दिध्यासा, | दाध्याया ; |
| ध्यानम्, | ध्यापनम्, | दिध्यासनम्, | दाध्यायनम् ; |
| [A]ध्यात्वा, | ध्यापयित्वा, | दिध्यासित्वा, | दाध्यायित्वा ; |
| आध्याय, | अभिध्याप्य, | आदिध्यास्य, | आदाध्याय्य ; |
| [B]ध्यायम् २, ध्यात्वा २, | ध्यापम् २, ध्यापयित्वा २, | दिध्यासम् २, दिध्यासित्वा २, | दाध्यायम् २ ; दाध्यायित्वा २. |

---

1. 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वे प्राप्ते 'न ध्याख्यापृ—' (8-2-57) इति तस्य निषेधः।
2. दुष्टं ध्यायतीति दूढ्यः। 'आतोऽनुपसर्गे—' (3-2-3) इति कः। पृषोदरादिषु 'दुरो दाशनाशदभध्येषु—' (वा. 6-3-109) इति वचनात् ढत्वमुत्वं च। 'मां ध्यायतीति मध्यः इत्यत्राप्येवमेव कप्रत्ययः।' इति क्षीरस्वामी। अत्र, अस्मच्छब्दप्रकृतेः 'म' इति कथमादेश इति न ज्ञायते।
3. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति क्वनिपि सम्प्रसारणे रूपम्। स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीब्रेफौ।
4. आध्यायन्त्येनमिति आढ्यः। 'आतश्चोपसर्गे' (3-1-136) इति कप्रत्ययः। पृषोदरादित्वान्मूर्धन्यः।
5. 'अचो यत्' (3-1-97) इति यत्प्रत्यये, 'ईद् यति' (6-4-65) इतीकारे गुणे च रूपम्।
6. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच्।

A. 'प्रस्कन्दिकामिव प्राप्तो ध्यात्वा मूते स्म जाम्बवान्।' भ. का. 7.74.

B. 'ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः।' प्रौढमनोरमा।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



### (926) "ध्रज गतौ" (I-भ्वादिः-219. सक. सेट्. पर.)

'धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि ।' (श्लो. 60) इति देवः ।

| | | | |
|---|---|---|---|
| ध्राजकः-जिका, | ध्राजकः-जिका, | दिध्रजिषकः-षिका, | दाध्रजकः-जिका ; |
| ध्रजिता-त्री, | ध्राजयिता-त्री, | दिध्रजिषिता-त्री, | दाध्रजिता-त्री ; |
| ध्रजन्-न्ती, | ध्राजयन्-न्ती, | दिध्रजिषन्-न्ती ; | — |
| ध्रजिष्यन्-न्ती-ती, | ध्राजयिष्यन्-न्ती-ती, | दिध्रजिषिष्यन्-न्ती-ती ; | — |
| — ध्राजयमानः, | ध्राजयिष्यमाणः, | — दाध्रज्यमानः, | दाध्रजिष्यमाणः ; |
| सुध्रक्-सुध्रग्-सुध्रजौ-सुध्रजः ; | — | — | — |
| ध्रजितम्-तः, | ध्राजितः, | दिध्रजिषितः, | दाध्रजितः-तवान् ; |
| ध्रजः, | ध्राजः, | दिध्रजिषुः, | दाध्रजः ; |
| ध्रजितव्यम्, | ध्राजयितव्यम्, | दिध्रजिषितव्यम्, | दाध्रजितव्यम् ; |
| ध्रजनीयम्, | ध्राजनीयम्, | दिध्रजिषणीयम्, | दाध्रजनीयम् ; |
| ध्राज्यम्, | ध्राज्यम्, | दिध्रजिष्यम्, | दाध्रज्यम् ; |
| ईषद्ध्रजः-दुर्ध्रजः-सुध्रजः ; | | — | — |
| ध्रज्यमानः, | ध्राज्यमानः, | दिध्रजिष्यमाणः, | दाध्रज्यमानः ; |
| ध्राजः, | ध्राजः, | दिध्रजिषः, | दाध्रजः ; |
| ध्रजितुम्, | ध्राजयितुम्, | दिध्रजिषितुम्, | दाध्रजितुम् ; |
| ध्रक्तिः, | ध्राजना, | दिध्रजिषा, | दाध्रजा ; |
| ध्रजनम्, | ध्राजनम्, | दिध्रजिषणम्, | दाध्रजनम् ; |
| ध्रजित्वा, | ध्राजयित्वा, | दिध्रजिषित्वा, | दाध्रजित्वा ; |
| प्रध्रज्य, | प्रध्राज्य, | प्रदिध्रजिष्य, | प्रदाध्रज्य ; |
| ध्राजम् २, ध्रजित्वा २, | ध्राजम् २, ध्राजयित्वा २, | दिध्रजिषम् २, दिध्रजिषित्वा २, | दाध्रजम् २ ; दाध्रजित्वा. |

### (927) "ध्रजि गतौ" (I-भ्वादिः-220. सक. सेट्. पर.)

'धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि ।' (श्लो. 60) इति देवः ।

ध्रञ्जकः-ञ्जिका, ध्रञ्जकः-ञ्जिका, दिध्रञ्जिषकः-षिका, दाध्रञ्जकः-ञ्जिका ;

इत्यादीनि सर्वाणि रूपाणि भौवादिकध्रजतिवत् (926) ज्ञेयानि । [A]ध्रञ्जन्-न्ती।

---

A. 'भजन्ति यां व्युष्टिमतोऽपि भूयसीं ध्रजन्ति यद्ध्रञ्जनमात्रतो जनाः ॥'
धा. का. 1. 29,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(928) "ध्रण शब्दे" (I-भ्वादिः-459. अक. सेट्. पर.)

ध्रणकः-णिका, ध्रणकः-णिका, दिध्रणिषकः-षिका, दंध्रणकः-दन्ध्रणकः-णिका ; इत्यादीनि सर्वाणि रूपाणि भौवादिकक्रणतिवत् (157) ज्ञेयानि । [A]विध्रणन् ।

(929) "उ ध्रस उञ्छे" (IX-क्र्यादिः-1524. अक. सेट्. पर.)

'ध्रस्नाति ध्रासयत्युञ्छे पदे तु श्रि, णिचि ध्रसेः ।' (श्लो 190) इति देवः ।

उकारोऽत्र इत् इति केचित् । अन्ये तु धात्ववयव इति वदन्ति । उत्पूर्वक एवायं धातुरिति क्षीरस्वामिग्रन्थस्थात् पक्षान्तराज्ज्ञायते । चुरादावप्ययं धातुः । तत्राप्युकारो धात्ववयवः, इत् इति पक्षद्वयम् । "यद्युकारो न धात्ववयवः, तदानीम्, 'ध्रसु' इत्येव पठेत् 'क्रसु' इत्यादिवत्" इति देवादीनामाशयः । [1]ध्रस्नन्-ती, इति शतरि रूपम् । सर्वाण्यपीतराणि रूपाणि भौवादिकग्रसुधातुवत् (440) ज्ञेयानि । [B]उध्रसितः । ध्रस्तः ।

(930) "ध्राक्षि घोरवाशिते च" (I-भ्वादिः-671. अक. सेट्. पर.)

चकारात् पूर्वधात्वर्थभूतः 'काङ्क्षायाम्' इत्ययमत्रापि सम्बध्यते । ध्राङ्क्षकः-ध्राङ्क्षिका, ध्राङ्क्षकः-क्षिका, दिध्राङ्क्षिषकः-षिका, दाध्राङ्क्षकः-क्षिका ; इत्यादीनि सर्वाणि रूपाणि भौवादिककाङ्क्षतिवत् (183) ज्ञेयानि । [C]ध्राङ्क्षन् । स्त्रियामङि—[2]ध्राक्षा इति रूपम् ।

---

1. शतरि, 'क्र्यादिभ्यः—' (3-1-81) इति श्नाप्रत्यये, 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे च रूपम् ।
2. यवादिषु (8-2-9) पाठसामर्थ्यात् द्राक्षा इत्यत्रेवात्रापि नुमो लोपः ।

A. 'प्रश्लोणितान् प्रैणनविध्रणत्क्षितीननुत्वणान् धेनुगणान् कनत्स्तनान् ॥' धा. का. 1. 59.

B. 'ध्रस्तं फलप्रकरमुध्रसितांश्च शालीन्
प्रादद्भिरैष्यत गिरा परिविष्टपार्श्वैः ॥' धा. का. 3. 11.
[अत्र ध्रस्तमिति, उदित्पक्षे क्त्वायाम्, 'उदितो वा' (7-2-56) इतीड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति नित्यम् इडभावे रूपम् । इट्पक्षे तु उकारो धात्ववयवं इति पक्षान्तरमवलम्ब्य रूपस्य साधुत्वं ज्ञेयम् । तेन उध्रसितान् इति श्लोकेऽत्रैव प्रयोगः कृत इति ज्ञेयम् ।]

C. 'द्राक्षां जनो वाञ्छति नो फलानि ध्राङ्क्षद् बहुध्वाङ्क्षविचूषितानि ॥' धा. का. 1.85.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(931) "ध्राखृ शोषणालमर्थयोः" (I-भ्वादिः-125. सक. सेट्. पर.)
ध्राखकः-खिका, ध्राखकः-खिका, दिध्राखिषकः-षिका, दाध्राखकः-खिका; इत्यादीनि रूपाणि भौवादिकद्राखतिवत् (879) ज्ञेयानि। [A]ध्राखी।

(932) "ध्राडृ विशरणे" (I-भ्वादिः-288. सक. सेट्. आत्म.)
ध्राडकः-डिका, ध्राडकः-डिका, दिध्राडिषकः-षिका, दाध्राडकः-डिका; इत्यादीनि सर्वाणि रूपाणि भौवादिकद्राखतिवत् (879) ज्ञेयानि। अस्य धातोरात्मनेपदित्वेन शानचि ध्राडमानः इत्यादीनि रूपाण्यूह्यानि। [B]ध्राडितः।

(933) "ध्रु स्थैर्ये" (I-भ्वादिः-943. अक. अनि. पर.) [अ]
'स्थैर्ये ध्रवति, गत्यां तु स्थैर्ये च ध्रुवतीति शे।' (श्लो. 22) इति देवः।
ध्रावकः-विका, ध्रावकः-विका, दुध्रूषकः-षिका, दोध्रूयकः-यिका; इत्यादीनि सर्वाणि रूपाणि भौवादिकद्रवतिवत् (883) ज्ञेयानि। द्रुधातुगतानि विशेषविधानानि तु नात्र भवन्ति। [C]ध्रुवः[1]।

(934) "ध्रु गतिस्थैर्ययोः" (VI-तुदादिः-1400. अक. अनि. पर.)

कुटादिः।

'ध्रुव—' इति केचित् पठन्ति। तेषां मते [2]सेडयं धातुः।
'स्थैर्ये ध्रवति, गत्यां तु स्थैर्ये च ध्रुवतीति शे।' (श्लो. 22) इति देवः।
ध्रावकः-विका, ध्रावकः-विका, दुध्रूषकः-षिका, दोध्रूयकः-यिका; इत्यादीनि सर्वाणि रूपाणि तौदादिकगुवतिवत् (396) ज्ञेयानि। [D]ध्रुवन्-ती।

---

1. 'ध्रुवमपायेऽपादानम्' (1-4-24) इति निर्देशात् बाहुलकात् कर्तरि कप्रत्यये उवङ्।
2. इट्पक्षे ध्रुवितः, ध्रुवितव्यम् इत्यादीनि रूपाणि यथायथमूह्यानि। क्तिनि ध्रूतिः इति भवति। ऊठि रूपमेवम् इति विशेषः।

A. 'अराखितत्वग्भिरलाखितच्छदैः प्रद्राखिताध्राखिफलैश्च शाखिभिः।'
धा. का. 1. 18.

B. 'सुपाकविद्रालिफलालिभिर्द्रुमैः स्निग्धानविध्राडितचारुशालिकान्॥'
धा. का. 1. 38.

C. 'श्रुत्यन्तवाचा ध्रुवया प्रदूनं घोरद्रवच्चक्रजिताशितारिम्।' धा. का. 2. 35.

D. 'नुत्या किं भयधूतविध्रुतगुवल्लोकं तदा तद्ध्रुवत्-
कोदण्डं कुवमानमैक्षि दलितं भोजेश्वराकूतवत्'॥ धा. का. 2. 82.

[अ] 'ध्रुव — इत्येव केचित् पठन्तीति 'ध्रुवमपाये—' (1-4-24) इति सूत्रे पदमक्षरीकारेणोपादानाज्ज्ञायते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(935) "**ध्रेकृ शब्दोत्साहयोः**" (I-भ्वादिः-79. अक. सेट्. आत्म.) उत्साहः=वृद्धिरौद्धत्यं वा । 'शब्दोत्साहे' इति केचित् । शब्दोत्साहः= शब्देन स्वोत्साहस्याविष्करणम् । ध्रेककः-किका, ध्रेककः-किका, दिध्रेकिषकः-षिका, देध्रेककः-किका ; [1]ध्रेकणः । इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-केपतिवत् (261) ज्ञेयानि ।

(936) "**ध्रै तृप्तौ**" (I-भ्वादिः-907. अक. अनि. पर.) ध्रायकः-यिका, ध्रापकः-पिका, दिध्रासकः-सिका, दाध्रायकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककायतिवत् (263) ज्ञेयानि । [A]ध्राणः । "[क्तप्रत्यये] भाष्ये नत्वं नेष्यते ध्रातः ।" इति क्षीरतरङ्गिणी । भाष्ये त्वेतादृशं वचनं नोपलभ्यते ।

(937) "**ध्वज गतौ**" (I-भ्वादिः-221. सक. सेट्. पर.) 'घर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि।' (श्लो. 60) इति देवः । ध्वाजकः-जिका, ध्वाजकः-जिका, दिध्वजिषकः-षिका, दाध्वजकः-जिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकध्रजतिवत् (926) ज्ञेयानि । पचाद्यचि-ध्वजः[B] ।

(938) "**ध्वजि गतौ**" (I-भ्वादिः-222. सक. सेट्. पर.) 'घर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शपि।' (श्लो. 60) इति देवः । ध्वञ्जकः-ञ्जिका, ध्वञ्जकः-ञ्जिका, दिध्वञ्जिषकः-षिका, दाध्वञ्जकः-ञ्जिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकध्रजतिवत् (926) ज्ञेयानि । इदित्वादस्य धातोः नुम् सर्वत्र भवतीति विशेषः । [B]ध्वञ्जितः ।

(939) "**ध्वण शब्दार्थः**" (I-भ्वादिः-453. अक. सेट्. पर.) 'मूर्धन्यान्तो ध्वणिर्लोके नास्ति ।' इति क्षीरस्वामी । 'ध्रण––' इति सम्मताकारपक्षे पाठः । 'धण––' इति सिद्धान्तकौमुदी ।

---

1. 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति तच्छीलादिषु कर्तृषु युच्प्रत्ययः । 'अट्कुपु—' (8. 4. 2) इति णत्वम् ।

A. 'निद्रायदिन्दीवरभाजि मज्जन्ध्राणधीस्तत्र च तं ददर्श ॥' धा. का. 2. 30.

B. 'प्रध्रज्य मोदं स दध्वज तद्वनं ध्वजोद्गतिध्वञ्जितकूजदण्डजम् ।' धा. का. 1. 30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ध्वाणकः-णिका, ध्वाणकः-णिका, दिध्वणिषकः-षिका, दन्ध्वणकः-णिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्कणतिवत् (293) ज्ञेयानि । शतरि–[A]ध्वणन्-न्ती, इति ।

(940) "ध्वन शब्दे" (I-भ्वादिः-816. 828. अक. सेट्. पर.)

घटादिः ।

'ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेत् शपि ॥' (श्लो. 126) इति देवः ।

ध्वानकः-निका,[1]ध्वनकः-ध्वानकः-निका, दिध्वनिषकः-षिका, [2]दन्ध्वनकः-दंध्वनकः-निका ;

ध्वनिता-त्री, ध्वनयिता-ध्वानयिता-त्री, दिध्वनिषिता-त्री, दन्ध्वनिता-दंध्वनिता-त्री ;

ध्वनन्-न्ती, [B]ध्वनयन्-ध्वानयन्-न्ती, दिध्वनिषन्-न्ती ; —

ध्वनिष्यन्-न्ती-ती, ध्वनयिष्यन्-ध्वानयिष्यन्-न्ती-ती, दिध्वनिषिष्यन्-न्ती-ती ;

[3]व्यतिध्वनमानः, [4]ध्वनयमानः-ध्वानयमानः, – दन्ध्वन्यमानः, दंध्वन्यमानः ;

व्यतिध्वनिष्यमाणः, ध्वानयिष्यमाणः, — दन्ध्वनिष्यमाणः-दंध्वनिष्यमाणः ;

[5]सुध्वान्-सुध्वानौ-सुध्वानः ; — — —

---

1. शब्दार्थकस्यास्य धातोः घटादिषु पाठान्निमित्त्वेन णौ, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः । व्यक्तध्वनिः, अव्यक्तध्वनिः इति द्विविधः शब्दः । व्यक्तध्वनिविषये घटादिरयम् । **'ध्वनयति घण्टाम्'** स्पष्टं वादयतीत्यर्थः । **'ध्वानयति** देवदत्तः' । अस्पष्टाक्षरमुच्चारयतीत्यर्थः ।

2. यङन्ताण्वुलि, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इत्यभ्यासस्य नुगागमः । 'स च पदान्तवद्वाच्यः' (वा. 7-4-85) इति वचनात् परसवर्णविकल्पे **दंध्वनकः** इत्यादीनि रूपाणि ण्वुलादिषु यथार्थं भवन्ति ।

3. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् ।

4. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेव । यदा तु अचित्तवत्कर्तृकत्वविवक्षा, तदानीं निर्दिष्टप्रकारेण शानजपि भवतीति विशेषः ।

5. क्विपि, 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घः ।

A. '**ध्वणच्छि**शून् घाणसमोणिताशुभान् शोणान् पृथुश्रोणिजनो दुदोह च ।' धा. का. 1. 59.

B. 'दृश्येत वेणुं **ध्वनयन्** कदा वा स नन्दसूनुः स्वनयन् कलापम् ॥' धा. का. 2. 13.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ध्वनितम्-तः-तवान्, [1]ध्वान्तः,[A] ध्वनितः-ध्वानितः, दिध्वनिषितः-
दन्ध्वनितः-दंध्वनितः-तवान्;

ध्वनः, [2]ध्वननः, ध्वनः-ध्वानः, दिध्वनिषुः, दन्ध्वनः-दंध्वनः; [दंध्वनितव्यम्;

ध्वनितव्यम्, ध्वनयितव्यम्-ध्वानयितव्यम्, दिध्वनिषितव्यम्, दन्ध्वनितव्यम्-

ध्वननीयम्, ध्वननीयम्-ध्वाननीयम्, दिध्वनिषणीयम्, दन्ध्वननीयम्-
दंध्वननीयम्;

ध्वान्यम्, ध्वन्यम्-ध्वान्यम्, दिध्वनिष्यम्, दन्ध्वन्यम्-दंध्वन्यम्;

ईषद्ध्वनः-दुर्ध्वनः-सुध्वनः; — — —

ध्वन्यमानः, ध्वन्यमानः-ध्वान्यमानः, दिध्वनिष्यमाणः, दन्ध्वन्यमानः-
दंध्वन्यमानः;

ध्वानः, ध्वनः-ध्वानः, दिध्वनिषः, दन्ध्वनः-दंध्वनः;

ध्वनितुम्, ध्वनयितुम्-ध्वानयितुम्, दिध्वनिषितुम्, दन्ध्वनितुम्-दंध्वनितुम्;

[3]ध्वान्तिः, ध्वनना-ध्वानना, दिध्वनिषा, दन्ध्वना-दंध्वना;

ध्वननम्, ध्वननम्-ध्वाननम्, दिध्वनिषणम्, दंन्ध्वननम्-दंध्वननम्;

ध्वनित्वा, ध्वनयित्वा-ध्वानयित्वा, दिध्वनिषित्वा, दन्ध्वनित्वा-दंध्वनित्वा;

प्रध्वन्य, [4]प्रध्वनय्य-प्रध्वान्य, प्रदिध्वनिष्य, प्रदन्ध्वन्य-प्रदंध्वन्य;

ध्वानम् २, ध्वनित्वा २, } [5]ध्वनम् २-ध्वानम् २-ध्वानम् २, ध्वनयित्वा २, ध्वानयित्वा २, } दिध्वनिषम् २, दिध्वनिषित्वा २, }
दन्ध्वनम् २-दंध्वनम् २; दन्ध्वनित्वा २ दंध्वनित्वा २; }

[6]ध्वनिः.

---

1. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्ट-स्वरानायासभृशेषु' (7-2-18) इत्यनेन तमसि वाच्ये **ध्वान्तम्** इति भवति। '**ध्वनितो** मृदङ्गः' इत्यत्र तु न, तमोऽर्थकत्वाभावात्।
2. 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति तच्छीलादिषु कर्तृषु युच्-प्रत्ययः।
3. क्तिनि, 'तितुत्रतथ—' (7-2-9) इत्यादिना इण्निषेधे, दीर्घे च रूपम्।
4. मित्त्वपक्षे ण्यन्ताल्ल्यपि ह्रस्वे, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
5. मित्त्वपक्षे, ण्यन्ताण्णमुलि, 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति दीर्घविकल्पः।
6. 'खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च' (द. उ. 1.68) इत्यादिना इप्रत्यये रूपम्।

A. 'संज्वारिणेव मनसा ध्वान्तमायासिना मया।' भ. का. 7, 6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



**(941) "ध्वन शब्दे"** (X-चुरादिः-1890. अक. सेट्. उभ. अदन्तः।)

'ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेत् शपि॥' (श्लो. 126) इति देवः। ध्वनकः-निका, दिध्वनयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकक्रुपयतिवत् (251) ज्ञेयानि।

## (942) "ध्वन्सु अवस्रंसने गतौ च"

(I-भ्वादिः 755. सक. सेट्. आत्म.)

| | | | |
|---|---|---|---|
| ध्वंसकः-सिका, | ध्वंसकः-सिका, | दिध्वंसिषकः-षिका, | [1]दनीध्वसकः-सिका; |
| ध्वंसिता-त्री, | ध्वंसयिता-त्री, | दिध्वंसिषिता-त्री, | दनीध्वसिता-त्री; |
| — | ध्वंसयन्-न्ती, | ध्वंसयिष्यन्-न्ती-ती; | — |
| ध्वंसमानः, | ध्वंसयमानः, | दिध्वंसिषमाणः, | दनीध्वस्यमानः; |
| ध्वंसिष्यमाणः, | ध्वंसयिष्यमाणः, | दिध्वंसिषिष्यमाणः, | दनीध्वसिष्यमाणः; |
| [2]पर्णध्वत्-पापध्वत्-पापध्वसौ-पापध्वसः; | — | — | — |
| [3]ध्वस्तम्-[A]ध्वस्तः-ध्वस्तवान्, | [B]ध्वंसितः, | दिध्वंसिषितः, | दनीध्वसितः; |
| ध्वंसः, | ध्वंसः, | दिध्वंसिषुः, | दनीध्वंसः; |
| ध्वंसितव्यम्, | ध्वंसयितव्यम्, | दिध्वंसिषितव्यम्, | दनीध्वसितव्यम्; |
| ध्वंसनीयम्, | ध्वंसनीयम्, | दिध्वंसिषणीयम्, | दनीध्वसनीयम्; |
| ध्वंस्यम्, | ध्वंस्यम्, | दिध्वंसिष्यम्, | दनीध्वस्यम्; |
| ईषद्ध्वंसः-दुर्ध्वंसः-सुध्वंसः; | | — | — |
| ध्वस्यमानः, | ध्वंस्यमानः, | दिध्वंसिष्यमाणः, | दनीध्वस्यमानः; |
| ध्वंसः, | ध्वंसः, | दिध्वंसिषः, | दनीध्वसः; |
| ध्वंसितुम्, | ध्वंसयितुम्, | दिध्वंसिषितुम्, | दनीध्वसितुम्; |

1. यङन्ते सर्वत्र, 'नीग्वञ्चुस्रंसुध्वंसु—' (7-4-84) इत्यादिना अभ्यासस्य नीगागमः। उपधानकारस्य यङ्निमित्तको लोपः।
2. क्विपि पदान्तनिमित्तकः, 'वसुस्रंसुध्वंस्वनडुहां दः' (8-2-72) इति सकारस्य दकारः। चर्त्वम्।
3. क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। उपधानकारलोपः।

A. 'ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा॥' भ. का. 5. 27.
B. 'स्निग्धाञ्जनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकान्तेः।' शि. पा. 3. 63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]ध्वस्तिः, ध्वंसना, दिध्वंसिषा, दनीध्वसा ;
ध्वंसनम्, ध्वंसनम्, दिध्वंसिषणम्, दनीध्वसनम् ;
[2]ध्वंसित्वा-ध्वस्त्वा, ध्वंसयित्वा, दिध्वंसिषित्वा, दनीध्वसित्वा ;
प्रध्वस्य, प्रध्वंस्य, प्रदिध्वंसिष्य, प्रदनीध्वस्य ;
ध्वंसम् २, ध्वंसित्वा २, ध्वस्त्वा २, } ध्वंसम् २, ध्वंसयित्वा २, } दिध्वंसिषम् २, दिध्वंसिषित्वा २, } दनीध्वसम् २ ; दनीध्वसित्वा २. }

(943) " **ध्वाक्षि घोरवाशिते च** " (I-भ्वादिः-672. अक. सेट्. पर.)

चकारात् '**काङ्क्षायाम्**' इति पूर्वधातुगतोऽर्थनिर्देशोऽत्रापि सम्बध्यते।
ध्वाङ्क्षकः-क्षिका, ध्वाङ्क्षकः-क्षिका, दिध्वाङ्क्षिषकः-षिका, दाध्वांक्षकः-क्षिका ; इत्यादीनि सर्वाण्यपि रूपाणि **काङ्क्षतिवत् (183)** ज्ञेयानि। अचि [A]ध्वाङ्क्षः इति।

(944) " **ध्वृ हूर्च्छने** " (I-भ्वादिः-939. सक. अनि. पर.)

"**हूर्च्छनम्**=कौटिल्यम्। 'भ्रातृव्यमेव **तदपध्वरति**।' इत्यादौ हिंसायामपि दृश्यते।" इति **मा. धा. वृत्तिः**।
ध्वारकः-रिका, ध्वारकः-रिका, [3]दुध्वूर्षकः-र्षिका, [4]दाध्वरकः-रिका ;
ध्वर्ता-ध्वर्त्री, ध्वारयिता-त्री, दुध्वूर्षिता-त्री, दाध्वरिता-त्री ;
ध्वरन्-न्ती, ध्वारयन्-न्ती, दुध्वूर्षन्-न्ती ; —
[5]ध्वरिष्यन्-न्ती-ती, ध्वारयिष्यन्-न्ती-ती, दुध्वूर्षिष्यन्-न्ती-ती ; —

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययं बाधित्वा, 'क्तिन् आबादिभ्यो निष्ठाया-मनिड्भ्यः' (वा. 3-3-94) इति क्तिन्।
2. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् उपधानकारलोपो न।
3. सनि, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्त्वे, रपरत्वे, 'हलि च' (8-2-77) इति दीर्घः।
4. संयोगादित्वात्, 'यङि च' (7-4-30) इति गुणः। अभ्यासकार्यम्। 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घः।
5. स्यप्रत्यये, 'ऋद्धनोः स्ये' (7-2-70) इतीडागमः।

A. 'द्राक्षां जनो वाञ्छति नो फलानि ध्राङ्क्षद्बहुध्वाङ्क्षविचूषितानि॥'
धा. का. 1. 85.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| — | ध्वारयमाणः, ध्वारयिष्यमाणः, | — | दाध्वर्यमाणः, दाध्वरिष्यमाणः; |
| [1]प्रध्वृत्-प्रध्वृद्-प्रध्वृतौ-प्रध्वृतः; | | — | — |
| ध्वृतम्-[A]विध्वृतः, | ध्वारितः, | दुध्वूर्षितः, | दाध्वरितः-तवान्; |
| [2]ध्वरः, [3]दध्वरिवान्, | ध्वारः, | दुध्वूर्षुः, | दाध्वरः; |
| ध्वर्तव्यम्, | ध्वारयितव्यम्, | दुध्वूर्षितव्यम्, | दाध्वरितव्यम्; |
| ध्वरणीयम्, | ध्वारणीयम्, | दुध्वूर्षणीयम्, | दाध्वरणीयम्; |
| ध्वार्यम्, [4]ध्वर्यः, | ध्वार्यम्, | दुध्वूर्ष्यम्, | दाध्वर्यम्; |
| ईषद्ध्वरः-दुर्ध्वरः-सुध्वरः; | | — | — |
| [5]ध्वर्यमाणः, | ध्वार्यमाणः, | दुध्वूर्ष्यमाणः, | दाध्वर्यमाणः; |
| ध्वारः, | ध्वारः, | दुध्वूर्षः, | दाध्वरः; |
| ध्वर्तुम्, | ध्वारयितुम्, | दुध्वूर्षितुम्, | दाध्वरितुम्; |
| ध्वृतिः, | ध्वारणा, | दुध्वूर्षा, | दाध्वरा; |
| ध्वरणम्, | ध्वारणम्, | दुध्वूर्षणम्, | दाध्वरणम्; |
| ध्वृत्वा, | ध्वारयित्वा, | दुध्वूर्षित्वा, | दाध्वरित्वा; |
| प्रध्वृत्य, | प्रध्वार्य, | प्रदुध्वूर्ष्य, | प्रदाध्वर्य; |
| ध्वारम् २, ध्वृत्वा २, | ध्वारम् २, ध्वारयित्वा २, | दुध्वूर्षम् २, दुध्वूर्षित्वा २, | दाध्वरम् २; दाध्वरित्वा २. |

## (945) "नक्क नाशने" (X-चुरादिः-1593. सक. सेट्. उभ.)

'णक्क—' इति णोपदेशममुं धातुं क्षीरस्वामी पपाठ। णोपदेशधातुषु अस्य पर्युदासात् णोपदेशकार्यं नेति ज्ञेयम्।

नक्ककः-क्किका, निनक्कयिषकः-षिका, [6]प्रनक्कयिता-त्री, इत्यादीनि सर्वाण्यपि

1. क्विपि, तुगागमः। एवं ल्यप्यपि ज्ञेयम्।
2. पचाद्यचि रूपमेवम्। न ध्वरः = हिंसा कौटिल्यं वा यत्रेति अध्वरः = यज्ञः।
3. क्वसुप्रत्यये, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपमेवम्।
4. 'छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्य—' (3-1-123) इति निपातनात् यत्प्रत्यये रूपम्। छन्दस्येवायम्।
5. 'गुणोऽर्तिसंयोगाद्योः' (7-4-29) इति यकि गुणः।
6. नकारादित्वात्, णोपदेशाभावादस्य धातोः 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति विहितं णत्वं न।

A. 'घृणाऽस्तु ते विध्वृतशूरदैत्यसुत स्वसिक्तायुधविश्वसोतः॥' धा. का. 2. 34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रूपाणि चौरादिककुट्टयतिवत् (207) ज्ञेयानि। दोपधोऽयं धातुः। दकारस्य सन्धिवशात् ककारः। दोपधफलं तु नद्-नत्-नक्षौ-नक्ः, इति क्विपि द्रष्टव्यम्।

(946) "नट अवस्यन्दने" (X-चुरादिः-1545. अक. सेट्. उभ.)

अयं धातुः पूर्वम् (658 संख्याकधातौ) प्रसङ्गाल्लिखितः। तत्रैव द्रष्टव्यश्च।

(947) "नट भाषार्थः" (X-चुरादिः-1792. अक. सेट्. उभ.)

आस्वदीयः। 'नल —' इति, 'नड—' इति च केचित्।
'नृतौ नटत्यवस्पन्दे चुरादेर्णिचि नाटयेत्।' (श्लो. 76) इति देवः।
नाटकः-टिका, निनाटयिषकः-षिका; इत्यादीनि रूपाणि चौरादिक-नाटयतिवत् (659) ज्ञेयानि।

(948) "टु नदि समृद्धौ" (I-भ्वादिः-67. अक. सेट्. पर.)

नन्दकः-न्दिका, नन्दकः-न्दिका, निनन्दिषकः-षिका, नानन्दकः-न्दिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि। [1]नन्दः,[A] [2]नन्दनः, [3]नन्दकः,[B] [4]रघुनन्दनः,[C] [5]हरिनन्दी, परिनन्दनम्, [6]नन्दथुः,[D] [7]नन्दयित्नुः,

---

1. पचाद्यचि (3-1-134) रूपमेवम्। नन्दतीति नन्दः। नन्द एव नान्दः प्रज्ञादित्वात् (5-4-38) स्वार्थेऽण्। अणन्तात् ङीपि नान्दी=मङ्गलध्वनिः।
2. ण्यन्तात् नन्दयतीति नन्दनः। 'नन्दिग्रहि—' (3-1-134) इति कर्तरि ल्युप्रत्ययः। कर्मण्यणोऽपवादः।
3. नन्दतात् इति नन्दकः। 'आशिषि च' (3-1-150) इति वुन्। 'आशिषि च' (वा. 7-3-45) इति निषेधात् स्त्रियाम् इत्वं न, तेन नन्दका इत्येव।
4. रघूणां नन्दयिता रघुनन्दनः। क्षुभ्नादित्वात् (8-4-39) णत्वं न।
5. हरिं नन्दतीति हरिनन्दी, 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः। अत्र, परिनन्दनम् इत्यत्र च क्षुभ्नादित्वादेव (8-4-39) णत्वं न।
6. 'ट्वितोऽथुच्' (3-3-89) इति भावादावथुच्प्रत्ययः।
7. औणादिकः [द. उ. 1-140] इत्नुच्प्रत्ययो ण्यन्तात् भवति। नन्दयतीति नन्दयित्नुः आनन्दः, प्रमुदितश्च। 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः।

A. 'मनोज्ञगण्डं तमनिन्दिताननं नन्दात्मजं शारदचन्द्रशीतलम्।' धा. का. 1. 10
B 'अत्यर्थमुद्वेजयिता परेषां नाम्नाऽपि तस्यैव स नन्दकोऽभूत्॥' शि. पा. 3. 19
C. 'तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरास्थत्॥' भ. का. 2. 36.
D. 'सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः।' भ. का. 5. 20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]ननान्दा, [2]नन्दयन्तः इत्यादीन्यस्य धातोरधिकतया विशेषरूपाणि सम्भवन्तीति ज्ञेयम् ।

(949) "नर्द शब्दे" (I-भ्वादिः-56. अक. सेट्. पर.)

नर्दकः-र्दिका, नर्दकः-र्दिका, निनर्दिषकः षिका, नानर्दकः-र्दिका ;

इत्यादीनि रूपाणि भौवादिककर्जतिवत् (169) ज्ञेयानि । [3]गेहेनर्दी, [4]सिंहनर्दी,[A] विनर्दन्[B] ।

(950) "नाथृ याच्ञोपतापैश्वर्याशीःषु"

(I-भ्वादिः-6. सक. सेट्. आत्म.)

उपतापः=ज्वरप्रयुक्ता पीडा । ऐश्वर्यम्=सम्पत्तिः । आशीः= आशासनम् । आशीरर्थ एव आत्मनेपदम् । अन्येष्वर्थेषु परस्मैपदमेव । द्विकर्मकोऽयं याच्ञार्थे ।

[C]नाथकः-थिका, नाथकः-थिका, निनाथिषकः-षिका, नानाथकः थिका ;
नाथिता-त्री, नाथयिता-त्री, निनाथिषिता-त्री, नानाथिता-त्री ;
[5]नाथन्-न्ती, नाथयन्-न्ती, निनाथिषन्-न्ती ; —
नाथिष्यन्-न्ती-ती, नाथयिष्यन्-न्ती-ती, निनाथिषिष्यन्-न्ती-ती ; —
[6][सर्पिषो]नाथमानः, नाथयमानः, निनाथिषमाणः, नानाथ्यमानः ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगाधतिवत् (391) ज्ञेयानि ।

---

1. 'नञि च नन्देः' [द. उ. 2. 6.] इति ऋन्प्रत्ययः वृद्धिश्च । न नन्दतीति **ननान्दा**=पत्युर्भगिनी ।
2. 'तॄभूवहि—' [द. उ. 6. 19] इत्यादिना आशिषि झच्प्रत्ययः षिच्च । नन्द्यात् इत्याशीरर्थे **नन्दयन्तः** इति रूपम् आनन्द इत्यर्थः ।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति ताच्छील्ये णिनिः । 'पात्रेसमितादयश्च' (2-1-48) इत्यत्र निपातनात् क्षेपार्थे तत्पुरुषसमासः सप्तम्या अलुक् च ।
4. 'कर्तर्युपमाने' (3-2-79) इति उपमानवाचकोपपदात् णिनिप्रत्ययः ।
5. याच्ञाभिन्नार्थे 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति परस्मैपदं, शता ।
6. 'आशिषि नाथः' (वा. 1-3-21) इत्यात्मनेपदम्, 'आशिषि नाथः' (2-3-55) इति कर्मणि षष्ठी ।

A. 'शूरम्मन्यो रणाच्चाहं निरस्तः **सिंहनर्दिना** ॥' भ. का. 5. 34.
B. 'कष्टं **विनर्दतः** क्रूरान् शस्त्रघुष्टकरान् कपिः ॥' भ. का. 9. 18.
C. 'द्रक्ष्यन् हरिं नाथितलोक**नाथकं** देधे मुदास्कुन्दितमन्तरिन्द्रियम् ॥' धा. का. 1.2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (951) " नाधृ याच्ञोपतापैश्वर्याशीःषु "

(I-भ्वादिः-7-अक. सेट्. आत्म.)

नाधकः-धिका, नाधकः-धिका, निनाधिषकः-षिका, नानाधकः-धिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगाधतिवत् (394) ज्ञेयानि। [A]नाधितः।

## (952) " निवास आच्छादने "

(X-चुरादिः-1886. सक. सेट्. उभ.) अदन्तः। [अ]

निवासकः-सिका, निनिवासयिषकः-षिका; निवासयिता-त्री, निनिवासयिषिता-त्री; निवासयन्-न्ती, निनिवासयिषन्-न्ती; निवासयिष्यन्-न्ती-ती, निनिवासयिषिष्यन्-न्ती-ती; निवासयमानः, निनिवासयिषमाणः; निवासयिष्यमाणः, निनिवासयिषिष्यमाणः; [1]सुनिवास्-सुनिवासौ-सुनिवासः; — —

[B]निवासितम्-तः, निनिवासयिषितः-तवान्; निवासः, निनिवासयिषुः; निवासयितव्यम्, निनिवासयिषितव्यम्; निवासनीयम्, निनिवासयिषणीयम्; निवास्यम्, निनिवासयिष्यम्; निवासयमानः, निनिवासयिषमाणः; ईषन्निवासः-दुर्निवासः-सुनिवासः; — —

निवासः, निनिवासयिषः; निवासयितुम्, निनिवासयिषितुम्; निवासना, निनिवासयिषा; निवासनम्, निनिवासयिषणम्; निवासयित्वा, निनिवासयिषित्वा; प्रणिवास्य, प्रणिनिवासयिष्य;

---

1. क्विपि, अदन्तत्वादस्य धातोरल्लोपस्य स्थानिवद्भावात् सकारस्य रुत्वविसर्गौ न भवतः।

A. 'द्रक्ष्यन् हरिं **नाधित**लोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम्॥' धा. का. 1.2.

B. 'छिद्रं गवेषयितुमेव तु वासयन्ते ये ते **निवासित**धियो ह्यसुभिर्विभाज्याः॥' धा. का. 3. 56.

[अ] अत्र धातौ '**नि**' इत्युपसर्गविशिष्टस्यैव धातुत्वम्, इति **क्षीरस्वामि**मतम्। 'पूर्वं धातुरुपसर्गेण युज्यते' इति **भाष्य**मतेनैवमुक्तम्। तन्मते **निवासयित्वा** इत्यत्र क्त्वाप्रत्ययस्योपपत्तिश्चिन्त्या। वस्तुतस्तु '**सङ्ग्राम, व्यय, वीर**' इत्यादिषु '**सम्, वि**' इत्युपसर्गयोरिव अत्रापि '**नि**' इत्युपसर्गविशिष्टस्यैव धातुत्वम्। अत्र प्रकृतिप्रत्ययोपसर्गादिविभागरहितः '**निवास**' इत्यानुपूर्वीक एव धातुरिति तत्त्वम्। अन्यथा, 'पूर्वं धातुः साधनेन युज्यते' इति 'सुट् कात् पूर्वः' (6-1-135) इति **सूत्रभाष्ये** सिद्धान्तितस्य विरोधस्स्यात्। अत एवाडागमयोग्येषु लकारेष्वपि **अनिवासयिष्यत्** इत्याद्येव रूपम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



निवासम् २, निवासयित्वा २, } निनिवासयिषम् २ ; निनिवासयिषित्वा २. }

(953) " निष्क परिमाणे " (X-चुरादिः-1687. सक. सेट्. आत्म.)

आकुस्मीयः ।

निष्ककः-ष्किका, निनिष्कयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचित्रयतिवत् (525) ज्ञेयानि । [A]निष्कितम् ।

(954) " नृती गात्रविक्षेपे " (IV-दिवादिः-1116. अक. सेट्. पर.)

नर्तकः-र्तिका, नर्तकः-र्तिका, निनृत्सकः-निनर्तिषकः-षिका, [1]नरीनृतकः-तिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककृन्ततिवत् (248) ज्ञेयानि । [2]नृत्यन्-न्ती, [B]नर्त्स्यन्-न्ती-ती, [3]नर्तकः-[C]नर्तकी, [4]नर्तयमानः,[D] [5]नर्तनः, [6]नृतूः ।

(955) " नॄ नये " (IX-क्र्यादिः-1495. अक. सेट्. पर.)

प्वादिः. ल्वादिः, घटादिश्च ।

नारकः-रिका, नरकः-रिका, निनरिषकः-निनरीषकः-निनीर्षकः-षिका,

---

1. क्षुभ्नादिषु (8-4-39) 'नृत्यतेर्यङि' (ग. सू.) इति पाठात् णत्वनिषेधः ।
2. शतरि, 'दिवादिभ्यः' (3-1-69) इति श्यन्प्रत्यये रूपम् ।
3. 'शिल्पिनि ष्वुन्' (3-1-145) इत्यत्र 'नृतिखनिरञ्जिभ्य एव' (वा. 3-1-145) इति परिगणनादस्मात् ष्वुन्प्रत्यये रूपम् । षित्त्वात् स्त्रियां ङीप् ।
4. अस्य धातोः चलनार्थत्वात्, अणावकर्मकत्वाच्च, ण्यन्तात् क्रमेण 'निगरणचलनार्थेभ्यः—' (1-3-87) इति, 'अणावकर्मकाच्चित्तवत्कर्तृकात्' (1-3-88) इति च यत् परस्मैपदं कर्त्रभिप्राये क्रियाफले प्राप्तम्, तत् 'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः' (1-3-89) इति निषिध्यते । तेन शता न भवति । परगामिनि क्रियाफले तु 'णिचश्च' (1-3-74) इति, 'शेषात् कर्तरि—' (1-3-78) इति च उभयपदं भवत्येव । तेन नर्तयन् इत्यपि साधुः ।
5. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति तच्छीलादिषु कर्तृषु युच् भवति ।
6. 'नृतिशृध्योः कूः' [द. उ. 1-174] इति कूप्रत्यये रूपम् । नृतूः=दीर्घाकृतिः, नर्तकः, क्रिमिविशेषो वा ।

A. 'क्लिश्येत निष्कपमनिष्कितकान्तिरेष बालोऽमुना नृपतिलालनयाऽद्य कष्टम् ॥' धा. का. 3. 34.
B. 'वनं चचार कर्तिष्यन् नर्त्स्यन् इव निरङ्कुशः ॥' भ. का. 9. 42.
C. 'नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जयत् ॥' रघु. 19. 14.
D. 'अवाद् वायुः शनैर्यस्यां लतां नर्तयमानवत् ।' भ. का. 8. 61.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



नैनिरकः-रिका ; इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिकदृणातिवत् (868) ज्ञेयानि । पचाद्यचि—नरः-[1]नारी । [2]विश्वानरः ।

(956) "पक्ष परिग्रहे" (X-चुरादिः-1550. सक. सेट्. उभ.)

पक्षकः-क्षिका, पिपक्षयिषकः-षिका ; पक्षयिता-त्री ; पिपक्षयिषिता-त्री ; पक्षयन्-न्ती, पिपक्षयिषन्-न्ती ; पक्षयिष्यन्-न्ती-ती, पिपक्षयिषिष्यन्-न्ती-ती; पक्षयमाणः, पिपक्षयिषिष्यमाणः ; पक्षयिष्यमाणः, पिपक्षयिषिष्यमाणः, [3]सुपक्-सुपक्षौ-सुपक्षः ; पक्षितम्-तः, पिपक्षयिषितः-तवान् ; पक्षः, पिपक्षयिषुः; पक्षयितव्यम्, पिपक्षयिषितव्यम् ; पक्षणीयम्, पिपक्षयिषणीयम् ; पक्ष्यम्, पिपक्षयिष्यम्; ईषत्पक्षः-दुष्पक्षः-सुपक्षः ; पक्ष्यमाणः, पिपक्षयिष्यमाणः ; पक्षः, पिपक्षयिषः ; पक्षयितुम् ; पिपक्षयिषितुम् ; पक्षणा, पिपक्षयिषा ; पक्षणम्, पिपक्षयिषणम्; पक्षयित्वा, पिपक्षयिषित्वा ; [A]संपक्ष्य, प्रपिपक्षयिष्य ; पक्षम् २-पक्षयित्वा २ ; पिपक्षयिषम् २-पिपक्षयिषित्वा २.

(957) "डु पचष् पाके" (I-भ्वादिः-996. सक. अनि. उभ.)

पाचकः-चिका, पाचकः-चिका, [4]पिपक्षकः-क्षिका, [5]पापचकः-चिका ; [6]पक्ता-त्री, पाचयिता-त्री, पिपक्षिता-त्री, पापचिता-त्री ; पचन्-न्ती, पाचयन्-न्ती, पिपक्षन्-न्ती ; — [7]प्रणिपक्ष्यन्-प्रनिपक्ष्यन्-[व्रजति]-न्ती-ती, पाचयिष्यन्-न्ती-ती, पिपक्षिष्यन्-न्ती-ती ;

---

1. स्त्रियाम्, 'नृनरयोर्वृद्धिश्च' (ग. सू. 4-1-73) इति ङीन् वृद्धिश्च ।
2. 'नरे संज्ञायाम्' (6-3-129) इति पूर्वपदभूतस्य विश्वशब्दस्य दीर्घः ।
3. ण्यन्तेऽत्र क्विपि संयोगान्तलोप एव । न तु संयोगादिलोपः । तेन रूपमेवम् ।
4. सन्नन्ताण्वुलि, 'चोः कुः' (8-2-30) इति कुत्वे, षत्वे च रूपम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
5. यङन्ते सर्वत्र, 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासदीर्घः ।
6. तृजादिषु सर्वत्र 'चोः कुः' (8-2-30) इति कुत्वं ज्ञेयम् ।
7. 'लृट् शेषे च' (3-3-13) इति लृडत्र भविष्यति काले; 'पक्ष्यामीति व्रजति' इत्यर्थः । 'शेषे विभाषा—' (8-4-18) इति नेर्णत्वविकल्पः ।

A. 'संपक्ष्य तन्निजदृशैवमवर्णि लोकैरेषोऽजनिष्ट किल दुष्टविचूर्णनार्थम् ।' धा. का. 3. 15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पचमानः, पाचयमानः, पिपक्षमाणः, पापच्यमानः ;
पक्ष्यमाणः, पाचयिष्यमाणः, पिपक्षिष्यमाणः, पापचिष्यमाणः ;
[1]ओदनपक्-पचौ-पचः ; — —
[2]पक्रम्-पक्तः-पक्तवान् , [3]प्रपक्तानि [फलानि], पाचितः, पिपक्षितः,
पापचितः-तवान् ;
[4]पचः, [5]श्वपचः, [6]दूरेपाकः-अक्षेपाकः, फलेपाकः-क्षणेपाकः-का, [7]दूरेपाकुः-फलेपाकुः, [8]पचनः, [9]श्वपाकः-मांसपाकः ओदनपाचः, कपोतपाकः, पिण्डपाकः, मूलपाकः-उलूकपाकः, [10]प्रस्थंपचः-[A]खारिम्पचः-द्रोणंपचः, [11]मितम्पचः[B]-[C]नखम्पचः, [12]अल्पम्पचः,[D]

---

1. ओदनं पचतीति **ओदनपक्** । 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप्। 'अनुनासिकस्य क्विझलोः —' (6-4-16) इत्यत्र **काशिकायामु**दाहृतमेवम् ।
2. '**पचो** वः' (8-2-52) इति निष्ठातकारस्य वकारः । वकारस्यासिद्धत्वात् झल्परत्वम् । तेन, 'चोः कुः' (8-2-30) इति कुत्वं भवतीति ज्ञेयम् ।
3. '**प्रपक्वानि**' इत्यत्र 'कुमति च' (8-4-13) इति प्राप्तं णत्वम्, 'युवादीनां प्रतिषेधः' (वा. 8-4-11) इत्यनेन न भवति।
4. 'नन्दिग्रहि**पचादिभ्यः**—' (3-1-134) इति, अच्प्रत्ययः ।
5. **पचादिषु** (3-1-134) पाठादत्र कर्मण्यणं वाधित्वा कर्तरि, अच्प्रत्ययः ।
6. अत्र सर्वत्र, **पचादिषु** पाठादचि, वृद्धौ, तथा न्यङ्क्वादिषु (7-3-53) पाठात् कुत्वे च रूपम् ।
7. न्यङ्क्वादिषु (7-3-53 पाठात् कुत्वम् , **पचादि**ष्वेव पाठादुप्रत्ययश्च ।
8. नन्द्यादिषु (3-1-134) पाठात् कर्तरि ल्युप्रत्ययः इति **केचित्** ।
9. 'अणपीष्यते' इति **क्षीरतरङ्गिण्या**मुक्तम् । तदानीमत्र कुत्वं न्यङ्क्वादित्वात् ज्ञेयम् । वस्तुतस्तु 'कर्मण्यण्' (3-2-1) इत्यत्र **भाष्ये 'ओदनपाचः'** इति प्रयुक्तत्वात् अण्विषये कुत्वं नेति ज्ञायते ।
10. 'परिमाणे **पचः**' (3-2-33) इति खश्प्रत्यये मुमि च रूपमेवम् । एवं परिमाणवाचकेषु सर्वेष्वपि उपपदेषु खश् ज्ञेयः ।
11. 'मितनखे च' (3-2-34) इति खशि मुमागमः ।
12. 'मितनखे च' '(3-2-34) इत्यत्र मितशब्देन मितपर्यायाणामपि ग्रहणमिति मते '**अल्पम्पचः**' इत्यत्र खशि मुमागमो ज्ञेयः ।

A. '**खारिम्पचा**मत्र **विपक्व**मन्नं विष्वण्य सुष्वाप स रक्षिवर्गः ॥' वा. वि. 3. 4.
B. '**अमितम्पच**मीशानं सर्वभोगीणमुत्तमम् ।' भ. का. 6. 97
C. '**नखम्पचो**ष्णं नलिनेक्षणानामुरोजमेवातितरामुपास्ते ॥' च. भारते. 4. 56.
D. 'ऐव विद्वन् पितुः कामात् पान्तावल्पंपचान् मुनीन् ॥' भ. का. 6. 97.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]उत्पचिष्णुः, [2]पचेलिमाः[A] [शालयः],
[3]किम्पचानः, [4]पेचिवान्, पाचः, पिपक्षुः, पापचः ;
पक्तव्यम्, पाचयितव्यम्, पिपक्षितव्यम्, पापचितव्यम् ;
पचनीयम्, पाचनीयम्, पिपक्षणीयम्, पापचनीयम् ;
[5]पाक्यम्[B], [6]कृष्टपच्यम्,[C] कृष्टपाक्यम्, [7]अवश्यपाक्यम्,
पाच्यम्, पिपक्ष्यम्, पापच्यम् ;
ईषत्पचः-दुष्पचः-सुपचः ; — ——
पच्यमानः, पाच्यमानः, पिपक्ष्यमाणः, पापच्यमानः ;
[8]पाकः, [9]मांसपाकः-मांस्पाकः, [10]पक्त्रिमम्,[D] पाचः, पिपक्षः, पापचः ;

---

1. 'अलङ्कृञ्निराकृञ्प्रजनोत्पच—' (3-2-136) इत्यादिना तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययः।
2. 'केलिमर उपसंख्यानम्' (वा. 3-1-96) इति केलिमर्प्रत्यये रूपम्। कर्मकर्तर्ये-वायं प्रत्यय इति **वृत्तिकारादयः**। अविशेषात् भावकर्मणोरेवेति **दीक्षितादयः**।
3. किम्शब्दे उपपदे, 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति चानशि, बाहुलकात् मुमागमाभाव इति **अमरव्याख्यायां भानुजीदीक्षितः**।
4. कर्तरि लिटः क्वसौ, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे, 'अत एकहल्मध्येऽनादेशादेर्लिटि' (6-4-120) इत्येत्वाभ्यासलोपयो रूपम्।
5. निष्ठायामस्य धातोरनिट्त्वेन ण्यति, 'चजोः कु घिण्ण्यतोः' (7-3-52) इत्यनेन कुत्वम्।
6. 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः' (3-1-114) इत्यनेन यत्प्रत्यये कर्मकर्तरि **कृष्टपच्यः** इति निपात्यते। कृष्टे ये स्वयमेव पच्यन्ते केचन व्रीहिविशेषाः ते **कृष्टपच्याः**। अन्यत्र **कृष्टपाक्यः** इत्येव।
7. 'ण्य आवश्यके' (7-3-65) इति निषेधाद् आवश्यकार्थे तु ण्यत्प्रत्यये कुत्वं न भवति।
8. घञि, 'चजोः कु—' (7-3-52) इति कुत्वम्।
9. मांसस्य पाकः **मांसपाकः मांस्पाको** वा। 'मांसस्य पचि ल्युड्घञोः' (वा. 6-3-109) इति वचनात् पचतेर्घञि मांसशब्दस्योपपदस्यान्त्यलोपो वा भवति।
10. 'ड्वितः क्त्रिः' (3-3-88) इति क्त्रिप्रत्यये, 'तेन' इत्यधिकारे, निर्वृत्तार्थे 'क्त्रेर्मम्नित्यम्' (4-4-20) इति नित्यं मप्प्रत्यये रूपम्।

A. 'स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं **पचेलिमम्**।' नैषधे 1.94.
B. 'पितॄणां कुरुषे कार्यम**पाक्यैः** स्वादुभिः फलैः॥' भ. का. 6. 64.
C. '**अकृष्टपच्याः** पश्यन्तौ ततो दाशरथी लताः।' भ. का. 6. 59.
D. '**विपक्त्रिम**ज्ञानगतिर्मनस्वी मान्यो मुनिः स्वां पुरमृष्यश्रृङ्गः॥' भ. का. 1. 10.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पक्तुम्, पाचयितुम्, पिपक्षितुम्, पापचितुम्;
[1]पचा, [2]पक्तिः, [3]पाचिका, पाचना, पिपक्षा, पापचा;
पचनम्, [4]मांसपचनम्-मांस्पचनम्, पाचनम्, पिपक्षणम्, पापचनम्;
पक्त्वा; पाचयित्वा, पिपक्षित्वा, पापचित्वा;
विपच्य, प्रपाच्य, प्रपिपक्ष्य, प्रपापच्य;
पाचम् २, पक्त्वा २, } पाचम् २, पाचयित्वा २, } पिपक्षम् २, पिपक्षित्वा २, } पापचम् २; पापचित्वा २. }

(958) **"पचि व्यक्तीकरणे"** (I-भ्वादिः-174. सक. सेट्. आत्म.)[अ]

'णौ पञ्चयति विस्तारे व्यक्तौ तु शपि पञ्चते।' (श्लो. 18) इति **देवः**।
पञ्चकः-ञ्चिका, पञ्चकः-ञ्चिका, पिपञ्चिषकः-षिका, पापञ्चकः-ञ्चिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कञ्चति**वत् (145) ज्ञेयानि। [5]पङ्कः, [6]पङ्क्तिः, [7]पञ्चालाः; इति अस्य धातो रूपाणीति विशेषः। [A]पञ्चितः।

(959) **"पचि विस्तारवचने"** (X-चुरादिः-1652. सक. सेट्. उभ.)

'विस्तारमात्रे च' इति **द्रुमे**। 'वचने' इत्यविवक्षितमित्यर्थः।

---

1. षित्त्वाद् '**षिद्**भिदादिभ्यः—' (3-3-104) इत्यङ् भवति।
2. 'स्थागापा**पचो** भावे' (3-3-95) इति वचनात् पक्षे क्तिन्नपि भावे भवति।
3. 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (3-3-111) इति ऋणे ण्वुच्।
   'शायिकाऽद्य तव प्रापदर्हसि क्षीरपायिकाम्।
   **पाचिका** मे त्वया देया प्रोत्पन्ना मेऽन्नभोजिका॥' इति **प्र. सर्वस्वे**।
4. 'मांसस्य **पचि** युड्घञोः' (काशिका 6-1-144) इति मांसशब्दस्याकारस्य लोपः ल्युट्प्रत्यये परतः। तेन **मांस्पचनम्** इत्यपि साधु। '**मांस्पचन्या** उखायाः' इति प्रयोगोऽत्रानुसन्धेयः (भाष्य०, काशिका० ६-१-६३)।
5. घञि, न्यङ्क्वादिपाठात् कुत्वम्।
6. बाहुलकात् 'क्तिन्नपि इष्यते' (वा. 3-3-94) इति क्तिन्, कुत्वं च।
7. 'तमिविडि—' (द. उ. 8-115) इति कालच्प्रत्यये रूपम्। पञ्चते पञ्चयति वा **पञ्चालाः**=विषयः, पर्वतेश्वरयक्षश्च।

A. 'अमुञ्चनैर्मञ्चितचित्तप**ञ्चित**त्रयीमतप्रस्तुचितैः शुभार्जकैः।' धा. का. 1.24.

[अ] '**पच** व्यक्तीकरणे' इति **दुर्गः**। 'तिङो गोत्रादीनि—' (8-1-27) इत्यत्र **काशिकायां न्यासे** च '**पचति**[=व्यक्तीकरोति] गोत्रम्' इत्युक्तत्वात् तन्मतेऽपि '**पच**' इत्येव पाठ इति गम्यते। **पच** इत्यदन्तपाठेऽपि धातोरस्यानिट्त्वम्, अनिट्कारिकासु पाठात्—इति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'णौ पञ्चयति विस्तारे, व्यक्तौ तु शपि पञ्चते।' (श्लो. 18) इति देवः। पञ्चकः-पञ्चिका, पिपञ्चयिषकः-षिका, पञ्चकः-ञ्चिका, पिपञ्चिषकः-षिका, पापञ्चकः-ञ्चिका; इत्यादीनि सर्वाणि रूपाणि चौरादिकचम्पयतिवत् (499) ऊह्यानि। घञि-[A]प्रपञ्चः।

(960) "पट गतौ" (I-भ्वादिः-296. सक. सेट्. पर.)

'भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत्॥' (श्लो. 76) इति देवः। पाटकः-टिका, पाटकः-टिका, पिपटिषकः-षिका, पापटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि कटतिवत् (148) बोध्यानि। [1]पाटूपटः, [2]परिपाटी, [3]पटुः, गोष्ठपटुः, [4]पटिमा, [5]पटाका, [6]पटलम्, [7]पटोलः, पटलिका, पाटलम्, पाटली, [8]पटीरः, [9]पटनः, [10]पटितिः, [11]कपाटम्;

---

1. 'पाटेर्णिलुक् ऊक् चाभ्यासस्य' (वा. 6-1-12) इत्यनेन ण्यन्तात् पचाद्यचि णिलुक्, अभ्यासे हलादिशेषं बाधित्वा ऊक्[1] च भवति।
"माधवोऽभ्यासदीर्घोक्त्या 'पाटूपट' इतीच्छति।
'पाटेर्णिलुक् दीर्घ ऊक् चे' त्यूचिवान् भोजराडपि॥"
'तमः पटपटूपटम्', 'आटोपपाटूपटम्।' इति च प्रयोगः।' इति प्र. सर्वस्वे।
2. परिपटतीति परिपाटी। ताच्छील्ये णिनिः।
3. 'फलिपाटि—' (द. उ. 1-103) इत्युप्रत्ययो णिलुक् च। पाटयतीति पटुः= चतुरः। 'गोष्ठेपटुः' इत्यत्र पात्रेसमितादित्वात् (2-1-48) सप्तम्या अलुक्।
4. अतिशयेन पटुः पटिमा। पृथ्वादित्वात् (5-1-122) इमनिच् तद्धितः।
5. 'शलिपटि—' (द. उ. 3-33) इत्यादिना आकप्रत्ययः। पटाका=पक्षिजातिः।
6. 'वृषादिभ्यश्चित्' (द. उ. 8-109) इत्यादिना कलप्रत्ययः। पटलम्=घनसंघातः, अक्षिरोगश्च।
7. 'कपिगडिपटिभ्य ओलः' (द. उ. 8-105) इत्योलप्रत्ययः। पटोलः= द्रव्यजातिः।
8. औणादिके (द. उ. 8-72) ईरन्प्रत्यये रूपम्। पटीरम्=कार्मुकम्।
9. 'चलनशब्दार्थादकर्मकाद्—' (3-2-148) इत्यनेन तच्छीलादिषु कर्तृषु युच्प्रत्ययः।
10. 'तितुत्रेष्वग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इत्यनेन इट् भवति।
11. कं=शिरं पाटयतीति कपाटम्=द्वारपिधानम्। ण्यन्तात् 'कर्मण्यण्' (3-2-1) इत्यण्। 'कवाटम्' इत्येव दाक्षिणात्यानां पाठ इति केचित्। तदानीं वटधातोरेतद्रूपमिति ज्ञेयम्।
A. 'कृष्णः प्रपञ्चरहितां धृततेजिताश्वैः वीरैः स्तुतां गिरमकीर्तदरातिवर्धी॥'
धा. का. 3.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इतीमानि रूपाणि अधिकान्यत्रेति विशेषः। [A]पटन्।

(961) "पट भाषार्थः" (X-चुरादिः-1753. सक. सेट्. उभ.)

आस्वदीयः।

'भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत् ॥' (श्लो. 76) इति देवः। पाटकः-टिका, पिपाटयिषकः-षिका; पाटयिता-त्री, पिपाटयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि चौरादिककालयतिवत् (175) ज्ञेयानि।

(962) "पट ग्रन्थे" (X-चुरादिः-1857. सक. सेट्. उभ.) अदन्तः

'भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत् ॥' (श्लो. 76) इति देवः। [1]पटकः-टिका, पिपटयिषकः-षिका, पटयिता-त्री, पिपटयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककलयतिवत् (176) ज्ञेयानि। [B]प्रपटय्य।

(963) "पठ व्यक्तायां वाचि" (I-भ्वादिः-330. सक. सेट्. पर.)

पाठकः-ठिका, पाठकः-ठिका, पिपठिषकः-षिका, पापठकः-ठिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककठतिवत् (148) ज्ञेयानि। निपठः[2] निपाठः, निपठितिः[3], इमानि रूपाणि अधिकान्यत्रेति विशेषः।

(964) "पडि गतौ" (I-भ्वादिः-281. सक. सेट्. आत्म.)

पण्डकः-ण्डिका, पण्डकः-ण्डिका, पिपण्डिषकः-षिका, पापण्डकः-ण्डिका; इत्यादीनि सर्वाणि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। [4]पण्डा, [5]गोष्ठेपण्डः, अस्य धातोः इमे रूपे अधिके इति ज्ञेयम्।

---

1. अत्र अल्लोपस्य स्थानिवत्त्वात् सर्वत्र उपधावृद्धिर्न।
2. 'नौ गदनदपठस्वनः' (3-3-64) इति करणे वा अप् प्रत्ययः।
3. क्तिनि, 'तितुत्र—' (7-2-9) इति इण्निषेधे प्राप्ते 'अग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इति इट् भवति।
4. स्त्रियां भावादौ 'गुरोश्च हलः' (3-3-103) इत्यप्रत्ययः। **पण्डा**=मतिः ज्ञानं च, गत्यर्थानां ज्ञानार्थत्वात्। 'तदस्य संजातं तारकादिभ्यः—' (5-2-36) इतीतच्प्रत्यये **पण्डितः** इति रूपम्।
5. पण्डतीति पण्डः। पचाद्यच्। क्षेपे गम्ये **गोष्ठेपण्ड** इति 'पात्रेसमितादयश्च' (2-1-48) इत्यत्र निपातनात् सप्तम्या अलुक्।

A. 'अम्लेटकैश्चाकटुचाटुभाषितैरटैः पटत्संरटिताजनोत्करैः ॥' धा. का. 1.39.

B. 'कुद्देनाकथि चाप्यवर्यगणने शठ्येन भोः श्वठ्यतां
मन्त्री तौ प्रपटय्य पाशवटनैः पापौ विरह्यौ पुरात्।' धा. का. 3-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (965) "पडि नाशने" (X-चुरादिः-1615. सक. सेट्. उभ.)

इदित्करणात् णिचो वैकल्पिकत्वम् ।

पण्डकः-ण्डिका, पिपण्डयिषकः-षिका, पण्डकः-ण्डिका, पिपण्डिषकः-षिका, पापण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककण्ठयतिवत् (150) ज्ञेयानि । पापप्रपण्डी[A] ।

## (966) "पण व्यवहारे स्तुतौ च"

(I-भ्वादिः-439-सक. सेट्. आत्म.) [अ]

[1]पणायकः-यिका, पाणकः-णिका, [2]पणायकः-यिका, पाणकः-णिका, पिपणिषकः-षिका, [3]पिपणायिषकः-षिका, [4]पम्पणकः-पंपणकः-णिका ; पणायिता-त्री, पणिता-त्री, पणाययिता-त्री, पाणयिता-त्री, पिपणिषिता-त्री, पिपणायिषिता-त्री, पम्पणिता-त्री ;

—पणाययन्-पाणयन्-न्ती;

—पणाययिष्यन्-पाणयिष्यन्-न्ती-ती;

---

1. ण्वुलि, 'गुपूधूपविच्छिपणिपनिभ्य आयः' (3-1-28) इति आयप्रत्ययः । 'आयादय आर्धधातुके वा' (3-1-31) इति आर्धधातुकेषु विकल्पेन भवति । तेन तृजादिष्वपि आयप्रत्ययपक्षे, आयप्रत्ययाभावपक्षे च रूपाणि सर्वाण्यपि **गुपू**-धातुवत् (411) ज्ञेयानि ।
2. णिजन्तेऽपि पूर्ववदायप्रत्ययविकल्पः । तेन रूपद्वयं ज्ञेयम् सर्वत्र ।
3. सनोऽप्यार्धधातुकत्वात् आयप्रत्ययविकल्पः । तेन सर्वत्र रूपद्वयं **गुपि**वत् (411) ज्ञेयम् ।
4. यङन्ते आयप्रत्ययो न भवति । आयप्रत्ययवेलायां धातोरनेकाच्त्वाद् यङ एवाप्रसक्तेः । तेन यङन्ताण्ण्वुलि, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति अभ्यासस्य नुकि, 'स च पदान्तवद् वाच्यः' (वा. 7-4-85) इति वचनात् 'वा पदान्तस्य' (8-4-59) इति परसवर्णविकल्पः ।

[अ] व्यवहारार्थे आयप्रत्ययाभावो वैयाकरणसम्प्रदायागत इति धातुपाठव्याख्यासु सर्वत्र साग्रहं साध्यते । 'न चोपलेभे **वणिजां पणायान्** ॥' (भट्टिकाव्ये 3-27), 'गोपायितसाररत्नभाण्डं **विपणायन्ति वणिग्जना**श्च यत्र ॥' (रावणार्जुनीये 8-30) इत्यादिप्रयोगानुसारात् व्यवहारार्थेऽपि आयप्रत्ययप्रयोगः नासाधुत्वज्ञापक इति प्रतिभाति । विद्वांसः प्रमाणमत्र ।

A. 'इत्यादिवादिषु जनेषु विमोटितारिः
**पापप्रपण्डि**पदपांसुरवाज्यधामा ।' धा. का. 3, 23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पणमानः, पणाययमानः-पणयमानः, पिपणायिषमाणः-पिपणिषमाणः, पम्पण्यमानः ;

पणायिष्यमाणः-पणिष्यमाणः-पणाययिष्यमाणः, पाणयिष्यमाणः, पिपणायिषिष्यमाणः-पिपणिषिष्यमाणः, पम्पणिष्यमाणः

[2]सुपाण्-सुपाणौ-सुपाणः, पणाः-पणौ-पणाः ;

पणायितम्-पणितम्-तः, पणायितः-पाणितः, पिपणायिषितः-पिपणिषितः, पम्पणितः-तवान् ;

पणायः-पणः, पणायः-पाणः, पिपणायिषुः-पिपणिषुः, पम्पणः ;

पणायितव्यम्-पणितव्यम्, पणाययितव्यम्-पाणयितव्यम्, पिपणायिषितव्यम्-पिपणिषितव्यम्, पम्पणितव्यम् ;

पणायनीयम्-पणनीयम्, पणायनीयम्-पाणनीयम्, पिपणायिषणीयम्-पिपणिषणीयम्, पम्पणनीयम् ;

पणाय्यम्-[3]पण्यम्-[A]पाण्यम्, [B]पणाय्यम्-पाण्यम्, पिपणायिष्यम्-पिपणिष्यम्, पम्पण्यम् ;

ईषत्पणः-दुष्पणः-सुपणः ; — —

पणाय्यमानः-पण्यमानः, पणाय्यमानः-पाण्यमानः, पिपणायिष्यमाणः-पिपणिष्यमाणः, पम्पण्यमानः ;

पणायः-[4]पणः-पाणः, मूलकपणः, शाकपणः-क्षीणपणः,[C] [5]आपणः,

1. अवयवे कृतस्यानुदात्तेत्त्वस्य आयप्रत्ययाभावे शुद्धे धातौ आत्मनेपदसम्पादनेन सार्थक्यम्। तत्र **पनिना** धातुना साहचर्यात् स्तुतावेवायप्रत्ययः। व्यवहारे तु न। तेन व्यवहारार्थादस्त शुद्धात् शानच्।

2. क्विपि, 'अनुनासिकस्य क्विझलोः—' (6-4-15) इति दीर्घः। आयप्रत्ययपक्षे तु वलि लोपे रूपम्।

3. व्यवहारार्थे ण्यतं बाधित्वा 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' (3-1-101) इति क्यप्। अन्यत्र **पाण्यम्** इत्येव।

4. 'नित्यं **पणः** परिमाणे' (3-3-66) इति भावादावप् प्रत्ययः। स्तुतौ तु **पाणः** इत्येव।

5. एत्य अत्र आपणते इत्या**पणः**। 'गोचरसञ्चरवहव्रजा**पण**निगमाश्च' (3-3-119) इति घप्रत्ययान्तः संज्ञायां निपात्यते। **आपणः**=क्रयविक्रयव्यवहारार्हा पण्यवीथिका।

A. 'ऋष्यमूकेऽनवद्योऽस्ति **पण्य**भ्रातृवधः कपिः।' भ. का. 6-51.

B. '**पणाय्य**रूपाः पनिताकृतीन् ययुर्भामिन्य एवाक्षमया स्वकामुकान्॥' धा.का. 1.57.

C. 'अथ क्रमादनिकाणाः नराः **क्षीणपणा** इव।' भ. का. 7.58.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पणायः-पाणः, पिपणायिषः-पिपणिषः, पम्पणः ; —

पणायितुम्-पणितुम्, पणाययितुम्-पाणयितुम्, पिपणायिषितुम्-पिपणिषितुम्, पम्पणितुम् ;

पणाया-[1]पणितिः, पणायना-पाणना, पिपणायिषा-पिपणिषा, पम्पणा;

पणायनम्-पणनम्, पणायनम्-पाणनम्, पिपणायिषणम्-पिपणिषणम्, पम्पणनम् ;

पणायित्वा-पणित्वा, पणाययित्वा-पाणयित्वा, पिपणायिषित्वा-पिपणिषित्वा, पम्पणित्वा;

प्रपणाय्य-प्रपण्य, प्रपणाय्य-प्रपाण्य, प्रपिपणायिष्य-प्रपिपणिष्य, प्रपम्पण्य ;

पणायम् २-पाणम् २, पणायित्वा २-पणित्वा २, } पणायम् २-पाणम् २, पणाययित्वा २- पाणयित्वा २, }

पिपणायिषम् २-पिपणिषम् २, पिपणायिषित्वा २-पिपणिषित्वा २, } पम्पणम् २ ; पम्पणित्वा २ ; }

[2]पाणिः, [3]वणिक्, [4]विपणिः.

## (967) "पत गतौ वा" (X-चुरादिः-1862. सक. सेट्. उभ.) अदन्तः ।

'—गत्यर्थे पतयेत् पतेत् ॥' (श्लो. 95) इति देवः ।

[5]पतकः-तिका, पिपातयिषकः-षिका, पिपतयिषकः-षिका, पतकः-तिका, [6]पिपतिषकः-षिका, पापतकः-तिका; इत्यादीनि सर्वाण्यपि रूपाणि

---

1. 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति पर्युदासात् इडत्र भवति । आयप्रत्ययपक्षे तु प्रत्ययान्तत्वादकारप्रत्ययः ।

2. 'अशिपणाय्यो रुड्लुकौ च' [द. उ. 1-61] इत्यनेन इण्प्रत्ययः, आयप्रत्ययस्य लुक् च भवति । पाणिः=हस्तः ।

3. 'पणेरिज्यादेश्च वः' (द. उ. 4-8) इत्यनेन इजिप्रत्यये धात्वादेश्च वकारादेशे रूपम् । वणिक्=आपणिकः ।

4. 'इन्' [द. उ. 1-46] इतीन्प्रत्यये रूपम् । विपणिः=पण्यवीथिका ।

5. 'पत गतौ वा' इत्यत्र विकल्पद्योतकः वाकारः अदन्तपाठविकल्पार्थः इति मते अदन्तत्वाभावे णिचि उपधावृद्धौ एवं रूपम् ।

6. 'पत गतौ वा' इति वाकारः णिज्विकल्पार्थ इति मते णिजभावपक्षे शुद्धात् सनि एवं रूपम् , एवं यङन्तस्याप्युपपत्तिः द्रष्टव्या ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



छादयतिवत् (562) ज्ञेयानि। [1]पतयालुः[A].

(968) "**पत्लृ गतौ**" (I-भ्वादिः-845. सक. सेट्. पर.) ज्वलादिः।

'—गत्यर्थे पतयेत् पतेत् ॥' (श्लो 95) इति देवः।

पातकः-तिका, पातकः-तिका, [2]पिपतिषकः-षिका-पित्सकः-सिका, [3]पनीपतकः-तिका ;

पतिता-त्री, पातयिता-त्री, पिपतिषिता-पित्सिता-त्री, पनीपतिता-त्री;

[4]प्रणिपतन्-न्ती, पातयन्-न्ती, [5]पिपतिषन्-पित्सन्-न्ती ; —

उत्पतिष्यन्-न्ती-ती, पातयिष्यन्, पिपतिषिष्यन्-पित्सिष्यन्-न्ती-ती ; —

[6]पतमानः, पातयमानः, [7]पिपतिषमाणः-प्रपित्समानः, पनीपत्यमानः ;

पतिष्यमाणः, पातयिष्यमाणः, पिपतिषिष्यमाणः-पित्सिष्यमाणः, पनीपतिष्यमाणः ;

प्रतिपत्-सुपत्-सुपतौ-सुपतः ; — — —

---

1. 'स्पृहिगृहिपति—' (3-2-158) इत्यादिना तच्छीलादिषु कर्तृषु ण्यन्ताद् आलुच् प्रत्ययः। 'अयामन्ताल्वाय्य—' (6-4-55) इत्यादिना णेरयादेशः।

2. 'तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः' (वा. 7-2-49) इति इड्विकल्पः। इट्पक्षे रूपमेवम्। इडभावपक्षे तु 'सनि मीमाघुरभलभशकपतपदामच इस्' (7-4-54) इतीसि, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपे, 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'स्कोः—' (8-2-29) इति सकारस्य लोपे च रूपम्। एवं सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्।

3. यङन्ते, 'नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्' (7-4-84) इत्यभ्यासस्य नीगागमः। अयमभ्यासदीर्घापवादः। एवं यङन्ते सर्वत्र ज्ञेयम्।

4. 'नेर्गदनदपत—' (8-4-17) इत्यादिना नेर्णत्वम्।

5. 'आशङ्कायामुपसंख्यानम्' (वा. 3-1-7) इति सनि रूपमेवम्। इच्छासन्नन्तादपि, एवमेव।

6. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति ताच्छील्ये, शक्तौ वा चानश् प्रत्ययः, न तु शानच्।

7. 'पूर्ववत् सनः' (1-3-62) इति ताच्छील्यार्थे चानश्।

A. 'वीरेण तेन विशिखेन विलूनमूर्नं
चक्रभ्रमेण पतयालु तदा शरव्यम्।' भारतचम्पूः 2.80.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पत्तम्-पत्तः-पत्तवान्-पतितम्-तः-तवान्, पातितः, पिपतिषितः-पित्सितः, पनीपतितः-तवान् ;

[2]पतः-[3]पातः-[4] पतापतः, [5]आपात्यः,[A] [6]उत्पतिष्णुः,[B] [7]पतयालुः, [8]प्रपातुकः,[C] [9]पतनः,[D] [10]निपेतिवान्,[E]

---

1. सनि धातोरस्य विकल्पितेट्कत्वात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्निषेधे प्राप्ते, 'द्वितीया श्रितातीत**पतित**गतात्यस्तप्राप्तापन्नैः' (2-1-24) इत्यत्र **पतित** इति निपातनात् इड् भवतीति सिद्धान्तः। 'बाधकान्येव निपातनानि' (परिभाषा 120) इति न्यायाश्रयणेन **पतित** इत्येव निष्ठायां साधुः। 'अबाधकान्यपि निपातनानि' (परिभाषा 121) इति न्यायाश्रयणे तु **पत्तम्-पत्तः** इत्यादीन्यपि रूपाण्यत्र साधून्येवेति प्रतिभाति। तत्र विद्वांसः प्रमाणम्। **वस्तुतस्तु** सूत्रकाररीत्या धातोरस्य कुत्रापि इड्विकल्पाभावात् निष्ठायामत्र 'यस्य विभाषा' (7-2-15) इति सूत्रं न प्रवर्तते। ततश्च **पतितः** इत्यस्य साधुत्वे न निर्देशादिरूपप्रमाणान्तराणि मृग्यानि।
2. णप्रत्ययाभावपक्षे पचाद्यचि रूपमेवम्।
3. '**ज्वलिति**कसन्तेभ्यो णः (3-1-140) इति कर्तरि वा णप्रत्ययः।
4. 'चरिचलि**पति**वदीनाम् द्वित्वम् अचि ; आक् चाभ्यासस्य' (वा· 6-1-12) इति द्वित्वम्। अभ्यासे हलादिशेषाभावः। यङन्तत्वाभावात् आगागमविधानाच्च नीगभावश्च।
5. 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्या**पात्या** वा' (3-4-68) इति कर्तरि ण्यत्प्रत्ययान्तो निपातितः।
6. 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्**पतो**न्मद—' (3-2-136) इति तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययः।
7. 'स्पृहिगृहि**पति**दयि—' (3-2-158) इति ण्यन्तात् आलुच् प्रत्ययः। ताच्छीलिकोऽयं प्रत्ययः। णिचि उपधाह्रस्वो निपातनात्। 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः।
8. ताच्छीलिकः 'लष**पत**पद—' (3-2-154) इत्यादिना उकञ् प्रत्ययः।
9. 'जुचङ्क्रम्यदंद्रम्यसृगृधिज्वलशुचलष**पत**पदः' (3-2-150) इत्यनेन ताच्छीलिके युच्प्रत्यये, अनादेशे च रूपम्।
10. कर्तरि लिटः क्वसौ द्वित्वे, 'अत एकहल्मध्ये—' (6-4-120) इति एत्वाभ्यासलोपयोः, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपम्।

A. 'अग्रे गतेन वसतिं परिगृह्य रम्यां **आपात्य**सैनिकनिराकरणाकुलेन।' शि. पा. 5. 15.

B. '**उत्पतिष्णू** सहिष्णू च चेरतुः खरदूषणौ॥' भ. का. 5. 1.

C. 'भेजेऽभितः **पातुक**सिद्धसिन्धोरभूतपूर्वां रुचमम्बुराशेः॥' शि. पा. 3. 3.

D. 'निरुद्धे सलिले राज्ञा **पतनं** कूलमाश्रितान्॥' रावणार्जुनीये 11-31.

E. 'बाणभिन्नहृदया **निपेतुषी** सा स्वकाननभुवं न केवलाम्।' रघु. 11-19.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]दूरपाती[A]-पक्षपाती, [2]पापतिः, पातः-पिपतिषुः-[B]प्रपित्सुः, पनीपतः ;
पतितव्यम्, पातयितव्यम्, पिपतिषितव्यम्-पित्सितव्यम्, पनीपतितव्यम्;
पतनीयम्, पातनीयम्, पिपतिषणीयम्-पित्सनीयम्, पनीपतनीयम्;
पात्यम्, [3]अपत्यम्, पात्यम्, पिपतिष्यम्-पित्स्यम्, पनीपत्यम्;
ईषत्पतः-दुष्पतः-सुपतः ; — — —
पत्यमानः, पात्यमानः, पिपतिष्यमाणः-पित्स्यमानः, पनीपत्यमानः ;
[4]पातः-सन्निपातः-उत्पातः, प्रणिपातः, [5]प्रपातः, [6]पत्त्रम्, पातः, पिपतिषः-पित्सः-पनीपतः ;
पतितुम्, पातयितुम्, पिपतिषितुम्-पित्सितुम्, पनीपतितुम्;
पत्तिः, [7]प्रतिपत्, [8]निपत्या, [9]पत्तिः, पातना, पिपतिषा-पित्सा, पनीपता ;

---

1. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिप्रत्ययः ।
2. 'सासहिवावहिचाचलि**पापतीना**मुपसंख्यानम्' (वा. 3-2-171) इत्यनेन कर्तरि किः किन् वा प्रत्ययः । यङन्तात् निपातनमिदम् । निपातनादेव नीगागमोऽभ्यासस्य नेति **भाष्यमतम्** । **वार्तिकमते** तु स्वतन्त्रमिदं निपातनम्, न तु यङन्तस्येति भाति । यथोत्तरं मुनीनां प्रामाण्यात् **भाष्यमतेनैव** निष्पत्तिर्ज्ञेया ।
3. न पतन्त्यनेनेति **अपत्यम्** । हलन्तात् करणे यत् । 'कृत्यल्युटो बहुलम्' (3-3-113) इत्यनेनात्र यतः साधुत्वं ज्ञेयम् । **शब्दकौस्तुभे** तु 'अथ वा बहुलं कृत्याः संज्ञायामिति तत् स्मृतम् । यथाऽपत्यं यथा जन्यं यथा भित्तिस्तथैव सा ॥' (श्लोकवार्तिकम् 3-1-112) इत्यत्र **अपत्यम्** इत्युपादानात् साधुत्वमुक्तम् । मुद्रित**भाष्य**कोशेषु तु 'यथा **यत्यं**—' इत्येव पाठो दृश्यते । तेन बाहुलकादेवेति समाधानं युक्तम् ।
4. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । **पातः**=राहुः ।
5. प्रपततीति **प्रपातः**=जलस्याधोदेशगमनम् ।
6. 'दाम्नीशसयुयुजस्तुतुदसिसिचमिह**पत**दशनहः करणे' (3-2-182) इति करणे ष्ट्रन्प्रत्ययः । **पत्त्रम्**=वाहनम् ।
7. स्त्रियां भावादौ, 'सम्पदादिभ्यः—' (वा. 3-3-94) इति क्विप् । **प्रतिपत्**=ज्ञानम् । 'क्तिन्नपीष्यते' (वा. 3-3-94) इति वचनात् **प्रतिपत्तिः**=इत्यपि साधुः ।
8. 'संज्ञायां समजनिषद**निपत**—' (3-3-99) इत्यादिना क्यप् संज्ञायाम् । **निपत्या**=पिच्छिला भूमिः ।
9. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच् । **पत्तिः**=पदातिः । पुंलिङ्गशब्दोऽयम् ।

A. 'अप्रग्राहैरिवादित्यो वाजिभि**र्दूरपातिभिः** ॥' भ. का. 7. 52.
B. 'पयसि **प्रपित्सु**रपराम्बुनिधेरधिरोढुमस्तगिरि**मभ्यपतत्** ॥' शि. व. 9. 1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पतनम्, प्रपातनम्, पिपतिषणम्-पित्सनम्, पनीपतनम्;
पतित्वा, पातयित्वा, पिपतिषित्वा-पित्सित्वा, पनीपतित्वा;
प्रणिपत्य, प्रपात्य, प्रपिपतिष्य-प्रपित्स्य, प्रपनीपत्य;
[1]लतानुपातम्[A], गेहानुपातम् गेहानुप्रपातमास्ते। गेहं गेहं अनुप्रपातम्, गेहानुप्रपातम्-गेहानुप्रपातमास्ते।

पातम् २, पतित्वा २, } पातम् २, पातयित्वा २, } पिपतिषम् २-पित्सम् २, पिपतिषित्वा २-पित्सित्वा २, } पनीपतम् २; पनीपतित्वा २. }

[2]पताका, [3]पतङ्गः, [4]पत्तनम्, [5]पतत्रम्, [6]पातालम्।

(969) "पथ प्रक्षेपे" (X-चुरादिः-1554. सक. सेट्. उभ.)

"पृथ" इत्यस्य पाठान्तरमिदम्।

पाथकः-थिका, पिपाथयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-कालयतिवत् (175) ज्ञेयानि।

(970) "पथि गतौ" (X-चुरादिः-1575. सक. सेट्. उभ.)

इदित्करणाण्णिचो वैकल्पिकत्वम्।

'—ऽथ पथेर्गतौ पथति णौ पन्थेर्गतौ पन्थयेत्॥' (श्लो. 101) इति देवः।

पन्थकः-पन्थिका, पिपन्थयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि

---

1. 'विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः' (3-4-56) इति द्वितीयान्ते णमुल्। पदार्थानां सम्बन्धो व्याप्तिः। आसेवा=तात्पर्यम्। एतयोरेवात्र णमुल्। उपपदसमासस्य विकल्पत्वात् रूपाण्येवं भवन्ति।
2. बलाकादित्वात् [द. उ. 3-32] आकप्रत्ययो भवति। पताका=ध्वजपटः।
3. 'पतेरङ्गच् पक्षिणि' [द. उ. 3-59] इत्यङ्गच् प्रत्ययः पक्षिण्यभिधेये। पतत्यसर्थ-मिति पतङ्गः=पक्षी, आदित्यश्च।
4. 'वीपतिभ्यां तनन्' [द. उ. 6-56] इति तनन्प्रत्ययः। पतन्त्यस्मिन् इति पत्तनम्।
5. 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' [द. उ. 8-56] इत्यत्रन्प्रत्ययः। पतत्रम्=वाहनम्।
6. 'पतिचण्डिभ्यामालन्' [द. उ. 8-116] इत्यालन् प्रत्ययः।

A. 'लतानुपातं कुसुमान्यगृह्णात् स नद्यवस्कन्दमुपास्पृशच्च।' भ. का. 2. 11.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

चौरादिककण्ठयतिवत् (150) ज्ञेयानि । णिजभावपक्षे शुद्धाच्छता-पन्थन्[A] इति ।

(971) "**पथे गतौ**" (I-भ्वादिः-847. सक. सेट्. पर.) ज्वलादिः ।

'—ऽथ पथेर्गतौ **पथति** णौ पन्थेर्गतौ पन्थयेत् ॥' (श्लो. 101) इति **देवः** ।

पाथकः-थिका, पाथकः-थिका, पिपथिषकः-षिका, पापथकः-थिका ;
पथिता-त्री, पाथयिता-त्री, पिपथिषिता-त्री, पापथिता-त्री,
पथन्-न्ती, पाथयन्-न्ती, पिपथिषन्-न्ती ; —
पथिष्यन्-न्ती-ती, पाथयिष्यन्-न्ती-ती, — पिपथिषिष्यन्-न्ती-ती ; —
— पाथयमानः, पाथयिष्यमाणः, पापथ्यमानः, पापथिष्यमाणः ; —
पथ्-पत्-पथौ-पथः ; — —
पथितम्-तः, पाथितः, पिपथिषितः, पापथितः-तवान् ;
पथः-पाथः, [B]तटपाथी, पाथः, पिपथिषुः, पापथः ;
पथितव्यम् , पाथयितव्यम् , पिपथिषितव्यम् , पापथितव्यम् ;
पथनीयम् , पाथनीयम् , पिपथिषणीयम् , पापथनीयम् ;
पाथ्यम् , पाथ्यम् , पिपथिष्यम् , पापथ्यम् ;
ईषत्पथः-दुष्पथः-सुपथः ; — —
पथ्यमानः, पाथ्यमानः, पिपथिष्यमाणः, पापथ्यमानः ;
पाथः, पाथः, पिपथिषः, पापथः ;
पथितुम् , पाथयितुम् , पिपथिषितुम् , पापथितुम् ;
पत्तिः, पाथना, पिपथिषा, पापथा ;
पथनम् , पाथनम् , पिपथिषणम् , पापथनम् ;
पथित्वा, पाथयित्वा, पिपथिषित्वा, पापथित्वा ;
प्रपथ्य, प्रपाथ्य, प्रपिपथिष्य, प्रपापथ्य ;
पाथम् २, पथित्वा २, } पाथम् २, पाथयित्वा २, } पिपथिषम् २, पिपथिषित्वा २, } पापथम् २ ; पापथित्वा २. }

---

A. 'कः स्माययेत विभुमेनमशिश्लिषद् यः **पन्थन्** व्रजेऽत्र भवपिच्छनभारिभरेव ।' धा. का. 3. 18.

B. 'अहोलसत्त्वा रविरश्मिजालेऽप्यविकथन्ती **तटपाथि**पाता ।' धा. का. 2.23.

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (972) "पद गतौ" (IV-दिवादिः-1169.सक. अनि. आत्म.)

'पद्ल—' इति पुरुषकारसम्मतः पाठः ।

'—श्यनि गत्यर्थे पद्यते पदयेत णौ ॥' (श्लो. 109) इति देवः ।

पादकः-दिका, पादकः-दिका, [1]पित्सकः-त्सिका, [2]पनीपदकः-दिका ;
पत्ता-पत्त्री, पादयिता-त्री, पित्सिता-त्री, पनीपदिता-त्री ;
— पादयन्-न्ती, पादयिष्यन्-न्ती-ती ; — —
[3]प्रणिपद्यमानः, पादयमानः, पित्समानः, पनीपद्यमानः ;
पत्स्यमानः, पादयिष्यमाणः, पित्सिष्यमाणः, पनीपदिष्यमाणः ;
[4]पत्-पद्-पदौ-पदः ; — — —
[5]प्रपन्नः-पन्नवान्, पादितः, पित्सितः, पनीपदितः-तवान् ;
पदः, [6]उत्पदिष्णुः, [7]पदनः, [8]पादुकः-[A]पादुका, [9]पादः, [10]सम्पद्यः,

---

1. 'सनि मीमाघुरभलभशकपतपदामच इस्' (7-4-54) इति सन्नन्ते सर्वत्र इस्। 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः। 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति सकारलोपः। 'इको झल्' (1-2-9) इति सनः कित्वम्। 'खरि च' (8-4-55) इति दकारस्य चर्त्वं भवति ।
2. यङन्ताण्ण्वुलि, 'नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्' (7-4-84) इत्यभ्यासस्य नीगागमः। अभ्यासदीर्घापवादः। एवं यङन्ते सर्वत्र ज्ञेयम्।
3. 'नेर्गदनदपतपद—' (8-4-17) इत्यादिना नेर्णत्वम्।
4. पद्यतेऽनेनेति पत्=पादः। क्विबन्ते चर्त्वविकल्पः।
5. 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठातकारधातुदकारयोर्नत्वे रूपम्।
6. 'अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पद—' (3-2-136) इत्यादिना इष्णुच् प्रत्ययः तच्छीलादिषु कर्तृषु भवति—इति माधवः। एतच्च प्रकृतसूत्रे (3-2-136), उत्पद इति पाठाश्रयणेन साध्यते। परं तु—पत्लृधातौ (968) स्वयमेव माधवेन उत्पत इत्येतस्मादेव इष्णुच् साधितः। पदधातौ तु "केचित्तु 'उत्पत' इति पतर्तिं पठन्ति" इति वदतः को वाऽत्र स्वाभिमतः पाठ इति न ज्ञायते।
7. 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः' (3-2-150) इत्यादिना ताच्छीलिको युच्प्रत्ययः।
8. 'लषपतपद—' (3-2-154) इत्यादिना तच्छीलादिषु कर्तृषु उकञ् प्रत्ययः। अदन्तत्वात् स्त्रियां टाप्।
9. 'पदरुजविशस्पृशो घञ्' (3-3-16) इति कर्तरि घञ्।
10. सम्पूर्वकादस्मात् कर्तरि शप्रत्यये, दिवादित्वात् श्यनि, पररूपे, रूपमेवम्। शप्रत्ययसद्भावे निदानं तु 'कृभ्वस्तियोगे सम्पद्यकर्तरि—' (5-4-50) इति सूत्रे सम्पद्य इति निर्देश एव।

A. 'प्रकृतिं प्रतिपादुकैश्च पादैश्चक्लृपे भानुमतः पुनः प्रसर्तुम्।' शि. व. 20-39.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सम्पादी, [1]प्रणिपेदिवान्,[A] पादः, पित्सुः, पनीपदः ;
पत्तव्यम् , पादयितव्यम् , पित्सितव्यम् , पनीपदितव्यम् ;
पदनीयम् , पादनीयम् , पित्सनीयम् , पनीपदनीयम् ;
पाद्यम् , पाद्यम् , पित्स्यम् , पनीपद्यम् ;
ईषत्पदः-दुष्पदः-सुपदः ; — — —
पद्यमानः, पाद्यमानः, पित्स्यमानः, पनीपद्यमानः ;
पादः, [2]पदम् , [3]आस्पदम् ,[B] [4]गोष्पदम् , पादः, पित्सः, पनीपदः ;
पत्तुम् , पादयितुम् , पित्सितुम् , पनीपदितुम् ;
[5]सम्पत्-सम्पत्तिः, विपत्-प्रतिपत्-आपत् , [6]पद्या, पादना, पित्सा, पनीपदा ;
पदनम् , आपादनम् , पित्सनम् , पनीपदनम् ;
पत्त्वा, पादयित्वा, पित्सित्वा, पनीपदित्वा ;
प्रणिपद्य, सम्पाद्य, प्रपित्स्य, प्रपनीपद्य ;

---

1. 'पपुष आगतं पपिवद्रूप्यम्' इति भाष्य (4-3-24) प्रयोगात् , छान्दसोऽपि क्वसुः क्वचिद् भाषायां भवति इति ज्ञायते। तेन क्वसौ, एत्वाभ्यासलोपयोः, 'वस्वेकाजाद्घसाम्' (7-2-67) इति इडागमे च रूपमेवम् ।

2. 'खनो घ च' (3-3-125) इत्यत्र चकारात् संज्ञायामन्यत्रापि घप्रत्ययो भवति इति ज्ञायते-इत्याश्रयणेन घप्रत्यये रूपम् ।

3. आङ्पूर्वकादस्मात् संज्ञायां घप्रत्यये, '**आस्पदं** प्रतिष्ठायाम्' (6-1-146) इत्यत्र निपातनात् सुडागमः ।

4. '**गोष्पदं** सेवितासेवितप्रमाणेषु' (6-1-145) इत्यनेन सेविते असेविते प्रमाणे च विषये सुट् निपात्यते । षत्वं च भवति ।

5. '**सम्पदादिभ्यः**—' (वा. 3-3-94) इत्यनेन स्त्रियां भावादौ क्विप्। 'क्तिन्नपीष्यते' (भाष्येष्टिः 3-3-94) इति वचनात् क्तिनि **सम्पत्तिः** इत्यादिकमपि साध्वेव। **प्रतिपत्**=ज्ञानम् , प्रथमा तिथिश्च ।

6. 'संज्ञायां समजनिषद**निपत**—' (3-3-99) इत्यत्र '**निपद**' इति **क्षीरस्वामि**पाठमाश्रित्यात्र क्यप् बोध्यः। **पद्या**=काव्यविशेषः। 'एकप्रघट्टकं **पद्या** मुक्तकानां निबन्धनम्।' इति तल्लक्षणम् । अत्र पक्षे 'उपेयिवान्—' (3-2-109) इत्यत्र '**उप**' इत्यस्येव अत्र '**नि**' इत्यस्याविवक्षितत्वं ज्ञेयम् ।

A. 'प्रायेण **प्रणिपेदुषां** निजमसौ योगं स्वयं शिक्षयन् ।' कामासिकाष्टके 5.

B. 'कृता**स्पदा** भूमिभृतां सहस्रैरुदन्वदम्भःपरिवीतमूर्तिः ।' शि॰ व॰ 3-34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]गेहानुप्रपादम्, गेहंगेहमनुप्रपादम्, गेहमनुप्रपादमनुप्रपादमास्ते ;

पादम् २, पत्त्वा २, } पादम् २, पादयित्वा २, } पित्सम् २, पित्सित्वा २, } पनीपदम् २ ; पनीपदित्वा २ ; }

[2]पादूः, [3]पद्मम्-पद्मिनी ।

(973) "पद गतौ" (X-चुरादिः-1898. सक. सेट्. आत्म.) अदन्तः ।

## आगर्वीयः ।

'—श्यनि गत्यर्थे पद्यते पदयेत णौ ॥' (श्लो. 109) इति देवः ।

पदकः-दिका, पिपदयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककथयतिवत् (162) ज्ञेयानि ।

(974) "पन स्तुतौ" (I-भ्वादिः-440. सक. सेट्. आत्म.) [अ]

पनायकः-पानकः-निका, पनायकः-पानकः, पिपनायिषकः-पिपनिषकः-षिका, पंपनकः-पम्पनकः-निका ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपणायतिवत् (964) ज्ञेयानि ।

[4]पनसः । [A]पनितम् ।

---

1. 'विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः' (3-4-56) इति सोपपदात् णमुल् । 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः । समासे, 'नित्यवीप्सयोः' (8-1-4) इति द्विर्वचनं न भवति । समासेनैव नित्यवीप्सार्थयोरुक्तत्वात् ।

2. 'णिच्च कसिपद्यर्तेः' [द. उ. 1-168] इत्यूप्रत्ययः, प्रत्ययस्य णित्वं च । पद्यते इति पादूः=पादुका । 'पादुका' इत्यत्र संज्ञायां कनि, 'केऽणः' (7-4-13) इति ह्रस्वो ज्ञेयः ।

3. औणादिके [द. उ. 7-26] मन्प्रत्यये रूपम् । पद्यते मधुकरैरिति पद्मम्=कमलम् । अर्शआद्यजन्ते मत्वर्थीये पद्मा=लक्ष्मीः । मत्वर्थीय एव इनिप्रत्यये पद्मिनी इति च ।

4. औणादिके [द. उ. 9.44] असच्प्रत्यये रूपम् । पनसः=फलवृक्षविशेषः ।

[अ] क्षीरतरङ्गिण्यां 'पनायते हरिम् ।' इत्यात्मनेपदमायप्रत्ययान्तात् निरुच्य, तस्य साधकत्वेन, "अत्र, 'अवयवेऽपि कृतं लिङ्गं समुदायस्य विशेषकं भवति ।' (भाष्यम्-3-1-5) इत्याद्यव्यवधानेऽपि आत्मनेपदम् ।' इत्युक्तम् । परं तु—पनायतेरार्धधातुके आयप्रत्ययाभावपक्षेऽनुदात्तेत्त्वस्य चरितार्थत्वात् आत्मनेपदं चिन्त्यम् ।

A. 'पणाढ्यरूपा पनिताकृतीन् ययुर्भामिन्य एवाक्षमया स्वकामुकान् ।' धा. का. 1.57.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(975) "**पय गतौ**" (I-भ्वादिः-476.सक. सेट्. आत्म.)

पायकः-यिका, पायकः-यिका, पिपयिषकः-षिका, पापयकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचयतिवत् (502) ज्ञेयानि ।

(976) "**पर्ण हरितभावे**" (X-चुरादिः-1939. अक. सेट्. उभ.) अदन्तः।

पर्णकः-र्णिका, पिपर्णयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककर्णयतिवत् (170) ज्ञेयानि । [A]प्रपर्णितम् ।

(977) "**पर्द कुत्सिते शब्दे**" (I-भ्वादिः-29. अक. सेट्. आत्म.)

"कुत्सितशब्दः=गुदरवः । तदाह **केशवस्वामी**—" कौक्षे कर्दति, पर्दते गुदरवे—' इति ।" इति **माधवधातुवृत्तिः** । **क्षीरस्वामी** तु—"पायुध्वनौ वर्ततेऽयम् । अन्ये निश्शब्दमधोवातं मन्वानाः 'अशब्दे' इत्याहुः ।" इत्याह ।

पर्दकः-र्दिका, पर्दकः-र्दिका, पिपर्दिषकः-षिका, पापर्दकः-र्दिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्जतिवत् (169) ज्ञेयानि । [1]पर्दनः, [2]पृदाकुः[B] पर्दमानः, पर्दिष्यमाणः ।

(978) "**पर्प गतौ**" (I-भ्वादिः-412. सक. सेट्. पर.)

पर्पकः-र्पिका, पर्पकः-र्पिका, पिपर्पिषकः-षिका, पापर्पकः-र्पिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्वतिवत् (173) ज्ञेयानि । [4]पर्पः ।

(979) "**पर्ब गतौ**" (I-भ्वादिः-416. सक. सेट्. पर.)

पर्बकः-र्बिका, पर्बकः-र्बिका, पिपर्बिषकः-षिका, पापर्बकः-र्बिका ; इत्येवमादीनि समस्तान्यपि रूपाणि भौवादिककर्वतिवत् (173) ज्ञेयानि । शतरि [C]पर्बन् ।

---

1. '**चलनशब्दार्थादकर्मकाद् युच्**' (3-2-148) इति ताच्छीलिको युच्प्रत्ययः ।
2. '**पर्देर्णित् संप्रसारणमलोपश्च**' [द. उ. 1-152] इत्यनेन काकुप्रत्ययः, संप्रसारणं, णित्त्वम् अलोपश्च । **पृदाकुः**=पर्दकः, सर्पश्च ।
4. पर्प्यतेऽनेनेति **पर्पः**=येन पीठेन पङ्गवश्चरन्ति स दारुविशेषः । 'हलश्च' (3-3-121) इति संज्ञायां करणे घञ् ।

A. '**प्रपर्णित**दिशं रुचा क्षपितभूभृतोऽस्यानुजाः
सदोनिवसितं हरिं ययुरतूत्थिताज्ञाः क्रुधा ।' धा. का. 3.64.

B. '**पृदाकुजिद्** वेगमयत्नतो ययौ वियोयुतत्काननजोतिनाध्वना ॥' धा. का. 1-5।

C. 'हयैः क्षुरम्फर्दुतमर्वतो रवेः **पर्बद्भि**रालर्ब्यत रक्तिमा करैः । धा. का. 1. 54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(980) "पर्व पूरणे" (I-भ्वादिः-577. सक. सेट्. पर.)

पर्वकः-र्विका, पर्वकः-र्विका, पिपर्विषकः-षिका, पापर्वकः-र्विका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्वतिवत् (173-A) ज्ञेयानि। [1]पर्वतः[A]।

(981) "पल गतौ" (I-भ्वादिः-839. सक. सेट्. पर.) ज्वलादिः।

पालकः-लिका, पालकः-लिका, पिपलिषकः-षिका, पापलकः-लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककलतिवत् (174) ज्ञेयानि। शतरि [B]पलन्-न्ती इति, पलः-[2]पालः, [3]पलम्, [4]पललम्, [5]पलालम् इति रूपाणि चास्य धातोः सम्भवन्तीति विशेषः।

(982) "पल्पूल लवनपवनयोः" (X-चुरादिः-1882. सक. सेट्. उभ.)

अदन्तः।

'पल्यूल--' इति क्षीरस्वाम्यादिसम्मतः पाठः। '--शोधनयोः' इत्यपि क्वचित् पाठः। 'पल्बूल--' इति, 'पल्वूल--' इति च क्वचिद् दृष्टः पाठः। 'लवनपतनयोः' इति दुर्गः।

पल्पूलकः-लिका, पिपल्पूलयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककलयतिवत् (176) ज्ञेयानि।

(983) "पश गतिनाशनयोः" (I-भ्वादिः-सक. अक. सेट्. पर.)

धातुपाठेऽपठितोऽप्ययं धातुः 'जपजभदहदशभञ्जपशां च' (7-4-86) इत्यत्रोपादानात् सौत्रोऽयमस्तीति प्रतीयते। अर्थनिर्देशस्य कुत्रापि स्पष्टतया

---

1. 'भृदृशीङ्यजिपर्वि—' [द. उ. 6. 14] इत्यादिना अतच्प्रत्यये रूपम्।
2. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि विभाषा णप्रत्ययः। पक्षे पचाद्यचि—पलः इति रूपम्।
3. संज्ञायां भावे घप्रत्ययः। बाहुलकात् क्लीबत्वम्। पलम्=मांसम्, उन्मान-विशेषश्च। परिमाणवाचकत्वेऽपि बाहुलकादेव घञ् न।
4. औणादिके [द. उ. 8-114] कलप्रत्यये रूपम्। पललम्=तिलकल्कः।
5. औणादिके [द. उ. 8-115] कालच्प्रत्यये रूपम्। पलालम्=निस्सारतृणादिकम्।

A. 'दुदूर्विंपून् धूर्वितुमेव गूर्तणं मूर्वन्तमापूर्वितपर्वताध्वरम्॥' धा. का. 1. 73.

B. 'स्थलीर्हली सचलिनीश्च तीर्त्वा पलन् हरिश्चात्मबलप्रपोलः।' धा. का. 2-22.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



अप्रतीतावपि, दशपाद्युणादिवृत्तौ (1-112) 'पशिः सौत्रो धातुर्नाशने' इति दर्शनात् नाशनार्थकत्वमस्येति ज्ञायते। "पसधातुर्दन्त्यान्तः सौत्रो गत्यर्थ इति माधवः, तालव्यान्त इति काशिका" इति बालमनोरमायाम्, तथा, **अष्टाध्यायीप्रकाशिकायाम्** (देवप्रकाशपातञ्जलकृतायाम्) 'जपजभ--' (7-4-86) इत्यत्र '**पम्पश्यते, पम्पशीति** गत्यर्थकोऽयं धातुः।' इत्युदाहृतत्वाच्च गतावप्ययं प्रयुज्यते इति ज्ञेयम्।

शब्विकरणस्यौत्सर्गिकत्वात्, **क्षीरतरङ्गिण्याम्** 'पशोऽनुपसर्गात्' (ग. सू. चुरादौ) इत्यत्र "गतावित्येव, अर्थानिर्देशात्। 'अनार्षोऽयम्' इति **चन्द्रः**। 'भ्वादेश्चुरादेश्चानुपसर्गस्य **पशेः** णिच्यदन्तत्वविधिः—' **इत्येके**। पशयति। उपसर्गान्नास्ति **प्रपशति**।" इत्युक्तत्वाच्च धातोरस्य भ्वादौ पाठः, गत्यर्थकत्वं चेति ज्ञायते। प्रकृतसूत्रे (7-4-86) '**पस**' इति दन्त्यान्तत्वेन **केचित्** पठन्ति।

गतौ सकर्मकः, नाशने त्वकर्मकः।

अनिट्कारिकासु धातोरस्योपादानाभावेन सेट्त्वं, 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति परस्मैपदत्वं चेति यथायथमूह्यम्।

पाशकः-शिका, पाशकः-शिका, पिपशिषकः-षिका, [1]पम्पशकः-पंपशकः-शिका;
पशिता-त्री, पाशयिता-त्री, पिपशिषिता-त्री, पम्पशिता-त्री;
पशन्-न्ती, पाशयन्-न्ती, पिपशिषन्-न्ती; —
पशिष्यन्-न्ती-ती, पाशयिष्यन्-न्ती-ती, पिपशिषिष्यन्-न्ती-ती; —
— पाशयमानः, पाशयिष्यमाणः, — पम्पश्यमानः, पम्पशिष्यमाणः;
[2]पट्-पड्-पशौ-पशः; — — —

| | | | |
|---|---|---|---|
| पशितम्-तः-तवान्, | पाशितः, | पिपशिषितः, | पम्पशितः-तवान्; |
| पशः, | पाशः, | पिपशिषुः, | पम्पशः; |
| पशितव्यम्, | पाशयितव्यम्, | पिपशिषितव्यम्, | पम्पशितव्यम्; |
| पशनीयम्, | पाशनीयम्, | पिपशिषणीयम्, | पम्पशनीयम्; |
| पाश्यम्, | पाश्यम्, | पिपशिष्यम्, | पम्पश्यम्; |
| ईषत्पशः-दुष्पशः-सुपशः; | | — | — |

1. यङन्ताण्वुलि, 'जपजभदहदशभञ्जपशां च' (7-4-86) इति अभ्यासस्य नुगागमः। 'स च पदान्तवद् वाच्यः' (वा. 7-4-85) इति पदान्तवद्भावे सति, 'वा पदान्तस्य' (8-4-59) इति परसवर्णविकल्पः। एवं यङन्ते सर्वत्र ज्ञेयम्।
2. क्विपि, 'व्रश्चभ्रस्ज—' (8-2-36) इत्यादिना षत्वे जश्त्वे च रूपम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| पश्यमानः, | पाश्यमानः, | पिपशिष्यमाणः, | पम्पश्यमानः ; |
| [1]पाशः, | पाशः, | पिपशिषः, | पम्पशः ; |
| पशितुम्, | पाशयितुम्, | पिपशिषितुम्, | पम्पशितुम् ; |
| [2]पष्टिः, | पाशना, | पिपशिषा, | पम्पशा ; |
| पशनम्, | पाशनम्, | पिपशिषणम्, | पम्पशनम् ; |
| पशित्वा, | पाशयित्वा, | पिपशिषित्वा, | पम्पशित्वा ; |
| प्रपश्य, | प्रपाश्य, | प्रपिपशिष्य, | प्रपम्पश्य ; |
| पाशम् २, | पाशम् २, | पिपशिषम् २, | पम्पशम् २ ; |
| पशित्वा २, | पाशयित्वा २, | पिपशिषित्वा २, | पम्पशित्वा २ ; |

[3]पशुः, [4]पांशुः ।

**(984) "पश बन्धने"** (X-चुरादिः-1720. सक. सेट्. उभ.) [अ]

पाशकः-शिका, पिपाशयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकजासयतिवत् (596) ज्ञेयानि । अस्य धातोर्णिज्विकल्पो नास्तीति विशेषः । [A]पाशितवान् ।

**(985) "पष गतौ"** (X-चुरादिः-1863. सक. सेट्. उभ. अदन्तः ।)

'पषोऽनुपसर्गात्' (ग. सू. चुरादौ) इत्यस्य स्वरूपमर्थादिकं च पूर्वस्मिन्नेव धातावुद्दिष्टमिति तत एव ज्ञेयम् । '**पशोऽनुपसर्गात्**' इति क्षीरस्वामि-

---

1. पश्यतेऽनेनेति करणे, संज्ञायाम् 'हलश्च' (3-3-121) इति घञ् । **पाशः**= आयुधविशेषः ।
2. क्तिनि, षत्वे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वे च रूपम् ।
3. 'उणादयो बहुलम्' (3-3-1) इति उप्रत्यये रूपम् । **पशुः**=चतुष्पाज्जातिः ।
4. औणादिके [द. उ. 1-112] कुप्रत्यये रूपम् । पश्यतेऽसौ-अल्पेनापि वायुना इति **पांशुः**=रेणुः । अत्र **दशपाद्युणादिवृत्तौ** 'पशि' इतीदित् धातुः सौत्रत्वेनोपात्तः । परं तु प्रकृत (7-4-86) सूत्रे अनिदितमेव धातुं प्रतीमः । अत्र [द. उ. 1-112] पाठो निरीक्ष्यः ।

A. 'मल्लो जिजम्भिषुरसूदितवीर्यमीशं
मुष्ट्या जजास बहु **पाशितवांश्च** दोष्णा ॥' धा. का. 3.38.

[अ] 'पष बन्धने' इति **पुरुषकार**संमतः पाठः । यदाह—"पाषण्डादिस्तु 'पष अनुपसर्गात्' इत्यस्य कथादेर्भविष्यति । '**पष** बन्धने' इत्यस्यैव वा युजादेः ।' (श्लो. 167 दैवव्याख्याने) " इति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



संमतः पाठः। पषकः-षिका, पिपषयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककलयतिवत् (176) ज्ञेयानि।

(986) "पसि नाशने" (X-चुरादिः-1616. सक. सेट्. उभ.)

इदित्करणात् णिचो वैकल्पिकत्वं ज्ञेयम्।

पंसकः-सिका, पिपंसयिषकः-षिका, पंसकः-सिका, पिपंसिषकः-षिका, पापंसकः-सिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि। [1]पांसुः[A]।

(987) "पा पाने" (I-भ्वादिः-925. सक. अनि. पर.)

'पाने पिबति, रक्षायां पाति, पायति शोषणे॥' (श्लो. ७) इति देवः।

| | | | |
|---|---|---|---|
| [2]पायकः-यिका, | [3]पायकः-यिका, | पिपासकः-सिका, | [4]पेपीयकः-यिका; |
| पाता-त्री, | पाययिता-त्री, | पिपासिता-त्री, | पेपीयिता-त्री; |
| [5]पिबन्-न्ती, | पाययन्-न्ती, | पिपासन्-न्ती; | — |
| पास्यन्-न्ती-ती, | पाययिष्यन्-न्ती-ती, | पिपासिष्यन्-न्ती-ती; | — |
| [6]व्यतिपिबमानः, | [7]पाययमानः, | व्यतिपिपासमानः, | पेपीयमानः; |

---

1. औणादिके [द. उ. 1-112] कुप्रत्यये दीर्घे च रूपमेवम्।
2. 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः। एवं णमुलादिष्वपि यथासम्भवं युक् ज्ञेयः।
3. ण्यन्तात् सर्वत्र 'शाच्छासाह्वाव्यावेपां युक्' (7-3-37) इति युगागमो ज्ञेयः। आदन्तलक्षणपुगागमस्य बाधकोऽयम्।
4. यङन्ते सर्वत्र, 'घुमास्थागापाजहातिसां हलि' (6-4-66) इति ईत्वम्। अभ्यासे गुणः।
5. शतरि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्र—' (7-3-78) इत्यादिना पिबादेशोऽङ्गस्य भवति। आदेशस्यादन्तत्वाद् गुणाभावः इति वृत्तिः। 'पिबतेर्गुणप्रतिषेधः' (वा. 7-3-78) इति वचनमत्र प्रमाणम्। 'लोपः पिबतेः—' (7-4-4) इत्यत्र 'पिबतेः' इति निर्देशात् गुणो न' इति वर्धमानः।
6. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच्। सन्नन्ते तु 'पूर्ववत् सनः' (1-3-62) इति शानजिति ज्ञेयम्।
7. धातोरस्य निगरणार्थत्वेऽपि, 'न पादमि—' (1-3-89) इति परस्मैपदनिषेधात् ण्यन्तात् 'णिचश्च' (1-3-74) इति शानजभवत्येव।

A. 'इत्यादिवादिषु जनेषु विमोटितारिः पापप्रपण्डिपदपांसुरवाज्यधामा।' धा.का. 3. 23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



व्यतिपास्यमानः, पाययिष्यमाणः, व्यतिपिपासिष्यमाणः, पेपीयिष्यमाणः ;
[1]दधिपीः-दधिप्यौ-दधिप्यः ; — — —
[2]पीतम्-पीतः-पीतवान् , पायितः, पिपासितः, पेपीयितः-तवान् ;
[3]उत्पिबः-विपिबः-पिबः, [4]रुधिरपायी[A], [5]मधुपायी[B], [6]क्षीरपायी,
[7]सुरापः-शीधुपः-सुरापी-शीधुपी, [C]मधुपः, पादपः, क्षीरपा[ब्राह्मणी],
[8]द्विपः-[D]-कच्छपः, [9]कुण्डपाय्यः[E] [क्रतुः], [10]क्षीरपीवा-क्षीरपीवरी,

---

1. क्विपि, 'घुमास्थागापा—' (6-4-66) इत्यादिना ईत्वे रूपमेवम् ।
2. निष्ठायाम् , ईत्वे रूपमेवम् । एवं क्तिन्क्त्वाप्रत्ययादिष्वपि ईत्वं ज्ञेयम् । **पीतः** इत्यत्र, प्रत्यवसानार्थत्वादस्य धातोः (**प्रत्यवसानम्**=गलबिलाधःसंयोगानुकूल-व्यापारः) अधिकरणे क्तप्रत्ययो ज्ञेयः । अर्शआद्यजन्तत्वेन '**पीता** गावः' इत्यादिषु स्थलेषु प्रयोग उपपन्नः ।
3. '**पा**घ्राध्माधेट्दृशः शः' (3-1-137) इति कर्तरि शप्रत्ययः । तस्य शित्त्वात् '**पा**घ्रा—' (7-3-78) इत्यादिना पिबादेशे, पररूपे च रूपम् । निरुपसृष्टादेवायं शप्रत्यय इति **केचित्** । सोपसृष्टादेवेति **परे** साधयन्ति ।
4. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इत्यनेन णिनिप्रत्ययः । **रुधिरपायी**= राक्षसादिः ।
5 'बहुलमाभीक्ष्ण्ये' (3-2-81) इति णिनिप्रत्ययः । **आभीक्ष्ण्यम्**=पौनःपुन्यम् ।
6. 'व्रते' (3-2-80) इति णिनिप्रत्ययः । क्षीरपानं व्रतं यस्य स एवमुच्यते ।
7. '**गा**पोष्टक्' (3-2-8) इति कर्मण्युपपदे टक्प्रत्ययः । तत्र '**पिबतेः** सुराशी-ध्वोरिति वक्तव्यम्' (वा. 3-2-8) इति वचनात् उपपदनियमः । स्त्रियां टित्त्वात् ङीप् भवति **सुरापी-शीधुपी** इति । अन्योपपदेषु तु '**आतो**ऽनुपसर्गे कः' (3-2-3) इति कप्रत्यये टापि **क्षीरपा** इत्यादिकं भवतीति विशेषः ।
8. 'सुपि स्थः' (3-2-4) इत्यत्र, 'सुपि' इति योगविभागात् कप्रत्ययः । द्वाभ्यां पिबतीति **द्विपः**=गजः ।
9. 'क्रतौ **कुण्डपाय्य**सञ्चाय्यौ' (3-1-130) इत्यनेन ण्यति, आयादेशश्च निपा-तितः । कुण्डेन पीयतेऽस्मिन् सोम इति क्रतुविशेषेऽभिधेये **कुण्डपाय्यशब्दः** साधुः ।
10. '**आतो** मनिन्क्वनिब्वनिपश्च' (3-2-74) इत्यनेन क्वनिपि ईत्वे **क्षीरपीवा** इति रूपम् । स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीप् रेफश्च भवति ।

A. 'राक्षसाः क**पि**मादाय पतिं **रुधिरपायिणाम्** ॥' भ. का. 9-95.
B. 'उपेयुर्**मधुपायिन्यः** क्रोशन्त्यस्तं कपिस्त्रियः ॥' भ. का. 6.127.
C. 'व्रीडजाड्यमभजन् **मधुपा** सा स्वां मदात् प्रकृतिमेति हि सर्वः ॥' शि. व. 10-18.
D. 'शर्मदं मारुतिं दूतं विषमस्थः **कपिद्विपम्** ।' भ. का. 6-89.
E. '**कुण्डपाय्य**वतां कच्चिदग्निचित्यावतां तथा ।' भ. का. 6-68.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]घृतपावा, [2]कीलालपाः, पीवा, [3]गजपायी, [4]पपिः, [5]पपिवान्, [6]पामा, [7]दधिपायः, पापः, [A]पिपासुः, पेप्यः ;

| | | | |
|---|---|---|---|
| पातव्यम्, | पाययितव्यम्, | पिपासितव्यम्, | पेपीयितव्यम्; |
| [8]प्रपानीयम्-प्रपाणीयम्, | पायनीयम्, | पिपासनीयम्, | पेपीयनीयम्; |
| पेयम्, | पाय्यम्, | पिपास्यम्, | पेपीय्यम्; |
| [9]ईषत्पानः[B]-[C]दुष्पानः-सुपानः ; | | — | — |
| पीयमानः, | पाय्यमानः, | पिपास्यमानः, | पेपीय्यमानः ; |
| [10]प्रपा, | पायः, | पिपासः, | पेपीयः ; |

---

1. 'आतो मनिन्—' (3-2-74) इत्यनेन वनिपि रूपमेवम् ।
2. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति विच्प्रत्यये रूपम् ।
3. 'कर्तर्युपमाने' (3-2-79) इति णिनिप्रत्ययः । गज इव पिबतीति **गजपायी**।
4. 'आदृगमहन—' (3-2-171) इति तच्छीलादिषु किः किन् वा प्रत्ययः, तस्य लिड्वद्भावातिदेशात् द्विर्वचनम् । 'आतो लोप इटि च' (6-4-64) इति आकारलोपः । अभ्यासे ह्रस्वः ।
5. 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (4-3-24) इत्यत्र भाष्ये 'पपुष आगतम्-पपिवद्रूप्यम्—' इति प्रयुक्तत्वात् छान्दसोऽपि क्वसुः क्वचिद् भाषायामपि भवतीति ज्ञायते । क्वसौ, द्विर्वचने, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपमेवम् ।
6. 'आतो मनिन्—' (3-2-74) इति मनिन्प्रत्यये रूपम् ।
7. 'अण् कर्मणि च' (3-3-12) इति क्रियार्थक्रियायामण् । कप्रत्ययापवादः ।
8. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति णत्वविकल्पः ।
9. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच्प्रत्ययः । 'दुष्पानः' इत्यत्र 'षात् पदान्तात्' (8-4-35) इति निषेधाण्णत्वं न ।
10. 'घञर्थे कविधानम् स्थास्नापाव्यधिहनियुध्यर्थम्' (वा. 3-3-58) इति घञर्थे कप्रत्ययः । प्रपिबन्त्यस्यामिति **प्रपा**=पानीयशाला ।

A. 'इतः स मित्रावरुणौ किमेतौ किमश्विनौ सोमरसं **पिपासू** ।' भ. का. 2. 41.
B. 'भवतु वपुषा यावांस्तावान् अगस्त्यरुषा पुनः
विधिरयमपाम् **ईषत्पान**स्तपांसि नमोऽस्तु वः ॥' अनर्घराघवे 7.14.
C. '**दुष्पानः** पुनरेतेन **कपिना** भृङ्गसंभृतः ।' भ. का. 9.108.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पातुम्, पाययितुम्, पिपासितुम्, पेपीयितुम्;

[1]सम्पीतिः, सपीतिः, [2]क्षीरपायिका, पायना, पिपासा, पेपीया;

[3]क्षीरपाणाः, [A]सुरापाणाः, सौवीरपाणाः, कषायपाणाः (वा उशीनरादयः।)

[4]मधुपानम्, [5]क्षीरपाणम्-क्षीरपानम् [वर्तते], सुरापाणः-सुरापानः [कंसः],

[6]पयःपानम्[B] [सुखम्], पायनम्, पिपासनम्, पेपीयनम्;

पीत्वा, पाययित्वा, पिपासित्वा, पेपीयित्वा;

[7]निपाय, प्रपाय्य, प्रपिपास्य, प्रपेपीय्य;

पायम् २, पीत्वा २, } पायम् २, पाययित्वा २, } पिपासम् २, पिपासित्वा २, } पेपीयम् २; पेपीयित्वा २; }

[8]पायुः, [9]पाकः,

---

1. 'स्थागापापचो भावे' (3-3-95) इति स्त्रियां सोपसर्गादपि क्तिन्प्रत्ययः। समाना पीतिः इति विशेषणसमासे 'समानस्य च्छन्दसि—' (6-3-84) इत्यत्र 'समानस्य' इति योगविभागात् सभावः। **सपीतिः**=सहपानम्।

2. 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (3-3-111) इति अर्हार्थे ण्वुच्। 'शायिकाऽद्य तव प्रापद्, अर्हसि **क्षीरपायिकाम्**।' इति प्र. सर्वस्वे।

3. '**पानं** देशे' (8-4-9) इति णत्वम्। अत्र क्षीरं पानं येषां ते **क्षीरपाणाः** इति वृत्तिः। **क्षीरपाणादयः** शब्दाः देशविशेषवाचकाः। **क्षीरपाणा** उशीनराः। **सुरापाणः** प्राच्याः। **सौवीरपाणा** वाहीकाः। **कषायपाणा** गन्धाराः।

4. देशविशेषाभिधानाभावादत्र णत्वं न।

5. 'वा भावकरणयोः' (8-4-10) इति णत्वविकल्पः। भावार्थे—**क्षीरपाणम्—क्षीरपानम्** इति, करणार्थे **सुरापाणः-सुरापानः** इति चोदाहरणमिति ज्ञेयम्।

6. 'कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम्' (3-3-116) इति ल्युट्। अत्र **पयःपानेन** पयःपानकर्तुः शरीरसुखसद्भावादीदृशस्थलेषु ल्युट् इति ज्ञेयम्।

7. 'न ल्यपि' (6-4-69) इति ईत्वनिषेधः। '**निपीय** यस्य—' (नैषधे 1-1) इत्यादयः प्रयोगाः 'पीङ् पाने' इत्यस्माल्ल्यपि साधव इति ज्ञेयम्।

8. '**कृवापा**—' [द. उ. 1-86] इत्यादिना उण्प्रत्यये रूपम्।

9. 'इण्भीकापा—' [द. उ. 3-21] इत्यादिना कन्प्रत्ययः। **पाकः**=असुरविशेषः, अर्भकश्च।

A. '**सुरापाण**परिक्षीबं रिपुदर्पहरोदयम्।' भ. का. 9. 96.

B. '**पयःपान**मिवाशंधुः महानायादशोभनः॥' भ. का. 7. 79.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पीथः, [2]पम्पा, [3]पात्रम्, [4]पयः, [5]पेरुः ।

(988) "पा रक्षणे" (II-अदादिः-1056. सक. अनि. पर.)

'पाने पिबति, रक्षायां पाति, पायति शोषणे ॥' (श्लो. 5) इति देवः ।

[6]पायकः-यिका, [7]पालकः-[8]गोपालकः-लिका, पिपासकः-सिका, [9]पापायकः-यिका ;

[A]पाता-पात्री, पालयिता-त्री, पिपासिता-त्री, पापायिता-त्री ;

[10]पान्-न्ती-[B]ती, पालयन्-न्ती, पिपासन्-न्ती ; —

पास्यन्-न्ती-ती, पालयिष्यन्-न्ती-ती, पिपासिष्यन्-न्ती-ती ; —

---

1. 'पातॄ—' [द. उ. 6-32] इत्यादिना थक्प्रत्यये, ईत्त्वे च रूपम् । पिबति तेजांसि इति **पीथः**=आदित्यः मकरश्च ।

2. औणादिके [द. उ. 7-7] पप्रत्यये बाहुलकात् ह्रस्वनुमागमयोः निपातितयो रूपमेवम् । पिबन्त्यस्यामिति **पम्पा**=सरोविशेषः ।

3. औणादिके त्रप्रत्यये [द. उ. 8-90] रूपम् । पिबन्त्यनेनेति **पात्रम्**=भाजनम् ।

4. '**पिबतेरि च**' [द. उ. 9-50] इत्यसुन्प्रत्यये इकारश्चान्तादेशः । **पयः**=जलं क्षीरं च ।

5. औणादिके रुप्रत्यये, धात्वन्तस्य एकारे च रूपम् । **पेरुः**=आदित्यः ।

6. '**आतो युक् चिण्कृतोः**' (7-3-33) इति युगागमः । एवं घञादिष्वपि ज्ञेयम् ।

7. '**पातेर्लुग् वक्तव्यः**' (वा. 7-3-37) इति ण्यन्ते सर्वत्र लुगागमः ।

8. गवां पालकः **गोपालकः** । 'नित्यं क्रीडाजीविकयोः' (2-2-17) इत्यनेन जीविकार्थकस्य नित्यसमासः ।

9. '**गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्**' (वा. 2 4-77) इति वचनादस्य लुग्विकरणत्वेन, '**लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य**' (परिभाषा 91) इत्यनेन च '**घुमास्थागापा—**' (6-4-66) इत्यादिषु नास्य ग्रहणम् । तेन ईत्वादिकमस्य नेति ज्ञेयम् । तेन यङन्ताण्वुलि द्वित्वे, अभ्यासह्रस्वे च, '**दीर्घोऽकितः**' (7-4-83) इत्यभ्यासस्य दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।

10. शत्रन्तात् स्त्रियाम्, '**आच्छीनद्योर्नुम्**' (7-1-80) इति नुम्विकल्पः ।

A. 'यद्भागिभाजोऽपि हि जानते तान् ज्ञेयं यदष्टादश यश्च **पाता** ।' वा. वि. 2.53.

B. '**पान्त्यः** शिशून्, धान्यधनानि रान्त्यो, लान्त्यश्च काश्चित् कुसुमानि दान्त्यः ॥' धा. का. 2. 49.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]व्यतिपानः, पालयमानः, [2]व्यतिपिपासमानः, पापायमानः ;
व्यतिपास्यमानः, पालयिष्यमाणः, व्यतिपिपासिष्यमाणः, पापायिष्यमाणः ;
[3]नपात्-नपातौ-नपातः, [A]तनूनपात्, अपान्नपात्, अपोनपात् ;
पातम्-तः-तवान्, पालितः, पिपासितः, पापायितः-तवान् ;
[4]विश्वपाः-सुपाः, [5]गोपः-नृपः, [6]अधिपः, [7]पायः, [8]गोपायी,
[9]नगरपायी, [10]पपिवान्, पालः, [11]गोपालः, पिपासुः, पापाः ;
पातव्यम्, पालयितव्यम्, पिपासितव्यम्, पापायितव्यम् ;
[12]प्रपाणीयम्-प्रपानीयम्, पालनीयम्, पिपासनीयम्, पापायनीयम् ;
पेयम्, पाल्यम्, पिपास्यम्, पापाय्यम् ;
[13]ईषत्पानः-दुष्पानः-सुपानः ; — —
पायमानः, पालयमानः, पिपास्यमानः, पापाय्यमानः ;

---

1. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति कर्मव्यतीहारे शानच् ।
2. सन्नन्तात् 'पूर्ववत् सनः' (1-3-62) इत्यनेन कर्मव्यतीहारे शानच् ।
3. न पातीति **नपात्**=नप्ता । 'नभ्राण्नपात्—' (6-3-75) इत्यत्र निपातनात् नञ्तत्पुरुषे नञः प्रकृतिभावः, क्विपि तुगागमश्च । तन्वा न पातीति **तनूनपात्**=अग्निरिन्द्रश्च । अपोनपात्, **अपांनपात्** इत्यपि देवताविशेषवाचके पदे । सर्वेऽप्येते क्विबन्ताः । प्रक्रिया पूर्ववत् ।
4. विश्वं पातीति **विश्वपाः** । 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति विचि रूपमेवम् । एवं **सुपाः** इत्यत्रापि ।
5. '**आतो**ऽनुपसर्गे कः' (3-2-3) इति कर्मण्युपपदे कर्तरि कप्रत्ययः । एवं **नृपः** इत्यादिष्वपि ज्ञेयम् ।
6. '**आत**श्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः ।
7. 'श्याऽऽद्व्यध—' (3-1-141) इत्यादिना आदन्तलक्षणे कर्तरि णप्रत्यये रूपम् ।
8. 'व्रते' (3-2-80) इति णिनिप्रत्यये युगागमः ।
9. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिप्रत्ययः ।
10. छान्दसोऽपि क्वसुरत्र धातौ भवतीति 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (4-3-24) इत्यत्र भाष्ये '**पपुष** आगतं **पपिवद्**रूप्यम्—'इति प्रयोगाज्ज्ञायते । तेन क्वसुप्रत्यये, लिड्वद्भावेन द्विर्वचने, '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपे, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपम् ।
11. गाः पालयतीति **गोपालः** । 'कर्मण्यण्' (3-2-1) इति ण्यन्तादस्मादण्प्रत्ययः ।
12. 'शेषे विभाषा—(8-4-18) इत्यनेन णत्वविकल्पः ।
13. '**आतो** युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच् ।
A. 'बभार बाष्पैर्द्विगुणीकृतं तनुः **तनूनपाद्** धूमवितानमाधिजैः ॥' शि.व. 1. 62.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पायः, पालः, पिपासः, पापायः ;
पातुम्, पालयितुम्, पिपासितुम्, पापायितुम् ;
पातिः, [1]सम्पातिः, पालना, पिपासा, पापाया ;
पात्वा, पालयित्वा, पिपासित्वा, पापायित्वा ;
प्रपाय, प्रपाल्य, प्रपिपास्य, प्रपापाय्य ;
पायम् २, पात्वा २, } पालम् २, पालयित्वा २, } पिपासम् २, पिपासित्वा २, } पापायम् २ ; पापायित्वा २; }
[2]पतिः, [3]पिता, [4]पापम्, [5]पुमान्, [6]पाथः.

(989) "पार कर्मसमाप्तौ" (X-चुरादिः-1911. सक. सेट्. उभ.)

अदन्तः।

पारकः-रिका, पिपारयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककालयतिवत् (185) ज्ञेयानि ।

[7]पारयः, [8]पारयिष्णुः, [9]पारणा, [A]निष्पारः ।

---

1. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच्। पुंल्लिङ्गोऽयम्। **सम्पातिः**=जटायुभ्राता।
2. '**पातेर्डतिः**' (द. उ. 1. 27.) इति डतिप्रत्ययः। पातीति **पतिः**=नायकः।
3. औणादिके (द. उ. 2. 3.) तृन्प्रत्यये, तृच्प्रत्यये वा रूपम्। तत्र [द. उ. 2. 3.] निपातनात् धातोरित्वम्। पातीति **पिता**=जनकः।
4. '**पानी**विषिभ्यः पः' [द. उ. 7.2.] इति पप्रत्यये रूपम्। दुर्जनैः पायते इति **पापम्**=कायवाङ्मनोदुश्चरितम्।
5. '**पातेर्डुम्सुन्**' [द. उ. 9.48.] इति डुम्सुन्प्रत्यये, टिलोपे च रूपम्। पातीति **पुमान्**=नरः।
6. '**पाते**र्बले जुट् च ; उदके थुट् च, अन्ने च' [द. उ. 9-63 to 5. इति बलेऽभिधेये जुडागमे **पाजः**=अग्निः; जलेऽभिधेये अन्ने च, थुडागमे **पाथः**=जलमन्नं च
7. 'अनुपसर्गाल्लिम्पविन्दधारि**पारि**—' (3-1-138) इति कर्तरि शप्रत्यय. । शप्रत्ययस्य शित्त्वेन सार्वधातुकत्वात् 'णेरनिटि' (6-4-51) इति णिलोपो न। शित्त्वेन शपि पररूपे गुणेऽयादेशे च रूपमेवम्।
8. 'णेश्छन्दसि'(3-2-137) इति ताच्छीलिकः इष्णुच्प्रत्ययः। 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः। 'वीरुधः **पारयिष्णवः**—' इति श्रौतः (ऋ. वे.(10-97-3) प्रयोगः)
9. 'ण्यासश्रन्थो युच्' (3-3-107) इति युच्। णत्वम्।
A. 'नि[दु]ष्पारदुश्चरिततीरणकृथेशो नो चक्षमे पुटगितुं तमकत्रितोष्मा ॥' धा. का. 3. 59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(990) "पाल रक्षणे" (X-चुरादिः-1609. सक. सेट्. उभ.)

'पल—' इति मैत्रेयक्षीरस्वाम्यादयः पठन्ति ।

पालकः-लिका, पिपालयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककालयतिवत् (185) ज्ञेयानि । [1]कपोतपाली[A] ।

(991) "पि गतौ" (VI-तुदादिः-1405. सक. अनि. पर.)

| | | | |
|---|---|---|---|
| पायकः-यिका, | पायकः-यिका, | [2]पिपीषकः-षिका, | [3]पेपीयकः-यिका; |
| पेता-त्री, | पाययिता-त्री, | पिपीषिता-त्री, | पेपीयिता-त्री, |
| [4]पियन्[B]-न्ती-ती, | पाययन्-न्ती, | पिपीषन्-न्ती; | — |
| पेष्यन्-न्ती-ती, | पाययिष्यन्-न्ती-ती, | पिपीषिष्यन्-न्ती-ती; | — |
| — | पाययमानः, पाययिष्यमाणः, | — | पेपीयमानः, पेपीयिष्यमाणः; |
| सुपित्-पितौ-पितः; | — | — | — |
| पितम्-तः, | पायितः, | पिपीषितः, | पेपीयितः-तवान्; |
| पयः, | पायः, | पिपीषुः, | पेप्यः; |
| पेतव्यम्, | पाययितव्यम्, | पिपीषितव्यम्, | पेपीयितव्यम्; |
| पयनीयम्, | पायनीयम्, | पिपीषणीयम्, | पेपीयनीयम्; |
| पेयम्, | पाय्यम्, | पिपीष्यम्, | पेपीय्यम्; |
| ईषत्पयः-दुष्पयः-सुपयः; | | — | — |
| पीयमानः, | पाय्यमानः, | पिपीष्यमाणः, | पेपीय्यमानः; |

1. कपोतं पालयतीति **कपोतपालः** । 'कर्मण्यण्' (3-2-1) इत्यण् । स्त्रियाम्, अणन्तत्वेन ङीप् ।
2. सन्नन्तात् ण्वुलि, 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
3. यङन्तात् ण्वुलि, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. शतरि, '**तुदादिभ्यः**—' (3-1-77) इति शप्रत्यये, 'अचि श्नुधातुभ्रुवाम्—' (6-4-77) इतीयङादेशः ।

A. 'चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः **कपोतपालीषु** निकेतनानाम् ।' शि. व. 3. 51.

B. 'व्यापारेऽत्र तदाऽमरानपि रियन् आशाः **पियन्** आधित-कौर्योत्क्षीणधनुष्प्रसूतनिनदः कंसे व्यकारीद् गरम् ।' धा. का. 2,83.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]पयः, | पायः, | पिपीषः, | पेपीयः ; |
| पेतुम् , | पाययितुम् , | पिपीषितुम् , | पेपीयितुम् ; |
| पितिः, | पायना, | पिपीषा, | पेपीया ; |
| पयनम् , | पायनम् , | पिपीषणम् , | पेपीयनम् ; |
| पित्वा, | पाययित्वा, | पिपीषित्वा, | पेपीयित्वा ; |
| प्रपित्य, | प्रपाय्य, | प्रपिपीष्य, | प्रपेपीय्य ; |
| पायम् २, पित्वा २, | पायम् २, पाययित्वा २, | पिपीषम् २, पिपीषित्वा २, | पेपीयम् २ ; पेपीयित्वा २. |

(992) " पिच्छ कुट्टने " (X-चुरादिः-1576. सक. सेट्. उभ.)

'पिच्च' इति क्षीरस्वामी ।

पिच्छकः-च्छिका, पिपिच्छयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुट्टयतिवत् (207) ज्ञेयानि । ल्युटि-पिच्छनम्[A] ।

(993) " पिजि वर्णे " (II-अदादिः-1028. अक. सेट्. आत्म.)

'—सम्पर्चने' इति शाकटायनः । '—वर्णसम्पर्चनयोः' इति सम्मताकारः । '—अवयवे', 'अव्यक्ते शब्दे च' इति काश्यपः । 'पृजि—' इत्येके । इति मा. धा. वृत्तौ ।

'वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति ।' (श्लो. 67) इति देवः । पिञ्जकः-ञ्जिका, पिञ्जकः-ञ्जिका, पिपिञ्जिषकः-षिका, पेपिञ्जकः-ञ्जिका ; इत्यादीनि समस्तान्यपि रूपाणि आदादिकनिजतिवत् (672) ज्ञेयानि । शानचि—[B]पिञ्जानः ।

(994) " पिजि हिंसाबलादाननिकेतनेषु "

(X-चुरादिः-1567. सक. सेट्. उभ.)

'पिज—' इति शाकटायनः ।

पिञ्जकः-ञ्जिका, पिपिञ्जयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि

---

1. भावे, 'एरच्' (3-3-56) इत्यच्प्रत्ययः । घञपवादः ।

A. 'कः स्मापयेत विभुमेनमशिश्लिषद् यः पन्थन् व्रजेऽत्र भवदिच्छनभाभिरेव ।' धा. का. 3. 18.

B. 'शिञ्जानपिञ्जानसुवर्णभूषासम्पृञ्जितो वृज्यवित्रञ्जिसेव्यः ।' धा. का. 2.46.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



चौरादिककुंशयतिवत् (232) ज्ञेयानि । भावे घञर्थेऽचि [A]विपिञ्जः ।

(995) " **पिजि भाषार्थः** " (X-चुरादिः-1758. सक. सेट्. उभ.)

'........भाषार्थे **पिञ्जयेदि**ति ।' (श्लो. 67) इति **देवः**। **आस्वदीयः** ।
पिञ्जकः-ञ्जिका, पिपिञ्जयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि । इदित्करणात् णिचो वैकल्पिकत्वम् ।

(996) " **पिट शब्दसंघातयोः** " (I-भ्वादिः-311. अक. सेट्. पर.)

पेटकः-टिका, पेटकः-टिका, पिपिटिषकः-पिपेटिषकः-षिका, पेपिटकः-टिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**केटति**वत् (190) बोध्यानि । घञन्ते, पेटी[B] इति । [1]पिटकम् ।

(997) " **पिठ हिंसासंक्लेशनयोः** " (I-भ्वादिः-339. सक. सेट्. पर.)

पेठकः-ठिका, पेठकः-ठिका, पिपिठिषकः-पिपेठिषकः-षिका, पेपिठकः-ठिका ; इत्यादीनि सर्वाणि रूपाणि **केटति**वत् (190) ज्ञेयानि । [2]पीठम्[C], पीठी ।

(998) " **पिडि संघाते** " (I-भ्वादिः-274. अक. सेट्. आत्म.)

'संघाते पिण्डयेत् पिण्डेस्तत्रैव शपि **पिण्डते**।' (श्लो. 90) इति **देवः** ।
पिण्डकः-ण्डिका, पिण्डकः-ण्डिका, पिपिण्डिषकः-षिका, पेपिण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि । पिण्डमानः, पिण्डयमानः, पिपिण्डिषमाणः, पिपिण्डिषिष्यमाणः, इति शानचि रूपाणीति विशेषः । पचाद्यचि-पिण्डः[D] ।

---

1. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3. 5.) इति क्वुन्प्रत्यये रूपम् । **पिटकम्** = पर्वतशिखरः ।
2. घञि, गुणापवादतया, 'अन्येषामपि दृश्यते' (6-3-137) इति दीर्घः ।

A. 'आश्वाठितारिकुलतुङ्ग**विपिञ्ज**शीलः संपेसयन् गृहमसान्त्वयद् एष गोपीः ।' धा. का. 3.17.

B. 'क्वचिच्च **पेटी**शतपूर्णहाटकान् क्वचित् सटालोटनलोलघोटकान् ॥' धा. का. 1.41.

C. 'रोठन् नृशंसालुठितैरनोठकैर्वृतान् धनाढ्यैर्मणि**पीठ**संश्रयैः ॥' धा. का. 1. 44.

D. 'स भण्डिलो भोजनृपाल**पिण्डभुक्** प्रमुण्डितांस्तत्र जनान् अतुण्डकान् ॥' धा. का. 1. 36.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(999) **"पिडि संघाते"** (X-चुरादिः-1670. अक. सेट्. उभ.)

'सङ्घाते **पिण्डयेत्** पिण्डेस्तत्रैव शपि पिण्डते ।' (श्लो. 90) इति **देवः** ।
पिण्डकः-ण्डिका, पिपिण्डयिषकः-षिका, पिण्डकः-ण्डिका, पिपिण्डिषकः-षिका, पेपिण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**चिन्तयति**वत् (523, बोध्यानि । [A]पिण्डितः ।

(1000) **"पिवि सेचने"** (I-भ्वादिः-588. सक. सेट्. पर.)

'—सेवने' इति **केचित्** ।

पिन्वकः-न्विका, पिन्वकः-न्विका, पिपिन्विषकः-षिका, पेपिन्वकः-न्विका ; इत्यादीनि समस्तान्यपि रूपाणि भौवादिक**जिन्वति**वत् (604) ज्ञेयानि । [B]पिन्वितम् ।

(1001) **"पिश अवयवे"** (VI-तुदादिः-1437. अक. सेट्. पर.)

**मुचादिः** । अवयवे=अवयवक्रियायामित्यर्थः । अयं दीपनायामपि वर्तते । 'त्वष्टा रूपाणि पिंशतु—' ऋ. वे. (10-184-1), 'नक्षत्रेभिः पितरो द्यामपिंशन् ।' ऋ. वे. (10-68-11) इत्यादिषु दीपनार्थे दर्शनात् ।
पेशकः-शिका, पेशकः-शिका, पिपिशिषकः-पिपेशिषकः-षिका, पेपिशकः-शिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**केटति**वत् (190) ज्ञेयानि । शतरि—[1]पिंशन्-ती, इति रूपम् ।

(1002) **"पिष्लृ सञ्चूर्णने"** (VII-रुधादिः-1452. सक. अनि. पर.)

सञ्चूर्णनम्=धान्यादीनां चूर्णीकरणम्, हिंसा च ।

पेषकः-षिका, पेषकः-षिका, [2]पिपिक्षकः-क्षिका, पेपिषकः-षिका ; पेष्टा-पेष्ट्री, पेषयिता-त्री, पिपिक्षिता-त्री, पेपिषिता-त्री ;

---

1. शतरि, तुदादित्वात् शप्रत्यये, '**शे मुचादीनाम्**' (7-1-59) इति नुमि रूपमेवम् ।

2. सन्नन्ताण्वुलि, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, 'षढोः कः सि' (8-2-41) इति षकारस्य ककारे, 'इण्कोः' (8-3-57) इति सकारस्य षत्वे च रूपमेवम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

A. 'इत्थं वदत्यसुरजासिनि **पिण्डिता**यस्स्थेमाऽथ रोषितमतिः प्रतिमल्लदेपी ।' धा. का. 3. 32.

B. 'विश्वेन्वितं सङ्घाधु**पिन्वित**।श्कं मिन्वन्तमुच्चैः कृपयैव निन्वकान् ।' धा.का.1.75.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[[1]चौरस्य] पिंषन्-ती, [धानाः] पिंषन्, पेषयन्-न्ती, पिपिक्षन्-न्ती; —
[A]पेक्ष्यन्-न्ती-ती, पेषयिष्यन्-न्ती-ती, पिपिक्षिष्यन्-न्ती-ती; —
—पेषयमाणः, पेषयिष्यमाणः, — पेपिष्यमाणः, पेपिषिष्यमाणः;
पिट्-पिषौ-पिषः; — — —
पिष्टम्-ष्टः, [2]पिष्टः, पेषितः, पिपिक्षितः, पेपिषितः-तवान्;
पिषः, [3]पेषणः, पेषः, पिपिक्षुः, पेपिषः;
पेष्टव्यम्, पेषयितव्यम्, पिपिक्षितव्यम्, पेपिषितव्यम्;
पेषणीयम्, पेषणीयम्, पिपिक्षणीयम्, पेपिषणीयम्;
पेष्यम्, पेष्यम्, पिपिक्ष्यम्, पेपिष्यम्;
ईषत्पेषः-दुष्पेषः-सुपेषः; — —
पिष्यमाणः, पेष्यमाणः, पिपिक्ष्यमाणः, पेपिष्यमाणः;
पेषः, पेषः, पिपिक्षः, पेपिषः;
पेष्टुम्, पेषयितुम्, पिपिक्षितुम्, पेपिषितुम्;
पिष्टिः, [4]पिष्टिः, पेषणा, पिपिक्षा, पेपिषा;
पेषणम्, पेषणम्, पिपिक्षणम्, पेपिषणम्;
पिष्ट्वा, पेषयित्वा, पिपिक्षित्वा, पेपिषित्वा;
विनिष्पिष्य, प्रपेष्य, प्रपिपिक्ष्य, प्रपेपिष्य;
[5]शुष्कपेषम्[B], [C]चूर्णपेषम्, रूक्षपेषं वा पिनष्टि। [6]उरःप्रतिपेषं[D]

1. 'जासिनिप्रहणनाटक्राथ**पिषां** हिंसायाम्' (2-3-56 इति कर्मणि षष्ठी। हिंसाभिन्नार्थे तु 'धानाः **पिंषन्**' इत्यत्र न।
2. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तप्रत्ययः। **पिष्टः**=सक्तुः।
3 नन्द्यादेः (3-1-134) आकृतिगणत्वात् कर्तरि ल्युः।
4. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच्। **पिष्टिः**=सक्तुः।
5. 'शुष्कचूर्णरूक्षेषु **पिषः**' (3-4-35) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुलन्तधातोरेवानुप्रयोगः। एवं **चूर्णपेषम्**, **रूक्षपेषम्** इत्यत्रापि ज्ञेयम्।
6. 'स्वाङ्गे—' (3-4-54) इत्यनुवर्तमाने, 'परिक्लिश्यमाने च' (3-4-55) इति द्वितीयान्तात् णमुल्। कृत्स्नमुरः पीडयन्तो युध्यन्ते इत्यर्थः। अध्रुवार्थोऽयं योगः।

A. '......**पेक्ष्यत्सु** माधवमभङ्गभुजेषु तेषु॥' धा. का. 3.2.
B. '**शुष्कपेषं पिनष्म्युर्वीम्** अखिन्दानः स्वतेजसा॥' भ. का. 6.37.
C. 'वर्म करतलयुगेन महत्तनु**चूर्णपेषम**पिषद् रुषा परः॥' शि. व. 15.76.
D. 'पीडिते पुर **उरःप्रतिपेषं** भर्तरि स्तनयुगेन युवत्याः।' शि. व. 10.46.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



युध्यन्ते । [1]उदपेषं पिनष्टि । [A]मूर्धपेषम्, मूर्धानं पेषं वा युध्यन्ते ।

पेषम् २, पिष्ट्वा २, } पेषम् २, पेषयित्वा २, } पिपिक्षम् २, पिपिक्षित्वा २, } पेपिषम् २; पेपिषित्वा २; }

[2]पिनाकः, पिण्याकम् ।

(1003) "पिस गतौ" (X-चुरादिः-1568. सक. सेट्. उभ.)

पेसकः-सिका, पिपेसयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचोरयतिवत् (546) ज्ञेयानि । [B]संपेसयन् ।

(1004) "पिसि भाषार्थः" (X-चुरादिः-1763. सक. सेट्. उभ.)

आस्वदीयः ।

'णौ पिंसयति भाषार्थे, गत्यां तु शपि पेसति ।' (श्लो. 192) इति देवः ।

पिंसकः-सिका, पिपिंसयिषकः-षिका, पिंसकः-सिका, पिपिंसिषकः-षिका, पेपिंसकः-सिका;

इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि ।

(1005) "पिसृ गतौ" (I-भ्वादिः-719. सक. सेट्. पर.)

'इह क्वचित्कोशे विसृ वेसृ—इति पठ्यते ।' इति मा. धा. वृत्तौ ।

'णौ पिंसयति भाषार्थे, गत्यां तु शपि पेसति ।' (श्लो. 192) इति देवः ।

पेसकः-सिका, पेसकः-सिका, पिपिसिषकः-पिपेसिषकः-षिका,

---

1. 'स्नेहने पिषः' (3-4-38) इति णमुल् । 'पेषंवासवाहनधिषु च' (6-3-58) इति उदकशब्दस्योदादेशः । उदकेन पिनष्टीत्यर्थः ।

2. 'पिनाकादयश्च' [द. उ. 3-34] इति आकप्रत्यये, षकारस्य नकारः, गुणाभावश्च निपातनात् भवति । पिनष्ट्यनेन शत्रून् इति पिनाकः=रुद्रधनुः, शूलं वा । अत्रैव गणे निपातनात् युगागमः, षकारस्य णकारः गुणाभावश्च । अतः पिण्याकम् इत्यपि सिद्ध्यति । पिण्याकम्=तिलपिष्टकल्कः ।

A. 'परितः पीड्यमानेऽङ्गे ध्रुवेऽप्युपपदे णमुल् ।
मूर्धपेषं नियुध्यन्ते, मूर्धानं पेषमित्यपि ॥' प्र. सर्वस्वे.

B. 'आश्वाठितारिकुलतुङ्गविपिञ्जशीलः
संपेसयन् गृहमसान्त्वयदेष गोपीः ।' धा. का. 3-17.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पेपिसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) बोध्यानि । [1]पेस्वरः, अनुपिसितः[A] ।

(1006) "पीङ् पाने" (IV-दिवादिः-1141. सक. अनि. आत्म.)

स्वादिः ।

पायकः-यिका, पायकः-यिका, पिपीषकः-षिका, पेपीयकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकधीङ्धातुवत्, (901) ज्ञेयानि । पीयमानः, [2]पाययन्-न्ती, [3]पीवा, इतीमानि रूपाणि अधिकान्यत्रेति विशेषः । आपीय[B] ।

(1007) "पीड अवगाहने" (X-चुरादिः-1544. सक. सेट्. उभ.)

अवगाहनम्—**बाधनम्** । '**बाधगाहनयोः**' इति द्रुमे । '**—गहने**' इति क्षीरस्वामी ।

पीडकः-डिका, पिपीडयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककीटयतिवत् (194) ज्ञेयानि । णमुलि–[4]पाणावुपपीडं पाण्युपपीडं, पाणिनोपपीडं [वा धारयति] । [5]पीडा, [6]जनापीडः, [C]मुष्टिपीडम्,

---

1. 'स्थेशभास**पिस**—' (3-2-175) इति ताच्छीलिके वरच्प्रत्यये एवं रूपम् ।
2. '**निगरण**चलनार्थेभ्यश्च' (1-3-87) इति ण्यन्तात् नित्यं परस्मैपदम् ।
3. 'अन्येभ्योऽपि दृश्यन्ते (3-2-75) इति वनिप्प्रत्यये एवं रूपम् ।
4. 'सप्तम्यां चोप**पीड**रुधकर्षः' (3-4-49) इति णमुल् । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (2-2-21) इति समासविकल्पः ।
5. युचं बाधित्वा भिदादिपाठात् (3-3-104) अङ् ।
6. 'कर्मण्यण्' (3-2-1) इति अण्प्रत्यये रूपम् । जनान्, आ=समन्तात् पीडयतीति विग्रहः ।

A. 'जीमूतचर्चिरवझर्झरवाद्यहृद्यं
तेनैव चाऽ**नुपिसितो** निलयं पिपेस ॥' धा. का. 1.89.

B. '**आपीय** तद्गिरममाननिरीतरोषः
प्रीतिं श्यतोऽस्य स करेण शिरोधिमच्छात् ।' धा. का. 2.59.

C. 'धनुररिभिरसह्यं **मुष्टिपीडं** दधाने ।' (भ. का. 1-26) इत्यत्र '**उप**' इत्युपसर्गस्याविवक्षा ज्ञेया । यथा 'उपेयिवान्' इत्यत्र, 'ईयिवान्' इति सिद्ध्यर्थं '**उप**' इत्यस्याविवक्षा ।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[A]नयोपपीडम्, [1]तिलपीडकः, [B]बाहूपपीडम् ।

(1008) "**पील प्रतिष्टम्भे**" (I-भ्वादिः-521. अक. सेट्. पर.)

**प्रतिष्टम्भः**=रोधनम् ।

पीलकः-लिका, पीलकः-लिका, पिपीलिषकः-षिका, पेपीलकः-लिका; इत्यादीनि सर्वाणि रूपाणि भौवादिक**कीलति**वत् (195) बोध्यानि। पीलितः[C]।

(1009) "**पीव स्थौल्ये**" (I-भ्वादिः-563. सक. सेट्. पर.)

पीवकः-विका, पीवकः-विका, पिपीविषकः-षिका, पेपीवकः-विका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कीलति**वत् (195) ज्ञेयानि। [2]पीवरः, [D]पीवितः ।

(1010) "**पुट् संश्लेषणे**" (VI-तुदादिः-1367. अक. सेट्. पर.)

**कुटादिः ।**

'भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् **पुटेत्** ॥' (श्लो. 75) इति **देवः** ।

पोटकः-टिका, पोटकः-टिका, पुपुटिषकः-षिका, पोपुटकः-टिका; पुटिता-त्री, प्रपुटितम्-[E]तः-तवान्, इत्यादीनि सर्वाण्यपि रूपाणि तौदादिक**कुटति**वत् (204) ज्ञेयानि ।

(1011) "**पुट भाषार्थः**" (X-चुरादिः-1754. सक. सेट्. उभ.)

**आस्वदीयः ।**

'भाषासंसर्गसंश्लेषे **पोटयेत्** पुटयेत् पुटेत् ॥' (श्लो. 75) इति **देवः** ।

पोटकः-टिका, पुपोटयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-

---

1. पीडयतीति **पीडकः**। तिलस्य पीडकः **तिलपीडकः**=तैलाविष्करणार्थो दारुविशेषः ।
2. 'छित्वरछत्वरधीवर**पीवर**—' [द. उ. 8-49] इति ष्वरच्प्रत्यये, वलोपोऽगुणत्वं च निपात्यते । **पीवरः**=स्थूलः ।

A. 'सलीलमालिङ्ग्य **नयोपपीडम**नामयं पृच्छति वासवस्त्वाम् ।' नैषधे 6.78.
B. '**बाहूपपीडम**ाश्लिष्य जगाहे द्यां निशाचरः ॥' भ. का. 5.94.
C. 'पिच्छस्रजा **पीलित**नीलकुन्तलं शीलेन संकीलितलोकमानसम् ॥' धा.का. 1.67.
D. '**अपीवितां** नाप्यतिमीवितां श्रितं तनुं सुतीवोरुमनीवमध्यमाम् ॥' धा.का. 1.72.
E. 'ततोऽतिकुटिलाशयैः **प्रपुटितैः** कुचज्जीवितैः
गुजद्भिरपि सैनिकैः सुगुडितां डिपद्भिर्जनान् ।' धा. का. 2. 80.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



कोटयतिवत् (205) बोध्यानि। अस्य धातोरुभयपदित्वात्, शतरि पोटयन्-न्ती, पुपोटयिषन्, पोटयिष्यन्, पुपोटयिषिष्यन्-न्ती-ती; इति विशेषः।

### (1012) "पुट संसर्गे" (X-चुरादिः-1913. सक. सेट्. उभ.)

### कथादिः, अदन्तश्च।

'भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् पुटेत् ॥' (श्लो. 75) इति देवः। पुटकः-टिका, पुपुटयिषकः-षिका; इत्यादीनि सर्वाणि रूपाणि प्रायः चौरादिककथयतिवत् (162) बोध्यानि। [A]पुटयितुम्।

### (1013) "पुटि भाषार्थः" (X-चुरादिः-1793. सक. सेट्. उभ.)

### आस्वदीयः।

पुण्टकः-ण्टिका, पुपुण्टयिषकः-षिका, पुण्टकः-ण्टिका, पुपुण्टिषकः-षिका, पोपुण्टकः-ण्टिका; इत्यादीनि सर्वाण्यपि रूपाणि कुण्ठयतिवत् (210) ज्ञेयानि।

### (1014) "पुट्ट अल्पीभावे" (X-चुरादिः-1559. अक. सेट्. उभ.)

पुट्टकः-ट्टिका, पुपुट्टयिषकः-षिका, पुट्टयिता-त्री, पुपुट्टयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि विशेषरूपाणि विना चौरादिककुट्टयतिवत् (207) बोध्यानि। कर्तरि क्तप्रत्यये [B]प्रपुट्टितः इति।

### (1015) "पुड उत्सर्गे" (VI-तुदादिः-1384. सक. सेट्. पर.)

### कुटादिः। 'मुड' इति आत्रेयः।

पोडकः-डिका, पोडकः-डिका, पुपुडिषकः-षिका, पोपुडकः-डिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि। [C]पुडित्वा।

---

A. 'दुष्पारदुश्चरिततीरणकृत्यथेशो
नो न्वक्षमे पुटयितुं तमकत्रितोष्मा ॥' धा. का. 3.59.

B. 'सा पूतना च शिशुभक्षणकुट्टनोत्का जघ्ने प्रपुट्टितकृपेण विचुट्टिताघा।' धा. का. 3.16.

C. 'पोड्रयोऽयं चुडतेति केऽपि, जुडतेत्यन्ये कडन्तोऽलुठन्
देवे स्वैर्लुलिते कुडत्विषि कुडद्गात्रे पुडित्वाऽऽदरम्।' धा. का. 2.81.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1016) **"पुडि खण्डने"** (I-भ्वादिः-326. सक. सेट्. पर.)

मैत्रेयानुसारेण पठितोऽयम् ।

पुण्डकः-ण्डिका, पुण्डकः-ण्डिका, पुपुण्डिषकः-षिका, पोपुण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि **कुण्ठति**वत् (209) ज्ञेयानि । [1]पुण्ड्रम्, [2]पुण्डरीकम् इति रूपे इति विशेषः ।

(1017) **"पुण कर्मणि शुभे"** (VI-तुदादिः-1333. अक. सेट्. पर.)

'पुण कर्मणि शब्दे च' इति क्षीरस्वामिसम्मतः पाठः ।

पोणकः-णिका, पोणकः-णिका, [3]पुपुणिषकः-पुपोणिषकः-षिका ; पोपुणकः-णिका ;

पोणिता-त्री, पोणयिता-त्री, पुपुणिषिता-पुपोणिषिता-त्री, पोपुणिता-त्री ;

[4]पुणन्-न्ती-ती, पोणयन्-न्ती, पुपुणिषन्-पुपोणिषन्-न्ती ; —

पोणिष्यन्-न्ती-ती, पोणयिष्यन्-न्ती-ती, पुपुणिषिष्यन्-पुपोणिषिष्यन्-न्ती ती ; —

— पोणयमानः, पोणयिष्यमाणः, — पोपुण्यमानः, पोपुणिष्यमाणः ;

प्रपुण्-प्रपुणौ-प्रपुणः ; — — —

पुणितम्-तः, पोणितः, पुपुणिषितः-पुपोणिषितः, पोपुणितः-तवान् ;

[5]निपुणः, आचारनिपुणः, पोणः, पुपुणिषुः-पुपोणिषुः, पोपुणः ;

पोणितव्यम्, पोणयितव्यम्, पुपुणिषितव्यम्-पुपोणिषितव्यम्, पोपुणितव्यम् ;

पोणनीयम्, पोणनीयम्, पुपुणिषणीयम्-पुपोणिषणीयम्, पोपुणनीयम् ;

---

1. औणादिके रक्प्रत्यये एवं रूपम् । **पुण्ड्रम्**=इक्षुभेदः । इक्षुसादृश्यात् अन्यत्रापि पुण्ड्रत्वव्यवहारः ।
2. 'फर्फरीकादयश्च' [द. उ. 3-38] इत्यत्र 'मृद्वीक ......**पुण्डरीक**—' इति **भोजेन** निपातितः ।' इति धा. का. व्याख्याने. (1.43.) ।
3. 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः । एवं सन्नन्ते सर्वत्र, क्त्वा-प्रत्ययेऽपि, रूपद्वयस्योपपत्तिर्ज्ञेया ।
4. '**तुदादिभ्यः** शः' (3-1-77) इति कर्तरि शप्रत्ययः । 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् वा भवति ।
5. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पुण्यम्-[A]पोण्यम्, पुपुणिष्यम्-पुपोणिष्यम्, पोपुण्यम्;
ईषत्पोणः-दुष्पोणः-सुपोणः; — —
पुण्यमानः, पोण्यमानः, पुपुणिष्यमाणः, पुपोणिष्यमाणः, पोपुण्यमानः;
पोणः, पोणः, पुपुणिषः-पुपोणिषः, पोपुणः;
पोणितुम्-पोणयितुम्, पुपुणिषितुम्-पुपोणिषितुम्, पोपुणितुम्;
[2]पुणितिः, पोणना, पुपुणिषा-पुपोणिषा, पोपुणा;
पोणनम्, पोणनम्, पुपुणिषणम्-पुपोणिषणम्, पोपुणनम्;
पुणित्वा-पोणित्वा, पोणयित्वा, पुपुणिषित्वा-पुपोणिषित्वा, पोपुणित्वा;
प्रपुण्य, प्रपोण्य, प्रपुपुणिष्य-प्रपुपोणिष्य, प्रपोपुण्य;
पोणम् २, पुणित्वा २-पोणित्वा २, } पोणम् २, पोणयित्वा २, } पुपुणिषम् २-पुपोणिषम् २, पुपुणिषित्वा २-पुपोणिषित्वा २, }
[3]पुण्डरीकम्. पोपुणम् २; पोपुणित्वा २; }

## (1018) "पुथ हिंसायाम्" (IV-दिवादिः-1119. सक. सेट्. पर.)

'पुथ्येत् पुन्थति हिंसार्थे, भाषार्थे पोथयेदिति ॥' (श्लो. 100) इति **देवः**। पोथकः-थिका, पोथकः-थिका, पुपुथिषकः-पुपोथिषकः-षिका, पोपुथकः-थिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिक**कुथ्यति**वत् (218) ज्ञेयानि। पोथ्यम्[B]।

## (1019) "पुथ भाषार्थः" (X-चुरादिः-1776. सक. सेट्. उभ.)

आस्वदीयः।

---

1. 'जनिकृति**पुणिभ्यः** क्यप्' इति **भोजो**क्तेः क्यप् प्रत्ययः।
2. 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इतीट् भवति।
3. '**पुण**' इत्यस्य धातोर्णकारस्य डकारे, डप्रत्ययस्य रुडागमे च एवं रूपम्।
'**पुण्डरीकं** सिताम्भोजे सितच्छत्रे च भेषजे।
पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि च ॥' इति **मेदिनी**।

A. 'ईशस्य **पुण्य**मुगमस्य वधं मुणन्तो
मल्लाश्च यत्र चुकुणुः शुनका इवोच्चैः।' धा. का. 2.76.

B. 'तं प्लुष्यदुद्दष्टिन्त्यद्रुषमपि च गतत्रासमुत्कुथ्यदङ्गम्
**पोथ्यं** प्रोचे स्वरेण स्वजनविगुधितं क्षिप्यता पुष्पमाध्वीम् ॥' धा. का. 2. 56.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'पुथ्येत् पुन्थति हिंसार्थे, भाषार्थे पोथयेदिति ॥' (श्लो. 100) इति देवः। पोथकः-थिका, पुपोथयिषकः-षिका; पोथयिता-त्री, पुपोथयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचोदयतिवत् (542) बोध्यानि।

(1020) "पुथि हिंसासंक्लेशनयोः" (I-भ्वादिः-44. सक. सेट्. पर.)

'पुथ्येत् पुन्थति हिंसार्थे, भाषार्थे पोथयेदिति ॥' (श्लो. 100) इति देवः। पुन्थकः-न्थिका, पुन्थकः-न्थिका, पुपुन्थिषकः-षिका, पोपुन्थकः-न्थिका; इत्यादीनि सर्वाण्यपि रूपाणि कुन्थतिवत् (220) ज्ञेयानि। ल्यपि प्रपुन्थ्य[A] इति रूपम्। [1]खड्गोपपुन्थं खड्गेनोपपुन्थम् वा शत्रुं मारयति।

(1021) "पुर अग्रगमने" (VI-तुदादिः-1346. सक. सेट्. पर.)

पोरकः-रिका, पोरकः-रिका, पुपुरिषकः-पुपोरिषकः-षिका, पोपुरकः-रिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुरतिवद् (229) ऊह्यानि। शतरि-[B]पुरन्-न्ती-ती, इति।

(1022) "पुर्व पूरणे" (I-भ्वादिः-576. सक. सेट्. पर.)

'पूर्व—' इति क्षीरस्वामी।

'पूरणे पूर्वतीति स्यात्, पूर्वयेण्णौ निकेतने ॥' (श्लो. 162) इति देवः। पूर्वकः-र्विका, पूर्वकः-र्विका, पुपूर्विषकः-षिका, पोपूर्वकः-र्विका; पूर्विता-त्री, पूर्वयिता-त्री, पुपूर्विषिता-त्री, पोपूर्विता-त्री; [C]पूर्वितम-तः-तवान्; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगूर्वतिवत् (416) बोध्यानि। [2]पूर्तिः इति क्तिनि रूपम्।

(1023) "पुर्व निकेतने" (X-चुरादिः-1666. अक. सेट्. उभ.)

'पूरणे पूर्वतीति स्यात् पूर्वयेत् णौ निकेतने ॥' (श्लो. 162) इति देवः। 'पूर्व निकेतने' इति मैत्रेयः। अत्र क्षीरस्वामी—"पूर्वनिकेतनम्= आद्यनिवासः। पारायणे-द्वौ धातू" इति।

---

1. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल्प्रत्ययः।
2. 'राल्लोपः' (6-4-21) इति झलादौ क्किति ङिति च प्रत्यये परतः वकारस्य लोपः।
A. 'ममन्थ विश्वं सुजनानकुन्थकान् प्रपुन्थ्य वन्धूनपि लुन्थति स्म यः।' धा.का. 1.7.
B. 'मुरादिबन्धुः क्षुरघोरचेताः पुरन् खलानां जनजीवबर्ही।' धा. का. 2.77.
C. 'दुदूर्विपून् धूर्वितुमेव गूर्वणं मूर्वन्तमापूर्वितपर्वताध्वरम् ॥' धा. का. 1. 73.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पूर्वकः-र्विका, पुपूर्वयिषकः-षिका, पूर्वयिता-त्री, पुपूर्वयिषिता-त्री ; पूर्वयन्-न्ती, पुपूर्वयिषन्-न्ती-ती ; पूर्वयिष्यन्-न्ती-ती, पुपूर्वयिषिष्यन्-न्ती-ती ; पूर्वयमाणः, पुपूर्वयिषमाणः, पूर्वयिष्यमाणः, पुपूर्वयिषिष्यमाणः, [A]पूर्वितम्-तः, पुपूर्वयिषितः-तवान् ; पूर्वयिट्-यिषौ-यिषः ; पूर्वः, पुपूर्वयिषुः, पूर्वयितव्यम्, पुपूर्वयिषितव्यम्, पूर्वणीयम्, पुपूर्वयिषणीयम्, पूर्व्यम्, पुपूर्वयिष्यम्, ईषत्पूर्वः-दुष्पूर्वः-सुपूर्वः, पूर्व्यमाणः, पुपूर्वयिष्यमाणः ; पूर्वः, पुपूर्वयिषः, पूर्वयितुम्, पुपूर्वयिषितुम्, पूर्वणा, पुपूर्वयिषा, पूर्वणम्, पुपूर्वयिषणम्, पूर्वयित्वा, पुपूर्वयिषित्वा, प्रपूर्व्य, प्रपुपूर्वयिष्य, पूर्वम् २, पूर्वयित्वा २, पुपूर्वयिषम् २, पुपूर्वयिषित्वा २.

## (1024) " पुल महत्त्वे " (I-भ्वादिः-841. अक. सेट्. पर.)

### ज्वलादिः ।

' महत्त्वे **पोलति** पुलेर्णौ तु तत्रैव पोलयेत् ।' (श्लो. 156) इति **देवः** ।

पोलकः-लिका, पोलकः-लिका, पुपुलिषकः-पुपोलिषकः-षिका, पोपुलकः-लिका ; इत्यादीनि सर्वाणि रूपाणि **कोलति**वत् (231) ज्ञेयानि । [2]पुलिः, [3]पुलकः, [4]पुलिनम्, [5]पुलाकः, [6]पुलिन्दः, इमानि रूपाणि अस्य धातोर्भवन्तीति विशेषः । [B]प्रपोलः ।

## (1025) " पुल महत्त्वे " (X-चुरादिः-1601. अक. सेट्. उभ.)

' महत्त्वे पोलति पुलेर्णौ तु तत्रैव **पोलयेत्** ।' (श्लो. 156) इति **देवः** ।

**'—समुच्छ्राये'** इति **क्षीरस्वामी** ।

---

1. 'उपधायां च' (8-2-78) इति सर्वत्र दीर्घः ।
2. 'इक् कृष्यादिभ्यः (वा. 3-3-94) इति स्त्रियां भावादौ इक्प्रत्ययः ।
3. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति क्वुन् ।
4. बाहुलकादौणादिके किनन्प्रत्यये रूपम् । **पुलिनम्**=सैकतम् ।
5. 'पिनाकादयश्च' (द. उ. 3-34.) इत्यस्याकृतिगणत्वात् आकप्रत्यये रूपमेवम् । **पुलाकः**=पक्वान्नलेशः ।
6. 'कुणि**पुल्योः** किन्दच्' (द. उ. 6.46.) इति किन्दच्प्रत्ययः । **पुलिन्दः**= म्लेच्छजातिविशेषः ।

A. 'मद्याग्र**पूर्वित**रूपे शिशुना रणं वः
स्यादेव मानपरिजंसकमोज्यधाम्नाम् ॥' धा. का. 3.31.

B. 'स्थलीर्हली सन्नलिनीश्च तीर्त्वा पलन् हरिश्चात्मबल**प्रपोलः** ।' धा. का. 22.2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पोलकः-लिका, पुपोलयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि **तोलयतिवत्** (757) ज्ञेयानि। कर्तरि क्तप्रत्यये [A]पोलितम् इति।

## (1026) "पुष पुष्टौ" (I-भ्वादिः-700. अक. सेट्. पर.)

'धारणे पोषयेत्, पुष्टौ पुष्येत् पुष्णाति पोषति। (श्लो. 171) इति **देवः**।

पोषकः-षिका, पोषकः-षिका, [1]पुपोषिषकः-पुपुषिषकः-षिका, पोपुषकः-षिका;
पोषिता-त्री, पोषयिता-त्री, पुपोषिषिता-पुपुषिषिता-त्री, पोपुषिता-त्री;
[B]प्रपोषन्-न्ती, पोषयन्-न्ती, पुपोषिषन्-न्ती, पुपुषिषन्-न्ती; —
पोषिष्यन्-न्ती-ती, पोषयिष्यन्, पुपोषिषिष्यन्-पुपुषिषिष्यन्-न्ती-ती; —
— पोषयमाणः, पोषयिष्यमाणः, — पोपुष्यमाणः, पोपुषिष्यमाणः;
प्रपुट्-प्रपुड्-पुषौ-पुषः; — — —
[2]पोषितम्-पुषितम्-तः, पोषितः, पुपोषिषितः-पुपुषिषितः-पोपुषितः-तवान्;
पुषः, [3]पोषणः, [4]प्रपोषी-घनपोषी, पोषः, पुपोषिषुः-पुपुषिषुः, पोपुषः;
पोषितव्यम्, पोषयितव्यम्, पुपोषिषितव्यम्-पुपुषिषितव्यम्, पोपुषितव्यम्;
पोषणीयम्, पोषणीयम्, पुपोषिषणीयम्-पुपुषिषणीयम्, पोपुषणीयम्;
पोष्यम्, पोष्यम्, पुपोषिष्यम्-पुपुषिष्यम्, पोपुष्यम्;
ईषत्पोषः-दुष्पोषः-सुपोषः; — —
पुष्यमाणः, पोष्यमाणः, पुपोषिष्यमाणः-पुपुषिष्यमाणः, पोपुष्यमाणः;
पोषः, पोषः, पुपोषिषः-पुपुषिषः, पोपुषः;

---

1. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सन्नन्ते सर्वत्र कित्त्वविकल्पः। तेन रूपद्वयं बोध्यम्। एवं शुद्धात् क्त्वायामपि ज्ञेयम्।
2. निष्ठायाम्, '**उदुपधाद्** भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति कित्त्वविकल्पः। तेन रूपद्वयम्।
3. नन्द्यादित्वात् कर्तरि ल्युप्रत्यये ऽनादेशे च रूपम्।
4. ताच्छीलिके णिनिप्रत्यये गुणे च रूपम्।

A. 'संदोलयन् अधिक**पोलित**मद्रिराजं संचोलितं सुबहुमूलितशाखिबृन्दैः॥' धा. का. 3.21.

B. 'वेषैर्मेष्यतमैः **प्रपोषद**शुभप्रश्रेषिभिः श्लेषति प्रोष्यान् .... ....।' धा.का. 1.88.

C. '**स्वपोषमपुषद्** युष्मान् या पक्षिमृगशावकाः।' भ. का. 6. 26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पोषितुम्, पोषयितुम्, पुपोषिषितुम्-पुपुषिषितुम्, पोपुषितुम्;
पुष्टिः, पोषणा, पुपोषिषा-पुपुषिषा, पोपुषा;
पोषणम्, पोषणम्, पुपोषिषणम्-पुपुषिषणम्, पोपुषणम्;
पोषित्वा-पुषित्वा, पोषयित्वा, पुपोषिषित्वा-पुपुषिषित्वा, पोपुषित्वा;
प्रपुष्य, प्रपोष्य, प्रपुपोषिष्य-प्रपुपुषिष्य, प्रपोपुष्य;
[1]स्वपोषं-धनपोषं-गोपोषं-रैपोषं वा पोषति।
पोषम् २, पुषित्वा २–पोषित्वा २, } पोषम् २, पोषयित्वा २, } पुपोषिषम् २-पुपुषिषम् २, पुपोषिषित्वा २-पुपुषिषित्वा २, } पोपुषम् २; पोपुषित्वा २; }
[2]पोषयित्नुः, [3]पुष्करम्, [4]पुष्कलम्.

(1027) "**पुष पुष्टौ**" (IV-दिवादिः-1182. सक. अनि. पर.) [अ]
'धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति।' (श्लो. 171) इति देवः।
पोषकः-षिका, पोषकः-षिका, पुपुक्षकः-क्षिका, पोपुषकः-षिका;
इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकतुष्यतिवत् (758) ज्ञेयानि।

---

1. '**स्वे पुषः**' (3-4-40) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकस्यैव धातोरनुप्रयोगः। सूत्रे '**स्वे—**' इति अर्थग्रहणम्, स्वरूपग्रहण च। तेन **रैपोषम्, गोपोषम्** इत्यादिषु 'स्व' इत्यस्यार्थस्य सदृशार्थकेषु च णमुल् भवति।

2. ण्यन्तात्, 'स्तनिहृषिपुषि—' [द. उ. 1-140] इतीत्नुच्प्रत्ययः। 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः। **पोषयित्नुः**= पोषणकर्ता।

3. '**पुषः** कित्' [द. उ. 8.71] इति करन्प्रत्यये, तस्य कित्त्वेन, बाहुलकात् प्रत्ययादेः ककारस्येत्संज्ञाभावे च रूपम्।

4. '**पुषः** कलन् किच' [द. उ. 8-118] इति कलन्प्रत्यये रूपम्। अत्रापि बाहुलकात् प्रत्ययककारस्य न लोप इति ज्ञेयम्।

[अ] 'सूर्यापाये न खलु कमलं **पुष्यति** स्वामभिख्याम्।' इति (**मेघसन्देशे** II-13), '**पुपोष** लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि॥' इति (**कुमारसम्भवे** 1-25) च महाकविप्रयोगात् सकर्मकत्वम्। 'वराह इव **पुष्यति—**' इत्यादिप्रयोगदर्शनादकर्मकत्वमप्यस्य धातोः संगच्छत इति ज्ञेयम्।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पुष्यः,[A] [2]स्वपोषं[B] रैपोषम्, गोपोषम् धान्यपोषम् वा पुष्यति। [3]गोपोषी।

(1028) "पुष पुष्टौ" (IX-क्र्यादिः-1529. अक. सेट्. पर.)

'धारणे पोषयेत्, पुष्टौ पुष्येत् पुष्णाति पोषति।' (श्लो. 171) इति देवः। पोषकः-षिका, पोषकः-षिका, पुपोषिषकः-पुपुषिषकः-षिका, पोपुषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। शतरि [4]पुष्णन्[C]-ती, इति रूपमिति विशेषः।

(1029) "पुष धारणे" (X-चुरादिः-1751. सक. सेट्. उभ.)

आस्वदीयः।

'धारणे पोषयेत्, पुष्टौ पुष्येत पुष्णाति पोषति।' (श्लो. 171) इति देवः। पोषकः-षिका, पुपोषयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकतोलयतिवत् (757) ज्ञेयानि। [D]प्रपोषितः।

(1030) "पुष्प विकसने" (IV-दिवादिः-1122. अक. सेट्. पर.)

पुष्पकः-ष्पिका, पुष्पकः-ष्पिका, पुपुष्पिषकः-षिका, पोपुष्पकः-ष्पिका; पुष्पम्, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजल्पतिवत् (592) ज्ञेयानि। शतरि—[5]पुष्यन्-न्ती, इति रूपमिति विशेषः।

---

1. 'पुष्यसिध्यौ नक्षत्रे' (3-1-116) इति नक्षत्रेऽभिधेये क्यप्। अन्यत्र पोष्यम् इति ण्यदेव। पुष्यन्त्यर्था अस्मिन् इति पुष्यः=नक्षत्रविशेषः।
2. 'स्वे पुषः' (3-4-40) इति णमुल्। 'स्वे' इति पर्यायाणामपि ग्रहणात् रैपोषम् इत्यादीनां साधुत्वम्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुलन्तस्यैव धातोरनुप्रयोगः।
3. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।
4. 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः। णत्वम्।
5. 'दिवादिभ्यः—' (3-1-69) इति श्यन्प्रत्ययः।

A. 'महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः॥' शि. व. 3. 22.
B. 'प्रस्थापयत् पूगकृतान् स्वपोषं पुष्टान् प्रयत्नाद् दृढगात्रबन्धान्।' भ. का. 3.4.
C. 'पुष्णन् सतां प्रियमयं प्लुषिताङ्गरागः
पुष्णन् मुदं मृगदृशां रिपुधाम मुष्णन्।' धा. का. 3.12.
D. 'दोर्भ्यां ग्रासयतां प्रपोषितरुषां निर्दलनोद्योगिनां
तेषां विक्रमणैरपाटि पटिमा शिक्षाऽप्यपोटि स्फुटम्।' धा. का. 3.43.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1031) " पुंस अभिवर्धने " (X-चुरादिः-1638. सक. सेट्. उभ.)

'—अभिमर्दने' इति क्षीरस्वामी ।

पुंसकः सिका, पुपुंसयिषकः-षिका ; [1]पुन्-पुंसौ-पुंसः ; [A]पुंसना, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकग्रन्थयतिवत् (375) ज्ञेयानि । अस्योभयपदित्वात् शतरि पुंसयन्-न्ती, पुंसयिष्यन्-न्ती-ती, इति रूपे अधिके इति विशेषः ।

(1032) "पुस्त आदरानादरयोः" (X-चुरादिः-1590. सक.सेट्. उभ.)

'—दानादरयोः' इति धातुकाव्ये (3-20) पाठः ।

पुस्तकः-स्तिका, पुपुस्तयिषकः-षिका ; [B]पुस्तितः, [2]पुस्तकम्, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुस्मयतिवत् (236) ज्ञेयानि । अस्योभयपदित्वात् शताऽपि भवतीति विशेषः । क्विपि, पुस्त्-पुस्तौ-पुस्तः इति रूपाणि इति विशेषः ।

(1033) " पूङ् पवने " (I-भ्वादिः-966. अक. सेट्. आत्म.)

पवनम्=शोधनम् ।

'श्नि पुनाति पुनीते स्ताम्, पवने पवते ङितः ।' (श्लो. 27) इति देवः ।

पावकः-विका, पावकः-विका, [3]पिपविषकः-षिका, पोपूयकः-यिका ;
पविता त्री, पावयिता-त्री, पिपविषिता-त्री, पोपूयिता-त्री ;
— पावयन्-न्ती, पावयिष्यन्-न्ती-ती, — —
पवमानः, पावयमानः, पिपविषमाणः, पोपूयमानः ;

---

1. 'नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजश्शकारश्चेर्षाट्टवर्गस्तवर्गजः ॥' इति अभियुक्तोक्त्याऽत्रानुस्वारो नकारस्थानिकः । तेन क्विपि संयोगान्तलोपे नकारान्तं रूपं प्रथमैकवचने बोध्यम् ।
2. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति संज्ञायां क्वुन् ।
3. सन्नन्ते, उगन्तत्वेनेण्णिषेधे प्राप्ते, 'स्मिपूङ्रञ्ज्वशां सनि' (7-2-74) इति नित्यमिट् । 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासस्य इकारः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

A. 'न स्फिट्यामि किमु चुम्बभिया स्थितोऽसि
किं पूलिताञ्चकृतपुंसनयाऽत्र पुंसाम् ॥' धा. का. 3.26.

B. 'वर्हादिमण्डितसुभण्डितविग्रहोऽसौ प्रच्छर्दितः किल वकेन च पुस्तितार्तिः ।' धा. का. 3.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पविष्यमाणः, पावयिष्यमाणः, पिपविषिष्यमाणः, पोपूयिष्यमाणः ;

पूः-पुवौ-पुवः ; — — —

[1]पूतम्-पवितम्-[A]तः-तवान्, पावितः, पिपविषितः, पोपूयितः-तवान् ;

पवः, [2]पवमानः, [3]पवनः, [4]पवित्रम् [अग्निः, देवता वा], [5]पोता,

पावः, [B]पिपविषुः-[6]पिपावयिषुः, पोपुवः ;

पवितव्यम्, पावयितव्यम्, पिपविषितव्यम्, पोपूयितव्यम् ;

[7]प्रपवणीयम्-प्रपवनीयम्, [8]प्रपावणीयम्-प्रपावनीयम्, पिपविषणीयम्, पोपूयनीयम् ;

---

1. 'पूङश्च' (7-2-51) इति निष्ठाया इड्विकल्पः। 'पूङः क्त्वा च' (1-2-22) इति निष्ठायाः कित्त्वनिषेधाद् गुणावादेशौ। एवं क्त्वायामपि रूपद्वयस्योपपत्तिर्ज्ञेया।

2. कर्तरि, 'पूङ्यजोः शानन्' (3-2-128) इति शानन्प्रत्ययः। शपि, 'आने मुक्' (7-2-82) इति मुगागमः।

3. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्यये, अनादेशे च रूपम्। **पवनः**=वायुः।

4. 'कर्तरि चर्षिदेवतयोः' (3-2-186) इति कर्तरि ऋषौ, देवतायां वा अभिधेये सति इत्रप्रत्ययः। ऋषिः=अग्निः। 'अग्निः **पवित्रम्**, स मा पुनातु,' (आप. श्रौ. सू. 12-19-6) 'वायुः सोमः सूर्य इन्द्रः **पवित्रम्**, ते मा पुनन्तु।' (आप. श्रौतसूत्रे 12-9-6) इत्यादिषु यथा। ऋषौ करणे, देवतायाम् कर्तरि चायं प्रत्ययो ज्ञेयः।

5. 'तृन्' (3-2-135) इति तच्छीलादिषु कर्तृषु तृन्प्रत्ययः। बाहुलकात् इडागमाभावः।

6. ण्यन्तात् सनि, उप्रत्यये रूपम्। अत्रापि 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासस्येकारः। तत्प्रदर्शनार्थमेवात्र रूपमेकं निदर्शितम्।

7. 'न भाभूपू—' (8-4-34) इत्यत्र 'पू' इत्यनेन **पूञ** एव ग्रहणम्, न तु **पूङः** इति **काशिकादिषु** दृश्यते। तेनात्र णत्वं भवत्येव। **क्षीरस्वामी** तु अविशेषेण पूङोऽपि प्रकृतसूत्रे ग्रहणं मन्यमानः **प्रपवनीयम्** इति णत्वाभावघटितं रूपमुदाजहार।

8. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति णत्वनिषेधोऽपि नास्य धातोरिति पक्षे रूपमेवम्। **क्षीरस्वामि**मते तु पूर्ववदत्रापि णत्वनिषेधः।

A. '**पवितो**ऽनुगुणैर्वातैः शीतैः **पूत्वा** पयोनिधौ।' भ. का. 9-39.

B. 'जगत् **पिपविषुर्**वायुः कल्पान्त इव दुर्धरः॥' भ. का. 9-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]विपूय:[A]-पव्यम्, [2]अवश्यपाव्यम्, पाव्यम्, पिपविष्यम्, पोपूय्यम्;
पूयमान:, पाव्यमान:, पिपविष्यमाण:, पोपूय्यमान: ;
[3]पव:, [4]निष्पाव:, [5]उत्पाव:, [6]पोत्रम्, [B]वनपोत्र:, [7]पवित्रम्, पाव:,
पिपविष:, पोपूय: ;
पवितुम्, पावयितुम्, पिपविषितुम्, पोपूयितुम्;
पूति:, पावना, पिपविषा, पिपावयिषा, पोपूया ;
पवनम्, पावनम्, पिपविषणम्, पोपूयनम् ;
पूत्वा-पवित्वा,[C] पावयित्वा, पिपविषित्वा, पोपूयित्वा ;
प्रपूय, प्रपाव्य, प्रपिपविष्य, प्रपोपूय्य ;
पावम् २ / पूत्वा २-पवित्वा २ } पावम् २, / पावयित्वा २, } पिपविषम् २, / पिपविषित्वा २, } पोपूयम् २ ; / पोपूयित्वा २.

---

1. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इत्यनेन मुञ्जेऽभिधेये विपूर्वका-दस्मात् क्यपि रूपमेवम्। अन्यत्रार्थे तु 'अचो यत् (3-1-97) इति यति, अवादेशे च पव्यम् इति रूपम्।
2. 'ओरावश्यके' (3-1-125) इति ण्यत्। आवादेश:। अवश्यमो मकारस्य 'लुम्पेदवश्यमः कृत्ये' (काशिका. 6-3-109) इति लोप:।
3. 'ॠदोरप्' (3-3-57) इति भावेऽप्प्रत्यय:। घञपवाद:।
4. 'निरभ्योः पूल्वोः' (3-3-28) इति निष्पूर्वकादस्मात् घञ्। निष्पाव:=धान्य-विशेष:। 'परिमाणाख्यायां सर्वेभ्यः' (3-3-20) इति घञ्यपि रूपमेवमेव। तदानीं निष्पाव:=परिमाणविशेष:।
5. 'उदि श्रयतियौतिपूद्रुव:' (3-3-49) इति घञ्।
6. 'हलसूकरयोः पुव:' (3-2-183) इति करणे ष्ट्रन्प्रत्यये रूपम्। पोत्रम्= सूकरस्य, हलस्य वा मुखम्।
7. 'पुवः संज्ञायाम्' (3-2-185) इति करणे इत्रप्रत्यय:। पवित्रम्=दर्भ:, चक्रायुधं च।

A. 'वसानां वल्कले शुद्धे विपूयैः कृतमेखलाम्।' भ. का. 6-61.
B. 'भूदार एव वनपोत्रवतामतानीत् भूदारशब्दमसहिष्णुरिवान्तमेषाम्॥' च. भा. 1.20.
C. 'सूतोऽपि गङ्गासलिलैः पवित्वा सहाश्वमात्मानमनल्पमन्युः।' भ. का. 3.18.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1034) "पूज पूजने" (X-चुरादिः 1643. सक. सेट्. उभ.)

पूजकः-जिका, पुपूजयिषकः-षिका, इत्यादीनि सर्वाणि रूपाणि चौरादिक-कूटयतिवत् (240) ज्ञेयानि। [1]पूजा, [A]पूज्यमानः, पूजयन्-न्ती, [राज्ञां] [2]पूजितः, राजपूजितः, इत्यादीनि रूपाण्यस्य धातोः विशेषेण संभवन्ति।

(1035) "पूञ् पवने" (IX-क्र्यादिः-1482. सक. सेट् उभ.)

प्वादिः, ल्वादिश्च। [अ]

'श्वि पुनाति पुनीते स्ताम्, पवने पवते ङितः।' (श्लो. 27) इति देवः।

पावकः-विका, पावकः-विका, [3]पुपूषकः-षिका, पोपूयकः-यिका;
पविता-त्री, पावयिता-त्री, पुपूषिता-त्री, पोपूयिता-त्री;
[4]पुनन्[B]-पुनाति, पावयन्-न्ती, [C]पुपूषन्-न्ती; —
पविष्यन्-न्ती-ती, पावयिष्यन्-न्ती-ती, पुपूषिष्यन्-न्ती-ती; —
पुनानः, पावयमानः, पुपूषमाणः, पोपूयमानः;
पविष्यमाणः, पावयिष्यमाणः, पुपूषिष्यमाणः, पोपूयिष्यमाणः;

---

1. 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इति स्त्रियां भावादौ युजपवादोऽङ्प्रत्ययः।
2. 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इति वर्तमाने क्तः। 'क्तस्य च वर्तमाने' (2-3-67) इति कर्तरि षष्ठी। 'क्तेन च पूजायाम्' (2-2-12) इति समास-निषेधः। राजपूजितः इति प्रयोगस्तु राज्ञा पूजितः इति तृतीयासमासे साधुः।
3. 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः। 'इको झल्' (1-2-9) इति सनः कित्त्वान्न गुणः। एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या।
4. शतरि 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयो-रातः' (6-4-112) इत्याकारलोपः। 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे रूपमेवम्। एवं शानजन्तेऽपि प्रक्रिया ज्ञेया।

A. 'च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन॥' भ. का. 3, 56.

B. 'द्वारं पुनन् पदतलेन स लूनवैरी
स्तीर्णाननं मदजलेन करीतुकामम्।' धा. का. 3.6.

C. 'त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजान् पुपूषता।' शि. व. 14.7.

[अ] क्र्यादिषु क्षीरस्वामिना "दिवादौ—पूयते.......।" इत्याद्युक्तम्। पूधातुः भ्वादौ, क्र्यादिषु च पठ्यते; न दिवादौ। क्षीरस्वामिनाऽपि दिवादिषु पूधातुः कुत्रापि न पठितः। तस्मात् क्षीरस्वामिवाक्यं क्र्यादिगतं किंनिबन्धन-मिति न जानीमः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]खलपूः-खलप्वौ-खलप्वः; — — —

[2]पूतम्-तः-तवान्-[3]पूनः-पूनवान् (यवः), पावितः, पुपूषितः, पोपूयितः-तवान्; पवः-[4]पवनः, [5]पुपविवान्, [6]पवित्रम् (अग्निः, देवता वा), [7]पोता, पावः, [8]पावनः[A], पुपूषुः, [9]पिपावयिषुः, पोपुवः;

पवितव्यम्, पावयितव्यम्, पुपूषितव्यम्, पोपूयितव्यम्;

[10]प्रपवनीयम्, [11]प्रपावनीयम्, पुपूषणीयम्, पोपूयनीयम्;

[12]विपूयः, पव्यम्-[B]अवश्यपाव्यम्, पाव्यम्, पुपूष्यम्, पोपूय्यम्;

पूयमानः, पाव्यमानः, पुपूष्यमाणः, पोपूय्यमानः;

पावः, [13]निष्पावः, [14]निष्पावः, [15]उत्पावः,

---

1. खलं पुनातीति खलपूः। क्विपि रूपमेवम्। द्विवचनादौ, 'ओः सुपि' (6-4-83) इति यण्।
2. 'श्र्युकः क्किति' (7-2-11) इति निष्ठायामिण्निषेधः। एवं क्तिनि, क्त्वायाम्, ल्यपि चेण्णिषेधो ज्ञेयः।
3. ल्वादित्वेन नित्यं निष्ठानत्वे प्राप्ते, '**पूञो** विनाशे' (वा. 8-2-44) इत्यर्थविशेषे निष्ठानत्वम्। **पूनाः** यवाः। विनष्टाः इत्यर्थः।
4. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्ययः।
5. लिटः क्वसौ, द्विर्वचने, इडागमे, उत्तरखण्डे गुणे, 'न शसददवादिगुणानाम्' (6-4-126) इति न एत्वाभ्यासलोपः।
6. 'कर्तरि चर्षिदेवतयोः' (3-2-186) इति कर्तरि, करणे च इत्रप्रत्ययः।
7. 'तृन्' (3-2-135) इति कर्तरि तच्छीलादिषु तृन्प्रत्ययः। बाहुलकादिडागमो न।
8. ण्यन्तादस्मात् नन्द्यादित्वात् कर्तरि ल्युप्रत्ययः।
9. ण्यन्तादस्मात् सनि, उप्रत्यये, 'ओः पुयण्—' (7-4-80) इत्यभ्यासस्येकारः।
10. 'न भाभूपूकमि—' (8-4-34) इति णत्वनिषेधः।
11. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति णत्वनिषेधः।
12. '**विपूय**विनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इति मुञ्जेऽभिधेये क्यपि रूपमेवम्।
13. 'निरभ्योः **पूल्वोः**' (3-3-28) इति निष्पूर्वकादस्मात घञ्प्रत्ययः। **निष्पावः**= धान्यविशेषः।
14. 'परिमाणाख्यायां सर्वेभ्यः (3-3-20) इति घञ्। **निष्पावः**=शूर्पः। निष्पूयते= शोध्यते तुषाद्यपनयनेन यस्तण्डुलादिः सः **निष्पावः**। शूर्पस्यापि प्राक्काले परिमाणवाचकत्वात् प्रत्ययोत्पत्तिरिति ज्ञेयम्।
15. '**उदि** श्रयतियौतिपूद्रुवः' (3-3-49) इति भावे घञ्।

A. 'दक्षिणीयमवगम्य पङ्क्तिशः पङ्क्ति**पावनमथ** द्विजव्रजम्।' शि. व. 14.33.

B. '**अवश्यपाव्यं** पवसे कच्चित् त्वं देवभाक् हविः।' भ. का. 6.65.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पोत्रम्-पोत्रः, [2]पवित्रम् ; पावः, पुपूषः, पोपूयः ;
पवितुम्, पावयितुम्, पुपूषितुम्, पोपूयितुम् ;
पूतिः, [3]पविः, पावना, पुपूषा-पिपावयिषा, पोपूया ;
पवनम्, पावनम्, पुपूषणम्, पोपूयनम् ;
पूत्वा, पावयित्वा, पुपूषित्वा, पोपूयित्वा ;
प्रपूय, प्रपाव्य, प्रपुपूष्य, प्रपोपूय्य ;
पावम् २, पूत्वा २, } पावम् २, पावयित्वा, } पुपूषम् २, पुपूषित्वा २, } पोपूयम् २ ; पोपूयित्वा २. }
[4]पूगः, [5]पोतः, [6]पुण्यम्, [7]पुत्रः.

## (1036) "पूयी विशरणे दुर्गन्धे च"

### (I-भ्वादिः-484. अक. सेट्. आत्म.)

पूयकः-यिका, पूयकः-यिका, पुपूयिषकः-षिका, पोपूयकः-यिका ;
पूयिता-त्री, पूययिता-त्री, पुपूयिषिता-त्री, पोपूयिता-त्री ;
— पूययन्-न्ती, पूययिष्यन्-न्ती ; —
पूयमानः, पूययमानः, पुपूयिषमाणः, पोपूय्यमानः ;
पूयिष्यमाणः, पूययिष्यमाणः, पुपूयिषिष्यमाणः, पोपूयिष्यमाणः ;
[8]सुपूः-सुपुवौ-सुपुवः ; — — —
[9]पूतम्-पूतः-पूतवान्, पूयितः, पुपूयिषितः, पोपूयितः-तवान् ;

---

1. 'हलसूकरयोः पुवः' (3-2-183) इति करणे ष्ट्रन्प्रत्यये रूपम् ।
2. 'पुवः संज्ञायाम्' (3-2-185) इति करणे इत्रप्रत्ययः । **पवित्रम्**=दर्भः, चक्रं च ।
3. 'इणजादिभ्यः' (वा. 3-3-94) इति भावे इण्प्रत्ययः । बाहुलकात् वृद्धिर्न । गुणस्तु भवत्येव । **पविः**=वज्रम् । **अजादिः**=अजधातुप्रकारः ।
4. 'छापूञ्—' [द. उ. 3-69] इति गक्प्रत्ययः । **पूगः**=संघातः ।
5. औणादिके [द. उ. 6-7] तन्प्रत्यये रूपम् । पुनाति इति **पोतः**=अग्निः, पुत्रः समुद्रयानं वा । बाहुलकादिडागमो न ।
6. '**पूञो** यण्णुट् ह्रस्वश्च [द. उ. 8-16] इति यत्प्रत्यये णुडागमे, उपधाया ह्रस्वे च रूपमेवम् । ह्रस्वविधानसामर्थ्यात् गुणो न ।
7. '**पूञो** ह्रस्वश्च' [द. उ. 8-87] इति त्रप्रत्यये, धातोर्ह्रस्वे च रूपमेवम् ।
8. क्विपि, वलि लोपे, ऊकारान्तत्वं ज्ञेयम् । द्विवचनादौ उवङ् ज्ञेयः ।
9. '**श्वीदितो** निष्ठायाम्' (7-2-14) इतीण्निषेधः । वलि लोपे रूपमेवम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| पूयः, [1]पूयिता, | पूयः, | पुपूयिषुः, | पोपूयः ; |
| पूयितव्यम् , | पूययितव्यम् , | पुपूयिषितव्यम् , | पोपूयितव्यम् ; |
| पूयनीयम् , | पूयनीयम् , | पुपूयिषणीयम् , | पोपूयनीयम् ; |
| पूय्यम् , | पूय्यम् , | पुपूयिष्यम् , | पोपूय्यम् ; |
| ईषत्पूयः-दुष्पूयः-सुपूयः ; | | — | — |
| पूय्यमानः, | पूय्यमानः, | पुपूयिष्यमाणः, | पोपूय्यमानः ; |
| पूयः, | पूयः, | पुपूयिषः, | पोपूयः ; |
| पूयितुम् , | पूययितुम् , | पुपूयिषितुम् , | पोपूयितुम् ; |
| [2]पूतिः,[A] | पूयना, | पुपूयिषा, | पोपूया ; |
| पूयनम् , | पूयनम् , | पुपूयिषणम् , | पोपूयनम् ; |
| पूयित्वा, | पूययित्वा, | पुपूयिषित्वा, | पोपूयित्वा ; |
| प्रपूय्य, | प्रपूय्य, | प्रपुपूयिष्य, | प्रपोपूय्य ; |
| पूयम् २ ; पूयित्वा २ ; | पूयम् २ ; पूययित्वा २ ; | पुपूयिषम् २ ; पुपूयिषित्वा २ ; | पोपूयम् २ ; पोपूयित्वा २. |

## (1037) "पूरी आप्यायने" (IV-दिवादिः-1151. अक. सेट्. आत्म.)

'आप्यायनम्=वृद्धिः ।' इति क्षीरस्वामी ।

'पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि ॥' ( श्लो. 150) इति देवः ।

| | | | |
|---|---|---|---|
| पूरकः-रिका, | पूरकः-रिका, | पुपूरिषकः-षिका, | पोपूरकः-रिका ; |
| पूरिता-त्री, | पूरयिता-त्री, | पुपूरिषिता-त्री, | पोपूरिता-त्री ; |
| — | पूरयन्-न्ती, | पूरयिष्यन्-न्ती-ती ; | — — |

---

1. धातोरस्यानुदात्तेत्त्वात्, हलादित्वाच्च तच्छीलादिषु कर्तृषु प्राप्तो युच्, 'न यः' (3-2-152) इति निषिध्यते । तेन, 'तृन्' (3-2-135) इति औत्सर्गिकः तृन्नेव ।

2. स्त्रियां भावादौ, 'गुरोश्च हलः' (3-3-103) इति प्राप्तमकारप्रत्ययं बाधित्वा, बाहुलकात्, 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इत्याबादित्वात्, 'गन्धस्येद् उत्पूतिसुसुरभिभ्यः' (5-4-135) इत्यत्र 'पूति—' इति निर्देशाच्च क्तिन्नेव भवति । क्तिनि वलिलोपे च रूपमेवम् ।

A. 'गोदोहदेशे रयितं सहाग्रजं तमूतसत्कीर्तिम् अपूतिभिर्गुणैः ॥' धा. का. 1·62.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

| | | | |
|---|---|---|---|
| पूर्यमाणः, | [1]प्रपूर्यमाणः, | पुपूरिषमाणः, | पोपूर्यमाणः ; |
| पूरिष्यमाणः, | पूरयिष्यमाणः, | पुपूरिषिष्यमाणः, | पोपूरिष्यमाणः ; |
| पूः-पूरौ-पूरः ; | — | — | — |
| [2]पूर्णम्-पूर्णः-पूर्णवान्, | [3]पूर्णः-पूरितः, | पुपूरिषितः, | पोपूरितः-तवान् ; |
| पूरः, [4]पूरणः, | पूरः, | पुपूरिषुः, | पोपूरः ; |
| पूरितव्यम्, | पूरयितव्यम्, | पुपूरिषितव्यम्, | पोपूरितव्यम् ; |
| पूरणीयम्, | पूरणीयम्, | पुपूरिषणीयम्, | पोपूरणीयम् ; |
| पूर्यम्, | पूर्यम्, | पुपूरिष्यम्, | पोपूर्यम् ; |
| पूर्यमाणः, | पूर्यमाणः, | पुपूरिष्यमाणः, | पोपूर्यमाणः ; |
| पूरः, | पूरः, | पुपूरिषः, | पोपूरः, |
| पूरितुम्, | पूरयितुम्, | पुपूरिषितुम्, | पोपूरितुम् ; |
| [5]पूर्तिः [पूर्णिः], | पूरणा, | पुपूरिषा, | पोपूरा ; |
| पूरणम्, | पूरणम्, | पुपूरिषणम्, | पोपूरणम् ; |
| पूरित्वा, | पूरयित्वा, | पुपूरिषित्वा, | पोपूरित्वा ; |
| प्रपूर्य, | प्रपूर्य, | प्रपुपूरिष्य, | प्रपोपूर्य ; |

[6]चर्मपूरं स्तृणोति । उदरपूरं भुङ्क्ते ।

---

1. 'णेर्विभाषा' (8-4-30) इति सूत्रस्य नेदं लक्ष्यम् । यत्रोपसर्गस्थान्निमित्तात् कृत्स्थस्य नकारस्य णत्वम्, तत्रैव तस्य सूत्रस्य प्रवृत्तिः । अत्र तु धातुस्थान्निमित्तात् रेफरूपात् णत्वमिति ज्ञेयम् । तेन नित्यणत्वमेव ।

2. '**श्वीदितो** निष्ठायाम्' (7-2-14) इतीण्निषेधः । णत्वम् ।

3. 'वा दान्तशान्त**पूर्ण**दस्तस्पष्टच्छन्नज्ञप्ताः' (7-2-27) इत्यनेन ण्यन्तादस्मान्निष्ठायां पक्षे अनिट्त्वं निपात्यते । अनिट्पक्षे, णिलुकि णत्वे **पूर्णः** इति, इट्पक्षे **पूरितः** इति च रूपम् ।

4. '**अनुदात्तेतश्च हलादेः**' (3-2-149) इति तच्छीलादिषु कर्तृषु युच् । अनादेशे णत्वे च रूपमेवम् । **पूरणः**=समुद्रः ।

5. 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इति क्तिन् ; अप्रत्ययापवादः । 'तितुत्र—' (7-2-9) इतीण्निषेधः । **पूर्णिः** इति तु बाहुलकात् निप्रत्यये णत्वे च रूपम् ।

6. 'चर्मोदरयोः **पूरेः**' (3-4-31) इत्यनेन चर्मोदरयोः कर्मणोरुपपदयोः णमुल्प्रत्ययः । **पूरयतेः** 'धातुसम्बन्धे प्रत्ययाः' (3-4-1) इति परिभाषया धातुसम्बन्धे विधानात् धात्वन्तरस्य प्रयोगः । एवम् **उदरपूरम्** इत्यत्रापि ज्ञेयम् ।

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]गोष्पदपूरम् [A]गोष्पदप्रम्, सीतापूरं सीताप्रं वा वृष्टो देवः। [2]ऊर्ध्वपूरं पूर्यते।

पूरम् २, पूरित्वा २, } पूरम् २, पूरयित्वा २, } पुपूरिषम् २, पुपूरिषित्वा २, } पोपूरम् २; पोपूरित्वा २; }

[3]पूरुः.

## (1038) "पूरी आप्यायने" (X-चुरादिः-1804. सक. सेट्. उभ.)

### आस्वदीयः।

'पूरेराप्यायनेऽर्थे स्यात् पूर्यते, पूरयेदपि ॥' (श्लो. 150) इति देवः। ईदित्त्वस्य ण्यन्ते प्रयोजनाभावात् णिज्विकल्पो ज्ञेयः। णिजभावपक्षे औत्सर्गिकः शब्विकरण इति ज्ञेयम्। पूरकः-रिका, पुपूरयिषकः-षिका, [4]पूरकः-रिका, पुपूरिषकः-षिका, पोपूरकः-रिका; [5]पूरन्-न्ती, पूरिष्यन्-न्ती-ती; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचोरयतिवत् (546) ज्ञेयानि।

## (1039) "पूर्ण सङ्घाते" (X-चुरादिः-1637. अक. सेट्. उभ.)

'पूल—' इत्यस्य पाठान्तरमिदम्। "—'पूण—' इति शाकटायनः। कोशशुद्धिस्तु ईदृशेषु कीदृशीति न विद्मः।" इति पुरुषकारे (156 श्लो.) चिन्तितम्। 'पूण—' इति मा. धा. वृत्तौ पाठभेदः प्रदर्शितः।

---

1. 'वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' (3-4-32) इत्यनेन कर्मण्युपपदे, वर्षस्येयत्तायां गम्यमानायाम्, पूरयतेर्णमुल्, ऊकारलोपश्चास्य विकल्पेन भवति। एवम्, 'मूषिकाबिलपूरम्, मूषिकाबिलप्रं वा वृष्टो देवः।' इत्यत्रापि णमुल् ज्ञेयः।
'कूपप्रं वापिकापूरं वर्षति स्माद्य वारिदः।
यावता पूर्यते कूपस्तावदित्यवगम्यते ॥' इति प्र. सर्वस्वे।
2. 'ऊर्ध्वे शुषिपूरोः' (3-4-44) इति कर्तृवाचिन्यूर्ध्वे उपपदे णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकस्यैव धातोरनुप्रयोगः। 'ऊर्ध्वः सन् पूर्यते कुम्भ ऊर्ध्वपूरं प्रपूर्यते।' इति प्र. सर्वस्वे।
3. बाहुलकादौणादिके उप्रत्यये रूपमेवम्।
4. णिजभावपक्षे क्रमेण शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, यङन्ताच्च रूपाणि प्रदर्शितानीति ज्ञेयम्।
5. णिजभावपक्षे, शतरि 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदंभवति।

A. 'ददाल भूर्नभो रक्तं गोष्पदप्रं ववर्ष च।' भ. का. 14.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पूर्णकः-र्णिका, पुपूर्णयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-**चूर्णयतिवत्** (550) ज्ञेयानि ।

(1040) **"पूर्व निकेतने"** (X-चुरादिः-1666. अक. सेट्. उभ.)

'गुर्द पूर्वनिकेतने' इति चुरादिषु पठितस्य धातोः **केषाञ्चित्** मतेन 'गुर्द–पूर्व' इति व्यस्तपाठपक्षे धातुरयमुपात्तः । 'पूर्व पूर्वनिकेतने' इति धा. का. (3-31) पाठः ।

'पूरणे पूर्वतीति स्यात् पूर्वयेत् णौ निकेतने ॥' (श्लो. 162) इति **देवः** ।

पूर्वकः-र्विका, पुपूर्वयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-**चूर्णयतिवत्** (550) ज्ञेयानि ।

(1041) **"पूल सङ्घाते"** (I-भ्वादिः-528. अक. सेट्. पर.)

'संघाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥' (श्लो. 156) इति **देवः** ।

पूलकः-लिका, पूलकः-लिका, पुपूलिषकः-षिका, पोपूलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कूलतिवत्** (244) ज्ञेयानि । [1]पूलः ।

(1042) **"पूल सङ्घाते"** (X-चुरादिः-1637. अक. सेट्. उभ.)

'संघाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥' (श्लो. 156) इति **देवः** ।

पूलकः-पुपूलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कूटयति-वत्** (240) ज्ञेयानि ।

(1043) **"पूष वृद्धौ"** (I-भ्वादिः-675. अक. सेट्. पर.)

पोषकः-षिका, पोषकः-षिका, पुपूषिषकः-षिका, पोपूषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**चूषतिवत्** (552) ज्ञेयानि । [2]पूषा ।

(1044) **"पॄ पालनपूरणयोः"**

(III-जुहोत्यादिः-1086. सक. अनि. पर.) [अ]

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । **पूलः**=मूलिकाविशेषः ।
2. बाहुलकात् औणादिके [ द. उ. 6.55. ] कनिन्प्रत्यये रूपम् । **पूषा**=आदित्यः ।

[अ] "ह्रस्वान्तोऽयं धातुरिति-**वर्धमान-काश्यप-आभरण-पुरुषकारा**ः। [**क्षीर**] **स्वामी** तु दीर्घान्तं पठित्वा, 'ह्रस्वान्तोऽयम्' इति **नन्दी** ।' इति । **आत्रेय-मैत्रेयौ** तु ह्रस्वान्तं पठित्वा, 'दीर्घान्त**मेके**' इति । ....... **वृत्तिकारस्य**

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'पॄणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति **देवः।**

पारकः-रिका, पारकः-रिका, [1]पुपूर्षकः-र्षिका, [2]पेप्रीयकः-यिका ;
पर्ता-पर्त्री, पारयिता-त्री, पुपूर्षिता-त्री, पेप्रीयिता-त्री ;
[3]पिप्रत्-पिप्रतौ-पिप्रतः, पिप्रती, पारयन्-न्ती, पुपूर्षन्-न्ती ; —
[4]परिष्यन्-न्ती-ती, पारयिष्यन्-न्ती-ती, पुपूर्षिष्यन्-न्ती-ती ; —
व्यतिपिप्राणः, पारयमाणः, व्यतिपुपूर्षमाणः, पेप्रीयमाणः ;
व्यतिपरिष्यमाणः, पारयिष्यमाणः, व्यतिपुपूर्षिष्यमाणः, पेप्रीयिष्यमाणः ;
व्यापृत्-व्यापृतौ-व्यापृतः ; — — —
व्यापृतम्-तः-तवान् , पारितः, पुपूर्षितः, पेप्रीयितः-तवान् ;
परः, व्यापारी, पारः, पुपूर्षुः, [5]पिपारयिषुः, पेप्रियः ;

---

तु दीर्घान्त एवेष्टः। यदाह—'शॄदॄप्रां ह्रस्वो वा' (7-4-12) इत्यत्र "**केचित्** एतत् सूत्रं प्रत्याचक्षते। 'श्रा पाके, द्रा कुत्सायां गतौ, प्रा पूरणे' इत्येषाम्, 'बह्वर्था अपि धातवः' (भाष्यम् 1-3-1) इति शॄदॄप्राम् अर्थे वर्तमानानां 'विशश्रतुः' इत्यादीनि रूपाणि साधयन्ति। तथा सति, 'विशुश्रुवान्' इति क्वसौ एतद्रूपं न स्यात्।" इति। यदि ह्रस्वान्तः स्यात् प्रातिना प्रत्याख्यानम्, **'पिपृवान्'** इति प्रयोजनकथनं चानुपपन्नं स्यात्। तथा **वृत्ति-न्यास पदमञ्जरी-प्रदीपकारादयो**ऽपि। किञ्च, **अपाणिनीयश्च** ह्रस्वान्तः। यदि हि स्यात्; किं ह्रस्वविकल्पेन? यत् क्रैयादिकाद् दीर्घान्तरूपाणि, अस्माच्च ह्रस्वान्तरूपाणि भविष्यन्ति। एवञ्च, "तं **पिपृतं** रोदसी—" (तै. ब्रा. 2. 8. 4. 8.) 'पाहि माऽग्ने **पिपृहि**—' (तै. सं. 1.3.3.1.) इत्यादयश्छान्दसा द्रष्टव्याः॥" इति **मा. धा. वृत्तौ** सुदूरं विचार्य ह्रस्वान्तपाठाभावः समर्थितः। तथापि, **सिद्धान्त-कौमुद्यादिषु**, पूर्वेषां ग्रन्थेषु ह्रस्वान्तस्याप्युपलम्भात्तेषां मतानुरोधेनात्र ह्रस्वान्तस्य रूपाणि प्रदर्शितानि।

1. सन्नन्ते सर्वत्र, 'अज्झनगमां सनि, (6-4-16) इति दीर्घे, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे 'उद् **ओष्ठ्यपूर्वस्य**' (7-1-102) इत्युत्त्वे रपरत्वे 'हलि च' (8-2-77) इति दीर्घः। 'इट् सनि वा' (7-2-41) इत्यत्रोपदेशाधिकारादत्र सनि इड्विधिर्न।
2. यङन्ते सर्वत्र 'रीङ् ऋतः' (7-4-27) इति रीङागमः। अभ्यासे गुणः।
3. शतरि, '**जुहोत्यादिभ्यः**—' (2-4-75) इति श्लुः विकरणप्रत्ययः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'अर्ति**पिपर्त्योश्च**' (7-4-77) इति अभ्यासस्येत्वम्। '**नाभ्यस्ता**च्छतुः' (7-1-78) इति नुम्निषेधः।
4. '**ऋद्धनोः** स्ये' (7-2-70) इति स्यप्रत्ययस्येडागमः।
5. ण्यन्तात् सनि, '**ओः पुयण्ज्यपरे**' (7-4-80) इत्यभ्यासस्येकारः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| पर्तव्यम्, | पारयितव्यम् | पुपूर्षितव्यम्, | पेप्रीयितव्यम्; |
| परणीयम्, | पारणीयम्, | पुपूर्षणीयम्, | पेप्रीयणीयम्; |
| [1]पार्यम्, | पार्यम्, | पुपूर्ष्यम्, | पेप्रीय्यम्; |
| ईषत्परः-दुष्परः-सुपरः; | — | — | — |
| [2]व्याप्रियमाणः, | पार्यमाणः, | पुपूर्ष्यमाणः, | पेप्रीय्यमाणः; |
| व्यापारः, | पारः, | पुपूर्षः, | पेप्रीयः; |
| पर्तुम्, | पारयितुम्, | पुपूर्षितुम्, | पेप्रीयितुम्; |
| व्यापृतिः, | पारणा, | पुपूर्षा-पिपारयिषा, | पेप्रीया; |
| परणम्, | पारणम्, | पुपूर्षणम्, | पेप्रीयणम्; |
| पृत्वा, | पारयित्वा, | पुपूर्षित्वा, | पेप्रीयित्वा; |
| व्यापृत्य, | व्यापार्य, | व्यापुपूर्ष्य, | प्रपेप्रीय्य; |
| पारम् २, } पृत्वा २, } | पारम् २, } पारयित्वा २, } | पुपूर्षम् २, } पुपूर्षित्वा २, } | पेप्रीयम् २; } पेप्रीयित्वा २. } |

(1045) "पृ प्रीतौ" (V-स्वादिः-1258. अक. अनि. पर.)

'प्रीतौ पृणोत्यृदन्तस्य, व्यायामे म्रियते पृङः।' (श्लो. 34) इति देवः।

अयं धातुश्छान्दस इति क्षीरस्वामिकाश्यपौ।

पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पेप्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिक**पिपर्ति**वत् (1044) ज्ञेयानि। शतरि—[3]पृण्वन्-ती, इति रूपमिति विशेषः।

(1046) "पृङ् व्यायामे" (VI-तुदादिः-1402. अक. अनि. आत्म.)

'व्यायामः=उद्योगः। स च प्रवृत्तिमात्रम्।' इति धा. का. (2-83)। 'प्रीतौ पृणोत्यृदन्तस्य, व्यायामे म्रियते पृङः।' (श्लो. 34) इति देवः। प्रायेणायम् 'वि, आङ्' इत्युपसर्गद्वयपूर्वकः।

पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पेप्रीयकः-यिका;

---

1. 'ऋहलोः—' (3-1-124) इति भावकर्मणोर्ण्यत्प्रत्ययः।
2. यकि, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः।
3. 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः। 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यण्। णत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1044) ज्ञेयानि। शानचि--[1]व्याप्रियमाणः, इति रूपम्।

(1047) "पृच संयमने" (X-चुरादिः-1808. सक. सेट्. उभ.)

आधृषीयः।

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति॥' (श्लो. 51) इति देवः। 'पृची सम्पर्चने' इति क्षीरस्वामी। देवोऽप्यत्रानुकूलः। '—'सम्बन्धने—' इति क्षीरस्वामी।' इति पुरुषकारे। आधृषीयत्वेन णिज्विकल्पः। पर्चकः-र्चिका, पिपर्चयिषकः-षिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्पयतिवत् (554) ज्ञेयानि।

(1048) "पृची सम्पर्चने" (II-अदादिः-1030. सक. सेट्. आत्म.)

सम्पर्चनम्=मिश्रीकरणम्।

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति॥' (श्लो. 51) इति देवः। "उदित्—इति दुर्ग-काश्यप-नन्दि-धनपालादयः। 'इदित्, तृतीयान्तः।' इति कौशिकः। 'ईदित्—' इत्यपरे। तत्र वृत्तौ 'सम्पृच—' (3-2-142) आदिसूत्रे, "पृची सम्पर्के' इति रुधादिर्गृह्यते, न त्वदादिः।' इत्यभिधानात् प्रथमान्त ईदिदेव युक्तः।" इति मा. धा. वृत्तौ। 'पृचे—' इति शाकटायनः।

पर्चकः-र्चिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगृजधातुवत् (422) ज्ञेयानि। [2]पृक्तः-पृक्तम्-पृक्तवान्, इति, [3]पृच्यम्, [4]सम्पर्कः, मधुपर्कः, [5]संपृचानः इति च रूपाणि धातोरस्य निष्ठा-ण्यद्-घञादिषु भवन्तीति विशेषः।

---

1. शानचि, 'तुदादिभ्यः'—(3-1-77) इति शप्रत्यये, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः।
2. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्निषेधः।
3. 'ऋदुपधात्—' (3-1-110) इति भावकर्मणोः क्यप्।
4. निष्ठायामनिट्त्वात्, 'चजोः कु घिण्यतोः' (7-3-52) इति कुत्वम्।
5. शानचि, 'अदिप्रभृतिभ्यः—' (2-4-72) इति शपो लुकि रूपम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1049) "**पृची सम्पर्के**" (VII-रुधादि:-1462. सक. सेट्. पर.)

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति ॥' (श्लो. 51) इति देवः। पर्चकः-र्चिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**गृज**धातुवत् (422) ज्ञेयानि। शतरि-[1]पृञ्चन्-ती, घञि—[2]सम्पर्कः, घिनुणि-[3]सम्पर्की, निष्ठायाम्-पृक्तः, इति च रूपाण्यस्य भवन्तीति विशेषः।

(1050) "**पृजि वर्णे**" (II-अदादि:-1028. अक. सेट्. आत्म.)

'पृची सम्पर्चने' इति धातोः पाठान्तरमिदं **कौशिकादिमतेन**। 'वर्णः= पिङ्गलत्वं तत्। 'सम्पर्चने' इत्येके! 'अवयवे' इत्यन्ये। 'अव्यक्ते शब्दे' इत्यपरे।' इति **धा. का. व्याख्यायाम्** (2-46)। 'पृणक्ति **पृङ्क्ते** सम्पर्के—॥' (श्लो. 51) इति देवपाठाभ्युपगमेनाप्ययं पाठोऽस्तीति ज्ञायते।

पृञ्जकः-ञ्जिका, पृञ्जकः-ञ्जिका, पिपृञ्जिषकः-षिका, परीपृञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि। शानचि पृञ्जानः, इति रूपमिति विशेषः। [A]सम्पृञ्जितम्।

(1051) "**पृड सुखने**" (VI-तुदादि:-1328. अक. सेट्. पर.)

पर्डकः-र्डिका, पर्डकः-र्डिका, पिपर्डिषकः-षिका, परीपृडकः-डिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**गर्जति**वत् (422) ज्ञेयानि। शतरि पृडन्-ती, इति रूपमिति विशेषः।

(1052) "**पृण प्रीणने**" (VI-तुदादि:-1329. अक. सेट्. पर.)

पर्णकः-र्णिका, पर्णकः-र्णिका, पिपर्णिषकः-षिका, परीपृणकः-णिका; इत्यादीनि

---

1. शतरि, '**रुधादिभ्यः**—' (3-1-78) इति श्नम् विकरणप्रत्ययः। मित्त्वादन्त्यादचः परो भवति। '**श्नसोरल्लोपः**' (6-4-111) इति श्नमोऽकारस्य लोपः। नकारस्यानुस्वारे, परसवर्णे च रूपमेवम्।
2. निष्ठायामनिट्त्वेन 'चजोः कु—' (7-3-52) इति घञि कुत्वम्।
3. '**सम्पृचानुरुध**—' (3-2-142) इत्यादिना सम्पूर्वकादस्मात् कर्तरि, तच्छीलादिष्वर्थेषु घिनुण्प्रत्ययः। 'चजोः—' (7-3-52) इति कुत्वम्।

A. 'शिञ्जानपिञ्जानसुवर्णभूषा**सम्पृञ्जितो** वृज्यवितृञ्जिसेव्यः।' धा. का. 2.46.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सर्वाण्यपि रूपाणि भौवादिकगर्जतिवत् (422) ज्ञेयानि। [1]लोकम्पृणः।

(1053) "पृथ प्रक्षेपे" (X-चुरादिः-1554. सक. सेट्. उभ.)

'पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः ॥' (श्लो.99) इति देवः।

पर्थकः-र्थिका, पिपर्थयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककल्पयतिवत् (250) ज्ञेयानि। ल्त्वादिकं नास्येति विशेषः। [A]पर्थितः।

(1054) "पृषु सेचने" (I-भ्वादिः-705. सक. सेट्. पर.)

'—हिंसासंक्लेशनयोश्च' इति माधवः।

पर्षकः-र्षिका, पर्षकः-र्षिका, पिपर्षिषकः-षिका, [2]परीपृषकः-षिका;
पर्षिता-त्री, पर्षयिता-त्री, पिपर्षिषिता-त्री, परीपृषिता-त्री;
पर्षन्-[3]व्यतिपर्षन्-न्ती, पर्षयन्-न्ती, पिपर्षिषन्-न्ती; —
— पर्षयमाणः, — परीपृष्यमाणः;
— पर्षयिष्यमाणः, — परीपृषिष्यमाणः;
पृट्-पृड्-पृषौ-पृषः; — — —
[4]पृष्टम्-पृष्टः-पृष्टवान्, पर्षितः, पिपर्षिषितः, परीपृषितः-तवान्;
पर्षः, [5]पर्षणः, सुपर्षी, पर्षः, पिपर्षिषुः, परीपर्षः;
पर्षितव्यम्, पर्षयितव्यम्, पिपर्षिषितव्यम्, परीपृषितव्यम्;
पर्षणीयम्, पर्षणीयम्, पिपर्षिषणीयम्, परीपृषणीयम्;

---

1. लोकं पृणतीति लोकम्पृणः। 'कप्रकरणे-मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5) इति कर्तरि कप्रत्यये, 'लोकस्य पृणे' (वा. 6-3-70) इति मुमागमः। लोकम्पृणः=यागवेदिका, आशुकार्यकारी, जनरञ्जकश्च।
2. यङन्ते सर्वत्र, 'रीगृदुपधस्य च' (7-4-90) इति रीगागमः।
3. 'न गतिहिंसार्थेभ्यः' (1-3-15) इति कर्मव्यतीहारे शानज्निषेधात् शतैव।
4. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। ष्टुत्वम्।
5. नन्द्यादित्वेन (3-1-134) कर्तरि ल्युप्रत्ययः।

A. 'अप्रार्थितो व्रजगृहेऽपि च पर्थितोऽभूदासम्बयन् जनमतिं निजशाम्बरीभिः ॥' धा. का. 3.15.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]पृष्यम्, | पर्ष्यम्, | पिपर्षिष्यम्, | परीपृष्यम्; |
| ईषत्पर्षः-[2]दुष्पर्षः-सुपर्षः; | | — | — |
| पृष्यमाणः, | पर्ष्यमाणः, | पिपर्षिष्यमाणः, | परीपृष्यमाणः; |
| पर्षः, | पर्षः, | पिपर्षिषः, | परीपृषः; |
| पर्षितुम्, | पर्षयितुम्, | पिपर्षिषितुम्, | परीपृषितुम्; |
| पृष्टिः, | पर्षणा, | पिपर्षिषा, | परीपृषा; |
| पर्षणम्, | पर्षणम्, | पिपर्षिषणम्, | परीपृषणम्; |
| [3]पर्षित्वा-पृष्ट्वा, | पर्षयित्वा, | पिपर्षिषित्वा, | परीपृषित्वा; |
| प्रपृष्य, | प्रपर्ष्य, | प्रपिपर्षिष्य, | प्रपरीपृष्य; |

[4]दण्डोपपर्षम्, दण्डेनोपपर्षम्, दण्डपर्षं वा गाः कालयति।

| | | | |
|---|---|---|---|
| पर्षम् २, पर्षित्वा २-पृष्ट्वा २, | पर्षम् २, पर्षयित्वा २, | पिपर्षिषम् २, पिपर्षिषित्वा २, | परीपृषम् २; परीपृषित्वा २; |

[5]पृषितम्, [6]पृषत्-पृषती, [7]पृषतम्।

## (1055) "पॄ पालनपूरणयोः" (III-जुहोत्यादिः-1086. सक.सेट्.पर.)

'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति **देवः**।

---

1. '**ऋदुपधात्—**' (3-1-110) इति भावकर्मणोः क्यप्। ण्यदपवादः।
2. खल्विधायके सूत्रे (3-3-126) '**दुस्**' इति सान्तस्योपसर्गस्योपादानम्, रेफान्तस्य च, इति पक्षद्वयम्। तत्र सान्तस्यैवेति पक्षे षत्वमत्रेति ज्ञेयम्। रेफान्तस्यैवेति पक्षे तु '**दुरः** षत्वणत्वयोरुपसर्गत्वप्रतिषेधः' (वा. 1-4-60) इति उपसर्गत्वनिषेधात् षत्वाभावः।
3. '**उदितो** वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे, '**न क्त्वा सेट्**' (1-2-18) इति कित्त्वनिषेधाद् गुणः।
4. '**हिंसार्थानां** च समानकर्मकाणाम्' (3-4-48) इति णमुल्। 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (2-2-21) इति समासविकल्पः।
5. बाहुलकान्निष्ठायामिडागम इति **केचित्**। वस्तुतस्तु बाहुलकात् औणादिके इतच्-प्रत्यये रूपमेवमिति ज्ञेयम्।
6. 'वर्तमाने **पृषद्**-' (द. उ. 6-5) इत्यादिना कतिप्रत्यये, तस्य शतृवद्भावेन शपि, पररूपे च रूपमेवम्। स्त्रियाम्, उगित्त्वेन, '**उगितश्च**' (4-1-6) इति ङीपि **पृषती** इति रूपम्।
7. '**पृषिरञ्जिभ्यां** कित्' (द. उ. 6-15) इति अतच्प्रत्ययः। **पृषतः**=मृगः, बिन्दुश्च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]पारकः-रिका, पारकः-रिका, [2]पुपूर्षकः-पिपरिषकः-पिपरीषकः-षिका, [3]पोपुरकः-रिका ;

परिता-परीता-त्री, पारयिता-त्री, पुपूर्षिता-पिपरिषिता-पिपरीषिता-त्री, पोपुरिता-त्री ;

[4]पिपुरत्-पिपुरतौ-पिपुरतः, पारयन्-न्ती, पुपूर्षन्-पिपरिषन्-पिपरीषन्-न्ती ; —

परिष्यन्-परीष्यन्-न्ती-ती, पारयिष्यन्-न्ती-ती, पुपूर्षिष्यन्-पिपरिषिष्यन् - पिपरीषिष्यन्-न्ती-ती ; —

— पारयमाणः, — पोपूर्यमाणः ;

— पारयिष्यमाणः, — पोपुरिष्यमाणः ;

पूः-पुरौ-पुरः ; — — —

[5]पूर्तम्-पूर्तवान्, पारितः, पुपूर्षितः-पिपरिषितः-पिपरीषितः, पोपुरितः-तवान् ;

परः- [6]पूः[A] [7]पारयः, [8]पारयिष्णुः, पुपूर्षुः-पिपरिषुः-पिपरीषुः, पोपुरः ;

---

1. 'इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन' (वा. 7-1-102) इति वचनेन वृद्धिरत्र ज्ञेया। एवं तव्यदादिषु गुणोऽपि ज्ञेयः।
2. सन्नन्ते सर्वत्र, 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'श्र्युकः क्किति' (7-2-11) इति प्राप्तमिण्निषेधं बाधित्वा, 'इट् सनि वा' (7-2-41) इतीड्विकल्पः। इट्पक्षे 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्त्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे च रूपमेवम्। इडभावपक्षे 'वृतो वा' (7-2-38) इति इटो दीर्घविकल्पे रूपद्वयम्। तत्र सनः कित्त्वाभावाद् गुणः, अभ्यासे इकारश्चेति ज्ञेयम्। आहत्य रूपत्रयमिति बोध्यम्।
3. यङन्ते सर्वत्र, उत्वरपरत्वाल्लोपयलोपेषु अभ्यासे, 'गुणो यङ्लुकोः' (7-4-82) इति गुणो ज्ञेयः।
4. शतरि, 'जुहोत्यादिभ्यः—' (2-4-75) इति शपः श्लौ, 'श्लौ' (6-1-10) इति द्विर्वचने, श्लोः शित्त्वेन सार्वधातुकत्वात् धातोरुत्वे रपरत्वे, 'अर्तिपिपर्त्योश्च' (7-4-77) इत्यभ्यासेकारः।
5. 'श्र्युकः क्किति' (7-2-11) इति इण्निषेधे, उत्वादिकम्।
6. तच्छीलादिषु कर्तृषु 'भ्राजभासधुर्विद्युतोर्जिपॄ—' (3-2-177) इति क्विपि उत्वादिषु प्रवृत्तेषु रेफस्य विसर्गे रूपम्।
7. ण्यन्तादस्मात् 'अनुपसर्गाल्लिम्पविन्दधारिपारि—'(3-1-138) इति कर्तरि शप्रत्यये तस्य शित्त्वेन सार्वधातुकत्वात् शपि, पररूपे, अयादेशे च रूपम्।
8. 'णेश्छन्दसि' (3-2-137) इति इष्णुच्प्रत्यये, 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः।

A. 'रथस्य तस्यां पुरि दत्तचक्षुः विद्वान् विदामास शनैर्नं यातम्॥' शि.व 3.32.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



परितव्यम्-परीतव्यम्, पारयितव्यम्, पुपूर्षितव्यम्-पिपरिषितव्यम्-पिपरीषितव्यम्, पोपुरितव्यम्;

परणीयम्, पारणीयम्, पुपूर्षणीयम्, पिपरिषणीयम्-पिपरीषणीयम्, पोपुरणीयम्;

पार्यम्, पार्यम्, पुपूर्ष्यम्-पिपरिष्यम्-पिपरीष्यम्, पोपूर्यम्;

ईषत्परः-दुष्परः-सुपरः; — —

[1]पूर्यमाणः, पार्यमाणः, पुपूर्ष्यमाणः-पिपरिष्यमाणः-पिपरीष्यमाणः, पोपूर्यमाणः;

परः, पारः, पुपूर्षुः-पिपरिषुः-पिपरीषुः, पोपुरः;

परितुम्-परीतुम्, पारयितुम्, पुपूर्षितुम्-पिपरिषितुम्-पिपरीषितुम्, पोपुरितुम्;

पूर्तिः- [2]पूर्णिः, पारणा, पुपूर्षा-पिपरिषा-पिपरीषा, पोपुरा;

परणम्, पारणम्, पुपूर्षणम्-पिपरिषणम्-पिपरीषणम्, पोपुरणम्;

पूर्त्वा, पारयित्वा, पुपूर्षित्वा-पिपरिषित्वा-पिपरीषित्वा, पोपुरित्वा;

प्रपूर्य, प्रपार्य, प्रपुपूर्ष्य-प्रपिपरिष्य प्रपिपरीष्य, प्रपोपूर्य;

पारम् २, } पारम् २, } पुपूर्षम् २-पिपरिषम् २-पिपरीषम् २, }
पूर्त्वा २, } पारयित्वा २, } पुपूर्षित्वा २-पिपरिषित्वा २-पिपरीषित्वा २, }
पोपुरम् २; }
पोपुरित्वा २; }

[3] पुरुः, [4]पर्व, [5]पुरीषम्, [6]पुरुषः, [7]परुषः, [8]परुः।

---

1. यकः कित्त्वेन उत्वरपरत्वादिकं ज्ञेयम्।
2. 'ऋल्वादिभ्यः क्तिन् निष्ठावद् वाच्यः' (वा. 8-2-44) इति नकारे, णत्वम्। एतच्च पाक्षिकमिति केचित्।
3. 'पृभि—' (द. उ. 1-108) इति कुप्रत्ययः। पृणाति, पूर्यते वा इति पुरुः= विस्तीर्णः, लोकश्च।
4. 'स्नामदिपद्यर्तिपॄ—' (द. उ. 6-68) इति वनिप्प्रत्ययः। पृणाति, पिपर्ति पूर्यते वा इति पर्व=अङ्गुल्यग्रम्, पुण्यतिथिश्च।
5. 'शॄपॄभ्यां कित्' (द. उ. 9-10) इतीषन्प्रत्ययः, तस्य कित्त्वं च। पृणाति, पूर्यते वा तेनोदरमिति पुरीषम्।
6. 'पुरः कुषन्' (द. उ. 9-14) इत्यनेन कुषन्प्रत्यये, उत्वादिकम्।
7. 'पॄकलिभ्यामुषच्' (द. उ. 9-15) इत्युषच्प्रत्ययः। पृणाति, पिपर्ति इति वा परुषः=अमृदुः।
8. 'अर्तिपॄवपि —' (द. उ. 9-39) इत्युसिप्रत्ययः। परुः= समुद्रः, राजा च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1056) " पॄ पालनपूरणयोः " (IX-क्र्यादिः-1489. सक. सेट्. पर.)
प्वादिः, ल्वादिश्च ।

'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः। पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पिपरीषकः-पिपरिषकः-षिका, पोपुरकः-रिका ; [1]पारयः[A], [2]पृणन्-ती, इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1055) ज्ञेयानि । [3]पूर्तम्[B]-पूर्तः-पूर्तवान् ।

(1057) " पॄ पूरणे " (X-चुरादिः-1548. सक. सेट्. उभ.)

'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः। पारकः-रिका, पिपारयिषकः-षिका, पारकः-रिका, पुपूर्षकः-र्षिका, पिपरीषकः-पिपरिषकः-षिका, पोपुरकः-रिका ;
इत्यादीनि सर्वाण्यपि रूपाणि ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्तात् शुद्धात् तदुपरि सन्नन्तात् यङन्ताच्च यथायथं जौहोत्यादिकपॄधातुवत् (1052) बोध्यानि। ण्यन्तात् सनि—पिपारयिषिता-त्री, पिपारयिषन्-न्ती, पिपारयिषिष्यन्-न्ती-ती; पिपारयिषमाणः, पिपारयिषिष्यमाणः, पिपारयिट्-यिषौ-यिषः, पिपारयिषितम्-तः-तवान्, पिपारयिषुः, पिपारयिषितव्यम्, पिपारयिषणीयम्, पिपारयिष्यम्, ईषत्पिपारयिषः-दुष्पिपारयिषः-सुपिपारयिषः, पिपारयिष्यमाणः, पिपारयिषः, पिपारयिषितुम्, पिपारयिषा, पिपारयिषणम्, पिपारयिषित्वा, प्रपिपारयिष्य, पिपारयिषम् २-पिपारयिषित्वा २, इतीमानि रूपाणीति विशेषः। णिजभावपक्षे शुद्धात् शतरि-परन्-न्ती, परिष्यन्-न्ती-ती इति रूपाणीति विशेषः।

---

1. 'अनुपसर्गाल्लिम्पविन्दधारिपारि—' (3-1-138) इति ण्यन्तादस्मात् कर्तरि शप्रत्यये, शपि, पररूपे, णेरयादेशे च रूपम् ।
2. शतरि, 'क्र्यादिभ्यः—(3-1-81) इति श्ना विकरणप्रत्ययः। 'प्वादीनां ह्रस्वः' (7-3-80) इति शिति परे ह्रस्वः । 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति णत्वम् ।
3. 'न ध्याख्यापॄमूर्च्छिमदाम्' (8-2-57) इति निष्ठानत्वनिषेधः ।

A. 'धारयैः कुसुमोर्मीणां पारयैः बाधितुं जनान् ।' भ. का. 6. 79.

B. 'नागं ददर्श पटचूर्णमुखं धुनानं
कर्णौ भृगन्तमखिलान् अभिपूर्तरोषम् ॥' धा. का. 3.6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1058) "पेलृ गतौ" (I-भ्वादिः-541. सक. सेट्. आत्म.)

पेलकः-लिका, पेलकः-लिका, पिपेलिषकः-षिका, पेपेलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। पेला भुक्तसमुज्झितम्। पेलकः =त्वग्गन्धः । पेलवम् =तनु। औणादिकोऽयम्।

(1059) "पेवृ सेवने" (I-भ्वादिः-504. सक. सेट्. आत्म.)

'—सेचने' इति मैत्रेयः। क्षीरस्वामिमैत्रेयादीनां मतेनास्य पाठः। पेवकः-विका, पेवकः-विका, पिपेविषकः-षिका, पेपेवकः-विका ; इत्यादीनि सर्वाणि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। अस्य धातोः आत्मनेपदित्वात् शानचि-पेवमानः, पेविष्यमाणः, पिपेविषमाणः, पिपेविषिष्यमाणः, इतीमान्यधिकानीति विशेषः।

(1060) "पेषृ प्रयत्ने" (I-भ्वादिः-615. अक. सेट्. आत्म.)

'एषृ—' इति धातोः पाठान्तरमिदम्।

पेषकः-षिका, पेषकः-षिका, पिपेषिषकः-षिका, पेपेषकः-षिका; इत्यादीनि रूपाणि भौवादिकगेपतिवत् (429) ज्ञेयानि। क्विपि तु [1]पेट्-पेड्-पेषौ-पेषः इति रूपम्। कर्तरि क्तप्रत्यये अपेषितम्[A] इति।

(1061) "पेसृ गतौ" (I-भ्वादिः-720. सक. सेट्. पर.)

'णौ पिंसयति भाषार्थे, गत्यां तु शपि पेसति।' (श्लो. 192) इति देवः।

पेसकः-सिका, पेसकः-सिका, पिपेसिषकः-षिका, पेपेसकः-सिका ;
पेसिता-त्री, पेसयिता-त्री, पिपेसिषिता-त्री, पेपेसिता-त्री ;
पेसन्-न्ती, पेसयन्-न्ती, पिपेसिषन्-न्ती ; —
पेसिष्यन्, पेसयिष्यन्-न्ती-ती, पिपेसिषिष्यन्-न्ती-ती ; —
— पेसयमानः, पेसयिष्यमाणः, — पेपेस्यमानः, पेपेसिष्यमाणः ;
पेः-पेसौ-पेसः ; — — —
पेसः, पेसः, पिपेसिषुः, पेपेसः ;
पेसितव्यम्, पेसयितव्यम्, पिपेसिषितव्यम्, पेपेसितव्यम् ;

---

1. 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वे चर्त्वविकल्पे च रूपमेवम्।
A. 'येषणात्तहरिजेश्वसंभ्रमान्नेषितस्मृतिरपेषितो रथात्॥' धा. का. 1.78.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पेसनीयम्, पेसनीयम्, पिपेसिषणीयम्, पेपेसनीयम्;
पेस्यम्, पेस्यम्, पिपेसिष्यम्, पेपेस्यम्;
ईषत्पेसः-दुष्पेसः-सुपेसः; —
पेस्यमानः, पेस्यमानः, पिपेसिष्यमाणः, पेपेस्यमानः;
पेसितुम्, पेसयितुम्, पिपेसिषितुम्, पेपेसितुम्,
पेसा, पेसना, पिपेसिषा, पेपेसा;
पेसनम्, पेसनम्, पिपेसिषणम्, पेपेसनम्;
पेसित्वा, पेसयित्वा, पिपेसिषित्वा, पेपेसित्वा;
प्रपेस्य, प्रपेस्य, प्रपिपेसिष्य, प्रपेपेस्य;
पेसम् २, पेसित्वा २, } पेसम् २, पेसयित्वा २, } पिपेसिषम् २, पिपेसिषित्वा २, } पेपेसम् २; पेपेसित्वा २. }

## (1062) "पै शोषणे" (I-भ्वादिः-920. अक. अनि. पर.)

'पाने पिबति, रक्षायां पाति, **पायति** शोषणे॥' (श्लो. 5) इति **देवः**।
[1]पायकः-यिका, [2]पायकः-यिका, पिपासकः-सिका, [3]पापायकः-यिका;
पाता-पात्री, पाययिता-त्री, पिपासिता-त्री, पापायिता-त्री;
[4]पायन्-न्ती, पाययन्-न्ती, पिपासन्-न्ती; —
पास्यन्-न्ती-ती, पाययिष्यन्-न्ती-ती, पिपासिष्यन्-न्ती-ती; —
[5]व्यतिपायमानः, पाययमानः, व्यतिपिपासमानः, पापायमानः;
व्यतिपास्यमानः, पाययिष्यमाणः, व्यतिपिपासिष्यमाणः, पापायिष्यमाणः,
पाः-पौ-पः; — — —

1. 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः। एवं घञ्प्रत्यये, णमुलि च युगागमो ज्ञेयः।
2. 'शाच्छासाह्वाव्यावेपां युक्' (7-3-37) इति ण्यन्ते सर्वत्र युगागमः। आदन्तलक्षणयुगागमस्यापवादः। सूत्रेऽत्र लाक्षणिकस्यापि पाधातोरस्य ग्रहणम् इति व्याख्यातारः।
3. 'गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्' (वा. 2-4-77) इति वचनात् ईत्वविधायके सूत्रे यङन्ते, नास्य ग्रहणमिति क्तप्रत्ययादिषु च ईत्वमस्य धातोर्नेति ज्ञेयम्। तेनैवं रूपम्।
4. '—अशिति' (6-1-45) इत्युक्तत्वादात्वं न। तेन शतरि आयादेशे रूपमेवम्।
5. कर्मव्यतीहारे शानच्। एवं सन्नन्तेऽपि प्रकृतेरात्मनेपदनिमित्तमेव शानज्निमित्तमिति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [A]पातम्-तः, | पायितः, | पिपासितः, | पापायितः-तवान्; |
| [1]पायः, [2]सुपः, | | पायः, पिपासुः, | पापः; |
| पातव्यम्, | पाययितव्यम्, | पिपासितव्यम्, | पापायितव्यम्; |
| पानीयम्, | पायनीयम्, | पिपासनीयम्, | पापायनीयम्; |
| पेयम्, | पाय्यम्, | पिपास्यम्, | पापाय्यम्; |
| [3]ईषत्पानःदुष्पानः-सुपानः; | | — | — |
| पायमानः, | पाय्यमानः, | पिपास्यमानः, | पापाय्यमानः; |
| पायः, | पायः, | पिपासः, | पापायः; |
| पातुम्, | पाययितुम्, | पिपासितुम्, | पापायितुम्; |
| पातिः, [4]सुपा, | पायना, | पिपासा, | पापाया; |
| पानम्, | पायनम्, | पिपासनम्, | पापायनम्; |
| पात्वा, | पाययित्वा, | पिपासित्वा, | पापायित्वा; |
| प्रपाय, | प्रपाय्य, | प्रपिपास्य, | प्रपापाय्य; |
| पायम् २, पात्वा २, | पायम् २, पाययित्वा २, | पिपासम् २, पिपासित्वा २, | पापायम् २; पापायित्वा २. |

## (1063) "पैणृ गतिप्रेरणश्लेषणेषु"

(I-भ्वादिः-458. सक. सेट्. पर.)

'पेणृ—' इति क्वचित् पाठः। 'प्रैणृ—' इति मा. धा. वृत्तिसंमतः पाठः।

| | | | |
|---|---|---|---|
| पैणकः-णिका, | पैणकः-णिका, | [5]पिपैणिषकः-षिका, | [6]पेपैणकः-णिका; |
| पैणिता-त्री, | पैणयिता-त्री, | पिपैणिषिता-त्री, | पेपैणिता-त्री; |

---

1. आदन्तलक्षणे णप्रत्यये युगागमे च रूपमेवम्।
2. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः।
3. ईषदाद्युपपदेषु, 'आतो युच्' (3-3-128) इति खलर्थवादो युच्। अनादेशः।
4. स्त्रियां भावादौ, 'आतश्चोपसर्गे' (3-3-106) इत्यङ्।
5. सन्नन्तात् ण्वुलि, द्वित्वे, अभ्यासे 'ह्रस्वः' (7-4-59) इति ह्रस्वः। स च, 'एच इग् घ्रस्वादेशे' (1-1-48) इति परिभाषया इकाररूप इति ज्ञेयम्।
6. यङन्ताण्ण्वुलि अभ्यासे ह्रस्वे, तस्य 'गुणो यङ्लुकोः' (7-4-82) इति गुणेन पुनरेकारश्रवणमिति ज्ञेयम्।

A. 'अपातमात्यं शयितं सुवानकाशदिवि स्तातततनौ फणीन्द्रे॥' धा. का. 2-32.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपेपतिवत् (429) ज्ञेयानि। शतरि-पैणन्-न्ती इति रूपमिति विशेषः।

(1064) "ओ प्यायी वृद्धौ" (I-भ्वादिः-488. अक. सेट्. आत्म.)

प्रायेणायमाङ्पूर्वः।

प्यायकः-यिका, प्यायकः-यिका, [1]पिप्यायिषकः-षिका, [2]पेपीयकः-यिका;
प्यायिता-त्री, प्याययिता-त्री, पिप्यायिषिता-त्री, पेपीयिता-त्री;
— [3]आप्याययन्-न्ती; आप्याययिष्यन्-न्ती-ती; —
आप्यायमानः, आप्याययमानः, पिप्यायिषमाणः, पेपीयमानः;
आप्यायिष्यमाणः, आप्याययिष्यमाणः, पिप्यायिषिष्यमाणः, पेपीयिष्यमाणः;
[4]सुप्याः-सुप्यौ-सुप्यः; — — —
[5]पीनः-पीनवान्, [6]आप्यानः[A]-प्रप्यानः(चन्द्रमाः), [7]आपीनम्[B] (अन्धूः, ऊधो वा), प्यायितः, पिप्यायिषितः, पेपीयितः-तवान्;
प्यायः, [8]प्यायिता[C], [9]पिप्यिवान्,

---

1. सन्नन्तात् ण्वुलि, अभ्यासे हलादिशेषे, इडागमे च रूपम्।
2. यङन्ते सर्वत्र, 'लिड्यङोश्च' (6-1-29) इति **पी**भावे, द्विर्वचने अभ्यासे गुणश्चेति ज्ञेयम्।
3. चित्तवत्कर्तृकत्वे परस्मैपदमेव। अचित्तवत्कर्तृकत्वे तु आत्मनेपदमेव।
4. क्विपि वलि लोपे रूपमेवम्।
5. '**प्यायः पी**' (6-1-28) इति विकल्पेन प्रकृतेः पीभावः। '**श्वीदितो** निष्ठायाम्' (7-2-14) इतीण्निषेधः। '**ओदितश्च**' (8-2-44) इति निष्ठानत्वम्।
6. '**प्यायः पी**' (6-1-28) इत्यत्र व्यवस्थितविभाषाश्रयणात्, सोपसर्गात् पीभावो न। तेनात्र वलि लोपे निष्ठानत्वे च रूपं ज्ञेयम्।
7. 'आङ्पूर्वादन्धूधसोरिति वक्तव्यम्' (वा. 6-1-28) इति वचनात् अन्धूधसो-र्विशेष्ययोः आङुपसृष्टादस्माद्धातोः पीभावे निष्ठानत्वे च रूपं ज्ञेयम्।
8. धातोर्यकारान्तत्वेन '**न यः**' (3-2-152) इति युचो निषेधात्, तच्छीलादिषु कर्तृषु औत्सर्गिकः '**तृन्**' (3-2-135) इति तृन्नेव।
9. लिटः क्वसौ, 'लिड्यङोश्च' (6-1-29) इति पीभावे, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे यणादेशे च रूपम्।

A. 'यद्वाप्यानं हिमोस्रेण भनक्त्युपवनं कपिः॥' भ. का. 9.2.
B. '**आपीन**भारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः।' रघुवंशे 2.18.
C. 'नावैत्याप्**यायितारं** किं कमलानि रविं कपिः।' भ. का. 7.17.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]आपीः, प्यायः, पिप्यायिषुः, पेप्यः ;

| | | | |
|---|---|---|---|
| प्यायितव्यम्, | प्याययितव्यम्, | पिप्यायिषितव्यम्, | पेपीयितव्यम् ; |
| [2]प्रप्यायनीयम्, | प्रप्यायनीयम्, | पिप्यायिषणीयम्, | पेपीयनीयम् ; |
| आप्याय्यम्, | प्याय्यम्, | पिप्यायिष्यम्, | पेपीय्यम् ; |
| ईषत्प्यायः-दुष्प्यायः-सुप्यायः ; | | — | — |
| प्याय्यमानः, | प्याय्यमानः, | पिप्यायिष्यमाणः, | पेपीय्यमानः ; |
| आप्यायः, | प्यायः, | पिप्यायिषः, | पेपीयः ; |
| आप्यायितुम्, | आप्याययितुम्, | पिप्यायिषितुम्, | पेपीयितुम् ; |
| [3]प्याया, | [A]आप्यायना, | पिप्यायिषा, | पेपीया ; |
| आप्यायनम्, | [4]प्रप्यायनम्, | पिप्यायिषणम्, | पेपीयनम् ; |
| प्यायित्वा, | प्याययित्वा, | पिप्यायिषित्वा, | पेपीयित्वा ; |
| आप्याय्य, | प्रप्याय्य, | प्रपिप्यायिष्य, | प्रपेपीय्य ; |
| प्यायम् २,<br>प्यायित्वा २, | प्यायम् २,<br>प्याययित्वा २, | पिप्यायिषम् २,<br>पिप्यायिषित्वा २, | पेपीयम् २ ;<br>पेपीयित्वा २. |

## (1065) "प्यैङ् वृद्धौ" (I-भ्वादिः-964. अक. अनि. आत्म.)

| | | | |
|---|---|---|---|
| प्यायकः-यिका, | प्यापकः-पिका, | पिप्यासकः-सिका, | पाप्यायकः-यिका ; |
| प्याता-त्री, | प्यापयिता-त्री, | पिप्यासिता-त्री, | पाप्यायिता-त्री ; |
| — | प्यापयन्-न्ती, | प्यापयिष्यन्-न्ती-ती ; | — |

---

1. 'अन्येभ्योऽपि दृश्यते' (3-2-178) इत्यत्र बाहुलकात् 'ध्याप्योः सम्प्रसारणं च' (भाष्यम्) इति वचनात् आङ्पूर्वादस्मात् क्विपि, सम्प्रसारणे, 'लोपो व्योर्वलि' (6-1-66) इति यलोपे च रूपमेवमिति **प्र. सर्वस्वे**। प्रकृतसूत्रे 'ध्यायतेः सम्प्रसारणं च' इत्येव **भाष्ये** दृश्यते। '**भट्टपाद**सम्मतोऽयं पाठः स्यात् दाक्षिणात्यः साधुः।' इति **प्र. स. टीका** (पु. 68)।

2. उपसर्गस्थान्निमित्तात् परस्य अच उत्तरस्य कृत्स्थस्य नकारस्य 'न भाभूपूकमिगमिप्यायीवेपाम्' (8-4-34) इति णत्वनिषेधः।

3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियाम् अकारप्रत्ययः।

4. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति ण्यन्तादुपसर्गस्थान्निमित्तात् परस्य कृत्स्थस्य नस्य णत्वनिषेधः।

A. 'छायाविशेषैः प्रचितैस्तदर्हामाप्यायनामारचयन्ति वृक्षाः ॥' या.अ.18.67.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| प्यायमानः, | [1]प्यापयमानः, | पिप्यासमानः, | पाप्यायमानः; |
| प्यास्यमानः, | प्यापयिष्यमाणः, | पिप्यासिष्यमाणः, | पाप्यायिष्यमाणः; |
| प्याः-प्यौ-प्यः; | — | — | |
| [2]प्यानम्-[A]नः, प्यानवान्, | प्यापितः, | पिप्यासितः, | पाप्यायितः-तवान्; |
| [3]आप्यायः, [4]पीवा-[B]पीवरी, | प्यापः, | पिप्यासुः, | पाप्यः; |
| प्यातव्यम्, | प्यापयितव्यम्, | पिप्यासितव्यम्, | पाप्यायितव्यम्; |
| प्यानीयम्, | प्यापनीयम्, | पिप्यासनीयम्, | पाप्यायनीयम्; |
| प्येयम्, | प्याप्यम्, | पिप्यास्यम्, | पाप्याय्यम्; |
| [5]ईषत्प्यानः-दुष्प्यानः-सुप्यानः; | | — | — |
| प्यायमानः, | प्याप्यमानः, | पिप्यास्यमानः, | पाप्याय्यमानः; |
| प्यायः, | प्यापः, | पिप्यासः, | पाप्यायः; |
| प्यातुम्, | प्यापयितुम्, | पिप्यासितुम्, | पाप्यायितुम्; |
| प्यातिः, | [6]आप्या, प्यापना, | पिप्यासा, | पाप्याया; |
| प्यानम्, | प्यापनम्, | पिप्यासनम्, | पाप्यायनम्; |
| प्यात्वा, | प्यापयित्वा, | पिप्यासित्वा, | पाप्यायित्वा; |
| प्रप्याय, | प्रप्याप्य, | प्रपिप्यासिष्य, | प्रपाप्याय्य; |
| प्यायम् २, प्यात्वा २, | प्यापम् २, प्यापयित्वा २, | पिप्यासम् २, पिप्यासित्वा २, | पाप्यायम् २; पाप्यायित्वा २. |

1. अचित्तवत्कर्तृकत्वे शानच्। चित्तवत्कर्तृकत्वे तु 'अणावकर्मकात्—' (1-3-88) इति ण्यन्ताच्छतैव।
2. '**संयोगादेरातो धातोर्यण्वतः**' (8-2-43) इति निष्ठानत्वे रूपम्।
3. 'श्याऽऽद्—' (3-1-141) इत्यादिना कर्तरि णप्रत्यये युगागमः।
4. '**आतो** मनिन्—' (3-2-74) इत्यनेन बाहुलकात् क्वनिप्प्रत्यये, 'प्याप्योः सम्प्रसारणं च' (भाष्यम्-3-2-178) इति **प्रक्रियासर्वस्वानुसारिभाष्य**-वाक्येन सम्प्रसारणे च रूपम्। स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीब्रेफौ भवतः।
5. ईषदाद्युपपदेषु, '**आतो** युच्' (3-3-128) इति युच्प्रत्ययः। खलोऽपवादः।
6. '**आतश्चोपसर्गे**' (3-3-106) इत्यङ्।

A. 'दयस्व मां देव कृपाम्बुशीत **प्यानौ**जसा त्रातजगत्त्रयं त्वाम्।' धा. का. 2.37.

B. 'जघनमलघु**पीवरो**रु कृच्छ्रादुरुनिबिरीसनितम्बभारखेदि।' शि. व. 7.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1066) "प्रच्छ ज्ञीप्सायाम्" (VI-तुदादि:-1413. सक. अनि. पर.)

### किरादि: ।

[1]प्रच्छक:-च्छिका, प्रच्छक:-च्छिका, [2]पिपृच्छिषक:-षिका, [3]परीपृच्छक:-च्छिका;

[4]प्रष्टा-प्रष्ट्री, प्रच्छयिता-त्री, पिपृच्छिषिता-त्री, परीपृच्छिता-त्री;

[5]पृच्छन्-न्ती-ती, प्रच्छयन्-न्ती, पिपृच्छिषन्-न्ती; —

[6]प्रक्ष्यन्-न्ती-ती, प्रच्छयिष्यन्, पिपृच्छिषिष्यन्-न्ती-ती; —

[7]सम्पृच्छमान:, [8]आपृच्छमान:,[A] प्रच्छयमान:, [9]आपिपृच्छिषमाण:, संपिपृच्छिषमाण:, परीपृच्छ्यमान:;

सम्प्रक्ष्यमाण:-आप्रक्ष्यमाण:, प्रच्छयिष्यमाण:, आपिपृच्छिषिष्यमाण:-सम्पिपृच्छिषिष्यमाण:, परीपृच्छिष्यमाण:;

---

1. 'प्रछ' इत्येव धातु:। तत्र, 'छे च' (6-1-73) इति ह्रस्वस्य तुकि, तस्य श्चुत्वेन चकार: सर्वत्र ज्ञेय:।
2. सन्नन्तात् ण्वुलि, 'किरश्च पञ्चभ्य:' (7-2-75) इतीडागमे, 'रुदविदमुषग्रहिस्वपिप्रच्छ: संश्च' (1-2-8) इति सन: कित्त्वे, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (6-1-16) इति सम्प्रसारणे षत्वे च रूपम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
3. यङन्ते सर्वत्र यङ्निमित्तकं सम्प्रसारणं भवति। पश्चात्. 'रीगृत्वत इति वक्तव्यम्' (वा. 7-4-90) इति रीक् अभ्यासस्य।
4. तृचि, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां ष:' (8-2-36) इति षत्वे, 'ष्टुना ष्टु:' (8-4-41) इति ष्टुत्वे च रूपम्। एवं तव्यदादिष्वपि ज्ञेयम्।
5. शतरि, 'तुदादिभ्य:—' (3-1-77) इति विकरणप्रत्यय: श:। तस्य सार्वधातुकत्वेन ङिद्वद्भावात् सम्प्रसारणे रूपमेवम्। एवं शानजन्तेऽपि प्रक्रिया ज्ञेया।
6. स्यप्रत्यये, 'व्रश्च—' (8-2-36) इत्यादिना षत्वे, 'षढो: क: सि' (8-2-41) इति षकारस्य ककारे, षत्वे च रूपमेवम्।
7. 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' (वा. 1-3-29) इति वार्तिकेन सम्पूर्वकादस्मादात्मनेपदं, शानच् भवति।
8. 'आङि नुप्रच्छ्योरुपसंख्यानम्' (वा. 1-3-21) इति आङ्पूर्वकादस्माच्छानच्।
9. 'पूर्ववत् सन:' (1-3-62) इति संपूर्वकात्, आङ्पूर्वकाच्च सन्नन्तेऽपि शानच्।

A. 'कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ
परिशिथिलितगात्रे गन्तुमापृच्छमाने।' शि. व. 11.38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]प्राट्, शब्दप्राट्-प्राड्-प्राशौ-प्राशः ; | | — | — |
| [2]पृष्टम्-पृष्टः-पृष्टवान्, | प्रच्छितः, | विपृच्छिषितः, | परीपृच्छितः-तवान् ; |
| प्रच्छः, | प्रच्छः, | [A]विपृच्छिषुः, | परीपृच्छः ; |
| प्रष्टव्यम्, | प्रच्छयितव्यम्, | विपृच्छिषितव्यम्, | परीपृच्छितव्यम् ; |
| प्रच्छनीयम्, | प्रच्छनीयम्, | विपृच्छिषणीयम्, | परीपृच्छनीयम् ; |
| प्रच्छ्यम्, | प्रच्छ्यम्, | विपृच्छिष्यम्, | परीपृच्छ्यम् ; |
| ईषत्प्रच्छः-दुष्प्रच्छः-सुप्रच्छः ; | | — | — |
| पृच्छ्यमानः, | प्रच्छ्यमानः, | विपृच्छिष्यमाणः, | परीपृच्छ्यमानः ; |
| प्रच्छः, | [3]प्रश्नः, प्रच्छः, | विपृच्छिषः, | परीपृच्छः ; |
| प्रष्टुम्, | प्रच्छयितुम्, | विपृच्छिषितुम्, | परीपृच्छितुम् ; |
| पृष्टिः, [4]पृच्छा, | प्रच्छना, | विपृच्छिषा, | परीपृच्छा ; |
| प्रच्छनम्, | प्रच्छनम्, | विपृच्छिषणम्, | परीपृच्छनम् ; |
| पृष्ट्वा, | प्रच्छयित्वा, | विपृच्छिषित्वा, | परीपृच्छित्वा ; |
| [5]आपृच्छ्य, | सम्प्रच्छय्य, | प्रविपृच्छिष्य, | प्रपरीपृच्छ्य ; |
| प्रच्छम् २, पृष्ट्वा २, | प्रच्छम् २, प्रच्छयित्वा २, | विपृच्छिषम् २, विपृच्छिषित्वा २, | परीपृच्छम् २ ; परीपृच्छित्वा २. |

1. 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजु श्रीणां दीर्घोऽसम्प्रसारणं च' (वा. 3-2-178) इत्यनेन क्विपि दीर्घेऽसंप्रसारणे च विहिते सति, 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति क्विन्निमित्तके शकारे, तस्य षत्वे जश्त्वे चर्त्वे च रूपमेवम् ।
2. क्तप्रत्यये सम्प्रसारणादिकं सर्वं यथायथमूह्यम् ।
3. भावेऽकर्तरि च कारके, 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (3-3-90) इति नङ्प्रत्ययः। 'च्छ्वोः शूड्—' (6-4-19) इति सतुक्कस्य छकारस्य शकारः। 'प्रश्ने चासन्नकाले' (3-2-117) इति सूत्रकारनिर्देशप्रामाण्यात् सम्प्रसारणं न भवति। 'शात्' (8-4-44) इति निषेधात् श्चुत्वं न ।
4. भिदादेः (3-3-104) आकृतिगणत्वात् अङि, सम्प्रसारणे च **पृच्छा** इति रूपमिति **आत्रेयादीनां** मतमिति **मा. धा. वृत्तिः** ।
5. ल्यपि, सम्प्रसारणे रूपमेवम् । 'च्छ्वोः शूठ्—' (6-4-19) इति शकारादेशो न भवति, ल्यपो बहिरङ्गत्वात् ।

A. 'उक्तं **विपृच्छिषूणां** वो मा स्म भूत बुभुत्सवः ॥' भ. का. 7.98.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1067) **"प्रथ प्रख्याने"** (I-भ्वादिः-765. अक. सेट्. आत्म.)

**घटादिः षिच्च।** '**प्रख्यानम्**=प्रसिद्धिः।' इति **क्षीरस्वामी।** 'विस्तारेऽपि' इति **धा. का.** [2.4]। '**प्रथते** प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः।' (श्लो. 99) इति **देवः** ।

प्राथकः-थिका, [1]प्रथकः-थिका, पिप्रथिषकः-षिका, पाप्रथकः-थिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्**श्रथति**वत् (206) तद्धातुविषयकप्रातिस्विकरूपाणि विना ज्ञेयानि। [2]प्रथा, [3]पृथुः-पृथु, [4]प्रथमः, [5]पृथिवी इति रूपाण्यस्माद्भवन्तीति विशेषः।

(1068) **"प्रथ प्रख्याने"** (X-चुरादिः-1553. अक. सेट्. उभ.)[अ]

'—क्षेपे च।' इति **द्रुमे** (श्लो. 188)।

'प्रथते **प्राथयत्येतत्** प्रख्याने द्वितयं प्रथेः।' (श्लो. 99) इति **देवः** ।

प्राथकः-थिका, पिप्राथयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकक्**ष्मापयति**वत् (282) ज्ञेयानि। '**नान्ये मितोऽहेतौ**' (ग. सू. भ्वादौ) इति सम्भवद्धेतुमण्णिचां चुरादिणिचि मित्त्वनिषेधात् घटादिकार्यमत्र नेति ज्ञेयम्। [A]प्राथितः।

---

1. ण्यन्ते सर्वत्र, '**घटादयो** मितः' (ग. सू. भ्वादौ) इति मित्संज्ञायाम्, '**मितां** ह्रस्वः' (6-4-92) इति उपधाह्रस्वे रूपम्।

2. '**घटादयः** षितः' (ग. सू. भ्वादौ) इति षित्त्वात्, स्त्रियाम्, '**षिद्भिदा**-दिभ्यः—' (3-3-104) इत्यङि रूपमेवम्।

3. '**प्रथिम्रदि**—' (द. उ. 1. 113) इति कुप्रत्यये सम्प्रसारणे च रूपमेवम्। प्रथतेऽसौ इति **पृथुः**=राजा, प्रथनं वा। **पृथु**=विस्तीर्णम्।

4. '**प्रथेरट्** च' (द. उ. 7.29) इति मन्प्रत्ययेऽडागमे च रूपम्।

5. '**प्रथेः** षिवन् सम्प्रसारणं च' (द. उ 8.124) इति षिवन्प्रत्यये सम्प्रसारणे च रूपम्। षित्त्वात् ङीष्।

[अ] **क्षीरस्वामी धातुममुं चुरादिषु** न **पठति**। '**पृथ (पर्थ)**' इति तस्य पाठः।

A. '**अप्राथितो** व्रजगृहेऽपि च पर्थितोऽभूत्......॥' धा. का. 3.15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1069) "प्रस विस्तारे" (I-भ्वादिः-766. अक. सेट्. आत्म.)

घटादिः षिच्च । '—प्रसवे ।' इति क्षीरस्वामी ।

प्रासकः-सिका, प्रसकः-सिका, पिप्रसिषकः-षिका, पाप्रसकः-सिका; [1]प्रसा, [2]प्रासः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रथतिवत् (206) ज्ञेयानि । [A]प्रसमानः ।

## (1070) "प्रा पूरणे" (II-अदादिः-1061. सक. अनि. पर.)

प्रायकः-यिका, प्रापकः-पिका, पिप्रासकः-सिका, पाप्रायकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकदाप्धातुवत् (833) ज्ञेयानि । [3]प्रायः, [4]प्रान्-प्रान्तौ-प्रान्तः, [5]प्राणः[B]-प्राणवान् इति रूपाणि भवन्त्यस्येति विशेषः ।

## (1071) "प्रीङ् प्रीतौ" (IV-दिवादिः-1144. अक. अनि. आत्म.)

'प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥

अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।' (श्लो. 19-20) इति देवः ।

प्रायकः-यिका, प्रायकः-यिका, पिप्रीषकः-षिका, पेप्रीयकः-यिका; [6]प्रियः-इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकधीङ्धातुवत् (901) ज्ञेयानि ।

---

1. षित्त्वात् स्त्रियां भावादावङ् इति ज्ञेयम् ।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । प्रासः=शब्दचित्रम् ।
3. 'श्याऽऽद्व्यध—' (3-1-141) इत्यादिना कर्तरि णप्रत्यये युगागमः ।
4. शतरि, शपि, 'अदिप्रभृतिभ्यः—' (2-4-72) इति शपो लुकि, 'पदान्तस्य' (8-4-37) इति निषेधात् णत्वं नेति ज्ञेयम् ।
5. 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वे, णत्वे च रूपम् ।
6. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः । एतच्च आत्रेयादीनां मतेनोक्तम् । काशिकायां तु 'प्रीणातीति प्रियः ।' इति क्रैयादिकस्यैव कप्रत्ययः प्रोक्तः ।

A. 'गोपीघटाः प्रव्यथितास्तदानीं पृथूपतापप्रसमानचिन्ताः ।' धा. का. 2.4.

B. 'ख्यान्त्यः कथाः प्राणमुदां पतीनां निर्मन्थ्य इष्टानि चरून् वचत्यः ।' धा. का. 2. 50.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1072) **"प्रीञ् तर्पणे कान्तौ च"** (IX-क्र्यादि:-1474. सक. अनि उभ.)

**कान्तिः**=कामना। 'प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीतें तर्पणे ञितः॥ अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत्।' (श्लो. 19.20) इति **देवः**। प्रायकः-यिका, [1]प्रीणकः-णिका, पिप्रीषकः-षिका, पेप्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिक**क्रीणाति**वत् (274) ज्ञेयानि। [2]वत्सप्रीः।

(1073) **" प्रीञ् तर्पणे "** (X-चुरादि:-1837. सक. सेट्. उभ.)

**आधृषीयः।**

'—यौ ञित्त्वसाफल्यात् **प्रीणयेत्** प्रयते प्रयेत्।' (श्लो. 20) इति **देवः**।

[3]प्रीणकः-णिका, [4]प्रायकः-यिका, [5]पिप्रीणयिषकः-पिप्राययिषकः-षिका,
[6]प्रायकः-यिका, [7]पिप्रीषकः-षिका, [8]पेप्रीयकः-यिका;
प्रीणयिता-त्री, पिप्रीणयिषिता-त्री, प्रेता-त्री, पिप्रीषिता-त्री, पेप्रीयिता-त्री;
प्रीणयन्-न्ती, पिप्रीणयिषन्-न्ती, [9]प्रयन्[A]-न्ती, पिप्रीषन्-न्ती; —

---

1. 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा. 7-3-37) इति ण्यन्ते सर्वत्र नुगागमे णत्वे च **प्रीणकः, प्रीणयिता** इत्यादीनि सर्वाण्यपि रूपाणि भवन्तीति यथायथमूह्यानि।
2. वत्सान् प्रीणातीति **वत्सप्रीः**। क्विपि रूपमेवम्। **काशिकायां** (6-4-148) रूपमेतदुदाहृतम्।
3. 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा. 7-3-37) इति ण्यन्ते सर्वत्र नुगागमो भवति। एतच्चाविशेषेण ण्यन्ते सर्वत्रेति मतेन लिखितम्।
4. 'धूञ्प्रीञोः—' (वा. 7-3-37) इति नुगागमः 'धूञ्' साहचर्येण क्रैयादिकस्य प्रीणातेर्णिवेति, **हरदत्तादि**मते तु नुगभावात् वृद्धौ, आयादेशे च रूपमेवम्। एवमेव तृजादिष्वपि **प्राययिता-त्री** इत्यादीनि रूपाणि यथायथमूह्यानि।
5. चुरादिप्रीञोऽपि नुगागमवादिनां पक्षे ण्यन्तात् सनि रूपमेवम्। **हरदत्तादि**मते तु **पिप्राययिषकः** इत्यादीनि रूपाणीति च ज्ञेयम्।
6. 'आधृषाद् वा' (गः सू. चुरादौ) इति वचनेन णिचो वैकल्पिकत्वात्, णिजभावपक्षे शुद्धाद्रूपमेवम्।
7. णिजभावपक्षे सनि, 'एकाच उपदेशे—' (7-2-10) इतीण्निषेधे, सनः कित्त्वे, दीर्घे च रूपम्। धातोरस्य चुरादिपठितस्य सेट्त्वेऽपि णिजभावपक्षे भ्वादिपाठेऽनिट्त्वं शास्त्रवशादिति ज्ञेयम्।
8. णिजभावपक्षे शुद्धात् यङन्ते रूपमेवमिति ज्ञेयम्।
9. णिजभावपक्षे शुद्धात्, 'शेषात् कर्तरि—' (1-3-78) इति शतैव।

A. '..........स्वैरं तत्र जनान् **प्रयन्** विगलितश्रन्थान् कचान् ग्रन्थयन्।'
धा. का. 3. 51.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



प्रीणयिष्यन्-पिप्रीणयिषिष्यन्-न्ती-ती, प्रेष्यन्-न्ती-ती, पिप्रीषिष्यन्-न्ती-ती ;
मित्रप्रीः-मित्रप्रियौ-मित्रप्रियः ; —
प्रीणितम्-तः, पिप्रीणयिषितः-तवान्, प्रीतम्-तः, पिप्रीषितः, पेप्रीयितः-तवान् ;
प्रीणः, पिप्रीणयिषुः, प्रियः, पिप्रीषुः, प्रेप्रियः ;
प्रीणयितव्यम्, पिप्रीणयिषितव्यम्, प्रेतव्यम, पिप्रीषितव्यम्, प्रेप्रीयितव्यम् ;
प्रीणनीयम्, पिप्रीणयिषणीयम्, प्रयणीयम्, पिप्रीषणीयम्, पेप्रीयणीयम् ;
प्रीण्यम्, पिप्रीणयिष्यम्, प्रेयम्, पिप्रीष्यम्, पेप्रीय्यम्;
ईषत्प्रीणः-दुष्प्रीणः-सुप्रीणः, ईषत्प्रयः-दुष्प्रयः-सुप्रयः ; — —
प्रीण्यमानः, पिप्रीणयिष्यमाणः, प्रीयमाणः, पिप्रीष्यमाणः, पेप्रीय्यमाणः ;
प्रीणः, पिप्रीणयिषः, [1]प्रयः, पिप्रीषः, पेप्रीयः ;
प्रीणयितुम्, पिप्रीणयिषितुम्, प्रेतुम्, पिप्रीषितुम्, पेप्रीयितुम् ;
प्रीणना, पिप्रीणयिषा, प्रीतिः, पिप्रीषा, पेप्रीया ;
प्रीणनम्, पिप्रीणयिषणम्, प्रयणम्, पिप्रीषणम्, पेप्रीयणम्;
प्रीणयित्वा, पिप्रीणयिषित्वा, प्रीत्वा, पिप्रीषित्वा, पेप्रीयित्वा ;
विप्रीण्य, विपिप्रीणयिष्य, विप्रीय, विपिप्रीष्य, विपेप्रीय्य ;
प्रीणम् २, प्रीणयित्वा २, } पिप्रीणयिषम् २, पिप्रीणयिषित्वा २, } प्रायम् २, प्रीत्वा २, } पिप्रीषम् २, पिप्रीषित्वा २, } पेप्रीयम् २ ; पेप्रीयित्व । २. }

## (1074) "प्रुङ् गतौ" (I-भ्वादिः-957. सक. अनि. आत्म.)

प्रावकः-विका, प्रावकः-विका, पुप्रूषकः-षिका, पोप्रूयकः-यिका, [2]पिप्रावयिषकः-पुप्रावयिषकः-षिका ;
प्रोता-त्री, प्रावयिता-त्री, पुप्रूषिता-त्री, पोप्रूयिता-त्री, पिप्रावयिषिता-पुप्रावयिषिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि च्यवतिवत (558) ज्ञेयानि ।

1. 'एरच्' (3-3-56) इति भावे घञपवादोऽप्प्रत्ययः । 'एरजण्यन्तानाम्' इति मतं तु भाष्यासम्मतत्वादप्रामाणिकम् । स्पष्टमिदं कैयटे (3-2-1) ।
2. 'स्रवतिशृणोतिद्रवतिप्रवति—' (7-4-81) इत्यनेन ण्यन्तात् सनि अवर्णपरे यणि च उवर्णान्तस्याभ्यासस्येकारादेशो वा भवति । इयमप्राप्तविभाषा । एवं ण्यन्तात् सनि सर्वत्र रूपद्वयं ज्ञेयम् ।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]कटप्रूः-कटप्रुवौ-कटप्रुवः, [2]प्रवकः, [3]प्रवणः, [4]प्रावयन्-प्रावयिष्यन्-न्ती-ती, इति इमानि रूपाणि अस्य धातोः भवन्तीति विशेषः।

## (1075) "प्रुष स्नेहनसेवनपूरणेषु"

### (IX-क्र्यादिः-1527. सक. सेट्. पर.)

'—सेचन....' इति क्षीरस्वामि-पुरुषकार-कविकल्पद्रुमसम्मतः पाठः। मैत्रेयस्तु '....मोचन....' इति पपाठ। 'मोहनदाहनयोरप्याह शङ्करः। इति धा. का. व्याख्या (3-12)। अयं 'प्रूष—' इति दीर्घोपध इति बालमनोरमा।

'—स्नेहनादिषु। प्रुष्णाति च, प्रोषति च दाहे—॥' (श्लो. 172) इति देवः। प्रोषकः-षिका, प्रोषकः-षिका, पुप्रोषिषकः-पुप्रुषिषकः-षिका, पोप्रुषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। [5]विप्रुट्। [6]प्रुष्णन्[A]।

## (1076) "प्रुषु दाहे" (I-भ्वादिः-703. सक. सेट्. पर.)

'—स्नेहनादिषु। प्रुष्णाति च, प्रोषति च दाहे—॥' (श्लो. 172) इति देवः। प्रोषकः-षिका, प्रोषकः, पुप्रोषिषकः-पुप्रुषिषकः-षिका, पोप्रुषकः-षिका-इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। [7]प्रोषित्वा-प्रुष्ट्वा,

1. कटं प्रवते इति कटप्रूः= कामरूपी कीटश्च। 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' (वा. 3-2-178) इत्यनेन सोपपदात् क्विपि प्रकृतेर्दीर्घः। द्विवचनादिषु उवङादेशः।
2. 'प्रुसृल्वः समभिहारे वुन्' (3-1-149) इति कर्तरि वुन्प्रत्ययः। अनादेशः। समभिहारः= साधुकारित्वम्।
3. 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इति तच्छीलादिषु कर्तृषु युच् प्रत्ययः। णत्वम्। अकर्मकत्वं विवक्षाभेदेनेति ज्ञेयम्।
4. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति कर्तृगामिन्यपि क्रियाफले ण्यन्तात् शतैव, न शानच्।
5. क्विपि षकारस्य जश्त्वेन डकारः। विप्रुट्=पामा।
6. शतरि क्र्यादिकत्वात् श्नाप्रत्यये, 'श्नाऽभ्यस्तयोः—'(6-4-112) इत्याकारलोपे णत्वे च रूपम्।
7. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् प्रोषित्वा इति रूपम्।

A. 'प्रुष्णन् सतां प्रियमयं प्लुषिताङ्गरागः......।' धा. का. 3. 12.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]प्रुष्टम्-प्रुष्टवान् इति रूपाण्यस्माद्भवन्तीति विशेषः ।

(1077) "प्रेषृ गतौ" (I-भ्वादिः-619. सक. सेट्. आत्म.)

प्रेषकः-षिका, प्रेषकः-षिका, पिप्रेषिषकः-षिका, पेप्रेषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि ।

(1078) "प्रैणृ गतिप्रेरणश्लेषणेषु" (I-भ्वादिः-458. सक. सेट्. पर.)

'पैणृ–' इति धातोः पाठभेदोऽयम् । सर्वाण्यपि रूपाणि भौवादिकक्षेपृधातुवत् (261) ज्ञेयानि । [A]प्रैणनम् ।

(1079) "प्रोथृ पर्याप्तौ" (I-भ्वादिः-867. सक. सेट्. उभ.)

'प्रोथति=सूदति' इति 'प्रोथदश्वो न यवसे—' (तैत्ति. सं. 4.4.3.3) इति मन्त्रव्याख्यायां व्याख्यानात्, 'अपप्रोथ दुन्दुभे दुच्छुनाम्–' (तैत्तिरीयसंहिता 4.6.6.7) इत्यत्र, 'अपप्रोथ=मारय—' इति व्याख्यानाच्च भट्टभास्करमते हिंसार्थकोऽयं धातुः इति **मा. धा.** वृत्तिदर्शनाज्ज्ञायते । "–पर्याप्तिगतौ' इत्यपि क्वचिदर्थनिर्देशः कृतः । 'अपप्रोथनम्=हुङ्करणम् ।' इति क्षुरे ।" इत्यपि **मा. धा.** वृत्तिः । 'शब्दार्थोऽपि । अपपूर्वस्तु मारणे हुङ्करणे वा' इति **धा. का.** व्याख्याने (2.25) । **भाष्यप्रदीपोद्योतात्** (1-4-56) नायं धातुरिति ज्ञायते ।

प्रोथकः-थिका, प्रोथकः-थिका, पुप्रोथिषकः-पुप्रुथिषकः-षिका, पोप्रुथकः-थिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि । [2]प्रोथः= अश्वादीनां नासारज्जुः ।

(1080) "प्लिह गतौ" (I-भ्वादिः-642. सक. सेट्. आत्म.)

प्लेहकः-हिका, प्लेहकः-हिका, पिप्लिहिषकः-पिप्लेहिषकः-षिका, पेप्लिहकः-हिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्लिश्यतिवत् (287) ज्ञेयानि । [3]प्लीहा ।

---

1. निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्निषेधः ।
2. 'हलश्च' (3-3-121) इति संज्ञायां करणे घञ् ।
3. 'श्वन्नुक्षन्—' [द. उ. 6.55.] इत्यादिना कनिन्प्रत्ययान्तो निपातितः । प्लीहा = कुक्षिव्याधिः, अध्वगश्च ।

A. 'प्रश्लोणितान् प्रैणनविघ्नणदिक्षतीन् अनुल्बणान् धेनुगणान् कनत्स्तनान् ॥' धा.का.1.59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1081) " प्ली गतौ " (IX-क्र्याद्रिः-1503. सक. अनि. पर.)

प्वादिः, ल्वादिश्च ।

'ल्वी—'इति क्षीरस्वामी पपाठ । '—वरणे' इति इति केचित् । मैत्रेयादयस्त्वमुं न पठन्ति । इति मा. धा. वृत्तावुक्तम् ।

प्लायकः-यिका, प्लायकः-यिका, पिप्लीषकः-षिका, पेप्लीयकः-यिका ;
प्लेता-त्री, प्लाययिता-त्री, पिप्लीषिता-त्री, पेप्लीयिता-त्री ;
[1]प्लिनन्-[A]न्ती, प्लाययन्-न्ती, पिप्लीषन्-न्ती ; —
प्लेष्यन्-न्ती-ती, प्लाययिष्यन्-न्ती-ती, पिप्लीषिष्यन्-न्ती-ती ; —
— प्लाययमानः, प्लाययिष्यमाणः, — पेप्लीयमानः, पेप्लीयिष्यमाणः ;
सुप्लीः-सुप्लियौ-सुप्लियः ; — —
[2]प्लीनम्-प्लीनः-प्लीनवान्, प्लायितः, पिप्लीषितः, पेप्लीयितः-तवान् ;
प्लयः, प्लायः, पिप्लीषुः, पेप्लियः ;
प्लेतव्यम्, प्लाययितव्यम्, पिप्लीषितव्यम्, पेप्लीयितव्यम् ;
प्लयनीयम्, प्लायनीयम्, पिप्लीषणीयम्, पेप्लीयनीयम् ;
प्लेयम्, प्लाय्यम्, पिप्लीष्यम्, पेप्लीय्यम् ;
ईषत्प्लयः-दुष्प्लयः-सुप्लयः ; — —
प्लीयमानः, प्लाय्यमानः, पिप्लीष्यमाणः, पेप्लीय्यमानः ;
प्लयः, प्लायः, पिप्लीषः, पेप्लीयः ;
प्लेतुम्, प्लाययितुम्, पिप्लीषितुम्, पेप्लीयितुम् ;
[3]प्लीनिः, प्लायना, पिप्लीषा, पेप्लीया ;
प्लयनम्, प्लायनम्, पिप्लीषणम्, पेप्लीयनम् ;

---

1. 'क्र्यादिभ्यः' (3-1-81) इति श्ना विकरणप्रत्ययः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपमेवम् ।
2. 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वम् ।
3. 'ॠल्वादिभ्यः क्तिन् निष्ठावद्वाच्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नकारे रूपमेवम् ।

A. 'पार्श्वे लिनन् गजमचोदयदुन्मदान्धमव्लीनशक्तिमतिघोरजवं प्लिनन्तम् ॥' धा. का. 3.8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



प्लीत्वा, प्लाययित्वा, पिप्लीषित्वा, पेप्लीयित्वा ;
संप्लीय, संप्लाय्य, प्रपिप्लीष्य, प्रपेप्लीय्य ;
प्लायम् २, प्लीत्वा २, } प्लायम् २, प्लाययित्वा २, } पिप्लीषम् २, पिप्लीषित्वा २, } पेप्लीयम् २ ; पेप्लीयित्वा २. }

(1082) "प्लुङ् गतौ" (I-भ्वादिः-958. सक. अनि. आत्म.)

प्लावकः-विका, प्लावकः-विका, पुप्लूषकः-षिका, [1]पोप्लूयकः-यिका, [2]पुप्लावयिषकः-पिप्लावयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकच्यवतिवत् (558) बोध्यानि। [3]प्लवः-प्लवी, [4]आप्लावः-[A]आप्लवः, ण्यति-[5]आप्लाव्यः, [6]परिप्लूय इत्यादीनि रूपाणि अस्य धातोर्भवन्तीति विशेषः।

(1083) "प्लुष दाहे" (IV-दिवादिः-1115.1216. सक. सेट्. पर).[अ]

'.......दाहकर्मणि ॥ प्लोषति प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु।'
(श्लो. 171-172) इति देवः।

प्लोषकः-षिका, प्लोषकः-षिका, पुप्लुषिषकः-पुप्लोषिषकः-षिका,

---

1. यङन्तात् द्वित्वे 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणे 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घे च रूपमेवम्।
2. ण्यन्तात् सनि 'सन्यङोः' (6-1-9) इति द्वित्वे वृद्ध्यावादेशयोः अवर्णपरयणपरकत्वादभ्यासघटितोकारस्य, 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (7-4-81) इति पाक्षिके इकारे रूपद्वयम्। एवं सर्वत्र ण्यन्तात् सनि प्रक्रिया ज्ञेया।
3. पचादिषु (3-1-134) प्लवट् इति पाठात् टित्वान्ङीपि स्त्रियां प्लवी इति ज्ञेयम्।
4. 'विभाषाऽऽङि रुप्लुवोः' (3-3-50) इति विभाषया घञ् भवति। घञभावे अप्प्रत्ययः। एवं रूपद्वयं बोध्यम्।
5. 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' (3-4-68) इति निपातनात् कर्तरि ण्यत्प्रत्ययः।
6. ल्यपि 'युप्लुवोर्दीर्घश्छन्दसि' (6-4-58) इति छन्दसि विषये दीर्घः। लोके तु आप्लुत्य इत्येव।

A. 'दूराप्लावं हनूमन्तं रामः प्रोचे गजाप्लवः॥' भ. का. 7.47.

[अ] दिवादिष्वेव प्लुषधातुर्द्विवारं पठ्यते—पुषादावन्यत्र च। तत्र पुषादिपाठाद् अप्लुषत् इति अङ्सिद्धिः फलम्। अन्यत्र तु, अप्लोषीत् इति सिचसिद्धिः फलमिति विशेषः; कृदन्तेषु तु द्वयोस्तुल्यतेत्यतोऽस्माभिरेकदैवोभयोरुपादानमादृतम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



पोप्लुषकः-षिका ; प्लोषिता-त्री, प्लोषयिता-त्री, पुप्लुषिषिता-पुप्लोषिषिता-त्री, पोप्लुषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि दैवादिककुप्यतिवत् (224) बोध्यानि । [A]प्लुष्यन् इति शतरि रूपम् ।

### (1084) "प्लुष स्नेहनसेवनपूरणेषु"

(IX-क्र्यादि:-1528. सक. सेट्. पर.)

'—मोहनदाहनयोरप्याह शङ्करः।' इति धा. का. (3-12.)। 'सेचन—' इत्यपि कुत्रचिद् दृष्टः पाठः ।

'प्लोषति प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु।' (श्लो. 172) इति देवः। प्लोषकः-षिका, प्लोषकः-षिका, पुप्लोषिषकः-पुप्लुषिषकः, पोप्लुषकः-षिका ; प्लुष्णन्-ती इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। निष्ठायाम्-[B]प्लुषितम्-तः, इति एकमेव रूपमिति विशेषः ।

### (1085) "प्लुषु दाहे" (I-भ्वादि:-704. सक. सेट्. पर.)

'..................दाहकर्मणि ॥ प्लोषति, प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु।' (श्लो. 171-172) इति देवः ।

प्लोषकः-षिका, प्लोषकः-षिका, पुप्लोषिषकः-पुप्लुषिषकः-षिका, पोप्लुषकः-षिका ; [1]प्लुष्टः[C], इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि ।

### (1086) "प्सा भक्षणे" (II-अदादि:-1055. सक. अनि. पर.)

प्सायकः-यिका, प्सापकः-पिका, पिप्सासकः-सिका, पाप्सायकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकदाप्-धातुवत् (833)

---

1. उदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। ष्टुत्वम् ।

A. 'तं प्लुष्यद् दृष्टिरुत्सवमपि च गतत्रासमुत्कुथ्यदङ्गं........॥' धा. का. 2.56.

B. 'पुष्णन् सतां प्रियमयं प्लुषिताङ्गरागः
पुष्णन् मुदं मृगदृशां रिपुधाम मुष्णन्।' धा. का. 3.12.

C. '......प्रोष्यान् प्लुष्टजनान् कृपामृतपृषद्वर्षी भवान् दानवान्।' धा. का. 1.88.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ज्ञेयानि । [1]प्सापयन्-न्ती-ती, [इदमेषां] [2]प्सातम्, इत्यस्माद् धातोः भवन्तीति विशेषः । [A]प्साति:, [3]प्रणिप्साता, [4]द्रप्सः ।

## (1087) "फक्क नीचैर्गतौ" (I-भ्वादिः-116. सक. सेट्. पर.)

'नीचैर्गतिः=मन्दगमनम्, असद्व्यवहारो वा।' इति **क्षीरस्वामी** । 'अधोगमनम्।' इति **केशवस्वामी** । इति **मा. धा. वृत्तिः** ।

फक्कक:-क्किका, फक्कक:-क्किका, पिफक्किषक:-षिका, पाफक्कक:-क्किका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**ककति**वत् (139) ज्ञेयानि । फक्कन्-न्ती, इति शतरि रूपम् ।

## (1088) "फण गतौ" (I-भ्वादिः-821. सक. सेट्. पर.) घटादिः ।

फाणक:-णिका, [5]फणक:-फाणक:-णिका, पिफणिषक:-षिका, पंफणक:-पम्फणक:-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कणति**वत् (157)

---

1. '**निगरण**चलनार्थेभ्यः—' (1-3-87) इति ण्यन्तात् कर्तृगामिन्यपि क्रियाफले परस्मैपदमेव । तेन शानच् न ।
2. 'क्तोऽधिकरणे च ध्रौव्यगति**प्रत्यवसानार्थे**भ्यः' (3-4-76) इति अधिकरणे क्तप्रत्ययः । **प्रत्यवसानार्थाः**=भक्षणार्थकाः धातवः ।
3. 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सा**ति**—' (8-4-17) इत्यादिना उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वम् ।
4. द्रवणेन प्सानीयो **द्रप्सः** । 'घञर्थे कविधानम्—' (वा. 3-3-58) इति कप्रत्ययः । '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपः । पृषोदरादित्वात् (6-3-109) द्रवणशब्दस्य द्रादेशः ।
5. घटादित्वेन मित्त्वात् णौ, 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वे रूपमेवम् । '**फणे**: पूर्वे घटादयः।' इति **मैत्रेय-क्षीरस्वाम्य**ाद्युपात्तवचनानुसारेण **फण**-धातोर्घटादित्वं नेति ज्ञायते । तदानीं मित्त्वाभावात् **फाणक:-णिका**, इत्यादीन्येव रूपाणि । किञ्च, धातूनामनेकार्थकत्वात्, गत्यर्थकस्य **फण**धातोरेव घटादिषु पाठ इति ज्ञायते; यतः 'अन्यत्र **फाणयति**=घटं निःस्नेहयतीत्यर्थः।' इति **क्षीरस्वामी** बभाण । '......फण-ण् निःस्नेहने—।' इति **कविकल्पद्रुम**-(श्लो 176) वाक्यमप्यत्र निःस्नेहनार्थेऽस्य धातोः प्रयोगेऽनुकूलम् ।

A. 'स्नान्त्यस्तदा श्राणमुपास्य चान्नं निद्रां गताः **प्साति**परास्तथाऽन्याः।' धा. का. 2.49.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ज्ञेयानि । [1]फाण्टः[A], [2]फणितिः, [3]फेणिवान् - पेफणिवान्, [B]फणितः । इति इमानि रूपाणि अस्य धातोर्भवन्तीति विशेषः ।

(1089) "फल निष्पत्तौ" (I-भ्वादिः-530. अक. सेट्. पर.)

'निष्पत्तिः=सिद्धिः।' इति क्षीरस्वामी ।

'फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥

आदितो, ऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।' (श्लो. 158–159)इति देवः।

फालकः-लिका, फालकः-लिका, पिफलिषकः-षिका, पाफलकः-लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकफलतिवत् (174) ज्ञेयानि । फलितम्, [4]फलम्, [5]त्रिफला, [6]संफला-भस्त्रफला-अजिनफला-शणफला-पिण्डफला,

---

1. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु' (7-2-18) इत्यनेनास्य धातोर्निष्ठायाम्, अनायाससाध्यकषायविशेषश्चेत् प्रकृतिप्रत्ययसमुदायेनोच्यते तदानीमिडभावो निपात्यते । 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घः । पश्चात्, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन निष्ठातकारस्य टकारः । अन्यत्र फणितमित्येव ।
'उष्णाम्बुन्यौषधं क्षुण्णं क्षिप्त्वा सद्योऽभिषुत्य च ।
पीयते यः कषायोऽसौ फाण्टोऽनायाससाधितः॥' इति प्र. सर्वस्वे । माधवस्तु 'तद्वै नवनीतं घृतं देवानाम्, फाण्टं मनुष्याणाम्—' इति शतपथश्रुतिव्याख्यायाम् (3-1-3-8) 'नवनीतं फाण्टघृतयोरन्तरालवर्ति' इत्याह । तेन नवनीतभावात् प्रागवस्थापन्नं द्रव्यं फाण्टम् इति लभ्यते । धातुवृत्तौ तु 'औषधस्य पञ्च कल्पनाः—रसः, कल्कः, शृतः, शीतः, क्वाथः । शीतो नाम क्षुण्णमौषधमुदके प्रक्षिप्य रात्रावधिवासितं यदुदकं प्रातः पीयते तत् । तदेवोष्णोदके प्रक्षिप्य सद्योऽभिषुत्य पूत्वा पीयते । स फाण्ट इति तद्विदः ।' इत्याह ।
2. क्तिनि, 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति वचनात् इडिति ज्ञेयम् । धातूनामनेकार्थकत्वाद् अत्र शब्दार्थकत्वमित्यपि ज्ञेयम् ।
3. कर्तरि लिटः क्वसौ, 'फणां च सप्तानाम्' (6-4-125) इत्येत्वाभ्यासलोपविकल्पः । 'वस्वेकाजाद्घसाम्' (7-2-67) इतीट् ।
4. फलतीति फलम्, कर्तरि पचादित्वादच् । लोकप्रयोगात् क्लीबत्वम् ।
5. अजादिषु (4-1-4) दर्शनात् स्त्रियां टाप् भवति । ङीषपवादः ।
6. 'पाककर्णपर्णपुष्पफल—' (4-1-64) इति प्राप्तं ङीषं बाधित्वा, 'संभस्त्राजिनशणपिण्डेभ्यः फलात्' (ग. सू. 4-1-4) इति टाप् । भस्त्रफला इत्यत्र 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6-3-63) इति ह्रस्वः ।

A. 'अम्लिष्टनादा निरगुः फाण्टचित्रास्त्रवाणयः ॥' भ. का. 9.17.

B. 'दुष्टानपस्वादयितुं प्रयाते कृष्णे विलेपुः फणिता विमोहम् ॥' धा. का. 2.19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]फालः, [2]दासीफली इति रूपाण्यस्य भवन्तीति विशेषः ।

(1090) "**ञि फला विशरणे**" (I-भ्वादिः-516. अक. सेट्. पर.)

'**विशरणम् = विकसनम्।**' इति **धा. का. व्याख्यायाम्** (1-66)।

'फलेर्विशरणे फुल्लम् , फलितम् , फलति त्रयम् ॥

आदितो, ऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।' (श्लो. 158-159) इति **देवः** ।

फालकः-लिका, फालकः-लिका, पिफलिषकः-षिका, [3]पम्फुलकः-पंफुलकः-लिका;

फलिता-त्री, फालयिता-त्री, पिफलिषिता-त्री, पम्फुलिता-त्री ;

फलन्-न्ती, फालयन्-न्ती, पिफलिषन्-न्ती ; —

फलिष्यन्-न्ती-ती, फालयिष्यन्-न्ती-ती, पिफलिषिष्यन्-न्ती-ती ; —

— फालयमानः, फालयिष्यमाणः, — पम्फुल्यमानः, पम्फुलिष्यमाणः ;

[4]फल्-फलौ-फलः ; — — —

[5]फुल्लः-[6]फुल्लवान् , [7]प्रफुल्तम्-प्रफुल्तः-प्रफुल्तवान् , [8]फलितम्-फलितवान् , [9]उत्फुल्लः-

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ्। फल्यते=निष्पाद्यतेऽनेन धान्यादिकमिति **फालः=हलः** ।

2. 'पाककर्णपर्णपुष्प**फल**मूल—' (4-1-64) इति जातिवाचिनः फलोत्तरपदादस्मात् स्त्रियां ङीष्।

3. यङन्ताण्वुलि द्वित्वादिके कृते, 'उत् परस्यातः' (7-4-88) इति उत्तरखण्डस्थाकारस्योकारे, परसवर्णविकल्पे च रूपद्वयम्। एवं यङन्ते सर्वत्र ज्ञेयम्।

4. 'न पदान्ताः परेऽणः सन्ति।' इति वचनं तु **भाष्यासम्मतमिति**, लकारान्तस्यास्य प्रयोग उपपन्नः ।

5. निष्ठायाम्, 'आदितश्च' (7-2-16) इति इण्निषेधे, 'अनुपसर्गात् **फुल्ल**क्षीब—' (8-2-55) इत्यत्र निपातनात् निष्ठातकारस्य लकारः, प्रकृतिघटिताकारस्योत्वं च । यद्वा, लत्वस्यासिद्धत्वेन तकारादिप्रत्ययपरकत्वात्, 'ति च' (7-4-89) इत्युत्वमिति ज्ञेयम् ।

6. 'क्तवतोरप्येतल्लत्वमिष्यते।' इति **वृत्तिः**। तन्मते **फुल्लवान्** इत्यपि साधुः।

7. अनुपसर्गादेव लत्वस्य निपातनात्, सोपसृष्टात् इण्निषेधे, उत्वे च रूपमेवम्। **प्रफुल्लम्** इति तु '**फुल्ल विकसने**' इत्यस्मात् पचाद्यचि ज्ञेयम् ।

8. 'विभाषा भावादिकर्मणोः' (7-2-17) इति भावे, आदिकर्मणि च या निष्ठा, तत्र विषये इण्निषेधस्य विकल्पनात् **फलितम्** इत्यपि साधुरिति ज्ञेयम् ।

9. '**उत्फुल्लसम्फुल्ल**योरुपसंख्यानम्' (वा. 8-2-55) इति वचनादत्रापि निष्ठातकारस्य लत्वमिति ज्ञेयम्। क्तवत्वन्तस्यापीदं लत्वमिति **वृत्तिकारे**ष्टेः तत्रापि लत्वम्।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



उत्फुल्लवान्, सम्फुल्लः-सम्फुल्लवान्, फालितः, पिफलिषितः, पम्फुलितः-तवान्;

फलम्, [1]फेलिवान्, फालः, पिफलिषुः, पम्फुलः ;

फलितव्यम्, फालयितव्यम्, पिफलिषितव्यम्, पम्फुलितव्यम् ;

प्रतिफलनीयम्, फालनीयम्, पिफलिषणीयम्, पम्फुलनीयम् ;

फाल्यम्, फाल्यम्, पिफलिष्यम्, पम्फुल्यम् ;

ईषत्फलः-दुष्फलः-सुफलः ; — —

फल्यमानः, फाल्यमानः, पिफलिष्यमाणः, [2]पम्फुल्यमानः ;

फालः, फालः, पिफलिषः, पम्फुलः ;

फलितुम्, फालयितुम्, पिफलिषितुम्, पम्फुलितुम् ;

[3]फुल्तिः, फालना, पिफलिषा, पम्फुला ;

फलनम्, फालनम्, पिफलिषणम्, पम्फुलनम् ;

फलित्वा, फालयित्वा, पिफलिषित्वा, पम्फुलित्वा ;

प्रफल्य, प्रफाल्य, प्रपिफलिष्य, प्रपम्फुल्य ;

फालम् २, फलित्वा २, } फालम् २, फालयित्वा २, } पिफलिषम् २, पिफलिषित्वा २, } पम्फुलम् २ ; पम्फुलित्वा २ ;

[4]फल्गुः.

## (1091) "फुल सञ्चलने"

(VI-तुदादिः-1390. अक. सेट्. पर.) कुटादिः ।

धातुरयं **सिद्धान्तकौमुद्यां** केवलमुपात्तः। **क्षीरतरङ्गिणी-धातुवृत्त्यादिषु** कुत्रापि नोपलभ्यते। 'स्फुल—' इत्यस्य पाठभेदोऽयमिति ज्ञेयम्। फोलकः-लिका, फोलकः-लिका, पुफुलिषकः-षिका, पोफुलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि।

---

1. कर्तरि, लिटः क्वसौ, '**तॄफलभजत्रपश्च**' (6-4-122) इत्येत्वाभ्यासलोपे, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपम्।
2. यङन्तात् यकि, '**हलो यमां यमि लोपः**' (8-4-64) इति यङो यकारस्य विकल्पेन लोपः। लोपाभावपक्षे तु '**फम्फुल्य्यमानः**' इत्यपि साधुः। एवं यङन्तात् ल्यप्यपि ज्ञेयम्।
3. क्तिनि, इण्निषेधे, 'ति च' (7-4-89) इत्युत्वे रूपमेवम्।
4. '**फलिपाटि–**' (द. उ.1-103) इत्युप्रत्यये गुणागमे च रूपम्। **फल्गुः**=असारः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1092) " फुल्ल विकसने " (I-भ्वादिः-532. अक. सेट्. पर.)

फुल्लकः-ल्लिका, फुल्लकः-ल्लिका, पुफुल्लिषकः-षिका, पोफुल्लकः-ल्लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचिल्लतिवत् (528) ज्ञेयानि। पचाद्यचि—[A]प्रफुल्लः।

(1093) " फेलृ गतौ " (I-भ्वादिः-542. सक. सेट्. पर.)

फेलकः- लिका, फेलकः-लिका, [1]पिफेलिषकः-षिका, [2]पेफेलकः-लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। [3]फेला, [B]फेलनम्।

(1094) " बण शब्दार्थः " (I-भ्वादिः-459. अक. सेट्. पर.) [अ]

बाणकः-णिका, बाणकः-णिका, बिबणिषकः-षिका, बम्बणकः-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रणतिवत् (157) ज्ञेयानि। [4]उल्बणः[C]। [5]बाणः, [6]गीर्बाणाः।

---

1. सन्नन्ते द्वित्वे, अभ्यासे, 'ह्रस्वः' (7-4-59) इति ह्रस्वः; स च, 'एच इग्घ्रस्वादेशे' (1-1-48) इति शास्त्रात् एकारस्य इकाररूपः।

2. यङन्ताण्ण्वुलि, अभ्यासस्य ह्रस्वे इकारे, 'गुणो यङ्लुकोः' (7-4-82) इति इकारस्य गुणेन एकार इति ज्ञेयम्।

3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादौ अकारप्रत्ययः। फेला = भुक्तसमुज्झितम्। 'पेला' इति धातुवृत्तौ पाठः।

4. पचाद्यचि. पृषोदरादित्वात् उलूखलशब्दवत् 'उत्' इत्युपसर्गस्य लत्वे रूपमेवम्।

5. बणति = शब्दं करोत्यस्मिन् बाणः = ज्या। अधिकरणे 'हलश्च' (3-3-121) इति संज्ञायां घञ्।

6. गीरेव बाणः येषां ते गीर्बाणाः = देवाः, भूदेवाश्च।

[अ] धातुरयं माधवधातुवृत्त्यादिषु न दृश्यते। 'भ्रण—' इत्यस्य पाठभेदोऽयम्, इति सि. कौमुदी। क्षीरतरङ्गिण्यां तु धातुरयमुपात्तः। परं तु तत्र वण इति मुद्रणाशुद्धिः। उत्तरत्र बाणशब्दस्यास्मादेव धातोर्निष्पादनात्।

A. 'अधित्यकायामिव धातुमत्यां लोध्रद्रुमं सानुमतः प्रफुल्लम्॥' रघु. 2.29.

B. 'फणीश्वरक्ष्वेलरुधं प्रवेल्लितस्रजं मुहुः पेलववातफेलनात्॥' धा. का. 1.69.

C. 'प्रश्लोणितान् प्रैणनविभ्रणक्षितीननुल्बणान् धेनुगणान् कनत्स्तनान्॥'
धा. का. 1. 59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1095) "बद स्थैर्ये" (I-भ्वादिः-51. सक. सेट्. पर.)

बादकः-दिका, बादकः-दिका, बिबदिषकः-षिका, बाबदकः-दिका, [1]बदरम्-बदरी, [A]बदन्-न्ती, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-खदतिवत् (338) बोध्यानि ।

(1096) "बध बन्धने" (I-भ्वादिः-973. सक. सेट्. आत्म.)

'यत्तु बीभत्सते तत् स्याद् वैरूप्येऽर्थे बधेः सनि ॥' (श्लो. 120) इति देवः ।

[2]बीभत्सकः-त्सिका, [3]बीभत्सकः-त्सिका, [4]बीभत्सिषकः-षिका, [5]बाधकः-धिका; बीभत्सिता-त्री, बीभत्सयिता-त्री, बीभत्सिषिता-त्री, बाधयिता-त्री;

— बीभत्सयन्-न्ती, बीभत्सयिष्यन्-न्ती-ती;

बीभत्समानः, बीभत्सयमानः, बीभत्सिषमाणः;

बीभत्सिष्यमाणः, बीभत्सयिष्यमाणः, बीभत्सिषिष्यमाणः;

[B]बीभत्सितम्-तः-तवान्, बीभत्सितः, बीभत्सिषितः-तवान्;

बीभत्सुः, [6]बीभत्सनः, बीभत्सयिषुः, बीभत्सिषुः;

बीभत्सितव्यम्, बीभत्सयितव्यम्, बीभत्सिषितव्यम्;

---

1. बाहुलकादरन्प्रत्ययः । 'षिद्गौरादिभ्यश्च' (4-1-41) इति गौरादिपाठात् स्त्रियां ङीष् ।
2. 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (3-1-6) इत्यत्र 'बधेर्वैरूप्ये' इति वचनात् वैरूप्यार्थे स्वार्थे नित्यसनि, अभ्यासस्य इत्वे दीर्घे च, 'एकाचो बशो भष्—' (8-2-37) इति भष्भावेन भकारे, धकारस्य चर्त्वे च रूपम् । एवं सर्वत्र प्रक्रिया ज्ञेया ।
3. स्वार्थसन्नन्तात् ण्यन्ते ण्वुलि, 'णेरनिटि' (6-4-51) इति णिलोपे रूपमेवम् ।
4. स्वार्थसन्नन्तादिच्छासनि रूपमेवम् । असरूपप्रत्ययत्वात् इच्छासन्नन्तस्यापि प्रयोग इष्टः । तदुक्तं भाष्ये (3-1-7)'सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥ 'इति।
5. 'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति।' (भाष्यम्. 3-1-7) इति वचनात् बध इत्यत्रोक्तस्यानुदात्तेत्त्वस्य स्वार्थसनोऽभावे अर्थान्तरे बन्धनादिरूपे चुरादित्वमिति, तत्पक्षे ण्यन्तात् क्रमेण रूपाणि यथायथमूह्यानि ।
6. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिको युच् ।

A 'पलान्यखाद्यानि खदन् बदद्वपुः गदन्नवाच्यानि रदन् सतां मनः ॥' धा. का. 1.8.

B. 'स खल्वबीभत्सितवृत्तिरर्चां तवारमेतापि कृपां लमेत ॥' धा. का. 2. 38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | |
|---|---|---|
| बीभत्सनीयम् , | बीभत्सनीयम् , | बीभत्सिषणीयम् ; |
| बीभत्स्यम् , | बीभत्स्यम् , | बीभत्सिष्यम् ; |
| ईषद्बीभत्सः-दुर्बीभत्सः-सुबीभत्सः ; | — | — |
| बीभत्स्यमानः, | बीभत्स्यमानः, | बीभत्सिष्यमाणः ; |
| बीभत्सः, | बीभत्सः, | बीभत्सिषः ; |
| बीभत्सितुम् , | बीभत्सयितुम् , | बीभत्सिषितुम् ; |
| बीभत्सा, | बीभत्सयिषा, | बीभत्सिषा ; |
| बीभत्सनम् , | बीभत्सनम् , | बीभत्सिषणम् ; |
| बीभत्सित्वा, | बीभत्सयित्वा , | बीभत्सिषित्वा ; |
| प्रबीभत्स्य, | प्रबीभत्स्य, | प्रबीभत्सिष्य ; |
| बीभत्सम् २, बीभत्सित्वा २, | बीभत्सम् २, बीभत्सयित्वा २, | बीभत्सिषम् २ ; बीभत्सिषित्वा २. |

## (1097) " बध संयमने " (X-चुरादिः-1547. सक. सेट्. उभ.)

' बन्धे— ' इति चन्द्रः ।

' बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।' (श्लो. 120) इति देवः । बाधकः-धिका, बिबाधयिषकः-षिका ; इत्यादीनि सर्वाणि रूपाणि चौरादिक-चाटयतिवत् (488) बोध्यानि । [A]बाधयन्-न्ती ।

## (1098) " बन्ध बन्धने " (IX-क्र्यादिः-1508. अक. अनि. पर.)

' बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।' (श्लो. 120) इति देवः । बन्धकः-न्धिका, बन्धकः-न्धिका, [1]बिभन्त्सकः-त्सिका, [2]बाबधकः-धिका ; [3]बन्द्धा-बन्द्ध्री, बन्धयिता-त्री, बिभन्त्सिता-त्री, बाबधिता-त्री ;

---

1. सन्नन्ताण्ण्वुलि, भष्भावचर्त्वादिकेषु रूपमेवम् । सर्वत्र सन्नन्तेषु एवमेव प्रक्रियेति ज्ञेयम् ।
2. यङन्ते सर्वत्र यङ्निमित्तके नकारलोपे, अभ्यासदीर्घे च रूपनिष्पत्तिरिति ज्ञेयम् ।
3. तृचि, ' झषस्तथोः— ' (8-2-40) इति धत्वम् । ' झलां जश् झशि ' (8-4-53) इति धातुधकारस्य दकारः । तस्य, ' झरो झरि— ' (8-4-65) इति पाक्षिको लोपः । एवं तव्यदादिष्वपि प्रक्रिया ज्ञेया ।

A. ' स्वर्गे प्रियंमविष्णुश्च कृत्स्नं शक्रोऽप्यबाधयन् ॥ ' भ. का. 6. 116.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]बध्नन्-ती, [2]बन्धयन्-न्ती, बिभन्त्सन्-न्ती ; —

[3]भन्त्स्यन्-न्ती-ती, बन्धयिषयन्-न्ती-ती, बिभन्त्सिष्यन्-न्ती-ती ; —

— बन्धयमानः, बन्धयिष्यमाणः, — बाबध्यमानः, बाबधिष्यमाणः ;

[4]भत्-भध्-बधौ-बधः ; — — —

बद्धः-बद्धम्-बद्धवान्, [5]चक्रबद्धः-दृषद्बद्धः, बन्धितः, बिभन्त्सितः, बाबधितः-तवान् ;

बन्धः, [6]सुतानुबन्धः,[A] बन्धः, बिभन्त्सुः, बाबन्धः ;

बन्द्धव्यम्, बन्धयितव्यम्, बिभन्त्सितव्यम्, बाबधितव्यम् ;

बन्धनीयम् बन्धनीयम्, बिभन्त्सनीयम्, बाबधनीयम्,

बन्ध्यम्, बन्ध्यम्, बिभन्त्स्यम्, बाबध्यम् ;

ईषद्बन्धः-दुर्बन्धः-सुबन्धः ; — —

बध्यमानः, बन्ध्यमानः, बिभन्त्स्यमानः, बाबध्यमानः ;

बन्धः, [7]पर्यङ्कबन्धः, चक्रबन्धः, दृषद्बन्धः, [8]अनूबन्धः, बन्धः, बिभन्त्सः, बाबधः ;

बन्द्धुम्, बन्धयितुम्, बिभन्त्सितुम्, बाबधितुम् ;

---

1. शतरि, क्र्यादित्वात् श्नाप्रत्यये, 'अनिदिताम्—' (6-4-24) इति धातुनकारलोपे, 'श्नाऽभ्यस्तयोः—' (6-4-112) इत्याकारलोपे च रूपमेवम्।
2. चित्तवत्कर्तृकत्वविवक्षायाम् ण्यन्तेऽत्र परस्मैपदमेव। अचित्तवत्कर्तृकत्वविवक्षायां तु आत्मनेपदमपि भवतीति ज्ञेयम्।
3. स्यप्रत्ययेऽपि भष्भावचर्त्वादिकं यथायथमूह्यम्।
4. क्विपि, उपधानकारलोपे, भष्भावचर्त्वविकल्पयो रूपम्।
5. क्तप्रत्ययान्तात्, 'सप्तमी—' (2-3-36) इति योगविभागात् समासः।
6. सुतमनुबध्नातीति **सुतानुबन्धः**। 'कर्मण्यण्' (3-2-1) इत्यण्।
7. पर्यङ्के बन्धः **पर्यङ्कबन्धः**। 'सिद्धशुष्कपक्वबन्धैश्च' (2-1-41) इति सप्तमीतत्पुरुषः। 'तत्पुरुषे कृति—' (6-3-14) इति प्राप्तस्यालुकः 'नेन्सिद्धबध्नातिषु च' (6-3-19) इति निषेधः।
8. अनु बध्यते इत्य**नूबन्धः** = प्रत्ययगतः कित्त्वङित्त्वादिर्विशेषः। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति दीर्घः।

A. 'ज्ञाताशयस्तस्य ततो व्यतानीत् स कर्मठः कर्म **सुतानुबन्धम्** ॥' भ. का. 1.11. (अत्र कर्मण्यणि **सुतानुबन्धम्** इति नपुंसकलिङ्गश्रवणासम्भवात् व्याख्यातृभिः **सुतानुबन्धि** इति पाठमाश्रित्य, तस्य च सुतमनुबन्धुं शीलमस्येति व्युत्पत्त्या ताच्छील्येऽर्थे णिनिप्रत्ययान्तत्वमिति समर्थितम्। तदेव च साध्विति प्रतिभाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]बन्धा, बद्धिः, बन्धना, बिभन्त्सा, बाबधा ;
बन्धनम् , बन्धनम् , बिभन्त्सनम् , बाबधनम् ;
बद्ध्वा, बन्धयित्वा, बिभन्त्सित्वा, बाबधित्वा ;
अनुबध्य, प्रबन्ध्य, प्रबिभन्त्स्य, प्रबाबध्य ;
[2]चक्रबन्धं बद्धः, [3]अट्टालिकाबन्धं बद्धः ;
बन्धम् २, बद्ध्वा २, बन्धम् २, बन्धयित्वा २, बिभन्त्सम् २, बिभन्त्सित्वा २, बाबधम् २ ; बाबधित्वा २ ;
[4]बन्धुः, [5]बधिरः, [6]ब्रध्नः-बुध्नः, [7]बन्धुरः, [8]बन्धूकः ।

## (1099) "बर्ब गतौ" (I-भ्वादिः-418. सक. सेट्. पर.)

'अयं बन्ब इति नोपधः । इति कौशिकः ।' इति मा. धा. वृत्तिः । बर्बकः-र्बिका, बर्बकः-र्बिका, बिबर्बिषकः-षिका, बाबर्बकः-र्बिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्बतिवत् (173) ज्ञेयानि । [9]बर्बरः-बर्बरी, [A]प्रबर्व्य ।

---

1. धातोः संयोगान्तत्वेन गुरुत्वात्, 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये रूपमेवम् । क्तिनि विवक्षिते तु कित्त्वेनोपधानकारलोपे बद्धिः इत्यपि साधुरिति ज्ञेयम् ।
2. 'अधिकरणे बन्धः' (3-4-41) इति णमुल् । चक्रे बद्ध इत्यर्थः । कषादित्वात् यथाविध्यनुप्रयोगः ।
3. 'संज्ञायाम्' (3-4-42) इति णमुल् । अट्टालिकाबन्ध इति बन्धविशेषस्य संज्ञा । एवं क्रौञ्चबन्धं बद्धः, पद्मबन्धं बद्धः, शरबन्धं बद्धः, इत्यादिषु सर्वत्र णमुलुपपत्तिर्ज्ञेया । अत्र सर्वत्र बन्धः इत्यनेन व्यूहविशेषस्य, काव्यगतस्य बन्धविशेषस्य च तन्त्रेण ग्रहणमिति ज्ञेयम् ।
4. औणादिके [द. उ. 1.95] उप्रत्यये रूपमेवम् ।
5. औणादिके [द. उ. 8.26] किरच्प्रत्यये, प्रत्ययस्य कित्त्वेनोपधानकारलोपे च रूपमेवम् । बद्धमस्य श्रवणेन्द्रियमिति बधिरः=श्रोत्रेन्द्रियहीनः ।
6. 'बन्धेर्ब्रधिबुधि च' (द. उ. 5-38) इति नक्प्रत्यये ब्रधि-बुधि-इत्यादेशयोश्च रूपे सिद्ध्यतः । कित्त्वादुपधानकारलोपः । ब्रध्नः=सूर्यः । बुध्नः=सङ्कल्पो मनः, देवो वा ।
7. बाहुलकादौणादिके उरच्प्रत्यये रूपम् । 'बन्धूर बन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु ।' इति रन्तिदेववचनाद् दीर्घमध्यमोऽप्यस्तीति विज्ञायते ।
8. औणादिके (द.उ. 3-46) ऊकप्रत्यये रूपम् । बन्धूकम्=पुष्पविशेषः । [बर्बरी इति ।
9. बाहुलकादौणादिकेऽरप्रत्यये रूपम् । बर्बरः= शिथिलः, प्राणिविशेषश्च । स्त्रियां ङीषि
A. 'प्रबर्व्य शैलानुपमर्व्य पद्मिनीं प्रकर्व्य चाशाः श्रमशोणितैरिव ॥' धा. का.1.54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1100) "बर्ह प्राधान्ये" (I-भ्वादिः-638. सक. सेट्. आत्म.)

बर्हकः-र्हिका, बर्हकः-र्हिका, बिबर्हिषकः-षिका, बाबर्हकः-र्हिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्हतिवत् (385) ज्ञेयानि। [1]बर्हः, [2]बर्हिणः, [3]बर्हकः इमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1101) "बर्ह हिंसायाम्" (X-चुरादिः-1665. सक. सेट्. उभ.)

बर्हकः-र्हिका, बिबर्हयिषकः-षिका, बर्हयिता-त्री, बिबर्हयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि चौरादिकगर्जयतिवत् (378) बोध्यानि। क्विपि [4]बट्-बड्-बर्हौ-बर्हः; [A]अनिबर्हणीयम्।

## (1102) "बर्ह भाषार्थः" (X-चुरादिः-1770. सक. सेट्. उभ.)

आस्वदीयः।

'वृद्धौ भाषार्थविषये वृंहयेद् बर्हयेदिति ॥' (श्लो. 198) इति देवः। बर्हकः-र्हिका, बिबर्हयिषकः-षिका, बर्हयिता-त्री, बिबर्हयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि चौरादिकग्रासयतिवत् (439) बोध्यानि।

## (1103) "बल प्राणने धान्यावरोधने च"

(I-भ्वादिः-840. सक. सेट्. पर.) ज्वलादिः।

प्राणनम्=जीवनम्। धान्यावरोधनम्=कुसूलादिव्यापारः। प्राणनेऽकर्मकः, धान्यावरोधने सकर्मकः।

बालकः-लिका, बालकः-लिका, बिबलिषकः-षिका, बाबलकः-लिका;

---

1. बर्हते=प्राधान्येन सर्वेष्ववयवेषु वर्तते इति बर्हः=मयूरादीनां शिखण्डकः। पचाद्यचि रूपमेवम्।
2. 'फलबर्हाभ्यामिनच् वक्तव्यः' (वा. 5-2-122) इति मत्वर्थीय इनच्प्रत्ययः। बर्हिणः=मयूरः।
3. आशिषि गम्यमानायाम् 'आशिषि च' (3-1-150) इति वुन्। बर्हताम् इत्याशिषि गम्यमानायामयं प्रत्ययो भवतीति ज्ञेयम्।
4. 'रात् सस्य' (8-2-24) इति नियमात् हकारस्य संयोगान्तलोपो न। हकारस्य पदान्तनिमित्तके ढत्वे, चर्त्वविकल्पे च रूपमेवम्।

A. 'अम्लेच्छलोकसहिते सदसीह तस्मात्
को भूषयिष्यति शिशून्निबर्हणीयम् ॥' धा. का. 3. 30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि तद्धातूपात्तविशेषरूपाणि विना भौवादिककलतिवत् (174) ज्ञेयानि । [1]बालः-बलः, [2]बाला, [3]बाहुबली-ऊरुबली, सर्वबली, [4]बलिः, [5]बलवान्-बली, [6]बलूलः, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1104) " **बल प्राणने** " (X-चुरादिः-1629. सक. सेट्. उभ.) ज्ञपादिः।

बलकः-लिका, बिबलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचहयतिवत् (515) ज्ञेयानि । [A]बलयन्-न्ती ।

(1105) " **बल्ह प्राधान्ये** " (I-भ्वादिः-639. अक. सेट्. आत्म.)

बल्हकः-ल्हिका, बल्हकः-ल्हिका, विबल्हिषकः-षिका , बाबल्हकः-ल्हिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्हतिवत् (385) ज्ञेयानि । [B]प्रबल्हः, [7]बाहीकः ।

(1106) " **बल्ह भाषार्थः** " (X-चुरादिः-1771. सक. सेट्. उभ.) आस्वदीयः ।

बल्हकः-ल्हिका, बिबल्हयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि

---

1. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि वा णप्रत्ययः । तदभावपक्षे पचाद्यचि बलः इति रूपम् ।
2. बालशब्दस्याजादिषु (4-1-4) पाठात् 'वयसि प्रथमे' (4-1-20) इति ङीष् न, टाबेव भवति ।
3. 'बलाद् बाहूरुपूर्वपदात्, सर्वादेश्च' (वा. 5-2-135) इति वचनात् मत्वर्थीय इनिप्रत्यये रूपाण्येतानि साधूनि ।
4. 'इन्' [द. उ. 1-46] इतीन्प्रत्यये रूपम् ।
5. मत्वर्थीये इनिप्रत्यये, मतुपि मतोर्वकारे च एते रूपे भवतः ।
6. 'वातदन्तबलललाटानामूङ् च' (ग. सू. 5-2-97) इति सिध्मादिषु पाठात् मत्वर्थीये लच्प्रत्यये ऊङागमे च रूपमेवम् ।
7. 'ईकक् च' (वा. 4-1-85) इत्यनेन बहिस्-बहिल्शब्दाभ्यामीकक्प्रत्यये टिलोपे च वाहीकः इति रूपसिद्धिः। वेदबाह्यदेशजात इत्यर्थः। 'गौर्वाहीकः' इत्यादिषु बाहीकः इत्येव ओष्ठ्यादिः प्रयोगः साधुः, न तु दन्त्योष्ठ्यादिरिति बोध्यम् ।

A. 'युध्यस्व भीतिरहितो बलयन् खलु त्वं
कीर्तिं चयस्व चपयापि नृपप्रसादम् ॥' धा. का. 3.25.

B. 'बर्हप्रबल्हसमलङ्कृतिरालिलिङ्ग
प्रोत्थाप्य बर्हकनिवल्हदुतं तमीशः ।' धा. का. 1.81.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



चौरादिकग्रासयतिवत् (439) ज्ञेयानि । [A]अबल्ह्यः ।

(1107) "बष्क दर्शने" (X-चुरादिः-1916. सक. सेट्. उभ.) [अ]

बष्ककः-ष्किका, बिबष्कयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगन्धयतिवत् (375) ज्ञेयानि । [B]बष्कयन्, [1]बष्कयणी ।

(1108) "बस्त अर्दने" (X-चुरादिः-1683. सक. सेट्. आत्म.)

आकुस्मीयः ।

'बस्तु—' इति मैत्रेयः । तस्य मते उदित्त्वाण्णिचो वैकल्पिकत्वम् । 'वस्त—' इति केचिद् दन्तोष्ठ्यादिं पठन्ति ।

बस्तकः-स्तिका, बिबस्तयिषकः-षिका, बस्तयिता-त्री, बिबस्तयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगन्धयतिवत् (375) ज्ञेयानि। णिचो वैकल्पिकत्वात् पक्षे शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, यङन्ताच्च इमानि रूपाणीति विशेषः । यथा—बस्तकः-स्तिका, बिबस्तिषकः-षिका, बाबस्तकः-स्तिका ; इति यथायथमूह्यानि । [C]बिबस्तयिषुः, [2]बस्तिः ।

(1109) "बहि वृद्धौ" (I-भ्वादिः-633. अक. सेट्. आत्म.) [आ]

---

1. बाहुलकात् औणादिकेऽयप्रत्यये **बष्कयः** = तरुणवत्सः । सोऽस्य अस्तीति पामादित्वात् (5-2-100) नप्रत्यये णत्वे ङीषि च **बष्कयणी** = चिरप्रसूता गौः ।
2. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति णिजभावपक्षे इक्प्रत्यये रूपम् । **बस्तिः** = मूत्रकोशः ।

A. 'नाहं वर्हयितास्म्य**बल्ह्य**मपि भोः सर्वैरिदं गोप्यते........॥' धा. का. 3.44.

B. 'लोके **वष्कयतीह** चित्रितमहामश्वे स्वयं चित्रयन्
दोष्णा खड्गमुदस्य तस्य वटयन् हस्तादगृह्णादमुम् ।' धा. का. 3. 61.

C. 'प्रस्पाश्य मुष्टिमभितर्जयते प्रभत्स्यों
मल्लो **बिबस्तयिषु**रेनमगन्धनीयम् ।' धा. का. 3.34.

[अ] 'कर्तृकरणाद् धात्वर्थे (ग. सू. चुरादिः) इत्यत्र तद्गणसूत्रनिदर्शनार्थमुपात्तेषु धातुष्वयमेकः । क्वचित् 'बल्क दर्शने' इत्युपात्तम् । 'पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्**बष्कयणी**प्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः' (2-1-65) इत्यत्र **वष्कयणी**शब्दस्योपादानात्, **माधव-धातुकाव्यकार**प्रभृतिभिरुपादानाच्चास्माभिः बष्क इति पाठमादृत्यैवमत्र लिखितम् ।

[आ] **क्षीरस्वामी** चुरादिषु (आस्वदीयेषु) भाषार्थकदण्डकेऽपि **बर्हि**धातुं पठित्वा **बंहयती**त्युदाहृतवान् । **अन्ये** केऽपि नामुं धातुं पठन्ति । अनतिप्रयोजनकत्वात् बहुत्र तस्यानुपलम्भात् **वर्हि**धातोः **बहि** इति मुद्रणसम्भवाच्चास्माभिरयं परित्यक्तः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



बंहकः-हिका, बंहकः-हिका, बिबंहिषकः-षिका, बाबंहकः-हिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (149) ज्ञेयानि [1]बहु । शानचि-बंहमानः इति रूपमस्येति ज्ञेयम् ।

**(1110) " बाडृ आप्लाव्ये "** (I-भ्वादिः-286. सक. सेट्. आत्म.)

**आप्लाव्यम्**=वेगेनोत्क्षिप्य गमनम् । ओष्ठ्यादिरयं धातुः । **औत्तराः** सर्वेऽपि ग्रन्थकाराः वबयोः प्रयोगं बहुधा विपर्यस्य कुर्वन्ति ।

बाडकः-डिका, बाडकः-डिका, बिबाडिषकः-षिका, बाबाडकः-डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**गाधति**वत् (394) ज्ञेयानि । [A]बाडितम्, [2]बाडः ।

**(1111) " बाधृ लोडने "** (I-भ्वादिः-5. सक. सेट्. आत्म.)

'**—रोटने । रोटनम्**=प्रतिघातः ।' इति **क्षीरस्वामी । लोडनम्**= हिंसनमिति यावत् ।

बाधकः-धिका, बाधकः-धिका, बिबाधिषकः-षिका, बाबाधकः-धिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**गाधति**वत् (394) ज्ञेयानि । [3]कार्यबाधी[B] ।

**(1112) " बाहृ प्रयत्ने "** (I-भ्वादिः-645. अक. सेट्. आत्म.)

बाहकः-हिका, बाहकः-हिका, बिबाहिषकः-षिका, बाबाहकः-हिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**द्राखति**वत् (879) ज्ञेयानि । [4]बाहः-[C]बाहा, [5]बाढम्[D]-बाहितम्, [6]बाहुः ।

---

1. 'लङ्घिबंह्योर्नलोपश्च' (द. उ. 1-114) इति कुप्रत्यये नकारलोपे च **बहु** इति रूपम् ।
2. बाडते=वेगेनोत्क्षिप्य गच्छतीति **बाडः**= अश्वः । पचाद्यचि रूपम् ।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिप्रत्ययः ।
4. पचाद्यचि, रूपमेवम् । स्त्रियामजादिपाठात् टाप् ।
5. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्ट**बाढा**नि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु' (7-2-18) इत्यनेनास्माद् धातोर्निष्ठायां भृशार्थे इडभावनिपातनात्, धातुहकारस्य ढत्वे धत्व-ष्टुत्व-ढलोप-दीर्घेषु च **बाढम्** इति रूपम् । अन्यत्र **बाहितम्** इत्येव ।
6. बाहते=प्रयतते इति **बाहुः**=करः । औणादिके उप्रत्यये रूपमेवम् ।

A. 'अहोडनीयान् पशुपालयानसौ अपश्यदानन्दपयोधि**बाडितः** ।' धा. का. 1.38.
B. 'स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधीगाधित**कार्यबाधिनम्** ।' धा. का. 1.2.
C. 'प्लीहायितासुरभरक्षतिवेहितोर्वीभैषज्यजेहपरया निज**बाहयै**व ॥' धा. का. 1.81.
D. 'प्रमेदिताः सपुत्रास्ते सुस्वान्ता **बाढ**विक्रमाः ।' भ. का. 9.17.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1113) " **बिट आक्रोशे** " (I-भ्वादिः-317. अक. सेट्. पर.)

'विट—' इति क्षीरस्वामी पपाठ। 'बिड —' इति नन्दी। 'पिट—' इति मल्लः।

[A]बेटकः-टिका, बेटकः-टिका, बिबेटिषकः-बिबिटिषकः-षिका, बेबिटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) ज्ञेयानि। [1]बिडालः।

(1114) " **बिदि अवयवे** " (I-भ्वादिः-64. अक. सेट्. पर.)

'अवयवे=एकदेशगतक्रियायाम्।' इति क्षीरस्वामी। 'भिदि—' इति सम्मताकारः।

बिन्दकः-न्दिका, बिन्दकः-न्दिका, बिबिन्दिषकः-षिका, बेबिन्दकः-न्दिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि। [2]बिन्दुः[B]।

(1115) " **बिल भेदने** " (VI-तुदादिः-1359. सक. सेट्. पर.) [अ]

बेललः--लिका, बेलकः-लिका, बिबेलिषकः-बिबिलिषकः-षिका, बेबिलकः-

---

1. 'तमिबिडि—' [द. उ. 8.115.] इत्यादिना कालच्प्रत्यये पृषोदरादित्वात् टकारस्य डकारे च रूपमेवम्। दशपाद्युणादिवृत्तावत्र 'विड —' इति सौत्रो धातुर्ण्यन्तः।' इति प्रोक्तम्। तच्चिन्त्यम्। तादृशस्य धातोः सूत्रेष्वनुपलम्भात्। दन्त्यौष्ठ्यादिं बशन्तं च येऽपि पठन्ति, तेषामपि वबयोरभेदोच्चारणमेव निदानमिति ज्ञेयम्।

2. बाहुलकादौणादिके उप्रत्यये रूपम्। मैत्रेयस्तु 'विन्दुरिच्छुः' (3-2-169) इति सूत्रे निपातनादुकारप्रत्ययान्तत्वं मेने। तदप्रामाणिकम्। यतः, काशिकादिषु "वेत्तेर्नुमि उप्रत्यये निपातनम् विन्दुः वेदनशीलः" इत्युक्तत्वात्। एतेन, 'यद्यभिधानमस्ति—भिन्दुरिति दृश्यते।' इति भिदिधातुमत्रावयवार्थे पठन्, तस्योप्रत्ययान्ते भिन्दुरिति साधयंश्च सम्मताकारोऽपि प्रतिबोधित इति ज्ञेयम्।

A. 'चेटैर्विटैश्चानुगतानबेटकैरेटपशूकेटिरजः कटन् मलान्।' धा. का. 1.42.

B. 'श्रुतान्दुकैश्चित्तगजेन्द्ररोधिनस्तुष्यन्तु सन्तो गुणबिन्दुलोलुपाः॥' धा. का. 1.9.

[अ] 'बेलति इति शपि, अयं चुरादौ च।' इति मा. धा. वृत्तौ आत्रेयवाक्योपादानात् भ्वादिष्वपि कश्चन बिलधातुरस्तीति ज्ञायते। क्षीरस्वामिप्रभृतिभिरनुपादानादस्माभिर्न लिखितः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



लिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिक**किल**तिवत् (193) ज्ञेयानि । [1]बिलम्, [2]बिल्वम्, [3]बिल्मम् ।

(1116) "**बिल भेदने** (X-चुरादिः-1606. सक. सेट्. उभ.)

"भिल —' इति **कौशिकः** । भेलयति, भेलः, भिल्मम् ।" इति **क्षीरस्वामी** । 'बिल्मं भिल्मं भासनमिति वा ।' इति **निरुक्ते** (1-20) प्रयोगोपलम्भात् 'भिल–' इत्येतस्यापि धातुपाठेषु पाठ उन्नीयते, इति **युधिष्ठिरमीमांसक**-मतम् ।

बेलकः-लिका, बिबेलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**चेतयति**वत (522) ज्ञेयानि । बेलयन्-न्ती, बेलयिष्यन्-न्ती-ती, इति शतरि रूपाणीति विशेषः ।

(1117) "**बिस प्रेरणे**" (IV-दिवादिः-1217. अक. अनि. पर.)

'विस—' इति कुत्रचिद् दृष्टः पाठोऽप्रामाणिकः ।

बेसकः-सिका, बेसकः-सिका, बिबेसिषकः-बिबिसिषकः-षिका, बेबिसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिक**कुस्यति**वत् (234) ज्ञेयानि । [4]बिस्तः, बिसम् । [A]बिसितम् ।

(1118) "**बुक्क भषणे**" (I-भ्वादिः-119. अक. सेट्. पर.)

भषणम्=श्वरवः । **क्षीरस्वामी** तु '—भाषणे' इति पठित्वा, 'भषणे इत्येके ।' इत्याह । '—आभाषणे ।' इति **शाकटायनः** ।

'णिचि बुक्कयतीति स्यात्, भाषणे शपि बुक्कति ।' (श्लो. 42) इति **देवः** । अत्र देवमतेऽपि भाषणमेवार्थ इति ज्ञायते ।

---

1. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्यये रूपमेवम् ।
2. बाहुलकात् औणादिके वक्प्रत्यये रूपमेवम् । प्रत्ययस्य कित्त्वान्न गुणः ।
3. बाहुलकात् औणादिके मक्प्रत्यये रूपमेवम् ।
4. औणादिके (द. उ. 6-7) तन्प्रत्यये, 'तितुत्रतथ—' (7-2-9) इत्यादिना इण्निषेधे च रूपमेवम् । **केचित्तु** धातोरस्य सेट्त्वेऽपि, 'अपरिमाण**बिस्ता**चित—' (4-1-22) इत्यत्र **बिस्त** इति निपातनान्निष्ठायामनिट्त्वमिति साधयन्ति । शास्त्रस्य सङ्कोचे प्रमाणाभावात् तच्चिन्त्यम् ।

A. '......वेदव्योषकृदप्लुषो **विसित**धीकुस्यजनांहोबुसम् ।' धा. का. 2. 66.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



बुक्कक:-क्किका, बुक्कक:-क्किका, बुबुक्किषक:-षिका, बोबुक्कक:-क्किका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककखतिवत् (141) ज्ञेयानि। अप्रत्यये—बुक्का[A] इति।

### (1119) "बुक्क भाषणे" (X-चुरादि:-1714. अक. सेट्. उभ.)

'—भषणे' इति धा. का. (3-38) व्याख्यादृष्टः पाठः।

'णिचि बुक्कयतीति स्यात्, भाषणे शपि बुक्कति।' (श्लो. 42) इति देवः। बुक्कक:-क्किका, बुबुक्कयिषक:-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-कुट्टयतिवत् (207) ज्ञेयानि। [1]बुक्कयिष्णुः[B]।

### (1120) "बुगि वर्जने" (I-भ्वादि:-158. सक. सेट्. पर.)

'वुगि—' इत्यस्य पाठभेदोऽयम्। 'भुगि भर्जने इत्येके।' इति क्षीरस्वामी। बुङ्गक:-ङ्गिका, बुङ्गक:-ङ्गिका, बुबुङ्गिषक:-षिका, बोबुङ्गक:-ङ्गिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि। ण्यति—[C]बुङ्ग्यम्।

### (1121) "बुध अवगमने" (I-भ्वादि:-858. सक. सेट्. पर.)

ज्वलादिः।

'बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम्।
बुधिरो बोधनार्थस्य बोधते बोधतीत्यपि॥' (श्लो. 119) इति देवः।

**अवगमनम्**=उद्बोधः, ज्ञानं च। आद्ये-अकर्मकः, द्वितीये-सकर्मकः। बोधक:-धिका, बोधक:-धिका, बुबोधिषक:-बुबुधिषक:-षिका, बोबुधक:-धिका इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोलतिवत् (231) ज्ञेयानि।

---

1. छान्दसा अपि प्रत्ययाः क्वचिद् भाषायां क्त्वादिवत् भवन्तीति, 'णेश्छन्दसि' (3-2-137) इति ताच्छीलिक इष्णुच्प्रत्यये णेरयादेशे च रूपमेवमिति ज्ञेयम्।

A. 'अफक्कताऽतक्यगुणेन तङ्कता खलश्च बुक्का परुषे पुरेऽमुना।' धा. का. 1.17.

B. 'सञ्चर्चयन् अपनयानथ बुक्कयिष्णुः
श्वेवोग्रशब्दनपरः करुद्धकाणः।' धा. का. 3-38

C. 'विजुङ्ग्य बुङ्ग्यं गुणसंघदङ्कका अलङ्घितानन्दरसात्तघर्घनाः।' धा. का. 1.22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]बोधयन् शिष्यं धर्मम्। [2]प्रबोधी-प्रतिबोधी। राज्ञां [3]बोधित:-बुधितो वा। [4]विबुध:[A]-बोध:, [B]अविबोधयन्।

## (1122) "बुध अवगमने"

(IV-दिवादि:-1172. अक. अनि. आत्म.) [अ]

'बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम्।' (श्लो. 119) इति देव:।

---

1. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णे:' (1-3-86) इति ण्यन्तादस्मात् परस्मैपदमेव। यदाऽयं चित्तवत्कर्तृक:, तदाऽपि, 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेवेति ज्ञेयम्। अत्र, 'गतिबुद्धिप्रत्यवसानार्थ—' (1-4-52) इत्यनेन बुध्यर्थत्वात् अण्यन्तावस्थायां कर्तु:, ण्यन्तावस्थायां कर्मसंज्ञेत्यपि ज्ञेयम्।

2. 'भविष्यति गम्यादय:' (3-3-3) इति सूत्रे, प्र—प्रतिपूर्वकस्यास्य णिनिप्रत्ययान्तत्वेन गणपाठात् भविष्यत्यर्थे णिनि:।

3. 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इति वर्तमाने आदिकर्मणि च क्तप्रत्यय:। 'उदुपधाद् भावादिकर्मणो:—' (1-2-21) इति कित्त्वविकल्प:। 'क्तस्य च वर्तमाने' (2-3-67) इति षष्ठी। अत्र क्षीरतरङ्गिण्यां बोद्धा, बुद्ध: इति इड्रहितप्रयोगौ प्रदर्शितौ। अनिट्कारिकासु (7-2-10) बुध्यति इति श्यना निर्देशात् दैवादिकस्यैवानिट्त्वमिति, अस्य भौवादिकत्वेन सेड्रूपाण्येव भवन्तीति च युक्तमुत्पश्याम:।

4. 'ज्वलितिकसन्तेभ्यो ण:।' (3-1-140) इति कर्तरि णप्रत्ययविकल्प:। तस्य वैकल्पिकत्वात्, कर्तरि पक्षे इगुपधलक्षणकप्रत्यये बुध:, विबुध: इत्यादीनां सिद्धि:। 'अभिधानलक्षणा: कृत्तद्धितसमासान्ता:, (भाष्यम्-3-3-1) इति वचनात् सामान्येन विहितानामपि कृतां क्वचित् संज्ञायामपि सम्भव इति, अत्र कप्रत्यय: संज्ञायामपि। तेन बुध: इति ग्रहविशेषस्य, जातिविशेषस्य च संज्ञा।

A. '.......तमहमितो विलोक्य विबुधै: कृतोत्तमायोधनम्।' भ. का. 10.37.

B. 'तत: प्राकारमारोहत् क्षपाटानविबोधयन्।' भ. का. 8.56.

[अ] 'तत्त्वं बुध्यते' इति धर्मकीर्त्ति प्रयोगात्, 'कपादमुं नारद इत्यबोधि स:॥' (शि. व. 1.3) इति माघप्रयोगाच्च सकर्मकत्वमप्यस्यास्तीति ज्ञायते। परं तु 'अत्र बुधादीनां चतुर्णाम्, 'अणावकर्मकात्—' (1-3-88) इत्येव सिद्धे, वचनमिदम् अचित्तवत्कर्तृकार्थम्।' इति प्रतिपादयतो वृत्तिकारादेरेतदनभिमतमिति ज्ञायते। मा. धा. वृत्तौ तु 'अयमर्थभेदेन सकर्मकोऽकर्मकश्च।' इति समाहितम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



बोधकः-धिका, बोधकः-धिका, [1]बुबुत्सकः-त्सिका, बोबुधकः-धिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्षुध्यतिवत् (315) ज्ञेयानि। [2]बुद्धः, [3]बुधानः, [4]बुबुधानः।

(1123) "बुधिर् बोधने" (I-भ्वादिः-875. सक. सेट्. उभ.)

'बुधिरो बोधनार्थस्य बोधते बोधतीत्यपि ॥' (श्लो. 119) इति देवः। चान्द्राः, क्षीरस्वामी च 'बुध—' इत्यनिरितं पठन्ति।

बोधकः-धिका, बोधकः-धिका, बुबोधिषकः-बुबुधिषकः-षिका, बोबुधकः-धिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोलतिवत् (231) ज्ञेयानि। [5]बोधयमानः, [A]विबोध्यः, [6]तत्त्वबोधः-[7]तत्त्वबोधिनी।

(1124) "उ बुन्दिर् निशामने"

(I-भ्वादिः-876. सक. सेट्. उभ.)

'उ बुन्धिर्[8]—' इति नन्दी। 'उ बेदिर्—' इत्यन्ये।' इति क्षीरस्वामी। 'उ चुन्दिर्—' इति काशकृत्स्नचन्द्रौ पेठतुरिति क्षीरतरङ्गिणीटीका।

---

1. सन्नन्ताण्वुलि, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, भष्भावे चर्त्वे च रूपम्।
2. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायाम् क्तप्रत्ययः। बुध्यतीति बुद्धः=सिद्धार्थः।
3. 'युधिबुधिदृशेः किच्च' (द. उ. 5-33) इत्यानच्प्रत्ययः, किच्च। कित्त्वान्न गुणः। बुधानः= आचार्यः।
4. 'मुचिबुधिभ्यां सन्वच्च' इति मा. धा. वृत्त्युपात्तेन औणादिकसूत्रेण आनच्प्रत्यये, तस्य सन्वद्भावात् द्वित्वे, कित्त्वे च रूपम्। बुबुधानः= बोद्धुमिच्छुः।
5. 'बुधयुध—' (1-3-86) इत्यत्र, अकर्मकैः युध-नश-जनैः साहचर्यात् तादृशस्याकर्मकस्यैव ग्रहणमिति, सकर्मकोऽयं न तत्र विवक्षितः। तेनास्मात् 'णिचश्च' (1-3-74) इत्यस्य प्रवृत्त्या यथासम्भवं ण्यन्तात् शता शानच्च भवतीति विशेषः।
6. 'कर्मण्यण्' (3-2-1) इत्यणि रूपमेवम्।
7. ताच्छील्ये णिनिप्रत्यये रूपमेवम्। स्त्रियां ङीप्।
8. "...आचार्यप्रवृत्तिर्ज्ञापयति—'नैवंजातीयकानामिदिद्विधिर्भवति' इति; यदयमिरितः कांश्चिन्नुमनुषक्तान् पठति—'उ बुन्दिर् निशामने' ...।" इति भाष्य- (1-3-7) वचनप्रामाण्यात् धकारपाठोऽप्रामाणिक इति ज्ञेयम्। अनेनैव भाष्यवाक्येन कुत्रचिद्धातुपु अर्थनिर्देशः पाणिनीय एवेत्यपि बोध्यम्।

A. 'या नेदितोर्वीपरिशर्धिवीचीविमृद्धवृक्षादिविबोध्यशैत्या ॥' धा. का. 2.26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



बुन्दकः-न्दिका, बुन्दकः-न्दिका, बुबुन्दिषकः-षिका, बोबुदकः-दिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतुम्पतिवत् (742) ज्ञेयानि । [1]बुन्दमानः-बुन्दिष्यमाणः, [2]बुन्नम्-बुन्नः-बुन्नवान्, [3]बुन्दित्वा-बुत्त्वा, [4]बुद्बुदः इत्यादीनि रूपाण्यस्य धातोः विशेषेण सम्भवन्तीति विशेषः । [A]प्रबुन्द्यः ।

(1125) " बुल निमज्जने " (X-चुरादिः-1602. अक. सेट्. उभ.)

'चुल समुच्छ्राये' (547) इति चुरादिधातोः क्षीरस्वामिसम्मतः पाठ एवम् । इतरे सर्वेऽप्यमुं न पठन्ति । बोलकः-लिका, बुबोलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचोरयतिवत् (546) ज्ञेयानि ।

(1126) " बुस उत्सर्गे " (IV-दिवादिः-1219. सक. सेट्. पर.)

बोसकः-सिका, बोसकः-सिका, बुबुसिषकः-बुबोसिषकः-षिका, बोबुसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिककुस्यतिवत् (234) ज्ञेयानि । [5]बुसम्, [B] [6]खलेबुसम् ; [7]बुस्तः ।

---

1. अस्य धातोरुभयपदित्वात् शानजपि भवतीति विशेषः ।
2. उदित्त्वेन क्त्वायामिड्विकल्पनात् 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधे, उपधानकारलोपे, निष्ठातकार-धातुदकारयोर्नत्वे च रूपमेवम् ।
3. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधादुपधानकारलोपो न । इडभावपक्षे तु नकारलोपे, धातुदकारस्य चर्त्वे च बुत्त्वा इति द्वितकारकं रूपमिति ज्ञेयम् ।
4. घञर्थे कप्रत्यये, 'क्वनादीनां के द्वे भवतः' (वा. 6-1-12) इति द्विर्वचने, पृषोदरादित्वात् (6-3-109) हलादिशेषाभावे च रूपमेवम् ।
5. इगुपधलक्षणे कप्रत्यये रूपमेवम् । बुसम् = धान्यादीनां निस्सारो भागः ।
6. यस्मिन् काले खले बुसं वर्तते स कालः = खलेबुसम् । तिष्ठद्गुप्रभृतिषु (2-1-17) पाठात् अव्ययीभावसमासः, सप्तम्या अलुक् च ।
7. औणादिके (द.उ. 6-7) तन्प्रत्यये, 'तितुत्रत—' (7-2-9) इत्यादिना इण्निषेधे च रूपमेवम् । यद्वा, अर्धर्चादिषु (2-4-31) बुस्त इति पाठान्निष्ठायामनिट्त्वमिति बोध्यम् ।

A. 'प्रबुन्द्यवेणीजववेनमाना खातान्तिका चीवरिभिर्निषादैः ।' धा. का. 2.27.
B. '......वेदव्योषक्रदप्लुषो बिसितधीकुस्यजनांद्रोबुसम् ।' धा. का. 2.66.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1127) "बुस्त आदरानादरयोः"

(X-चुरादिः-1591. सक. सेट्. उभ.)

'—बन्धने।' इति क्षीरस्वाम्युद्धृतश्चान्द्रसम्मतपाठः। 'मुद्रितचान्द्रधातुपाठे तु '—वञ्चने' इत्येव दृश्यते।' इति क्षी. टीका। '—दानादरयोः' इति धा. का. व्याख्यायां (3-20) दृष्टः पाठः। बुस्तकः-स्तिका, बुबुस्तयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुस्मयतिवत् (236) ज्ञेयानि। अस्योभयपदित्वात् शताऽपि भवतीति विशेषः। [A]सम्बुस्तितः।

## (1128) "बृह वृद्धौ" (I-भ्वादिः-735. अक. सेट्. पर.)

'..........बृंहति बर्हति।

वृद्धौ, भाषार्थविषये बृंहयेद् बर्हयेदिति॥' (श्लो. 198) इति देवः। बर्हकः-र्हिका, बर्हकः-र्हिका, बिबर्हिषकः-षिका, बरीबृहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकदर्हतिवत् (866) ज्ञेयानि। [1]परिबृढः[B], परिबृहितः, [2]बृहत्।

## (1129) "बृहि वृद्धौ शब्दे च" (I-भ्वादिः-736. अक. सेट्. पर.)

---

1. परिपूर्वादस्माग्निष्ठायाम्, इडभावः, तकारस्य ढत्वम्, हकारस्य लोपः इति, 'प्रभौ परिबृढः' (7-2-21) इत्यनेन प्रभावभिधेये निपातितः। अन्यत्र परिबृहितः। अत्र बृंहतेरेव सानुषङ्गस्येदं निपातनमिति वार्तिककारपक्ष इति पदमञ्जर्यनुसारेण मा. धा. वृत्तावुक्तम्। भाष्ये दर्हतिदृंहति विषय एव प्रकृत्यन्तरसद्भावे प्रमाणं प्रदर्शितमिति बोध्यम्। किञ्च, अत्र सर्वत्र भाष्यकोशेषु 'प्रभौ परिवृढः' (7-2-21) इत्युपादाय परिवृढः इत्येव रूपसम्पादनं कृतमिति ज्ञायते। अतश्च दन्तोष्ठ्यादिः वर्हतिर्लिलिखिषमाणैव भाष्योपात्तेत्यपि ज्ञायते। अत्र तत्त्वं विद्वांसो विभावयन्तु।
2. 'वर्तमाने पृषद्बृहत्—' (द. उ. 6.5) इति कतिप्रत्ययः, तस्य शतृवद्भावश्च!

A. 'संबुस्तितते गिरिमखे परिचोद्य गोपान्
प्रानक्षयद्धरिमखं मदघक्कनार्थी॥' धा. का. 3.20.

B. '.तान् दृष्ट्वाऽतिदृढान् धृष्टान् प्राप्तान् परिबृढाज्ञया।' भ. का. 9.18

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



अत्र शब्दः-गजशब्द एव, लोके तथैव प्रयोगात्। 'बृहिर्—' इति चन्द्रदुर्गौ। '....................बृंहति बर्हति।

बृद्धौ, भाषार्थविषये बृंहयेत् बर्हयेदिति ॥' (श्लो. 198) इति देवः।

बृंहकः-बृंहिका, बृंहकः-बृंहिका, बिबृंहिषकः-षिका, बरीबृंहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकदर्हतिवत (866) ज्ञेयानि। [1]परिबृढः-[A]उपबृंहितः, [2]बर्हिः, [3]ब्रह्म।

## (1130) "बृहि भाषार्थः" ( X-चुरादिः-1769. सक. सेट्. उभ. )

### आस्वदीयः। '—भासार्थः' इति क्षीरस्वामी।

'बृद्धौ, भाषार्थविषये बृंहयेद् बर्हयेदिति ॥' (श्लो. 198) इति देवः।

बृंहकः-हिका, बिबृंहयिषकः-षिका, बृंहयिता-त्री, बिबृंहयिषिता-त्री; बृंहयन्-न्ती, बिबृंहयिषन्-न्ती, बृंहयिष्यन्-न्ती-ती, बिबृंहयिषिष्यन्-न्ती-ती; बृंहयमाणः, बिबृंहयिषमाणः, बृंहयिष्यमाणः, बिबृंहयिषिष्यमाणः; सुबृट्-सुबृड्-सुबृहौ-सुबृहः; — — —

बृंहितम्-तः-तवान्, बिबृंहयिषितः-तवान्, बृंहः, बिबृंहयिषुः; बृंहयितव्यम्, बिबृंहयिषितव्यम्; बृंहणीयम्, बिबृंहयिषणीयम्; बृंह्यम्, बिबृंहयिष्यम्, ईषद्बृंहः-दुर्बृंहः-सुबृंहः; बृंह्यमाणः, बिबृंहयिष्यमाणः, बृंहः, बिबृंहयिषः, बृंहयितुम्, बिबृंहयिषितुम्; बृंहणा, बिबृंहयिषा, बृंहणम्, बिबृंहयिषणम्; बृंहयित्वा, बिबृंहयिषित्वा; प्रबृंह्य, प्रबिबृंहयिष्य; बृंहम् २, बृंहयित्वा २, बिबृंहयिषम् २, बिबृंहयिषित्वा २.

---

1. अत्रापि प्रभावभिधेये, 'प्रभौ परिबृढः' (7-2-21) इति क्तप्रत्ययस्यानिड्त्वं तकारस्य ढत्वं नकारहकारयोर्लोपश्च निपात्यते। अन्यत्र बृंहितम् इत्येव। 'बृंहितं= करिगर्जितम्।' इति अमरः (2-8-107)।
2. 'बृंहेर्नलोपश्च' (द. उ. 9-31) इतीसिप्रत्यये नलोपे च रूपम्। पश्चात् गुणः। बर्हिः= वेद्यास्तरणम्।
3. 'बृंहेर्नोऽच्च' (द. उ. 6-74) इति मनिन्प्रत्यये धातुप्रधानकारस्य अकारे, पश्चाद् यणि च रूपम्। ब्रह्म= परं तेजः, वेदश्च।

A. 'यानैरप्युपबृंहितो विहितवान् प्रातः प्रयातुं मनः।' धा. का. 1.92.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1131) "बृहू उद्यमने" (VI-तुदादिः-1347. अक. वेट्. पर.)

क्षीरतरङ्गिणी-धातुकाव्यादिषु दृष्टः पाठ एवम् । अन्ये सर्वे दन्तोष्ठ्यादि 'वृहू—' इत्येव पठन्ति । तत्र क्षीरस्वामी 'बृहु—' इति उदितं पपाठ। बर्हकः-र्हिका, बर्हकः-र्हिका, बिबर्हिषकः-बिभृक्षकः-क्षिका, बरीबृहकः-हिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिकतर्हतिवत् (777) ज्ञेयानि। णिनिप्रत्यये—[A]जनजीवबर्ही इति ।

(1132) "ब्रूञ् व्यक्तायां वाचि"

(II-अदादिः-1044. अक. [अनि.] सेट्. उभ.)

| | | | |
|---|---|---|---|
| [1]वाचकः-चिका, | वाचकः-चिका, | [2]विवक्षकः-क्षिका, | वावचकः-चिका; |
| वक्ता-वक्त्री, | वाचयिता-त्री, | विवक्षिता-त्री, | वावचिता-त्री; |
| [3]ब्रुवन्-ती, | वाचयन्-न्ती, | विवक्षन्-न्ती; | — |
| वक्ष्यन्-न्ती-ती, | वाचयिष्यन्-न्ती-ती, | विवक्षिष्यन्-न्ती-ती; | — |
| ब्रुवाणः, | वाचयमानः, | विवक्षमाणः, | वावच्यमानः; |
| वक्ष्यमाणः, | वाचयिष्यमाणः, | विवक्षिष्यमाणः, | वावचिष्यमाणः; |
| [4]सुवाक्-सुवाग्-सुवाचौ-सुवाचः; | | — | — |
| [5]उक्तम्-उक्तः-उक्तवान्, | वाचितम्-तः, | विवक्षितः, | वावचितः-तवान्; |

---

1. आर्धधातुके विवक्षिते 'ब्रुवो वचिः' (2-4-53) इति वच्यादेशे रूपमेवम्। एवमेव तृजादिषु सर्वत्र शुद्धे, ण्वुलादिषु ण्यन्ते च वच्यादेशे रूपं ज्ञेयम्।
2. सन्नन्ताण्ण्वुलि वच्यादेशे रूपम्। तत्र वच्यादेशस्य 'पचिं वचिं—' इत्यनिट्कारिकासु (भाष्ये-7-2-10) वचनादनिट्त्वम्। कुत्वषत्वयोः रूपमेवम्। एवमेव सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
3. शतरि, अदादित्वात् शपो लुकि, शतुः सार्वधातुकत्वेन ङित्वात्, 'अचि श्नुधातु—' (6-4-77) इत्यादिनोवङि रूपमेवम्।
4. ताच्छीलिके क्विपि, 'क्विप् वचिप्रच्छि—' (वा. 3-2-178) इति दीर्घोऽसंप्रसारणं च भवति।
5. निष्ठायाम्, 'वचिस्वपियजादीनां किति' (6-1-15) इति वकारस्य संप्रसारणे, 'सम्प्रसारणाच्च' (6-1-108) इति पूर्वरूपे च रूपमेवम्। एवमेव क्तिनि, क्त्वायां च रूपनिष्पत्तिर्बोध्या।

A. 'मुरादिबन्धुः क्षुरघोरचेताः पुरन् खलानां जनजीवबर्ही।' धा. का. 2.77.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]ब्रुवः, ब्राह्मणिब्रुवा, [2]विदुषिब्रुवा-विदुषीब्रुवा, श्रेयसिब्रुवा-श्रेयसीब्रुवा, [3]विद्वद्ब्रुवा, श्रेयोब्रुवा, वाक्-[4]वाचा, [5]अनूचानः,[A] [6]वाग्मी, वाचालः-वाचाटः, [7]प्रवचनीयः (ब्राह्मणः, अनुवाको वा), [8]गुणवचनः, वाचः विवक्षुः, वावचः; वक्तव्यम्, वाचयितव्यम्, विवक्षितव्यम्, वावचितव्यम्; प्रवचनीयम्, वाचनीयम्, विवक्षणीयम्, वावचनीयम्;

---

1. ब्रवीति इति **ब्रुवः**। कर्तरि पचाद्यचि रूपम्। 'घरूपकल्पचेलड्ब्रुव—' (6-3-43) इति सूत्रे 'ब्रुव' इति निपातनात् गुणाभावे, वच्यादेशाभावे च रूपम्। अनेनैव सूत्रेण भाषितपुंस्कात् परस्य ङीप्प्रत्ययान्तस्यानेकाचो ह्रस्वः। **काशिकायामेव** (8-1-27) सूत्रे 'ब्रुव इति ब्रुवः कन्, निपातनात् **वच्या**देशाभावश्च।' इत्युक्तमप्यत्रानुसन्धेयम्।
2. 'उगितश्च' (6-3-45) इति **ब्रुव**शब्दे परे ह्रस्वविकल्पः।
3. 'पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः' (काशिका. 6-3-45) इति **वृत्तिकार**वचनादत्र पुंवद्भावे **विद्वद्ब्रुवा, श्रेयोब्रुवा** इति रूपे भवतः। परंतु **भाष्ये** नैतादृशं वचनं दृश्यते।
4. क्विबन्तात् स्त्रियां टापि रूपमेवम्। 'आपं चैव हलन्तानां यथा **वाचा** निशा दिशा।' इति **भागुरि**वचनात् टाप् इति **सि. कौमुदी**। **भाष्ये** तु नैतादृशं वचनं दृश्यते।
5. 'उपेयिवाननाश्वाननूचानश्च' (3-2-109) इत्यनेन, 'अनु' इत्युपसर्गपूर्वकादस्मात् लिटः कर्तरि कानचि, सम्प्रसारणे पूर्वरूपे द्वित्वे सवर्णदीर्घे च '**अनूचानः**' इति सिद्ध्यति। **अनूचानः**= साङ्गवेदाध्येता।
6. वाक्छब्दात् '**वाचो** ग्मिनिः' (5-2-124) इति मत्वर्थीये ग्मिनिप्रत्यये रूपमेवम्। प्रशस्तवाग्वति प्रत्ययोऽयम्। अत्रैव प्रकरणे 'आलजाटचौ बहुभाषिणि' (5-2-125) इति कुत्सितार्थे मत्वर्थीये आलच्-आटच्प्रत्यययोः **वाचालः, वाचाटः** इति रूपे इत्यपि ज्ञेयम्।
7. 'भव्यगेय**प्रवचनीय**—' (3-4-68) इत्यादिना कर्तरि अनीयर् प्रत्ययः। **प्रवचनीयः**=ब्राह्मणः। अत्र कर्मण्येव प्रत्ययो निपात्यते इति मते तु **प्रवचनीयः**=अनुवाकः।
8. गुणम् उक्तवान् इति **गुणवचनः**। 'कृत्यल्युटो बहुलम्' (3-3-113) इति भूते कर्तरि ल्युट्प्रत्ययः। अत्र च निदानम्, '**गुणवचन**ब्राह्मणादिभ्यः—' (5-1-124) इत्यत्र '**गुणवचन**—' इति निर्देश एवेति ज्ञेयम्।

A. '**इदमूचुरनूचानाः** प्रीतिकण्टकितत्वचः॥' कुमारसम्भवे 6.15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]वाच्यम्-वाक्यम्, [2]प्रवाच्यम्, अविवाक्यम्, वाच्यम्, वाकोवाक्यम्,
विवक्ष्यम्, वावच्यम्;

ईषद्वचः-दुर्वचः-सुवचः ; — —

उच्यमानः, वाच्यमानः, विवक्ष्यमाणः, वावच्यमानः ;

वाचः, [3]अनुवाकः-प्राड्विवाकः, वाचः, विवक्षः, वावचः ;

वक्तुम्, वाचयितुम्, विवक्षितुम्, वावचितुम् ;

उक्तिः, [4]निरुक्तम्-पुनरुक्तिः, वाचना, विवक्षा, वावचा ;

वचनम्, वाचनम्, विवक्षणम्, वावचनम् ;

उक्त्वा, वाचयित्वा, विवक्षित्वा, वावचित्वा ;

प्रोच्य, संवाच्य, प्रविवक्ष्य, प्रवावच्य ;

वाचम् २, } वाचम् २, } विवक्षम् २, } वावचम् २ ; }
उक्त्वा २, } वाचयित्वा २, } विवक्षित्वा २, } वावचित्वा २; }

---

1. 'आर्धधातुके' (2-4-35) इत्यत्र विषयसप्तमीत्वाश्रयणात् प्रत्ययोत्पत्तेः प्रागेव वच्यादेशे हलन्तलक्षणे ण्यति 'वचोऽशब्दसंज्ञायाम्' (7-3-67) इति कुत्वनिषेधे **वाच्यम्** इति रूपम्। शब्दसंज्ञायां तु कुत्वे **वाक्यम्** इत्येव। **वाक्यम्=वार्तिकादिरूपः** शाब्दिकसंज्ञासिद्धः ग्रन्थः।

2. 'यजयाचरुच**प्रवच**र्चश्च' (7-3-66) इत्यनेन कुत्वनिषेधे **प्रवाच्यम्** इति रूपम्। '**प्रवाच्यम्**=ग्रन्थविशेषः' इति **वृत्त्यादिषु** प्रोक्तम्। परं तु **भाष्ये** (7-3-66) **प्रवचि**ग्रहणप्रत्याख्यानप्रकरणे 'प्रपूर्वश्च **वचिर**शब्दसंज्ञायां वर्तते।' इत्युक्तत्वात् ग्रन्थविशेषस्य **प्रवाच्य**मिति संज्ञेति पक्षः चिन्त्य इति **उद्द्योते** प्रकृतसूत्रे स्फुटम्। **अविवाक्यम्** इत्यत्र तु पृषोदरादित्वात् (6-3-109), न्यङ्क्वादित्वात् (7-3-53) वा अहर्विशेषे कुत्वम्। द्वादशाहे दशरात्रस्य यज्ञविशेषस्य दशममहः **अविवाक्यम्**, यस्मिन्नहनि याज्ञिकाः न विब्रुवते=न नानावाक्यान्युच्चारयन्ति। अन्यत्र **अविवाच्यम्** इत्येव।

3. शब्दसंज्ञात्वात् कुत्वमत्रेति ज्ञेयम्। **अनुवाकः**=श्रुतौ विभागविशेषः। पृच्छतीति प्राट्। विशेषेण सूक्ष्मेक्षिकया न्यायादिकं ब्रवीति-इति **विवाकः**। प्राट् चासौ विवाकश्च **प्राड्विवाकः**=नीतिस्थले न्यायवादी। अत्रापि 'हलश्च' (3-3-121) इति संज्ञायां घञि कुत्वमिति ज्ञेयम्।

4. **पुनरुक्तिः, निरुक्तम्** इत्यत्र 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इत्यनेन क्तिच् क्तश्च संज्ञायां भवतः। **पुनरुक्ति**रिति असकृदाम्नानस्य संज्ञा। एवं **निरुक्त**मिति ग्रन्थविशेषस्य संज्ञा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]कृकवाकुः[A], [2]उक्थम्, [3]वक्त्रम्, [4]वचः, [5]वचक्नुः ।

(1133) "ब्रूस हिंसायाम्" (X-चुरादिः-1664. सक. सेट्. उभ.)

ब्रूसकः-सिका, बुब्रूसयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुत्सयतिवत् (217) ज्ञेयानि । अस्योभयपदित्वात् ब्रूसयन्-न्ती, बुब्रूसयिषन्-न्ती, ब्रूसयिष्यन्-न्ती-ती, बुब्रूसयिषिष्यन्-न्ती-ती; इति शतरि रूपाणि भवन्तीति विशेषः ।

(1134) "ब्लेष्क दर्शने" (X-चुरादिः-1916. सक. सेट्. उभ.) [अ]

ब्लेष्ककः-ष्किका, बिब्लेष्कयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकग्रन्थयतिवत् (375) ज्ञेयानि ।

(1135) "भक्ष अदने" (I-भ्वादिः-893. सक. सेट्. उभ.) [आ]

---

1. 'कृके वचः कश्च' [द. उ. 1.91.] इति ञुण्प्रत्यये ककारस्यान्तादेशे च रूपमेवम् । कृकेण=गलेन ब्रवीतीति कृकवाकुः=कुक्कुटः ।
2. औणादिके (द. उ. 6.32) थक्प्रत्यये सम्प्रसारणे च रूपमेवम् । उक्थम्=सामविशेषः ।
3. 'गुधृवीपचिवचि—' (द. उ. 8.89) इत्यादिना कर्तरि त्रप्रत्यये रूपम् । ब्रवीत्यनेनेति वक्त्रम्=आस्यम् ।
4. 'असुन्' (द. उ. 9.49) इत्यनेनासुन्प्रत्यये वच्यादेशे च रूपमेवम् ।
5. 'सृ यु वचिभ्योऽन्यज् आकुज् अक्नुचः' (द. उ. 10.4) इत्यनेन यथासंख्यमक्नुच्प्रत्यये रूपमेवम् । ब्रवीति इति वचक्नुः=वाग्मी ।

A. 'अनुनयमगृहीत्वा व्याजसुप्ता पराची
रुतमथ कृकवाकोस्तारमाकर्ण्य कल्ये ।' शि. व. 11.9.

[अ] 'बष्क दर्शने' इति पूर्वलिखितस्य (1107) धातोः क्षीरस्वामिसम्मतः पाठ एवम् । अत्र क्षीरतरङ्गिण्याम्, 'कर्तुरगाढत्वेऽपि ब्लेष्को वर्तना इत्येके ।' इत्युक्तम् । एतेन ज्ञायते—'ब्लेष्क दर्शने कर्तृशैथिल्ये' इति संहितापाठे द्वावपि धातू मेलयित्वा केचित् पठन्ति; तदानीं कर्तुः अगाढत्वे=शैथिल्ये ब्लेष्कधातोर्वृत्तिं केचिदिच्छन्ति—इति । एवञ्च दर्शने, कर्त्रगाढार्थे च केचिदमुं धातुं पठन्तीति बोध्यम् ।

[आ] 'भ्लक्ष अदने' इत्यत्र भ्वादौ मैत्रेयादयः 'भक्ष' इति पठन्ति । तदनुसारेण देवेनापि 'शपि भक्षति भक्षते ।' (श्लो. 177) इत्युक्तम् । धातुकाव्येऽपि '—प्रभ्लक्ष्य भक्षन्ति यदम्बु नीचाः ।' (2-28) इति शब्विकरणकः प्रयोगः कृतः । परं तु 'भक्षेरहिंसार्थस्य' (वा. 1-4-52) इत्यत्र 'भक्षयति पिण्डीं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'भक्षयत्यदने भक्षेः, शपि भक्षति भक्षते ।' (श्लो. 177) इति देवः। भक्षकः-क्षिका, भक्षकः-क्षिका, बिभक्षिषकः-षिका, बाभक्षकः-क्षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतक्षतिवत् (691) ज्ञेयानि ।

(1136) "भक्ष अदने" (X-चुरादिः-1557. सक. सेट्. उभ.)

'भक्षयत्यदने भक्षेः, शपि भक्षति भक्षते ।' (श्लो. 177) इति देवः। भक्षकः-क्षिका, बिभक्षयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि । [1]मांसभक्षः-मांसभक्षा, [2]भक्षयन् पिण्डीं देवदत्तेन याति । [3]इक्षुभक्षिका, [4]भक्-भग्-भक्षौ-भक्षः, भक्षणम्, इत्यादीनि रूपाण्यस्य संभवन्तीति विशेषः ।

(1137) "भज सेवायाम्" (I-भ्वादिः-998. सक. अनि. उभ.)

'–विभागसेवयोः' इति द्रुमे (श्लो. 123)।
'सेवायां भजते भजेदिति भजेः, विश्राणने भाजयेद्
आमर्दे तु भनक्ति, भाजयति णौ भाजेः पृथक्कर्मणि ॥ (श्लो. 66) इति देवः।

---

देवदत्तः । भक्षयति पिण्डीं देवदत्तेन ।' इति ण्यन्ताद्धेतुमण्णिचि प्रयोज्यस्य कर्मसंज्ञाभावप्रतिपादकभाष्येण भक्षतेः शब्विकरणपाठोऽनभिसंहितः । 'शीलिकामिभक्ष्याचरिभ्यो णः' (वा. 3-2-1) इत्यत्रापि वार्तिक-भाष्य-कैयटोद्योतादिषु चौरादिकस्य भक्षयतेरेव प्रत्ययविधानप्रदर्शनादपि भ्वादौ पाठोऽस्याप्रामाणिक एवेति ज्ञेयम् । स्पष्टमिदं माधवधातुवृत्तौ प्रकृतधातुप्रकरणे इति ज्ञेयम् ।

1. 'शीलिकामिभक्ष्याचरिभ्यो णः' (वा. 3-2-1) इति कर्मण्युपपदे णप्रत्ययः। मांसं भक्षयतीति मांसभक्षः। स्त्रियां णप्रत्ययान्तत्वेन टापि मांसभक्षा इति रूपम्। 'स्तुतिशीला हरिकामा फलभक्षा कानने व्रताचारा' इति प्र. सर्वस्वे।

2. 'निगरणचलनार्थेभ्यः—' (1-3-87) इति ण्यन्तादस्य नित्यं परस्मैपदमेव। अत्रास्य पुनः हेतुमण्णिचि, 'गतिबुद्धिप्रत्यवसानार्थ—' (1-4-52) इति प्रयोज्यस्य कर्मत्वम्, 'भक्षेरहिंसार्थस्य' (वा. 1-4-52) इति वार्तिकेन निषिध्यते। हिंसायां तु 'भक्षयति यवान् बलीवर्दान्।' इति भाष्यम्। अत्र भक्षयतिः 'सर्वे सचेतना भावाः' इति न्यायेन हिंसायां वर्तते। यवानां सचेतनत्वात् हिंस्यत्वम्।

3. 'पर्यायार्हर्णोत्पत्तिषु—' (3-3-111) इत्यनेन अर्हार्थे ण्वुच् प्रत्ययः। इक्षुभक्षणमर्हति इति इक्षुभक्षिका।

4. ण्यन्तादस्मात् क्विपि, संयोगान्तलोपे जश्त्वचर्त्वयो रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भाजकः-जिका, भाजकः-जिका, [1]बिभक्षकः-क्षिका, [2]बाभजकः-जिका ;
[3]भक्ता-भक्त्री, भाजयिता-त्री, बिभक्षिता-त्री ; बाभजिता-त्री ;
भजन्-न्ती, भाजयन्-न्ती, बिभक्षन्-न्ती ; —
भक्ष्यन्-न्ती, भाजयिष्यन्-न्ती-ती, बिभक्षिष्यन्-न्ती-ती ; —
भजमानः, भाजयमानः, बिभक्षमाणः, बाभज्यमानः ;
भक्ष्यमाणः, भाजयिष्यमाणः, बिभक्षिष्यमाणः, बाभजिष्यमाणः ;
[4]देहभाक्[A]-देहभाग्-देहभाजौ-देहभाजः ; — —
विभक्तम्-भक्तवान्, भाजितः, बिभक्षितः, बाभजितः-तवान् ;
भजः, [5]भागी, [6]भक्तम्-भक्तः, [7]राज्यभाक्-प्रभाक्, [8]भेजिवान्[B], [9]भ्राता,

---

1. सन्नन्ताण्वुलि, धातोरनिट्त्वादिडागमाभावे, चर्त्वषत्वयोश्च रूपम्। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
2. यङन्ते सर्वत्र, अभ्यासे दीर्घः, जश्त्वं चेति ज्ञेयम्।
3. धातोरनिट्त्वात्, चर्त्वे रूपमेवम्। एवं तव्यदादिष्वपि ज्ञेयम्।
4. '**भजो** ण्विः' (3-2 62) इति कर्तरि ण्विप्रत्ययः। प्रत्ययस्य णित्त्वादुपधावृद्धिः। क्विबादिवदयं प्रत्ययः सर्वलोपी। कर्तरि क्विपोऽपवादोऽयम्।
5. तच्छीलादिषु कर्तृषु, 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिप-परिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरज**भज**–' (3-2-142) इत्यादिना घिनुण्प्रत्ययः। णित्त्वादुपधावृद्धिः। घित्त्वात्, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वमिति च ज्ञेयम्।
6. आशीरर्थे, 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तप्रत्ययः। **भक्तम्**= अन्नम्। भजतादिति **भक्तः**= उपासकः।
7. '**भजो** ण्विः' (3-2-62) इत्यत्र उपसर्गे सुपि च उपपदे प्रत्ययविधानाश्रयणादत्र, **प्रभाक्** इत्यत्र च कर्तरि ण्विप्रत्यय इति ज्ञेयम्।
8. कर्तरि भूतसामान्ये लिटः क्वसुः, 'तृफल**भज**त्रपश्च' (6-4-122) इति एत्वाभ्यास-लोपयोः, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपमेवम्।
9. 'तृन्' (3-2-135) इति ताच्छीलिके तृन्प्रत्यये, 'नप्तृनेष्टृ—' (द. उ. 2.3) इत्यत्र निपातनात् भ्रादेशे च **भ्राता** इति सिद्ध्यतीति **मा. धा. वृत्ता**वुक्तम्। **द. उ. वृत्त्यादिषु** भ्राजतेर्जकारलोपे रूपनिष्पादनं कृतम्। 'श्वशुरः श्वश्र्वा' (1-2-71) इत्यत्र **भाष्ये** तु 'यदि तावद् बिभर्तीति **भ्राता**—' इत्युक्तत्वात् भृञ्धातोरेव भ्रातृशब्दनिष्पत्तिर्ग्राह्येति प्रतिभाति।

A. '**देहभाजि** ततः केशान् लुलुवे लुलुठे मुहुः॥' भ. का. 14.59.

B. 'आज्ञानुग्रहभीमकोमलपुरीपाला फलं **भेजुषां** याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता।' श्रीगुणरत्नकोशे 23.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]धनभाजी, [2]विभक्तिः, [3]भजमानः, | भाजः, | बिभक्षुः, | बाभजः ; |
| भक्तव्यम्, | भाजयितव्यम्, | बिभक्षितव्यम्, | बाभजितव्यम् ; |
| भजनीयम्, | भाजनीयम्, | बिभक्षणीयम्, | बाभजनीयम् ; |
| [4]विभज्यम्, [5]विभाग्यम्, | भाज्यम्, | बिभक्ष्यम्, | बाभज्यम् ; |
| ईषद्भजः-दुर्भजः-सुभजः ; | — | — | |
| भज्यमानः, | भाज्यमानः, | बिभक्ष्यमाणः, | बाभज्यमानः ; |
| भागः, [6]भगः, | भाजः, | बिभक्षः, | बाभजः ; |
| भक्तुम्, | भाजयितुम्, | बिभक्षितुम्, | बाभजितुम् ; |
| [7]भक्तिः-[A]दृढभक्तिः, | भाजना, | बिभक्षा, | बाभजा ; |
| [8]भजनम्, | भाजनम्, | बिभक्षणम्, | बाभजनम् ; |

---

1. ताच्छीलिके णिनिप्रत्यये रूपमेवम् ।
2. 'क्तिच्क्तौ च—' (3-3-174) इत्यनेन संज्ञायां क्तिचि रूपम्। **विभक्तिः**= प्रथमाद्या विभक्तिः। अत्र सूत्रे (3-3-174) आशिषि गम्यमान एव प्रत्यय इत्युक्तम-विवक्षितमिति **केचित्** ।
3. '**ताच्छील्य**वयोवचनशक्तिषु—' (3-2-129) इत्यनेन ताच्छील्ये गम्ये चानश्प्रत्ययः। शित्त्वाच्छबादिकं भवति।
4. 'द्विवचन**विभज्यो**पपदे—' (5-3-57) इति सूत्रे **विभज्य** इति निर्देशात् हलन्तलक्षणण्यदपवादो यत्प्रत्ययोऽत्रेति ज्ञेयम् ।
5. 'अबाधकान्यपि निपातनानि' (परिभाषा-120) इति दर्शने ण्यत्प्रत्यये कुत्वे च रूपमेवम्। **विभाज्यम्** इति कुत्वाभावरूपं तु सर्वथा अप्रामाणिकमेव। स्पष्टमिदं प्रकृतसूत्रे (5-3-57) **पदमञ्जर्याम्**, **उद्द्योते** च ।
6. 'खनो घ च' (3-3-125) इत्यत्र चकाराद् धात्वन्तरेभ्योऽपि घप्रत्ययो भवतीत्यतोऽत्र घप्रत्यये, घित्त्वेन कुत्वे च रूपमेवम्। 'हृद्**भग**—' (7-3-19) इत्यत्र '**भग**—' इति निर्देश एवात्र निदानम् ।
7. भजनम्=**भक्तिः**। भावे क्तिन् । **दृढभक्ति**रित्यत्र दृढा भक्तिरस्येति विग्रहे '**स्त्रियाः पुंवत्**—' (6-3-34) इति पूर्वपदस्य पुंवद्भावे रूपमेवम्। प्रियादिषु (6-3-34) कर्मसाधनस्यैव **भक्ति**शब्दस्य पाठः, न तु भावसाधनस्य। अतः पुंवद्भावः कथमत्रेति न शङ्क्यम् ।
8. ल्युटि, अनादेशे रूपमेवम्। स्त्रियां टित्त्वेन ङीपि **भजनी** इत्येव भवति। **भजना** इति टावन्तप्रयोगो लोके दृश्यते। तस्य शास्त्रं मृग्यमेव। ण्यन्तात् स्त्र्यधिकारीये युच्प्रत्ययेऽपि **भाजना** इत्येव स्यात्, न तु **भजना** इति।

A. '**दृढभक्ति**रिति ज्येष्ठे राज्यतृष्णापराङ्मुखः।' रघुवंशे 12-19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| भक्त्वा; | भाजयित्वा, | बिभक्षित्वा, | बाभजित्वा; |
| विभज्य, | विभाज्य, | प्रबिभक्ष्य, | प्रबाभज्य; |
| भाजम् २, भक्त्वा २, | भाजम् २, भाजयित्वा २, | बिभक्षम् २, बिभक्षित्वा २, | बाभजम् २; बाभजित्वा २. |

## (1138) "भज विश्राणने" (X-चुरादिः-1734. सक. सेट्. उभ.)

**विश्राणनम्=दानम् ।**

'सेवायां भजते भजेदिति भजेः, विश्राणने **भाजयेद्...**' (श्लो. 65) इति **देवः** । भाजकः-जिका, बिभाजयिषकः-षिका; भाजयिता-त्री, बिभाजयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**गर्जयति**वत् (378) ज्ञेयानि । [A]विभाज्य ।

## (1139) "भजि भाषार्थः" (X-चुरादिः-1760. अक. सेट्. उभ.)

**आस्वदीयः ।**

'भाषार्थे णिचि **भञ्जयेद्....** ।' (श्लो. 66) इति **देवः** ।

भञ्जकः-ञ्जिका, बिभञ्जयिषकः-षिका, भञ्जकः-ञ्जिका, बिभञ्जिषकः-षिका, बाभञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कुंशयति**वत् (232) ज्ञेयानि ।

## (1140) "भट भृतौ" (I-भ्वादिः-307-780. अक. सेट्. पर.) घटादिः।

भृतिः=वेतनम् । 'भृतिः=वेतनप्राप्तिः ।' इति **धा. का. व्याख्यायाम्** (1-41) । भाटकः-टिका, भाटकः-टिका, [1]भटकः-टिका, बिभटिषकः-षिका, बाभटकः-टिका, इत्यादीनि सर्वाणि रूपाणि भौवादिक**कठति**वत् (148) बोध्यानि । [2]भटितम् ।

---

1. '**भट परिभाषणे**' इति घटादिषु पठ्यते । अस्यैव भृत्यर्थकस्य धातोः परिभाषणार्थे मित्त्वार्थोऽनुवादः । ततश्च परिभाषणार्थे घटादित्वेन मित्त्वात् णौ, 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वे रूपमेवम् । एवं तृजादिष्वपि **भटयिता-त्री** इत्यादीनि रूपाणि यथायथमूह्यानि ।
2. औणादिके [द. उ. 8.93] इत्रप्रत्यये रूपमेवम् । **भटित्रम्**=शूलपक्वमांसम्- 'वेतनमित्युणादिवृत्तौ—' इति **मा. धा. वृत्तिः** ।

A. 'आज्ञापनामिह **विभाज्य** नृपेण दृष्टौ.....॥' धा. का. 3. 40.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1141) " भडि परिभाषणे " (I-भ्वादिः-273. सक. सेट्. आत्म.)

'परितो भाषणम्=परिभाषणम् ।' इति स्वाम्यादयः । "— 'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ।' (अमरकोशे 1-6-14) इति निघण्टुः ।" इति मा. धा. वृत्तिः ।

'कल्याणे भण्डयेद् भण्डेः, परिहासे तु भण्डते ।' (श्लो. 89) इति देवः । [अ] भण्डकः-ण्डिका, भण्डकः-ण्डिका, बिभण्डिषकः-षिका, बाभण्डकः-ण्डिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (149) ज्ञेयानि । [1]भण्डनः, [2]भाण्डम्, [3]भण्डिलः[A] ।

(1142) " भडि कल्याणे " (X-चुरादिः-1588. सक. सेट्. उभ.)

इदित्करणात् णिचो वैकल्पिकत्वम् ।

'कल्याणे भण्डयेद् भण्डेः परिहासे तु भण्डते ।' (श्लो. 89) इति देवः । भण्डकः-ण्डिका, बिभण्डयिषकः-षिका, भण्डकः-ण्डिका, बिभण्डिषकः-षिका, बाभण्डकः-ण्डिका ; इत्यादीनि सर्वाणि रूपाणि चौरादिककुण्ठयतिवत् (210) ज्ञेयानि । कर्तरि क्तप्रत्यये [B]सुभण्डितः इति भवति ।

(1143) " भण शब्दे " (I-भ्वादिः-447. अक. सेट्. पर.)

भाणकः-णिका, भाणकः-णिका, बिभणिषकः-षिका, बम्भणकः-बंभणकः-

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिके युचि रूपमेवम् ।
2. भण्डते इति भण्डः । पचाद्यच् । भण्ड एव भाण्डम्=पात्रादिकम् । स्वार्थिकेऽणि रूपमेवम् ।
3. बाहुलकात् औणादिके इलच्प्रत्यये रूपमेवम् । भण्डिलः=दूतः ।

A. 'स भण्डिलो भोजनृपालपिण्डभुक् प्रमुण्डितांस्तत्र जनानतुण्डकान् ॥' धा. का. 1. 36.

B. 'बर्हादिमण्डितसुभण्डितविग्रहोऽसौ
प्रच्छर्दितः किल बकेन च पुस्तितार्तिः ।' धा. का. 3. 20.

[अ] यद्यपि, 'कल्याणे भण्डयेद् भण्डेः, परिहासे तु भण्डते ।' इति देवश्लोकः क्वचित् दैवकोशेषु नोपलभ्यते, पुरुषकारेऽपि न व्याख्यातः । तथापि, '—परिहासे' इति देवः ।' इति माधवधातुवृत्तिवाक्यात्, क्वचित् कोशे मुद्रितत्वाच्चास्माभिरपीहोपात्तः इति ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



णिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककणतिवत् (157) ज्ञेयानि। [1]भाणः, [2]भणितिः, [3]भाण्डम्, [A]भणन्-न्ती इतीमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1144) "भदि कल्याणे सुखे च"

(I-भ्वादिः-12. अक. सेट्. आत्म.) [अ]

**कल्याणम्**=मङ्गलम्, **सुखम्**=आत्मगुणः, आत्मगुणोदयो वा।
भन्दकः-न्दिका, भन्दकः-न्दिका, बिभन्दिषकः-षिका, बाभन्दकः-न्दिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि। [4]भद्रम्, [B]नतभन्दिनी। [5]भदाकः, [6]भदन्तः।

## (1145) "भन्जो आमर्दने" (VII-रुधादिः-1453. सक. अनि. पर.)

'—आमर्दे तु **भनक्ति**........ ॥' (श्लो. 65) इति **देवः**।

[7]भञ्जकः-ञ्जिका, भञ्जकः-ञ्जिका, [8]बिभङ्क्षकः-क्षिका, [9]बम्भजकः-बंभजकः-जिका;

---

1. भण्यते इति कर्मणि संज्ञायां घञ्प्रत्यये रूपम्। **भाणः** दशसु रूपकेष्वेकः।
2. 'तितुत्रेष्वग्रहादीनाम् —' (वा. 7-2-9) इति वचनात् इड् भवति।
3. भणतीति **भाण्डम्**। 'पुच्छभाण्ड—' (3-1-20) इति निर्देशाद्दीर्घः। अथवा 'अमन्ताड्डः' (द. उ. 5-7) इति डप्रत्यये ततः प्रज्ञादित्वात् (5-4-38) अणि रूपमेवम्। भण्यते इति वा **भाण्डम्**=पात्रम्।
4. औणादिके (द. उ. 8-46) रन्प्रत्यये रूपमेवम्। बाहुलकाद्धातुनकारस्य लोपः।
5. पिनाकादिषु (द. उ. 3-34) दर्शनादाकप्रत्यये नकारलोपे च रूपमेवम्। **भदाकः**=अकुटिलः।
6. '**भन्देर्नलोपश्च**' (पञ्चपाद्युणादिः 3-130) इति झच्प्रत्यये, 'झोऽन्तः' (7-1-3) इत्यन्तादेशे नकारलोपे च रूपमेवम्। **भदन्तः**=प्रव्रजितः।
7. 'नकारजावनुस्वारपञ्चमौ झलि धातुषु।' इति **अभियुक्त**वचनात् उपदेशे नोपधोऽयं धातुः। नकारस्य 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनुस्वारे परसवर्णे च रूपमेवम्। एवमेवोत्तरत्र तृजादिष्वपि रूपनिष्पत्तिर्ज्ञेया।
8. सन्नन्ताण्ण्वुलि धातुजकारस्य कुत्वे, सनः षत्वे च रूपमेवम्। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
9. यङन्ताण्ण्वुलि, द्विर्वचनादिकेषु 'जपजभदहदशभञ्जपशां च' (7-4-86) इति अभ्यासे नुगागमः। नुकः पदान्तवद्भाववचनात् परसवर्णविकल्पः। तेन रूपद्वयम्।

A. 'अणद्दिशः केलिरणैर्मनोज्ञया वाण्या **भणन्तो** मणिभूषणोत्कणाः।' धा. का. 1.58.
B. 'प्रश्विन्दिताशं यशसा पुराऽप्यसौ विवन्दिषुस्तं **नतभन्दिनं** विभुम्।' धा.का.1.3.
[अ] '**भदि** कल्याणे' इति चुरादावपि **दुर्गः** पठतीति **क्षीरतरङ्गिण्यामुक्तम्**। **दुर्गा**तिरिक्तेन केनापि तस्य धातोः चुरादिष्वपठितत्वादस्माभिर्न लिखित इति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भङ्क्ता-भङ्क्त्री, भञ्जयिता-त्री, बिभङ्क्षिता-त्री, बम्भजिता-त्री ;

[1]भञ्जन्-भञ्जती, भञ्जयन्-न्ती, बिभङ्क्षन्-न्ती ; —

भङ्क्ष्यन्-न्ती-ती, भञ्जयिष्यन्-न्ती-ती, बिभङ्क्षिष्यन्-न्ती-ती ; —

— भञ्जयमानः, — बम्भज्यमानः ;

— भञ्जयिष्यमाणः, — बम्भजिष्यमाणः ;

[2]विभक्-विभग्-विभजौ-विभजः ; — —

[3]भग्नम्-भग्नः-भग्नवान्, भञ्जितः, बिभङ्क्षितः, बम्भजितः-तवान् ;

भञ्जः, [4]प्रभञ्जनः,[A] [5]भङ्गुरः,[B] [शत्रुं] [6]भन्जानः, भञ्जः, बिभङ्क्षुः, [7]बम्भञ्जः ;

भङ्क्तव्यम्, भञ्जयितव्यम्, बिभङ्क्षितव्यम्, बम्भजितव्यम् ;

भञ्जनीयम्, [8]भजेलिमाः[शालयः], भञ्जनीयम्, बिभङ्क्षणीयम्, बम्भजनीयम् ;

[9]भङ्ग्यम्, भन्ज्यम्, बिभङ्क्ष्यम्, बम्भज्यम् ;

---

1. शतरि, 'रुधादिभ्यः—' (3-1-78) इति श्नमि, 'श्नान्नलोपः' (6-4-23) इति धातुनकारलोपे, 'श्नसोरल्लोपः' (6-4-111) इति श्नमोऽकारस्य लोपे च रूपमेवम्।
2. विशेषेण भनक्तीति **विभक्**। क्विपि नकारलोपे कुत्वे च रूपम्।
3. '**ओदितश्च**' (8-2-45) इति निष्ठानत्वे, तस्यासिद्धत्वात् पूर्वमेव 'चोः कुः' (8-2-30) इति कुत्वे च रूपमेवम्।
4. प्रभञ्जयतीति **प्रभञ्जनः** = वायुः। नन्द्यादित्वात् (3-1-134) ण्यन्तात् कर्तरि ल्युः।
5. '**भञ्ज**भासमिदो घुरच्' (3-2-161) इति तच्छीलादिषु कर्तृषु घुरच्प्रत्यये, घित्त्वेन 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे च रूपमेवम्।
   **प्रक्रियाकौमुदीव्याख्याने** तु "'भञ्जेः कर्मकर्तरि (प्रत्ययः) तथोक्तम् **पाणिनीयमतदर्पणे**— 'कर्मकर्तारमेवास्मादभिधत्ते स्वभावतः। न कर्ममात्रमित्येष प्रत्ययः कर्मकर्तरि ॥' इति।" इत्युक्तम्।
6. 'ताच्छील्यवयोवचनशक्तिषु—' (3-2-129) इति चानश्प्रत्यये रूपमेवम्। न तु शानच्प्रत्ययः। अत्र ताच्छील्ये शक्तौ वा चानश्।
7. यङन्तात् पचाद्यचि यङो लुकि उपधानकारलोपस्य निमित्ताभावात् तस्यानुस्वारपरसवर्णयो रूपमेवम्।
8. 'केलिमर उपसंख्यानम्' (वा. 3-1-96) इति केलिमर्प्रत्यये, तस्य कित्त्वेनोपधानकारलोपे च रूपमेवम्। कर्मकर्तर्ययं प्रत्यय इति **वृत्तिः**। **भाष्ये** तु कर्मण्येवायं प्रत्यय इति ज्ञायते।
9. ण्यति, 'चजोः—' (7-3-52) इति कुत्वम्।

A. 'व्यस्यगच्छन् न च गतं प्रचण्डोऽपि **प्रभञ्जनः** ॥' भ. का. 8. 4.

B. 'स नरोऽभङ्गुरप्रज्ञो गृहीत्वा भासुरं धनुः।' भ. का. 7.22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ईषद्भञ्जः-दुर्भञ्जः-सुभञ्जः ; — —

| | | | |
|---|---|---|---|
| भज्यमानः, | भञ्ज्यमानः, | बिभङ्क्ष्यमाणः, | बम्भज्यमानः ; |
| [1]भङ्गः-भङ्गा, | भञ्जः, | बिभङ्क्षः, | बम्भजः ; |
| भङ्क्तुम् , | भञ्जयितुम् , | बिभङ्क्षितुम्, | बम्भजितुम् ; |

भक्तिः, [2]सालभञ्जिका,[A] उद्दालकपुष्पभञ्जिका, भञ्जना, बिभङ्क्षा, बम्भजा ;

| | | | |
|---|---|---|---|
| भञ्जनम् , | भञ्जनम्, | बिभङ्क्षणम् , | बम्भजनम् ; |
| [3]भङ्क्त्वा[B]-भक्त्वा, | भञ्जयित्वा, | बिभङ्क्षित्वा, | बम्भजित्वा ; |
| विभज्य, | विभञ्ज्य, | विबिभङ्क्ष्य, | विबम्भज्य ; |
| [4]इक्षुभञ्जं, | गजभञ्जं, | [C]वल्लीभञ्जं | [वा बभञ्ज ।] |
| भञ्जम् २, भङ्क्त्वा २, भक्त्वा २, | भञ्जम् २, भञ्जयित्वा २, | बिभङ्क्षम् २, बिभङ्क्षित्वा २, | बम्भजम् २ ; बम्भजित्वा २. |

## (1146) " भर्त्स तर्जने " (X-चुरादिः-1683. सक. सेट्. आत्म.)

### आकुस्मीयः ।

भर्त्सकः-र्त्सिका, बिभर्त्सयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादि-

---

1. कर्मणि घञि कुत्वे च रूपमेवम् । स्त्रियां टाप् । **भङ्गा**=कुसुम्भम् ।

2. 'संज्ञायाम्' (3-3-109) इति स्त्रियामधिकरणे भावादौ ण्वुल् । एवमेव **उद्दालकपुष्पभञ्जिका** इत्यत्रापि ण्वुल् । उद्दालकपुष्पाणि=श्लेष्मातकपुष्पाणि भज्यन्ते यस्यां क्रियायां सेति विवरणम् । 'नित्यं क्रीडाजीविकयोः' (2-2-17) इति समासः ।

3. क्त्वायाम्, '**जान्तनशां विभाषा**' (6-4-32) इत्यनुनासिकलोपविकल्पः, तेन रूपद्वयम् ।

4. 'उपमाने कर्मणि च' (3-4-45) इति कर्मणि, कर्तरि च णमुल् । 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकधातोरेव अनुप्रयोगः ।
**'इक्षुभञ्जं बभञ्जासौ गजभञ्जं बभञ्ज तम् ।**
अत्र हीक्षुमिवेत्यर्थस्तथा गज इवेत्यपि ॥' इति. **प्र. सर्वस्वे** ।

A. 'धिक् **सालभञ्जिका**प्रख्यान् विषयान् कल्पनारुचीन् ॥' भ. का. 7. 74.

B. '**भङ्क्त्वा** भुजौ विराधाख्यं तं तौ भुवि निचख्नतुः ॥' भ. का. 4. 3.

C. 'अधिशयितवानब्धिं नाथो ममन्थ बबन्ध तं
हरधनुरसौ **वल्लीभञ्जं बभञ्ज** च मैथिलि ।' श्रीगुणरत्नकोशे 54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ककुत्सयतिवत् (217) ज्ञेयानि। ण्यति-[A]प्रभर्त्स्यः इति। [1]भर्त्सयमानः।

(1147) " भर्व हिंसायाम् " (I-भ्वादिः-580. सक. सेट्. पर.)

अयमीदिदपि क्वचित् पठ्यते इति मा. धा. वृत्तिः।

[B]भर्वकः-र्विका, भर्वकः-र्विका, बिभर्विषकः-षिका, बाभर्वकः-र्विका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्वतिवत् (173-A) बोध्यानि।

(1148) " भल परिभाषणहिंसादानेषु "

(I-भ्वादिः-495. सक. सेट्. आत्म.)

भालकः-लिका, भालकः-लिका, बिभलिषकः-षिका, बाभलकः-लिका; इत्यादीनि सर्वाण्यपि रूपाणि विशेषरूपाणि विना भौवादिककलतिवत् (174) ज्ञेयानि। [2]भालः, ण्यति-[C]आभाल्यः इति विशेषः।

(1149) " भल आभण्डने " (X-चुरादिः-1701. अक. सेट्. आत्म.)

आकुस्मीयः। आभण्डनम्=निरूपणम्। 'मार्जनम्' इति धा. का. (3-36)। भालकः-लिका, बिभालयिषकः-षिका, भालयिता-त्री, बिभालयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि। ल्युटि-[D]भालनम्।

(1150) " भल्ल परिभाषणहिंसादानेषु "

(I-भ्वादिः-496. सक. सेट्. आत्म.)

भल्लकः-ल्लिका, भल्लकः-ल्लिका, बिभल्लिषकः-षिका, बाभल्लकः-ल्लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककल्लतिवत् (156) ज्ञेयानि।

---

1. 'आकुस्मादात्मनेपदिनः' (ग.सू. चुरादौ) इति ण्यन्तेऽप्यात्मनेपदमेव; तेन शानच्। क्षीरस्वामी तु 'लक्ष्ये भर्त्सयति......इति दृश्यते।' इत्याह। तेनास्य धातोः परस्मैपदमपि भवतीति ज्ञेयम्।

2. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति संज्ञायां घञ्। भालः=ललाटः।

A. 'प्रस्पाद्य मुष्टिमभितर्जयते प्रभर्त्स्यो
मल्लो बिबस्तयिषुरेनमगन्धनीयम्।' धा. का. 3. 34.

B. 'अफर्विताकाङ्क्षितमर्वकं सतां मांसादिसंचर्वकदुष्टभर्वकम्।' धा. का. 1.74.

C. 'मामल्यमानं स्मितमल्लिकावलीमाभाल्यदैत्याधिपभल्लनोद्धुरम्।' धा. का. 1.64.

D. '..........दुष्कीर्तिभालनपराः खलु कूटवृत्त्या।' धा. का. 3.36.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भल्लः-भल्ली, [2]भल्लूकः, [3]भल्लनः, [4]भल्लटः, इमानि रूपाण्यधिकान्यत्रेति विशेषः। ल्युटि-[A]भल्लनम्।

## (1151) "भष भर्त्सने" (I-भ्वादिः-695. अक. सेट्. पर.)

'भर्त्सनम्=श्वरवः, यतस्तत्रैवायं (धातुः) प्रसिद्धः।' इति मा. धा. वृत्तिः। क्षीरस्वामी तु कुत्सितशब्दकरणार्थकत्वमस्याह।
'भष् बुक्के पिशुनोक्तौ .... .... ....॥' क. क. द्रुमे (श्लो. 320)
भाषकः-षिका, भाषकः-षिका, बिभषिषकः-षिका; बाभषकः-षिका; इत्यादीनि सर्वाणि रूपाणि भौवादिककषतिवत्, (179) ज्ञेयानि। [5]भषः-भषी, [6]भषकः-भषिका, इमानि रूपाण्यधिकान्यत्रेति विशेषः। [B]भषन्।

## (1152) "भस भर्त्सनदीप्त्योः"

(III-जुहोत्यादिः-1100. अक. सेट्. पर.) छान्दसः। [अ]

---

1. भल्यते हिंस्यतेऽनेनेति, 'पुंसि संज्ञायाम्—' (3-3-118) इति घः। 'हलश्च' (3-3-121) इति वा घञ् प्रत्यये रूपमेवम्। भल्लः=आयुधविशेषः। 'जातेरस्त्री-विषयादयोपधात्' (4-1-63) इति स्त्रियां ङीष्प्रत्यये भल्ली इति रूपम्।
2. 'उलूकादयश्च' (द. उ. 3-16) इति ऊकप्रत्यये रूपमेवम्। भल्लूकः=ऋक्षः।
3. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिको युच्प्रत्ययः।
4. वाहुलकादौणादिके अटप्रत्यये रूपमेवम्। भल्लते=परितो भाषतेऽयमिति भल्लटः= कविविशेषः।
5. पचादिषु (3-1-134) भषट् इति पाठात् टित्त्वेन स्त्रियां 'टिड्ढाणञ्—' (4-1-15) इति ङीपि भषी इति रूपम्।
6. 'कुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति क्वुन्। स्त्रियां टापि 'प्रत्ययस्थात्—' (7-3-44) इतीत्वम्।

A. 'मामल्यमानं स्मितमल्लिकावलीमाभाल्यदैत्याधिप भल्लनोद्धुरम्।' धा. का. 1.64
B. '....रेषोऽन्यान् भषतो नमोऽस्तु कमलाकोष्णस्तनं जोषते॥' धा. का. 1.87.

(अ) धातुपाठेषु सर्वत्र '—भर्त्सनदीप्त्योः' इत्येवास्य धातोरर्थनिर्देशो दृश्यते। परं तु निरुक्ते (5-46) 'बभस्तिरत्तिकर्मा।' इत्युक्तत्वात्; तथा, 'हरी इवान्धांसि बप्सता।' (ऋ. वे. 1-6-28-7) इत्यत्र यास्केन 'हरी इवान्नानि भुञ्जाने।' इति व्याख्यानात्, सायणभाष्येऽपि 'भस भक्षणदीप्त्योः।' इत्येवात्र (ऋ. वे. 1-6-28-7) धातुस्वरूपोपादानाच्च 'भक्षणदीप्त्योः' इत्येव पाठः प्रामाणिक इति, भर्त्सन-भक्षणशब्दयोः प्रायस्तुल्यश्रुत्या पाठभेद इति वा प्रतिभाति।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भासकः-सिका, भासकः-सिका, बिभसिषकः-षिका, बाभसकः-सिका ;
भसिता-त्री, भासयिता-त्री, बिभसिषिता-त्री, बाभसिता-त्री ;
[1]बप्सत्-बप्सतौ-बप्सतः, [2]भासयन्-न्ती-ती, बिभसिषन्-न्ती-ती ; —
भसिष्यन्-न्ती-ती, भासयिष्यन्-न्ती-ती, बिभसिषिष्यन्-न्ती-ती ;—
इत्यादीनि सर्वाण्यपि रूपाणि आदादिककशतिवत् (178) ज्ञेयानि ।
[3]नभः, [4]भस्म, [5]भस्त्रम्, [6]भसत् इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः।

(1153) "भा दीप्तौ" (II-अदादिः-1051. अक. अनि. पर.)

[7]भायकः-यिका, [8]भापकः-पिका, बिभासकः-सिका, बाभायकः-यिका ;
भाता-भात्री, भापयिता-त्री, बिभासिता-त्री, बाभायिता-त्री ;

---

1. शतरि, शपि, तस्य 'जुहोत्यादिभ्यः—' (2-4-75) इति श्लुः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'घसिभसोर्हलि च' (6-4-100) इति उपधाऽकारलोपः। 'खरि च' (8-4-55) इति भकारस्य चर्त्वेन पकारः। अभ्यासे हलादिशेषजश्त्वादिकम्।
2. भक्षणार्थकत्वे, 'निगरणचलनार्थेभ्यः—' (1-3-87) इति ण्यन्तात् कर्तृगामिन्यपि क्रियाफले परस्मैपदमेव। दीप्त्याद्यर्थकत्वे, छान्दसत्वात् दृष्टानुविध्याश्रयणे वा शानजन्तेऽपि भासयमानः इति रूपं साध्वेवेत्यपि बोध्यम्।
3. न बभस्ति इति नभः=आकाशः। नञ्पूर्वादस्मात् 'अन्येभ्योऽपि दृश्यते' (3-2-178) इति क्विपि सकारस्य रुत्वे विसर्गे च रूपमिति आत्रेयादयः साधयन्तीति माधवधातुवृत्तौ दृश्यते। अत्र बाहुलकात् नञ्समासे नलोपाभाव इति बोध्यम्।
4. भाषायामपि, 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिन्प्रत्यये 'नेड् वशि कृति' (7-2-8) इतीण्निषेधे रूपमेवम्। 'भूतेऽपि दृश्यन्ते' (3-3-2) इति भूतेऽर्थे प्रत्ययः। भसितम्=भस्म।
5. 'हुयामाश्रुभसिभ्यस्त्रन्' (द. उ. 8-84) इति त्रन्प्रत्यये रूपमेवम्। 'तितुत्रत—' (7-2-9) इतीण्निषेधः। बभस्तीति भस्त्रम्=चर्म, उदरं च।
6. 'शृदृभसोऽदिः' (द. उ. 6-42) इत्यदिप्रत्यये रूपमेवम्। बभस्ति, भस्यते वा तस्मिन् आहार इति भसत्=आमाशयस्थानम्।
7. 'आतो युक्चिण्कृतोः' (7-3-33) इति युगागमः। एवं घञि, णमुल्यपि ज्ञेयम्।
8. ण्यन्ते सर्वत्र, आदन्तलक्षणः पुगागमो ज्ञेयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भान्-भान्ती-भाती, [2]भापयन्-न्ती, बिभासन्-न्ती ; —
भास्यन्-न्ती-ती, भापयिष्यन्-न्ती-ती, बिभासिष्यन्-न्ती-ती ; —
[A]व्यतिप्रभानः, भापयमानः, भापयिष्यमाणः, – बाभायमानः, बाभायिष्यमाणः ;
भाः-भौ-भाः ; — —
सुप्रभातम्-तः, भापितः, बिभासितः, बाभायितः-तवान् ;
[3]निभः, [B]आभः, [4]भम्, [5]विभावरी, [6]भायः, बिभासुः, [7]बाभाः ;
भातव्यम्, भापयितव्यम्, बिभासितव्यम्, बाभायितव्यम् ;
[8]प्रभानीयम्, [9]प्रभापनीयम्, बिभासनीयम्, बाभायनीयम् ;
भेयम्, भाप्यम्, बिभास्यम्, बाभाय्यम् ;
ईषद्भानः-[10]दुर्भानः-सुभानः ; — —
भायमानः, भाप्यमानः, बिभास्यमानः, बाभाय्यमानः ;

---

1. शतरि शपि, 'अदिप्रभृतिभ्यः—' (2-4-72) इति शपो लुकि रूपमेवम्। स्त्रियाम्, 'आच्छीनद्योः—' (7-1-80) इति नुम्विकल्पः।
2. दीप्तेः चित्तवत्कर्तृकत्वे, 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेव। अचित्तवत्कर्तृकत्वे तु शानजपि भवतीति विशेषः।
3. 'आतश्चोपसर्गे, (3-1-136) इति कर्तरि कप्रत्ययः। 'आतो लोप इटि च' (6-4-64) इति आकारलोपः। निभः=तुल्यः। अत्र धात्वर्थानुगमाभावस्तु उपसर्गवशात् धातोरर्थान्तरे वृत्तेरिति ज्ञेयम्।
4. 'अन्येभ्योऽपि दृश्यत इति वाच्यम्' (वा. 3-2-101) इति वचनादत्र डप्रत्यये, डित्त्वसामर्थ्यात् भसंज्ञाभावेऽपि टिलोपे रूपमेवम्। भातीति भम्= नक्षत्रम्।
5. विपूर्वकादस्मात्, 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति वनिप्प्रत्यये, स्त्रियाम्, 'वनो र च' (4-1-7) इति ङीब्रेफौ भवतः। विभावरी=रात्रिः।
6. 'श्याऽऽद्व्यध—' (3-1-141) इत्यादिना कर्तरि णप्रत्यये युगागमे च रूपम्।
7. यङन्तात् पचाद्यचि यङो लोपे, रूपमेवम्।
8. 'न भाभूपू—' (8-4-34) इत्यनेन, उपसर्गस्थन्निमित्तात् परस्याच उत्तरस्य कृन्नकारस्य णत्वनिषेधः।
9. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति वचनात् ण्यन्तेऽपि कृन्नकारस्य णत्वनिषेधः।
10. ईषदाद्युपपदेषु खलपवादः, आदन्तलक्षणो युच्प्रत्ययः। 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वाच्यः। (वा. 1-4-60)' इति वचनान्न णत्वं षत्वं वाऽत्रेति ज्ञेयम्।

A. 'व्यतिप्रभानो विविधस्तदोच्चकैः तत्रैधते माङ्गलिकः स्म निस्वनः।' वा. वि.1.35
B. 'मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।' रघुवंशे 2.10.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| भायः, | भापः, | बिभासः, | बाभायः ; |
| भातुम्, | भापयितुम्, | बिभासितुम्, | बाभायितुम् ; |
| भातिः, [1]प्रतिभा, प्रभा, विभा, आभा, भाः | भापना, | बिभासा, | बाभाया ; |
| [A]प्रभानम्, | भापनम्, | बिभासनम्, | बाभायनम् ; |
| भात्वा, | भापयित्वा, | बिभासित्वा, | बाभायित्वा ; |
| प्रभाय, | प्रभाप्य, | प्रबिभास्य, | प्रबाभाय्य ; |
| भायम् २, भात्वा २, | भापम् २, भापयित्वा २, | बिभासम् २, बिभासित्वा २, | बाभायम् २ ; बाभायित्वा २ ; |

[2]भातुः, [3]भानुः, [4]भामः.

(1154) "भाज पृथक्कर्मणि" (X-चुरादिः-1857. अक. सेट्. उभ.)

अदन्तः ।

'आमर्दे तु भनक्ति भाजयति गौ भाजेः पृथक्कर्मणि ॥' (श्लो. 65) इति देवः। भाजकः- जिका, बिभाजयिषकः-षिका, भाजयिता-त्री, बिभाजयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककालयतिवत् (185) ज्ञेयानि। यत्प्रत्यये—[B]विभाज्यः इति ।

(1155) "भाम क्रोधे" (I-भ्वादिः-441. अक. सेट्. आत्म.)

'भामेर्भामयति क्रोधे तत्रैव शपि भामते ॥' (श्लो. 149) इति देवः। भामकः-मिका, भामकः-मिका, बिभामिषकः-षिका, बाभामकः-मिका; भामिता-त्री, भामयिता-त्री, बिभामिषिता-त्री, बाभामिता-त्री;

---

1. स्त्रियाम्, 'आतश्चोपसर्गे' (3-3-106) इति भावाद्यावङ् प्रत्ययः। सम्पदादित्वात् (वा. 3-3-94) भावे क्विपि तु भाः इत्यपि भवति ।
2. 'कमिमनिजनिगाभा—' (द. उ. 1-125) इत्यादिना तुप्रत्ययः। भातीति भातुः= प्रकाशः।
3. 'दाभाभ्यां नुः' (द. उ. 1-143) इति नुप्रत्ययः। भानुः=आदित्यः, किरणश्च।
4. 'अर्तिस्तु—' (द. उ. 7-26) इति मन्प्रत्ययः। भामः= क्रोधः।

A. 'हरेः प्रगमनं नास्ति न प्रभानं हिमद्रुहः।' भ. का. 9.107.

B. '............ये ते निर्वासितधियो ह्यसुभिर्विभाज्याः ॥' धा. का. 3.56.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]भामयन्-न्ती, | भामयिष्यन्-न्ती-ती ; | | — |
| [2]देवदत्ताय भाममानः, | — | बिभामिषमाणः, | बाभाम्यमानः ; |
| भामिष्यमाणः, | — | बिभामिषिष्यमाणः, | बाभामिष्यमाणः ; |
| [3]भान्-भामौ-भामः ; | — | — | — |
| भामितम्-तः, | भामितः, | बिभामिषितः, | बाभामितः-तवान् ; |
| भामः, [4]भामनः, | भामः, | बिभामिषुः, | बाभाम ; |
| भामितव्यम्, | भामयितव्यम्, | बिभामिषितव्यम्, | बाभामितव्यम् ; |
| भामनीयम्, | भामनीयम्, | बिभामिषणीयम्, | बाभामनीयम् ; |
| भाम्यम्, | भाम्यम्, | बिभामिष्यम्, | बाभाम्यम् ; |
| ईषद्भामः-दुर्भामः-सुभामः; | | — | — |
| भाम्यमानः, | भाम्यमानः, | बिभामिष्यमाणः, | बाभाम्यमानः ; |
| भामः, [5]भामिनी[A], | भामः ; | बिभामिषः, | बाभामः ; |
| भामितुम्, | भामयितुम्, | बिभामिषितुम्, | बाभामितुम् ; |
| भामा, | भामना, | बिभामिषा, | बाभामा ; |
| भामनम्, | भामनम्, | बिभामिषणम्, | बाभामनम् ; |
| भामित्वा, | भामयित्वा, | बिभामिषित्वा, | बाभामित्वा ; |
| प्रभाम्य, | प्रभाम्य, | प्रबिभामिष्य, | प्रबाभाम्य ; |
| भामम् २. भामित्वा २, | भामम् २, भामयित्वा २, | बिभामिषम् २, बिभामिषित्वा २, | बाभामम् २; बाभामित्वा २. |

1. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेव।
2. 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (1-4-37) इति देवदत्तस्य सम्प्रदानता।
3. 'मो नो धातोः' (8-2-64) इति पदान्ते नकारादेशो भवति। नत्वस्यासिद्धत्वात् नलोपो न।
4. तच्छीलादिषु कर्तृषु 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच्।
5. भामः = क्रोधः। सोऽस्याऽस्तीति भामिनी = स्त्री। मत्वर्थीय इनिप्रत्यये, 'ऋन्नेभ्य.—' (4-1-5) इति ङीपि रूपमेवम्।

A. 'पणाय्यरूपाः पनिताकृतीन्ययुः भामिन्य एवाक्षमया स्त्रकामुकान्॥'
धा. का. 1. 57.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1156) "भाम क्रोधे" (X-चुरादिः-1873. अक. सेट्. उभ.)

अदन्तः।

'भामेर्भामयति क्रोधे तत्रैव शपि भामते॥' (श्लो. 149) इति देवः। भामकः-मिका, बिभामयिषकः- षिका; भामयिता - त्री, बिभामयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककालयतिवत् (185) ज्ञेयानि। कर्तरि क्तप्रत्यये-[A]भामितः इति रूपम्।

(1157) "भाष व्यक्तायां वाचि"

(I-भ्वादिः-612. सक. सेट्. आत्म.)

भाषकः-षिका, भाषकः-षिका, बिभाषिषकः-षिका, बाभाषकः-षिका; भाषिता-त्री, भाषयिता-त्री, बिभाषिषिता-त्री, बाभाषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकभामतिवत् (1155) ज्ञेयानि। [1]व्याभाषकः, [2]सुभाषी, सुभाषितम्, भाषा, [3]आत्मनेभाषा-परस्मैभाषा, भाष्यम् इतीमानि रूपाणि अस्य धातोः भवन्तीति विशेषः। [B]भाषितुम्।

(1158) "भासृ दीप्तौ" (I-भ्वादिः-624.अक. सेट्. आत्म.)

भासकः-सिका, भासकः-सिका, बिभासिषकः-षिका, बाभासकः-सिका; इत्यादीनि सर्वाणि रूपाणि भौवादिककासतिवत् (188) बोध्यानि।

---

1. 'निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्' (3-2-146) इत्यादिना तच्छीलादिषु कर्तृषु वुञ् प्रत्यये रूपमेवम्।
2. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।
3. स्त्रियाम् 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये भाषा इति सिद्ध्यति। आत्मनेभाषा, परस्मैभाषा इत्यत्र 'वैयाकरणाख्यायां चतुर्थ्याः' (6-3-7) 'परस्य च' (6-3-8) इत्यलुक्। आत्मनेभाषा=आत्मनेपदम्। परस्मैभाषा=परस्मैपदम्। धातुपाठेषु वैयाकरणाख्यायामेते प्रसिद्धे। भाष्ये तु (6-3-7) प्रकृतस्थले आत्मनेभाषः, परस्मैभाषः इति घञन्त एव प्रयुक्तो लक्ष्यते।

A. 'यो मत्क्षयं स्पृहयते मयि भामितेऽपि संसूचयत्यरिगुणांश्च मदन्तखेटी।' धा. का. 3.55.

B. 'भाषितुं स खलु दर्पवर्जितो गेषितुं समुचितं च नाशकत्।' धा. का. 1.78.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भासुरः[A], [2]भास्वरः[B], [3]भाः-भासौ-भासः, [4]भासा, ण्यन्तात् शतरि [C]उद्भासयन्, [5]उद्भासी, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1159) "भिक्ष भिक्षायाम् अलाभे लाभे च"

(I-भ्वादिः-606. सक. सेट्. आत्म.) [अ]

'—याच्ञायाम्......' इति सर्वेषु कोशेषु दृष्टः पाठः।

भिक्षकः-क्षिका, भिक्षकः-क्षिका, बिभिक्षिषकः-षिका, बेभिक्षकः-क्षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकधिक्षतिवत् (898) ज्ञेयानि। [6]भिक्षाकः, [7]भिक्षुः[E], [8]तण्डुलभिक्षः, इत्यादीनि रूपाणि अस्य धातोः

---

1. 'भञ्जभास—' (3-2-161) इति घुरच्प्रत्ययः तच्छीलादिषु कर्तृषु भवति।
2. 'स्थेशभास—' (3-2-175) इति तच्छीलादिषु कर्तृषु वरच्प्रत्ययः। 'अनुदात्तेतश्च हलादेः' (3-2-149) इति प्राप्तस्य युचोऽपवादोऽयम्। 'नेड्वशि कृति' (7-2-8) इतीण्निषेधः।
3. तच्छीलादिषु कर्तृषु 'भ्राजभास—' (3-2-177) इत्यादिना क्विप्प्रत्ययः। 'ताच्छीलिकेषु ताच्छीलिकाः वाऽसरूपेण न भवन्ति, (भाष्यम्. 3-2-150) इति न्यायेनात्र क्विप्प्रत्ययोऽप्यस्य धातोः ताच्छीलिकेष्वेवार्थेषु भवतीति बोध्यम्।
4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्यये रूपमेवम्।
5. ग्रह्यादित्वात् (3-1-134) णिनिप्रत्यये रूपमेवम्।
6. 'जल्पभिक्ष—' (3-2-155) इत्यनेन तच्छीलादिषु कर्तृषु षाकन्प्रत्यये रूपमेवम्। षित्त्वात् स्त्रियां ङीषि भिक्षाकी इति भवति। 'अनुदात्तेतश्च—' (3-2-149) इति प्राप्तस्य युचोऽपवादोऽयम्।
7. तच्छीलादिषु कर्तृषु 'सनाशंसभिक्ष उः' (3-2-168) इति उप्रत्ययः। 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति।' इति, अत्रैव सूत्रे (3-2-168) भिक्षधातोः 'ताच्छीलिकप्रत्ययविधायकस्थले पुनरुपादानात् ज्ञाप्यते इति बोध्यम्।
8. 'कर्मण्यण्' (3-2-1) इति कर्मण्युपपदे अण्प्रत्ययः।

A. 'स्मरोभङ्गुरप्रज्ञो गृहीत्वा भासुरं धनुः।' भ. का. 7. 22.
B. 'अभीरुरवसं स्त्रीभिर्भास्वराभिरिहेश्वरः॥' भ. का. 7.25. [शि. व. 3.60.
C. 'कला दधानः सकलाः स्वभाभिः उद्भासयन् सौधसिताभिराशाः।'
D. 'वज्रप्रभोद्भासिसुरायुधश्रीः या देवसेनेव परैरलङ्घ्या॥' शि. व. 3 64.
E. '...........संत्यक्ष्यवेदमतशिक्षकभिक्षुगम्यम्।' धा. का. 1.77.

[अ] क्षीरस्वामी तु 'भिक्ष याच्ञायाम्, अलाभे लाभे च, क्लेशे च, व्यक्तायां वाचि' इत्युपादाय, 'तत्तद्देशादिप्रसिद्धथर्थानां पृथङ्निर्देशः।' इति तत्रोपपत्तिमप्याह। प्रसिद्धेषु धातुपाठकोशेषु क्लेशधातुः पृथगेव पठ्यते, न तु भिक्षधातोरर्थत्वेन। स्पष्टमिदं माधवधातुवृत्त्यादिषु प्रकृतस्थले। अतोऽत्रास्माभिरपि क्लेशार्थकत्वमस्य नोपक्षिप्तमिति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



विशेषेण भवन्तीति विशेषः। [A]भिक्षमाणः।

(1160) "भिदिँर् विदारणे" (VII-रुधादिः-1439. सक. अनि. उभ.)

भेदकः-दिका, भेदकः-दिका, [1]बिभित्सकः-त्सिका, [2]बेभिदकः-दिका;
भेत्ता-भेत्री, भेदयिता-त्री, बिभित्सिता-त्री, बेभिदिता-[B]त्री;
[3]भिन्दन्-[C]ती, भेदयन्-न्ती, बिभित्सन्-न्ती; —
भेत्स्यन्-न्ती, भेदयिष्यन् न्ती-ती, बिभित्सिष्यन्-न्ती-ती; —
भिन्दानः, भेदयमानः, बिभित्समानः, बेभिद्यमानः;
भेत्स्यमानः, भेदयिष्यमाणः, बिभित्सिष्यमाणः, बेभिदिष्यमाणः;
[4]गोत्रभिद्, काष्ठभिद्, उद्भित्, प्रभित्-प्रभिदौ-प्रभिदः;
[5]भित्तम् [शकलम्], भित्तः, [6]भिन्नम्-भिन्नवान्, भेदितम्-तः,
बिभित्सितः, बेभिदितः-तवान्;

---

1. सन्नन्ताण्ण्वुलि, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, द्विर्वचनादिषु कृतेषु धातुदकारस्य चर्त्वेन तकारः। एवमुत्तरत्रापि प्रक्रिया ज्ञेया।
2. यङन्ते द्विर्वचनादिकेषु कृतेषु, 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासे गुणः सर्वत्र बोध्यः।
3. शतरि, 'रुधादिभ्यः—' (3-1-78) इति श्नम् विकरणप्रत्ययः। स च अन्त्यादचः परो भवति। 'श्नसोरल्लोपः' (6-4-111) इति श्नमोऽकारस्य लोपः। एवमेव शानजन्तेऽपि प्रक्रिया ज्ञेया।
4. 'सत्सूद्विषद्रुहदुहयुजविदभिद—' (3-2-61) इत्यादिना कर्मण्युपपदे, उपसर्गे उपपदेऽपि क्विप्प्रत्ययः। गोत्रं भिनत्तीति **गोत्रभित्**=इन्द्रः। उद्भित्= लतागुल्मादिः।
5. क्तप्रत्यये शकलेऽभिधेये '**भित्तं** शकलम्' (8-2-59 इत्यनेन निष्ठानत्वाभावो निपात्यते। **भित्त**मिति शकलपर्यायो रूढिशब्दः। अत्र भिदिक्रिया शब्दव्युत्पत्ते-र्निमित्तम्। स्पष्टमिदं प्रकृतसूत्रे भाष्यादिषु।
6. शकलादन्यत्र, 'रदाभ्यां निष्ठातो नः, पूर्वस्य च दः' (8-2-42) इत्यनेन निष्ठात-कार-धातुदकारयोर्नत्वे रूपमेवम्।

A. 'संदश्य शरणं शून्यं **भिक्षमाणो** वनं प्रियाम्।' भ. का. 6.9.
B. 'आत्तायुधाहितजनैः सह संयतित्री शत्रोर्मनोरथशतान्यथ **बेभिदित्री**।' वा. वि. 3.51.
C. 'निहतश्च स्थितिं **भिन्दन्** दानवोऽसौ बलद्विषा।' भ. का. 7 68.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]उद्भिदः, [2]भिदेलिमाः, [3]भिदुरम्,[A] [4]भिद्यः[B] [नदः], [5]कर्णभेदी,[C]
[6]काष्ठभेदः, [7]बिभिद्वान्, [8]भेदनः-भेदः, बिभित्सुः, बेभिदः;

| | | | |
|---|---|---|---|
| भेत्तव्यम्, | भेदयितव्यम्, | बिभित्सितव्यम्, | बेभिदितव्यम्; |
| भेदनीयम्, | भेदनीयम्, | बिभित्सनीयम्, | बेभिदनीयम्; |
| भेद्यम्, | भेद्यम्, | बिभित्स्यम्, | बेभिद्यम्; |
| भिद्यमानः, | भेद्यमानः, | बिभित्स्यमानः, | बेभिद्यमानः; |
| ईषद्भेदः-दुर्भेदः-सुभेदः; | | — | — |
| भेदः, उद्भेदः, | भेदः, | बिभित्सः, | बेभिदः; |
| भेत्तुम्, | भेदयितुम्, | बिभित्सितुम्, | बेभिदितुम्; |

---

1. 'इगुपध—' (3-1-135) इत्यादिना कर्तरि कप्रत्ययः। कित्त्वान्न गुणः।
2. 'केलिमर उपसंख्यानम्' (वा. 3-1-96) इत्यनेन केलिमर्प्रत्ययः। धातोरस्य सकर्मकत्वादयं कर्मणि सम्पद्यते। वृत्त्यादिषु तु 'कर्मकर्तरि चायमिष्यते' (काशिका. 3-1-96) इत्युक्तम्। 'भिदेलिमाः सरलाः—भेत्तव्याः।' इति भाष्ये (3-1-96) कर्मार्थकेन तव्यप्रत्ययेन विवरणात् कर्मार्थकत्वमेवास्य प्रत्ययस्येति बोध्यम्।
3. 'विदिभिदिच्छिदेः कुरच्' (3-2-162) इति ताच्छीलिकः कुरच्प्रत्ययः। कर्मकर्तरि प्रत्ययोऽयमिति वृत्तौ लक्ष्यते। भेदनकर्तुः वज्रायुधस्य 'भिदुरम्' इत्यभिधानात् शुद्धकर्तर्येवायं प्रत्यय इति प्रतिभाति।
4. भिनत्ति कूलमित्यर्थे नदेऽभिधेये कर्तरि 'भिद्योद्ध्यौ नदे' (3-1-115) इति क्यप् निपात्यते। भिद्यः=नदः; अधुना 'जम्मू' राज्ये 'बई' इति देशभाषया व्यवह्रियते।
5. कर्णं भिनत्तीति कर्णभेदी=रूक्षध्वनिः, पिशुनश्च। ताच्छील्ये णिनिप्रत्यये रूपमेवम्।
6. कर्मण्युपपदेऽणि रूपमेवम्। 'कर्मण्यण्' (3-2-1) इत्यत्र भाष्ये एवं प्रयुक्तम्।
7. लिटः क्वसौ द्विर्वचनादिकेषु कृतेषु रूपमेवम्। 'वस्वेकाजाद्घसाम्' (7-2-67) इत्यत्र कृतद्विर्वचनस्य एकाच एव ग्रहणादत्र नेडिति ज्ञेयम्।
8. नन्द्यादेराकृतिगणत्वात्, 'कृत्यल्युटो बहुलम्' (3-3-113) इति बहुलग्रहणाद्वा कर्तरि ल्युः ल्युट् वा प्रत्ययः। भेदनः=रोगविशेषः, वराहश्च।

A. 'अयशो भिदुरालोके कोपधामरणादृते।' शि. व. 19. 58.
B. 'तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम्॥' रघुवंशे 11. 8.
C. 'तेषां निहन्यमानानां संघुष्टैः कर्णभेदिभिः।' भ. का. 9. 21.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भिदा, भित्तिः-भिदिः, भेदना, बिभित्सा, बेभिदा ;
भेदनम् , भेदनम् , बिभित्सनम् , बेभिदनम् ;
भित्त्वा, भेदयित्वा, बिभित्सित्वा, बेभिदित्वा ;
संभिद्य, संभेद्य, प्रबिभित्स्य, प्रबेभिद्य, [2]प्रबेभिदय्य गतः ;
भेदम् २, भित्त्वा २, } भेदम् २, भेदयित्वा २, } बिभित्सम् २, बिभित्सित्वा २, } बेभिदम् २ ; बेभिदित्वा २ ; }
[3]भिदुः, [4]भिदिरम् , [5]भिद्रः ।

(1161) "ञि भी भये" (III-जुहोत्यादिः-1084. अक. अनि. पर.)
भायकः-यिका, [6]भापकः-[7]भीषकः-षिका, [8]भायकः-यिका, [9]बिभीषकः-षिका,
बेभीयकः-यिका ;
भेता-भेत्री, [A]भापयिता-भीषयिता-भाययिता-त्री, बिभीषिता-त्री, बेभीयिता-त्री ;
[10](चोरात्) बिभ्यत्-बिभ्यतौ-बिभ्यतः, [कुञ्जिकया एनं] [11]भाययन्-न्ती,
बिभीषन्-न्ती ; —

1. स्त्रियाम्, 'भिदा विदारणे' (ग. सू. 3-3-104) इति भिदादिपाठाद् भावादौ अङ् । अन्यत्र भित्तिः इत्येव । भित्तिः=कुड्यम् । स्वार्थे कन्प्रत्यये भित्तिका इति भवति । 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इतीक्प्रत्यये भिदिः इत्यपि भवति ।
2. यङन्तात् णिचि ल्यपि, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः। काशिकायाम् (6-4-56) उदाहृतोऽयम् ।
3. 'पृभिदि—' (द. उ. 1-108) इति कुप्रत्ययः। भिदुः=वज्रम् ।
4. 'इषिमदिमुदिखिदिच्छिदिभिदि—' (द. उ. 8-26) इति किरच्प्रत्यये रूपमेवम्। भिदिरम्=भेदः ।
5. औणादिके (द. उ. 8-31) रक्प्रत्यये रूपमेवम् । भिद्रः=शरः ।
6. 'बिभेतेर्हेतुभये' (6-1-56) इति विकल्पेन णावात्वे, आदन्तलक्षणः पुगागमः।
7. आत्वाभावपक्षे, 'भियो हेतुभये षुक्' (7-3-40) इति षुगागमः।
8. अहेतुभये तु (करणादिजन्ये भये तु) णिज्निमित्तकवृद्धौ, आयादेशे च रूपमेवम्। एवमेव ण्यन्ते रूपत्रयस्योपपत्तिर्ज्ञेया ।
9. सन्नन्तात् ण्वुलि, 'इको झल्' (1-2-9) इति सनः कित्वान्न गुणः। एवमुत्तरत्रापि सन्नन्तेषु ज्ञेयम् ।
10. शतरि शपो जुहोत्यादित्वात् श्लौ, द्विर्वचने, अभ्यासह्रस्वे, उत्तरखण्डे यणि 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुमो निषेधः।
11. हेतुभये एवात्मनेपदविधानादत्र च अहेतु (करण) भयत्वात् ण्यन्ताच्छतैव ।
A. 'विस्मापयित्री जनमुग्रसेनजं द्राग् भापयित्री भृशमस्य पश्यताम् ।' वा, वि.1. 38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भेष्यन्-न्ती-ती, भाययिष्यन्-न्ती-ती, बिभीषिष्यन्-न्ती-ती ; —
— (जटिलो)[1]भापयमानः, (मुण्डो)[A]भीषयमाणः, — बेभीयमानः ;
— भापयिष्यमाणः-भीषयिष्यमाणः — बेभीयिष्यमाणः ;
भीः-भियौ-भियः ; — — — —
भीतः-भीतवान्, भापितः-भीषितः-भायितः, बिभीषितः, बेभीयितः-तवान् ;
[2]भीतः, वृकभीतः, [3]भीरुः[B]-भीलुकः, [4]भीरुकः, [5]विभीषणः,[C]
भापः-भीषः-भायः, बिभीषुः, बेभ्यः ;
भेतव्यम्, भापयितव्यम्-भीषयितव्यम्-भाययितव्यम्, बिभीषितव्यम्,
बेभीयितव्यम् ;
[6]प्रनिभयनीयम्-प्रणिभयनीयम्, भापनीयम्-भीषणीयम्-भायनीयम्,
बिभीषणीयम्, बेभीयनीयम् ;
भेयम्, भाप्यम्-भीष्यम्-भाय्यम्, बिभीष्यम्, बेभीय्यम् ;
भायमानः, भाप्यमानः-भीष्यमाणः-भाय्यमानः, बिभीष्यमाणः, बेभीय्यमानः ;
ईषद्भयः-दुर्भयः-सुभयः ; — — —

---

1. '**भीस्म्योर्हेतुभये**' (1-3-68) इति ण्यन्तादात्मनेपदम्।
2. '**ञीतः क्तः**' (3-2-187) इति वर्तमाने कर्तरि क्तप्रत्ययः। **वृकभीतः** इत्यत्र 'भय**भीत**भीतिभीभिरिति वक्तव्यम्' (वा. 2-1-37) इति वचनात् समासो बोध्यः।
3. तच्छीलादिषु कर्तृषु '**भियः क्रुक्लुकनौ**' (3-2-174) इति क्रुः क्लुकन् च प्रत्ययौ भवतः। क्रमेण **भीरुः, भीलुकः** इति रूपे सिद्ध्यतः।
4. 'क्रुकन्नपि वक्तव्यः' (वा. 3-2-174) इति वचनात् क्रुकन्प्रत्यये रूपमेवम्। अयमपि ताच्छीलिकप्रत्ययः।
5. विशेषेण भीषयत इति **विभीषणः**। ण्यन्तात् नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः। षुगागमः।
6. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति उपसर्गस्थान्निमित्तात् परस्य नेः णत्वविकल्पः।

A. 'शत्रून् **भीषयमाणं** तं रामं विस्मापयेत कः।' भ. का. 5-58.

B. '**अभीरु**रवसं स्त्रीभिर्भास्वराभिरिहेश्वरः॥' भ. का. 7-25.

C. '**विभ्युर्बिडालेक्षणभीषणाभ्यो** वैदूर्यकुड्येषु शशिद्युतिभ्यः॥' शि. व. 3-45.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भयम्-वृकभयम्, भाप:-भीष:-भाय:, बिभीष:, बेभीय:;

भेतुम्, भापयितुम्-भीषयितुम्-भाययितुम्, बिभीषितुम्, बेभीयितुम्;

भीति:, वृकभीति:, [2]भी:, भापना-भीषणा-भायना, [3]भीषा-[A]जातभीषा, बिभीषा, बेभीया;

— भापनम्-भीषणम्-भायनम्, बिभीषणम्, बेभीयनम्;

भीत्वा, भापयित्वा-भीषयित्वा-भाययित्वा, बिभीषित्वा, बेभीयित्वा;

प्रभीय, प्रभाप्य-प्रभीष्य-प्रभाय्य, प्रबिभीष्य, प्रबेभीय्य;

भायम् २, भीत्वा २, } भापम् २-भीषम् २-भायम् २, भापयित्वा २-भीषयित्वा २-भाययित्वा २, } बिभीषम् २, बिभीषित्वा २, } बेभीयम् २; बेभीयित्वा २; }

[4]भेक:, [5]भयानक:, [6]भीम:-भीष्म: ।

## (1162) "भुज पालनाभ्यवहारयो:"

(VII-रुधादि:-1454. सक. अनि. पर.) अभ्यवहार:=भोजनम् ।

'भुजेद् भुनक्ति भुंक्ते स्यु:, कौटिल्ये पालनेऽदने ।' (श्लो. 65) इति देव: ।

---

1. 'अज्विधौ-भयादीनामुपसंख्यानम्, नपुंसके क्तादिनिवृत्त्यर्थम्' (वा. 3-3-56) इति वचनादत्र 'एरच्' (3-3-56) इति भावेऽच्प्रत्यय: । अच्प्रत्ययान्तस्य पुंलिङ्गत्वं तु प्रायिकम् । अतोऽत्र नपुंसकत्वम् । वार्तिकेऽत्र 'क्तादिनिवृत्त्यर्थम्' इत्युक्तत्वात् नपुंसके भावे विहित: ल्युट्प्रत्ययोऽप्यस्य धातोर्नेति ज्ञेयम् । वृकभयम् इत्यत्र 'पञ्चमी भयेन' (2-1-37) इति समास: ।
2. स्त्रियां भावे सम्पदादित्वात् (वा. 3-3-94) क्विप् ।
3. हेतुमण्ण्यन्तात् बाहुलकेन 'अ प्रत्ययात्' (3-3-102) इत्यकारप्रत्यय:, युजपवाद: ।
4. 'इण्भीका—' (द. उ. 3-21) इति कन्प्रत्यये रूपमेवम् । बिभेतीति भेक: ।
5. 'आनक: शीङ्भिय:' (द. उ. 3-26) इत्यानकप्रत्यय: । बिभेति तस्मादिति भयानक:=भीषण: । 'भीमादयोऽपादाने' (3-4-74) इति अपादानेऽयं प्रत्यय: ।
6. 'भिय: षुग् वा' (द. उ. 7-35) इति मक्प्रत्यय:, पक्षे षुगागमश्च । बिभेत्यस्माज्जन इति भीम:, भीष्मो वा । 'भीमादयोऽपादाने' (3-4-74) इत्यपादानेऽयं प्रत्ययो ज्ञेय: ।

A. 'जगत्पतौ पश्यति जातभीषा प्रायस्तदालिङ्गनमभ्यनैषीत् ॥' या. अ. 13-57.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भोजकः-जिका, भोजकः-जिका, [1]बुभुक्षकः-क्षिका, बोभुजकः-जिका ;
भोक्ता-भोक्त्री, भोजयिता-त्री, बुभुक्षिता-त्री, बोभुजिता-त्री ;
[2]भुञ्जन्-ती, देवदत्तं यज्ञदत्तः-[3]भोजयन्-न्ती, बुभुक्षन्-न्ती ; —
भोक्ष्यन्-न्ती-ती, भोजयिष्यन्-न्ती-ती, बुभुक्षिष्यन्-न्ती-ती ; —
[4]भुञ्जानः, भोजयमानः, बुभुक्षमाणः, बोभुज्यमानः ;
भोक्ष्यमाणः, भोजयिष्यमाणः, बुभुक्षिष्यमाणः, बोभुजिष्यमाणः ;
हुतभुक्, हव्यभुक्, [5]बलिभुक्-बलिभुजौ-[A]बलिभुजः ; — —
भुक्तम्-भुक्तवान्, [6]प्रभुक्तः, भोजितः, बुभुक्षितः, बोभुजितः-तवान् ;

---

1. सन्नन्ते सर्वत्र 'इको झल्' (1-2-9) इति सनः कित्त्वे, धातुजकारस्य षकारे, तस्य 'षढोः कः सि' (8-2-41) इति ककारे च रूपनिष्पत्तिर्ज्ञेया।

2. शतरि, शपो रुधादित्वेन श्नमि, 'श्नसोरल्लोपः' (6-4-111) इति श्नमोऽकारस्य लोपे नकारस्य श्चुत्वेन ञकारे च रूपमेवम्।

3. अभ्यवहारार्थे धातोरस्य ण्यन्तात्, '**निगरण**चलनार्थेभ्यः' (1-3-87) इति शतैव। 'गतिबुद्धिप्रत्यवसानार्थ—' (1-4-52) इत्यादिना अणौ कर्तुः णौ कर्मसंज्ञाऽत्रेति विशेषः।

4. '**भुजोऽनवने**' (1-3-66) इत्यनेन अवनभिन्नार्थे आत्मनेपदं शानच्। ण्यन्तेऽपि पालनार्थे शानज्ज्ञेयः। सन्नन्तेऽपि पालनार्थे 'पूर्ववत् सनः' (1-3-62) इति शानज्भवतीति बोध्यम्। धातूनामनेकार्थत्वात्, '**भुञ्जाना** मानुषान् **भोगान्** सर्वकामसमृद्धिनी।' (रामा-अर. 47-4), '**बुभुजे** पृथिवीपालः पृथिवीमेव केवलाम्॥' (रघुवंशे. 15-1) इत्यादिषु, अनुभवार्थेऽपि आत्मनेपदं भवतीति बोध्यम्। स्पष्टमिदं **माधवधातुवृत्तौ**।

5. कर्मण्युपपदे 'क्विप् च' (3-2-76) इति कर्तरि क्विप्। **बलिभुक्**=वायसः।

6. 'आदिकर्मणि क्तः कर्तरि च' (3-4-71) इति कर्तरि क्तः।' '**प्रभुक्तो** गोरसं कृष्णः प्रभुक्तोऽनेन गोरसः।' इति **प्र. सर्वस्वे**। अस्य धातोर्भक्षणार्थकत्वात् 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (3-4-76) इति अधिकरणेऽपि क्तप्रत्ययो बोध्यः। **प्रत्यवसानार्थकाः**= भक्षणार्थका धातवः।

A. 'तूष्णीं प्रत्यभिजानते **बलिभुजो** भीताः स्वयूथ्यस्वरान्॥' अनर्घराघवे 4.1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भोजः, [2]विश्वभोजः, [3]उष्णभोजी-शीतभोजी, [A]कलहभोजी, [4]अश्राद्धभोजी, कांस्यभोजी, (भोगं) [5]भुञ्जानः, भोजः, [B]बुभुक्षुः, बोभुजः ;
भोक्तव्यम्, भोजयितव्यम्, बुभुक्षितव्यम्, बोभुजितव्यम्;
प्रनिभोजनीयम्-प्रणिभोजनीयम्, भोजनीयम्, बुभुक्षणीयम्, बोभुजनीयम्;
[6]भोज्यम्-भोग्यम्, भोज्यम्, बुभुक्ष्यम्, बोभुज्यम्;
ईषद्भोजः-दुर्भोजः-सुभोजः ; — —
भुज्यमानः, भोज्यमानः, बुभुक्ष्यमाणः, बोभुज्यमानः;
[7]भुजः-भोगः, [8]भोगः, भोजः, बुभुक्षः, बोभुजः ;
भोक्तुम्, [9]भोक्तुं शक्नोति, भोजयितुम्, बुभुक्षितुम्, बोभुजितुम् ;

---

1. इगुपधलक्षणं कप्रत्ययं बाधित्वा 'अज्विधिः सर्वधातुभ्यः पठ्यन्ते च पचादयः।' (का. 3-1-134) इति वचनात् कर्तरि अच्प्रत्ययः।
2. विश्वं भुनक्ति इति **विश्वभोजः**। 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्ययः।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति ताच्छील्ये णिनिप्रत्ययः। एवं **शीतभोजी, कलहभोजी** इत्यत्रापि ज्ञेयम्। कलहं भुनक्ति=पालयति इति **कलहभोजी**=नारदः।
4. 'व्रते' (3-2-80) इति णिनिप्रत्ययः। सति भोजनेऽश्राद्धमेव भुङ्क्ते इत्यत्र व्रतं गम्यते। एव **कांस्यभोजी** इत्यत्रापि व्रते गम्ये णिनिप्रत्यय इति ज्ञेयम्।
5. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति चानश्प्रत्ययः। ताच्छीलिकोऽयं प्रत्ययः।
6. '**भोज्यं** भक्ष्ये' (7-3-69) इति ण्यति कुत्वाभावो निपात्यते। 'भक्ष्ये' इत्यत्रोपलक्षणं खादनसामान्यधर्मस्य। तेन '**भोज्या** यवागूः' इत्यत्र पानार्थकस्यापि **भोज्या** इति सिद्ध्यति। भक्षणादिभिन्नार्थे तु 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे **भोग्यः**=कम्बलः इति सिद्ध्यति।
7. '**भुज**न्युब्जौ पाण्युपतापयोः' (7-3-61) इति पाणावभिधेये घञि कुत्वाभावः, गुणाभावश्च निपात्यते। भुज्यतेऽनेनेति **भुजः**=पाणिः। 'बाहावभिधेये **भुज** इति प्रयोगो लाक्षणिकः।' इति **बृहच्छब्देन्दुशेखरे** स्फुटम्। भुजादन्यत्र घञि कुत्वे **भोगः**= शरीरम्।
8. 'हलश्च' (3-3-121) इति संज्ञायां घञ्। **भोगः**= स्त्रीभोगाज्जातोऽक्षिरोगविशेषः। कारणे कार्योपचारोऽत्र। **भोगः**= सर्पकायश्च।
9. पूर्वकालत्वाभावेऽपि शक्नोत्यर्थे 'शकधृषज्ञा—' (3-4-65) इति तुमुन्प्रत्ययः।

A. '..........पुरतोऽभवत् **कलहभोजिनो** मुनेः॥' च. भा. 5.53.
B. 'बलात् **बुभुक्षुणो**ऽत्क्षिप्य जह्रे भीमेन रक्षसा॥' भ. का. 4.2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| भुक्तिः, [1]भुजिः, अन्नभोजिका, भोजना, | | [A]बुभुक्षा, | बोभुजा ; |
| भोजनम्, | भोजनम्, | बुभुक्षणम्, | बोभुजनम् ; |
| भुक्त्वा, | भोजयित्वा, | बुभुक्षित्वा, | बोभुजित्वा ; |
| उपभुज्य, | उपभोज्य, | प्रबुभुक्ष्य, | प्रबोभुज्य ; |

[2]अग्रेभोजम्-भुक्त्वा, प्रथमं भोजं-भुक्त्वा, पूर्वं भोजं-भुक्त्वा वा व्रजति।

| | | | |
|---|---|---|---|
| भोजम् २, भुक्त्वा २, | भोजम् २, भोजयित्वा २, | बुभुक्षम् २, बुभुक्षित्वा २, | बोभुजम् २ ; बोभुजित्वा २ ; |

[3]भुज्युः, [4]भुजिष्यम्-भुजिष्या.

## (1163) "भुजो कौटिल्ये"

(VI-तुदादिः-1417. अक. अनि. पर.)

'भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने।' (श्लो.65) इति देवः। भोजकः-जिका, भोजकः-जिका, बुभुक्षकः-क्षिका, बोभुजकः-जिका; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना रौधादिकभुजधातुवत् (1162) ज्ञेयानि। [5]भुग्नः[B]-भुग्नवान्, [6]विभुजन्-न्ती-ती, [7]मूलविभुजः,

---

1. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावे इक्प्रत्ययः। **अन्नभोजिका** इत्यत्र उत्पत्तिरूपार्थे 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (3-3-111) इति स्त्रियां ण्वुच्। 'पाचिका मे त्वया देया प्रोत्पन्ना मेऽन्नभोजिका॥' इति **प्र. सर्वस्वे।**
2. 'विभाषाऽग्रेप्रथमपूर्वेषु' (3-4-24) इति अग्रेप्रथमपूर्वशब्देषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ विकल्पेन भवतः।
3. '**भुजि**मृङ्भ्याम्—' (द. उ. 1-135) इति युक्प्रत्ययः। **भुज्युः**= गन्धर्वः।
4. 'रुचि**भुजिभ्यां** किष्यन्' (द. उ. 8-15) इति किष्यन्प्रत्ययः। **भुजिष्यम्**= भोग्यम्। **भुजिष्या**=दासी।
5. धातोरस्य, ओदित्त्वेन, 'ओदितश्च' (8-2-44) इति निष्ठानत्वम्।
6. शतरि, तुदादित्वाच्छप्रत्यये तस्य ङिद्वद्भावेनाङ्गस्य गुणो न। स्त्रियां नुम्विकल्प इति विशेषः।
7. मूलानि विभुजतीति **मूलविभुजः**=रथः। 'कप्रकरणे—**मूलविभुजादिभ्य** उपसंख्यानम्' (वा. 3-2-5) इति कर्मण्यणोऽपवादः कप्रत्ययः।

A. 'अस्मानत्तुमितोऽभ्येति परिग्लानो **बुभुक्षया**॥' भ. का. 7.84.

B 'महाभराभुग्नशिरः सहस्रसाहायकव्यग्र**भुजं** प्रसस्रे॥' शि. व. 3.25.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भुजः, [2]भोगः; इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1164) "भुवोऽवकल्कने" (X-चुरादिः-1748. सक. सेट्. उभ.)

"अवकल्कनम्=मिश्रीकरणम्। भावयति दध्नौदनम्। अनित्यण्यन्तत्वार्था पञ्चमी। 'विकल्कने' इति नन्दी। 'भावयेद् ब्राह्मणं तपः।'—" इति **क्षीरस्वामी**। "अवकल्कनं=चिन्तनम्। इति **काश्यपः**। क्वचित् **स्वामिग्रन्थे**ऽनुकल्कनम्-इति पठित्वा, 'अनुकल्कनम्=मिश्रीकरणम्।' इति दृश्यते। .... .... ....**विकल्कनम्**=विपाचनम् (=[3]विपक्वीकरणम्।) तथा च प्रयुज्यते—'तपो भावितमात्मानम्—' इति। '— **अवकल्पने**' इत्यपरे। तथा च **धनपालः** ..." इति **मा. धा. वृत्तिः**। 'मूलशुद्धिस्त्वत्र कीदृशी? इति न विद्मः।' इति **पुरुषकारः**।

'सत्तायां भवति, प्राप्तौ णिचि भावयते तङि।
भवते शपि, तत्रैव भावयत्यवकल्कने॥' (श्लो. 3) इति **देवः**।

भावकः-विका, [4]विभावयिषकः-षिका, भावयिता-त्री, बिभावयिषिता-त्री; [5]भावयन्-न्ती, बिभावयिषन्-न्ती; भावयिष्यन्-न्ती-ती, बिभावयिषिष्यन्-न्ती-ती;

---

1. इगुपधलक्षणे कर्तरि कप्रत्यये रूपमेवम्।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञि 'चजोः कु—' (7-3-52) इति कुत्वे च रूपमेवम्। '**भोगः**= सर्पकायः।' इति **क्षीरस्वामी**। "अथवा **भोग**-शब्दः शरीरवाच्यपि दृश्यते। तद्यथा— 'अहिरिव **भोगैः** पर्येति बाहुम्—' (ऋ. वे. 6-75-14) अहिरिव शरीरैरिति गम्यते" इति **भाष्य** (5-1-9) वचनप्रामाण्यात् शरीरसामान्ये **भोग**शब्दस्य वृत्तिरिति गम्यते।
3. '**प्रभावुकमन्नं** भवति।' इति **काशिकायाम्** (3-2-154) उदाहृतम्। तस्यान्नविशेष्यकत्वेन विपक्वीकरणार्थे वृत्तिरस्य धातोः इति **काशिका**सम्मतमिति ज्ञेयम्।
4. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासे इकारः। एवमुत्तरत्रापि ज्ञेयम्।
5. '**भू** अवकल्कने' इति पठितव्ये सति, '**भुवो**ऽवकल्कने' इति पाठः 'अनित्यण्यन्तत्वार्थं पञ्चमी।' इति ज्ञापयतीत्याहुः। तेन णिजभावपक्षे, धातोश्चिन्तनार्थकत्वे अकर्मकत्वेन, चिन्तनस्य च चित्तवत्कर्तृकत्वेन 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-87) इति ण्यन्तात् परस्मैपदमेव। मिश्रीकरणाद्यर्थान्तरे तु यथासम्भवमात्मनेपदमपि धातोरस्य भवतीत्यपि बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भावयमानः, बिभावयिषमाणः; भावयिष्यमाणः, बिभावयिषिष्यमाणः, बिभावयिट्-यिषौ-यिषः; [A]भावितम्-तः, बिभावयिषितः-तवान्; भावः, [1]भावुकः, [2]भावनः, बिभावयिषुः; भावयितव्यम्, बिभावयिषितव्यम्; भावनीयम्, बिभावयिषणीयम्; भाव्यम्, बिभावयिष्यम्; ईषद्भावः-दुर्भावः-सुभावः; ईषद्बिभावयिषः-दुर्बिभावयिषः-सुबिभावयिषः; भाव्यमानः, बिभावयिष्यमाणः; भावः, बिभावयिषः; भावयितुम्, बिभावयिषितुम्; भावना, बिभावयिषा; भावनम्, बिभावयिषणम्; भावयित्वा, बिभावयिषित्वा; प्रभाव्य, प्रबिभावयिष्य; भावम् २, भावयित्वा २, बिभावयिषम् २; बिभावयिषित्वा २. इति रूपाण्यस्य भवन्ति ।

(1165) **"भू सत्तायाम्"** (I-भ्वादिः-1. अक. सेट्. पर.)

'सत्तायां भवति, प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव, भावयत्यवकल्कने ॥' (श्लो. 3) इति **देवः** ।

भावकः-भाविका, भावकः-विका, [3]बुभूषकः-षिका, बोभूयकः-यिका; भविता-त्री, भावयिता-त्री, बुभूषिता-त्री, बोभूयिता-त्री; परिभवन्-न्ती, [4]सुखमनुभवन् वर्धस्व, शुश्रूषुर्भवन् विद्यामधिकरोति,

---

1. तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु 'लषपतपदस्थाभूवृष—' (3-2-154) इत्यनेन उकञ्प्रत्ययः । 'णेरनिटि' (6-4-51) इति णिलोपः । 'न वाचमवमन्यन्ते नर्तकीमिव **भावुकाः** ॥' (या. अ. 1-7) इत्यत्र, "**भावुकाः= भावनाकृतो** भगवद्भक्ताः। '**भुवोऽवकल्कने**' इति भवतेर्णिजन्तात् 'लषपत—' (3-2-154) इत्यादिना उकञ्प्रत्ययः। 'अवकल्कनम्=चिन्तनम् ।' इति व्याख्यातम् ।" इति **अप्पय्यदीक्षितोक्तेः** धातोरस्यैवोकञ्विधायके सूत्रे ग्रहणमित्यपि ज्ञायते ।

2. ण्यन्तादस्मात् नन्द्यादेराकृतिगणत्वात् कर्तरि ल्युः । **भावनः**= चिन्तकः ।
(अत्र **भावितम्** इति मिश्रीकरणार्थे धातोर्वृत्तिरिति ज्ञेयम्)

3. 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः । अभ्यासे ह्रस्वः । एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया ।

4. **सुखमनुभवन्, शुश्रूषुर्भवन्** इत्यत्र क्रमेण लक्षणार्थे हेत्वर्थे च, 'लक्षणहेत्वोः क्रियायाः' (3-2-126) इति शता ।

A. 'रोषान्ध्यभावितमसृग्भिरकल्पयत् तं
कृष्णोऽपि नाकिजनराकितलाग्यवीर्यः ॥' धा. का. 3.41.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



शयनमनुभवन् भुङ्क्ते, मा[1]भवन्, भावयन्-न्ती, बुभूषन्-न्ती ; —
[2]व्यतिभवमानः, भावयमानः, [3]व्यतिबुभूषमाणः, बोभूयमानः ;
व्यतिभविष्यमाणः, भावयिष्यमाणः, व्यतिबुभूषिष्यमाणः, बोभूयिष्यमाणः ;
[4]गान्दिनीभूः-[A]गान्दिनीभुवौ-गान्दिनीभुवः ; — —
[5]भूतम्, भूतवान्, भावितः, बुभूषितः, बोभूयितः-तवान् ;
[6]भवः, भावः, [7]भव्यः (देवदत्तः), [8]अभिभावी, [9]परिभावी[B]परिभवी, [10]अभावी,

---

1. 'माङ्याक्रोशे' (वा 3-2-124) इति शता । यद्यपि लुङोऽपि माङ्येव विधानम्; तथापि **वार्तिककार**वचनप्रामाण्यात् लटः शत्राऽत्र लुङः समावेश इति ज्ञेयम् ।
2. 'कर्तरि कर्मव्यतीहारे, (1-3-14) इति कर्मव्यतिहारे शानच् ।
3. 'पूर्ववत्सनः' (1-3-62) इति सन्नन्तात् कर्मव्यतीहारे गम्ये शानच् ।
4. गान्दिन्याः भवति=उत्पद्यते इति **गान्दिनीभूः** । 'क्विप् च' (3-2-76) इति कर्तरि क्विप् ।
5. 'श्र्युकः क्किति' (7-2-11) इतीण्निषेधोऽत्र । एवमेव क्त्वा-क्तिनोरपि इण्निषेधो ज्ञेयः ।
6. 'अज्विधिः सर्वधातुभ्यः–' (का. 3-1-134) इति वचनादस्माद्धातोः पचाद्यचि, गुणावादेशयो रूपमेवम् । स्त्रियाम् 'इन्द्रवरुणभव-' (4-1-49) इत्यादिना ङीषानुगौ । **'भवतेश्चे**ति वक्तव्यम्' (का. 3-1-143) इति वाक्यं **काशिकायां** कर्तरि विकल्पेन णप्रत्ययविधानप्रकरणे दृश्यते । तेन पक्षे कर्तरि **भावः** इत्यपि ज्ञेयम् । परं तु वाक्यमिदं **भाष्ये** न दृश्यते ।
7. '**भव्य**गेयप्रवचनीय—' (3-4-68) इत्यादिना कर्तरि यत्प्रत्ययान्तो निपातितः । भवत्यसौ, भव्यमनेनेति वा **भव्यः** ।
8. '**अभिभावी** भूते' (ग. सू. 3-1-134) इति वचनात् भूतार्थे ग्रह्यादित्वाण्णिनिप्रत्ययः ।
9. ग्रह्यादिष्वेव (3-1-134) '**परिभवी-परिभावी**' इति निपातनात् णिनिप्रत्यये, तस्य पाक्षिके वृद्ध्यभावे च रूपे एते सिद्ध्यतः ।
10. 'अचामचित्तकर्तृकाणाम्' (ग. सू. 3-1-134) इत्यत्र पूर्वस्मात् गणसूत्रात् '— प्रतिषिद्धानाम्' (ग. सू. 3-1-134) इत्यनुवर्तते । तेनात्र णिनिप्रत्यये रूपमेवम् । प्रकृतगणसूत्रस्यायमर्थः— अचेतनकर्तृकाणाम् अजन्तानां धातूनां नञ्युक्तानां (नञुपपदकानाम्) णिनिर्भवति—इति । तेनात्र ग्रह्यादित्वात् णिनिः ।

A. 'स **गान्दिनीभू**रथ गोकुलैधितं स्पर्धालुधीगाधितकार्यबाधिनम् ।' धा. का. 1-2.
B. '**परिभावीणि** ताराणां पश्य मन्थीनि चेतसाम् ।' भ. का. 6-75. अत्र नपुंसकलिङ्गे नुमि, 'प्रातिपदिकान्तनुम्—' (8-4-11) इति णत्वम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भावी, [2]अभिभावकः-अभिभविता, [3]भविता, [4]आढ्यम्भविष्णुः[A]-सुभगम्भविष्णुः-स्थूलम्भविष्णुः-पलितम्भविष्णुः-नग्नम्भविष्णुः-अन्धम्भविष्णुः-प्रियम्भविष्णुः, आढ्यम्भावुकः-[B]सुभगम्भावुकः-स्थूलम्भावुकः-पलितम्भावुकः-नग्नम्भावुकः-अन्धम्भावुकः-प्रियम्भावुकः, [C]मषीभावुकः, [5]भविष्णुः, [6]भूष्णुः, [7]भावुकः, [8]परिभवी,

---

1. 'भविष्यति गम्यादयः' (3-3-3) इत्यत्र गणे **भावी** इति पाठात् भविष्यत्यर्थे णिनिप्रत्ययः।

2. वाऽसरूपन्यायेन 'ण्वुल्तृचौ' (3-1-133) इति यथाक्रमं ण्वुलि, तृचि च रूपमेवमिति ज्ञेयम्।

3. तच्छीलादिषु कर्तृषु 'तृन्' (3-2-135) इति तृन्प्रत्यये रूपमेवम्।

4. आढ्यसुभगस्थूलपलितनग्नान्धप्रियपदेषूपपदेषु सत्सु च्व्यर्थेषु गम्येषु अच्व्यन्तेषु 'कर्तरि भुवः खिष्णुच्खुकञौ' (3-2-57) इत्यनेन खिष्णुच् खुकञ् च प्रत्ययः क्रमेणात्रेति ज्ञेयम्। प्रत्यययोः खित्त्वात्, 'अरुर्द्विषदजन्तस्य मुम्' (6-3-67) इति मुमागमः।

5. '**भुवश्च**' (3-2-138) इतीष्णुच्प्रत्ययस्तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु भवति। अत्र पूर्वसूत्रात् '–छन्दसि' (3-2-137) इत्यनुवृत्तेः छन्दस्येवायं प्रत्यय इति ज्ञेयम्। **चान्द्रास्तु** भाषायामप्यस्य प्रयोगमिच्छन्ति।

6. 'ग्लाजिस्थश्च ग्स्नुः' (3-2-139) इति सूत्रे चकारेण तत्पूर्वसूत्रगतभूधातोरप्यनुषङ्गात् अत्र ग्स्नुप्रत्ययः। प्रत्ययस्य गित्त्वात् 'क्ङिति च' (1-1-5) इत्यत्र गकारस्यापि प्रश्लेषात् गुणो नेति ज्ञेयम्। एवं 'श्र्युकः क्किति' (7-2-11) इत्यत्रापि गकारप्रश्लेषणात् इण्निषेधोऽत्रेत्यपि ज्ञेयम्।

7. 'लषपतपदस्थाभू-' (3-2-154) इत्यनेन ताच्छीलिके उकञ्प्रत्यये रूपमेवम्। ताच्छीलिकेषु वाऽसरूपविधिर्नास्तीति **भाष्यादिषु** स्पष्टम्। तेन उत्सर्गेण समावेश एवेतरेषां प्रत्ययानामिति ज्ञेयम्।

8. 'जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च' (3-2-157) इत्यनेन ताच्छीलिके इनिप्रत्यये रूपमेवम्। अत्र सूत्रे **परिभू** इत्युक्तेः अन्योपसर्गे उपपदे प्रत्ययोऽयं न भवतीति ज्ञेयम्।

A. '**आढ्यम्भविष्णुर्यशसा** कुमारः **प्रियम्भविष्णुर्न** स यस्य नासीत्॥'
भ. का. 3.1.

B. 'हृदयङ्गममूर्तिस्त्वं **सुभगम्भावुकं** वनम्।' भ. का. 5.67.

C. 'दलोदरे काञ्चनकेतकस्य क्षणान्मषी**भावुक**वर्णरेखम्।' नैषधे-6.63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]विभूः, [2]स्वयम्भूः-अग्निभूः-कच्छभूः-मित्रभूः-पवनभूः, [3]विभुः-प्रभुः-संभुः, [4]शम्भुः, [5]भवकः, [6]धेनुम्भव्या, [7]बभूवान्, [8]भवभूतिः-भूतः, भावः, [9]भावनः, [A]बुभूषुः-[10]बिभावयिषुः, बोभुवः; भवितव्यम्, भावयितव्यम्, बुभूषितव्यम्, बोभूयितव्यम्; [11]प्रभवनीयम्, [12]प्रभावनीयम्, बुभूषणीयम्, बोभूयनीयम्;

---

1. 'भुवः संज्ञाऽन्तरयोः' (3-2-179) इति क्विप्प्रत्ययः। विभूः इति कस्यचित् संज्ञा। अत्र सूत्रे अन्तरशब्देन धनिकाधमर्णयोरन्तरालवर्ती उच्यते। प्रतिभूः= क्रयविक्रयादिषु ऋणादानप्रत्यर्पणादिषु च मध्यवर्ती साक्षी।
2. उपसर्गे,पदान्तरे च उपपदे धातुसामान्यविहितः क्विप्प्रत्ययोऽत्रेति यथासम्भवमूह्यम्।
3. 'विप्रसंभ्यो ड्वसंज्ञायाम्' (3-2-180) इति भूधातोरस्य वि-प्र-सं-पूर्वकस्य डुप्रत्ययः। प्रत्ययस्य डित्वात् टेर्लोपः।
4. 'डुप्रकरणे—मि[त्र]तद्रु—आदिभ्य उपसंख्यानम्—' (वा. 3-2-180) इति डुप्रत्ययः। शं भावयतीति शम्भुः। अन्तर्भावितण्यर्थोऽत्र भवतिरिति ज्ञेयम्।
5. भवतात् इति भवकः। आशिषि गम्यमानायाम्, 'आशिषि च' (3-1-150) इति वुन्।
6. 'धेनोर्भव्यायां मुम्—' (वा. 6-3-70) इति मुमागमः। धेनुर्भविष्यतीत्यर्थः। बाहुलकादत्र भविष्यत्यर्थे भुवो यत्प्रत्ययः इति ज्ञेयम्।
7. लिटः क्वसौ रूपमेवम्। 'वस्वेकाजाद्घसाम्' (7-2-67) इति सूत्रोपात्तनिदानस्यात लक्ष्येऽभावादिडागमो न। माधवधातुवृत्तौ तु क्वसोर्भाषायां प्रयोगाभावः साग्रहं साधितः। 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (4-3-24) इत्यत्र भाष्ये, 'पपुष आगतं पपिवद्रूप्यम्—' इति प्रयुक्तत्वात् भाषायामपि क्वसुप्रयोगो नाप्रामाणिक इति ज्ञेयम्।
8. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच्। पुंल्लिङ्गोऽयं शब्दः। एवं भूतः इत्यत्रापि संज्ञायां क्तप्रत्ययो ज्ञेयः।
9. नन्द्यादेः (3-1-134) आकृतिगणत्वात् ण्यन्तात् कर्तरि ल्युप्रत्ययोऽत्रेति ज्ञेयम्।
10. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासे इकारः।
11. 'न भाभूपू—' (8-4-34) इत्यादिना उपसर्गस्थान्निमित्तात् परस्य कृत्स्थस्य नकारस्य णत्वनिषेधः।
12. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति उपसर्गस्थान्निमित्तात् परस्य नकारस्य णत्वनिषेधः।

A. 'प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोविरागाद्दशमं चिकर्तिषुः।' शि. व. 1.49.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भाव्यम्, [1]अवश्यभाव्यम्, [2]ब्रह्मभूयं [A]मित्रभूयं वा गतः, भाव्यः, भाव्यम्, बुभूष्यम्, बोभूय्यम्;
ईषद्भवः-दुर्भवः-सुभवः, [3]ईषदाढ्यम्भवं-दुराढ्यंभवं-स्वाढ्यम्भवम्, [B]सुराजम्भवः, वा भवता; — — —
भूयमानः-अनुभूयमानम्, भाव्यमानः, बुभूष्यमाणः, बोभूय्यमानः;
[4]भवः, [5]भावः, प्रभवः, [6]परिभावः[C]-परीभावः-परिभवः, भावः, बुभूषः-बोभूयः;

1. 'ओरावश्यके' (3-1-125) इत्यावश्यकार्थे ण्यत्। 'लुम्पेदवश्यमः कृत्ये ......' (का. 6-1-144) इति अवश्यमो मकारस्य लोपः। आवश्यकार्थे ण्यदत्रेति प्रदर्शनार्थमत्र 'अवश्यम्' इति पदमुपात्तम्; न तु उपपदत्वेन; विनैवावश्यपदमपि प्रयोगः साधुरेव। तथा च प्रयुक्तम्—'विप्रेण शुचिना भाव्यम्–' (प्र. कौमुद्युपात्तोऽयं श्लोकः) इति।
2. 'भुवो भावे' (3-1-107) इति भावार्थे क्यप्। ब्रह्मभूयं गतः=ब्रह्मभावं गत इत्यर्थः।
3. ईषदाद्युपपदेषु कर्तरि कर्मणि चोपपदयोः सतोः च्व्यर्थे गम्ये 'कर्तृकर्मणोश्च भूकृञोः' (3-3-127) इति खल्प्रत्ययः। उपपदद्वयविधानात् भाष्यकारप्रयोगाच्च कर्तृवाचकस्य चोपपदस्य धातोरव्यवहितपूर्वप्रयोग इति ज्ञेयम्।
'अकर्मत्वाद् भुवो भावे कृञः कर्मार्थ एव तत्।
च्व्यर्थयोगश्च वाच्योऽत्र भवतेषत्पटुम्भवम्॥
अपटोस्ते पटुत्वेन भवनं लध्वितीर्यते।
एवं स्वाढ्यम्भवं तेन, तया दुस्सुन्दरिम्भवम्॥" इति प्र. सर्वस्वश्लोकोऽत्रानुसन्धेयः।
4. 'ऋदोरप्' (3-3-57) इति भावेऽप्प्रत्ययः।
5. 'नपुंसके भावे क्तः' (3-3-114), 'भावे' (3-3-18), '—भाववचनात्' (2-3-15) 'भाववचनाश्च' (3-3-11) इत्यादिनिर्देशप्रामाण्यात् उवर्णान्तत्वेन प्राप्तोऽप्प्रत्ययः पाक्षिकः; तेन, 'अबाधकान्यपि निपातनानि' (परि. 121) इति न्यायेन घञ्प्रत्ययोऽपि भवतीति केचित्। भाष्ये 'बाधकान्येव हि निपातनानि भवन्ति' (भाष्यम् 1-1-27) इत्युक्तत्वात् घञ्प्रत्यय एव भावार्थे न्याय्यः, न तु ओरप्प्रत्यय इति परे वदन्ति। सर्वथा रूपमेतदपि साध्विति ज्ञेयम्।
6. 'परौ भुवोऽवज्ञाने' (3-3-55) इति विकल्पेन घञ्प्रत्ययोऽत्रावज्ञाने गम्ये। पक्षे औत्सर्गिकोऽप्प्रत्यय इति ज्ञेयम्। परीभावः इत्यत्र 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति दीर्घविकल्पः।
A. 'मित्रभूयं गतस्तस्य रिपुहत्यां करिष्यसि॥' भ. का. 6.55.
B. 'सैन्यान्न यातः समयापि विव्यथे कथं सुराजम्भवमन्यथाऽथवा॥' शि. व. 12-52.
C. 'परिभावं मृगेन्द्राणां कुर्वन्तो नगमूर्धसु।' भ. का. 7-54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भवितुम्, भावयितुम्, बुभूषितुम्, बोभूयितुम्;
[1]भूतिः, [2]भूः, वर्षाभूः, दृन्भूः-करभूः-कारभूः-पुनर्भूः, भावना, बुभूषा-बिभावयिषा, बोभूया;
भवनम्, [3]भुवनम्, आशितभवनम्, आशितभवनः, [4]आशितम्भवः[A] [ओदनः], भावनम्, बुभूषणम्, बोभूयनम्;
भूत्वा, [5]अग्रे भूत्वा-प्रथमं भूत्वा-पूर्वं भूत्वा, [6]मुखतो भूत्वा-मुखतोभूय वा तिष्ठति। [7]नाना भूत्वा-नानाभूय वा गतः। विना भूत्वा-विनाभूय वा गतः। द्विधा भूत्वा-द्वैधंभूय-वा गतः। [8]तूष्णींभूत्वा, तूष्णींभूय[B] वा गतः।

---

1. 'स्त्रियां क्तिन्' (3-3-94) इति क्तिनि, इण्निषेधे च रूपमेवम्। 'मन्त्रे वृषेष-पचमनविदभूवीरा उदात्तः' (3-3-96) इत्यत्र भू इत्युपादानात् मन्त्र एव भूति-शब्दः प्रयोगार्ह इति न मन्तव्यम्; प्रत्ययस्य नित्त्वेनाद्युदात्तत्वे प्राप्ते उदात्तत्वार्थं सूत्रमिति समाधिः। स्पष्टं चैतत् मा. धा. वृत्तौ।
2. भवत्यस्यां सर्वमिति भूः। बाहुलकेन सम्पदादित्वात् (3-3-94) अधिकरणे स्त्रियां क्विप्।
3. ल्युटि रूपमेवम्। बाहुलकाद् गुणाभावोऽत्रेति ज्ञेयम्। भट्टिकाव्यव्याख्याने (1-1) प्राचीनैर्व्याख्याकारैरेवमेव समर्थितम्।
4. 'आशिते भुवः करणभावयोः' (3-2-45) इति करणे भावे चार्थे आशित-शब्दे उपपदे खच्प्रत्ययः। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम्। आशितो भवत्यनेनेति आशितम्भवः=ओदनः। करणेऽत्र प्रत्ययः। आशितस्य भवनम्-आशितम्भवं वर्तते। भावेऽत्र प्रत्ययः।
5. 'विभाषाऽग्रेप्रथमपूर्वेषु' (3-4-24) इत्यनेन क्त्वाप्रत्ययोऽत्र विकल्पेन भवतीति ज्ञेयम्। एवं णमुलप्युत्तरत्रानेनैव सूत्रेणेति ज्ञेयम्।
6 तस्प्रत्यये स्वाङ्गवाचिन्युपपदे धातोरस्य, 'स्वाङ्गे तस्प्रत्यये कृभ्वोः' (3-4-61) इति क्त्वाप्रत्ययोऽत्रेति ज्ञेयम्। 'तृतीयाप्रभृतीनि—' (2 2-21) इति समास-विकल्पः। तेन समासेऽत्र ल्यबपीति ज्ञेयम्। णमुलप्यनेनैव भवतीत्यपि बोध्यम्।
7. 'नाधार्थप्रत्यये च्व्यर्थे' (3-4-62) इति क्त्वाणमुलौ भवतः। च्व्यर्थकत्वात् अनाना नाना भूत्वा=नानाभूत्वा गतः, इति वृत्तिरत्र ज्ञेया। तृतीया-प्रभृतित्वात् (2-2-21) समासविकल्पः। धार्थप्रत्ययाः 'संख्यायाः विधार्थे धा' (5-3-42), 'द्वित्र्योश्च धमुञ्' (5-3-45) इति सूत्रविहिताः प्रत्ययाः।
8. 'तूष्णीमि भुवः' (3-4-63) इति क्त्वाणमुलौ भवतः। अत्रापि समास-विकल्पः। तेन ल्यबन्तप्रयोगोऽप्युपपन्नः।
A. 'आशितम्भवमुत्कुष्टं वल्गितं शयितं स्थितम्।' भ. का. 6-107.
B. 'तूष्णीम्भूय भयादासाञ्चक्रिरे मृगपक्षिणः॥' भ. का. 5. 95.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]अन्वग् भूत्वा-अन्वग्भूय वा गतः ।
अनुभूय, अनुभाव्य, अनुबुभूष्य, अनुबोभूय्य ;
अग्रेभावम्-प्रथमंभावम्-पूर्वम्भावम्, मुखतोभावम् वा गतः। नानाभावं-विनाभावम् वा गतः। द्वैधंभावं-द्विधाभावं वा गतः। तूष्णीं भावम् अन्वग्भावं वा गतः।

भावम् २ } भूत्वा २ } भावम् २ } भावयित्वा } बुभूषम् २ } बुभूषित्वा २ } बोभूयम् २; } बोभूयित्वा २; }

[2]भूमिः, [3]भूरिः, [4]अद्भुतम्, [5]भावित्रम् ।

## (1166) "भू प्राप्तौ" (X-चुरादिः-1845. सक. सेट्. आत्म.) [अ]

आधृषीयः ।

---

1. 'अन्वच्यानुलोम्ये' (3-4-64) इत्यनेनान्वक्छब्द उपपदे धातोरस्यानुलोम्ये द्योत्ये क्त्वाणमुलौ भवतः। तृतीयाप्रभृतित्वात् (2-2-21) समासविकल्पः। **आनुलोम्यम्**=अनुकूलता।
2. '**भुवः** कित्' (द. उ. 1-16) इति मिप्रत्ययः, स च कित्। तेन गुणो न। भवन्त्यस्यां भावा इति **भूमिः**।
3. 'अदिशदिभू—' (द. उ. 1.34) इति क्रिन्प्रत्ययः। भवतीति **भूरिः**=बहुः, सुवर्णं च।
4. 'अदि **भुवो** डुतच्' (द. उ. 6-22) इति डुतच्प्रत्ययः।
5. '**भूवादि**—' (द. उ. 8-91) इत्यादिना णित्रन्प्रत्ययः। **भावित्रम्**=विधानम्।

[अ] '**भू प्राप्तौ, आत्मनेपदी**' इति चुरादिषु (आधृषीयेषु) पठ्यते। आधृषीयत्वेनास्य णिज्विकल्पः। णिजभावपक्षे आत्मनेपदमेव, परस्मैपदमेव इति चात्र पक्षद्वयम्। णिच्सन्नियोगेनैवात्मनेपदविधानम्, णिजभावपक्षे तु परस्मैपदमेवेति **पुरुषकारे** सप्रमाणं साग्रहं च साधितम्। णिजभावपक्षे आत्मनेपदमेवास्य धातोरित्यत्र **क्षीरस्वामिना** 'याचितारश्च नः सन्तु दातारश्च **भवामहै**।' इति श्लोकः कश्चिदुदाहृतः। 'मनोरमा भा **भवते**—' इति श्लोकोऽप्यात्मनेपदानुकूलत्वेन **सुधाकरेण** भूवादिसूत्रे (1-3-1) उदाहृत इति **मा. धातुवृत्त्यादि**ग्रन्थात् ज्ञायते। '**भवते** शपि तत्रैव—' (श्लो. 3) इति वदन् **देवो**ऽप्यत्रानुकूलः। '**वर्षाभ्वश्च**' (6-4-84) इत्यत्र 'वर्षासु भवति, वर्षा वा **भवते**' इति **कैयट**विवरणमप्यत्रानुकूलम्। "**अन्ये** तु **पुराणव्याकरणेषु** '**भुवो णिङ्**' इति सूत्रस्य णिङो ङकारः प्रत्ययान्तादात्मनेपदार्थः, प्रकृतौ तु केवलादिति **श्रीभद्रादिभिः** व्याख्यानात् **तन्त्रान्तर**वचनानुरोधेन सन्नियोगन्यायो बाध्यते इत्याहुः।" इति **धातुवृत्ति**वचनादात्मनेपदं णिजभावपक्षेऽपि प्रामाणिकम्, बहुवैयाकरणसम्मतं चेति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'सत्तायां भवति, प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव भावयत्यवकल्कने ॥' (श्लो. 3.) इति देवः ।
भावकः-विका, बिभावयिषकः-षिका, भावकः-विका, बुभूषकः-षिका, बोभूयकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि ण्यन्तप्रकृतिकसन्नन्तं विना भौवादिकभूधातुवत् (1165) ज्ञेयानि । अस्य धातोः आधृषीयत्वेन णिचो वैकल्पिकत्वम् । ण्यन्तात् सनि सर्वाणि रूपाणि अवकल्कनार्थक-भावयतिवत् (1164) बोध्यानि ।

(1167) "भूष अलङ्कारे" (I-भ्वादिः-682. अक. सेट्. पर.) [अ]

'........भूषति भूषयेत् ॥ अलङ्कृतौ........।' (श्लो. 172-3) इति देवः।
भूषकः-षिका, भूषकः-षिका, बुभूषिषकः-षिका, बोभूषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचूषतिवत् (552) बोध्यानि ।

(1168) "भूष अलङ्करणे" (X-चुरादिः-1731. सक. सेट्. उभ.)

'........भूषति भूषयेत् ॥ अलङ्कृतौ........।' (श्लो. 172-3) इति देवः।
भूषकः-षिका, बुभूषयिषकः-षिका ; इत्यादीनि सर्वाणि रूपाणि चौरादिक-कूटयतिवत (240) बोध्यानि । विभूषणम्[A] ।

(1169) "भृजी भर्जने" (I-भ्वादिः-178. सक. सेट्. आत्म.)

भर्जनम्=पाकविशेषः ।

'........भर्जने भर्जते भृजेः ।' (श्लो. 68) इति देवः ।
भर्जकः-भर्जिका, भर्जकः-र्जिका, बिभर्जिषकः-बरीभृजकः-जिका ; इत्यादीनि

---

[अ] '—'अक्ष्णः सूनाः परिभूषन्त्यश्वम् ।' (तै. सं. 4-6-9) इत्यत्र भट्टभास्करः — 'सूना=मांसविकर्षणसाधनानि अस्थ्यादीनि, अश्वं परिभूषन्ति=परितो भवन्ति ।' भवतेः (भूषतेः ?) लोटि सिपि रूपमुक्त्वा, "भूषयतेर्वा शपः 'छन्दस्युभयथा' (3-4-117) इत्यसार्वधातुकत्वात् णिलोपः ।" इत्याह । तदस्य धातोरस्मरणात् । न चायं नास्तीति शक्यते वक्तुम्—सर्वेषु व्याख्यानेषु अविवादेनोपादानात् ।" इति मा. धा. वृत्तिपर्यालोचनया केचनामुं धातुं न पठन्तीति ज्ञायते । सर्वत्र धातुपाठेषु भ्वादावपि धातोरस्य पाठदर्शनात्, देवादिभिः प्राचीनैरुपादानाच्चास्माभिरप्ययमुपात्त इति ज्ञेयम् ।

A. 'विभूषणान्युन्मुमुचुः क्षमायां पेतुर्बभञ्जुर्वलयानि चैव ।' भ. का. 3-22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सर्वाण्यपि रूपाणि भौवादिकगर्जतिवत् (422) बोध्यानि। निष्ठायाम्-[1]भृक्तम्[A]-क्तवान्, घञि-[2]भर्गः, [3]भृज्यम्, [4]अवश्यभर्ज्यम् इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1170) "भृञ् भरणे" (1-भ्वादिः-898. सक. अनि. उभ.)

'पूरणेऽपि-इति भट्टिः।' इति धा. का. व्याख्याने (2-29)।

'भृञो बिभर्ति बिभृते भरते भरतीत्यपि।

ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः॥' (श्लो. 28) इति देवः।

भारकः-रिका, भारकः-रिका, [5]बिभरिषकः-बुभूर्षकः-षिका, [6]बेभ्रीयकः-यिका;

भर्ता-र्त्री, भारयिता-त्री, बिभरिषिता-बुभूर्षिता-त्री, बेभ्रीयिता-त्री;

भरन्-न्ती, भारयन्-न्ती, बिभरिषन्-बुभूर्षन्-न्ती; —

---

1. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्निषेधः। जकारस्य कुत्वम्।
2. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति घञ्। निष्ठायामनिट्त्वात्, 'चजोः—' (7-3-52) इति कुत्वम्। भर्गः=शिवः।
3. 'ऋदुपधात्—' (3-1-110) इति कर्मणि क्यप्।
4. "अवश्यभर्ज्यम्। 'ण्य आवश्यके' (7-3-65) इति कुत्वाभावः।" इति क्षीरतरङ्गिण्यां दृश्यते। तत्र, 'कृत्याश्च' (3-3-171) इत्यनेन सूत्रेण आवश्यकार्थे कृत्यप्रत्ययस्य सामान्येन विधानेऽपि, यथासम्भवं तत्तद्धातुगतं प्रातिस्विकरूपं निमित्तमादायैव कृत्यप्रत्ययानामुत्पत्तिः। ततश्च प्रकृते, भृजीधातोरनुबन्धविनिर्मुक्तस्य ऋकारोपधत्वात्, हलन्तलक्षणं ण्यतं बाधित्वा ऋदुपधलक्षणः क्यबेव प्राप्तः। क्यपश्च कित्त्वात् गुणवृद्धिप्रभृतीनामप्राप्तेः प्रकृतलक्ष्ये भर्ज्यम् इति गुणस्य प्राप्त्यभावात् अवश्यभृज्यम् इत्येव आवश्यकार्थेऽपि रूपं स्यादिति युक्तमुत्पश्यामः।
5. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (7-2-49) इत्यनेन सन्नन्ते इड्विकल्पः। इट्पक्षे रूपमेवम्। इडभावपक्षे सनो झलादित्वात् 'इको झल्' (1-2-9) इति कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्वरपरत्वयोः, 'हलि च' (8-2-77) इति दीर्घे च बुभूर्षकः इति रूपम्। एवं सन्नन्ते सर्वत्र रूपद्वयस्य निष्पत्तिः।
6. यङि, द्विर्वचनात् पूर्वं, परत्वेन 'रीङ् ऋतः' (7-4-27) इति 'भृ' इत्यत्र ऋकारस्य रीङादेशे, द्विर्वचनादिषु कृतेषु अभ्यासे गुणे च रूपम्। एवं यङन्ते सर्वत्र ज्ञेयम्।

A. 'समृज्जितं कन्दमभृक्तसत्फलान्यदद्भिरेकत्र यदेजितं जनैः॥' धा. का. 1.24.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भरिष्यन्-न्ती-ती, भारयिष्यन्-न्ती-ती, बिभरिषिष्यन्-बुभूर्षिष्यन्-न्ती-ती ; -
भरमाणः, भारयमाणः, बिभरिषमाणः-बुभूर्षमाणः, बेभ्रीयमाणः ;
भरिष्यमाणः, भारयिष्यमाणः, बिभरिषिष्यमाणः-बुभूर्षिष्यमाणः, बेभ्रीयिष्यमाणः;
[2]मेदिनीभृत्[A]-भृतौ-भृतः ; — — —
भृतम्-तवान् , भृतकी,[B] भारितः, बिभरिषितः-बुभूर्षितः, बेभ्रीयितः-तवान् ;
[3]जारभरः, [4]उदकभारः, वंशभारः [5]आत्मम्भरिः[C], [6]कुक्षिम्भरिः-उदरम्भरिः,[D]
[7]शाकम्भरी, [8]अब्भ्रम् ,

---

1. 'ऋद्धनोः स्ये' (7-2-70) इतीडागमः । एवं शानजन्तेऽपि ज्ञेयम् ।
2. 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप् । 'ह्रस्वस्य–' (6-1-71) इति तुक् ।
3. जारं भरतीति **जारभरः** । स्त्रियां **जारभरा**=कुलटा । पचादिषु 'जारभरा' इति पाठात् कर्मोपपदे अणपवादोऽच्प्रत्ययः । **चारभरा** इति कुत्रचिद् दृष्टः पाठः । स चाप्रामाणिकः ।
4. उदकं भरतीति **उदकभारः** । 'कर्मण्यण्' (3-2-1) इत्यण् । 'मन्थौदनसक्तु-बिन्दुवज्रभारहारवीवधगाहेषु च' (6-3-60) इत्यनेन उदकशब्दस्य उदादेशो विकल्पेन भवति ।
5. 'फलेग्रहिरात्मम्भरिश्च' (3-2-26) इत्यनेन, आत्मानं भरतीत्यर्थे आत्मन्-शब्दस्योपपदस्य मुमागमः इन्प्रत्ययश्च भृञो निपात्येते । **आत्मम्भरिः**= उदरैकपरायणः ।
6. 'भृञः कुक्ष्यात्मनोर्मुम् च' (वा. 3-2-26) इति **वार्तिकात् कुक्षिम्भरिः** इत्यपि साधुः । अत्रैव **वार्तिके** चकारात **उदरम्भरिः** इत्यादयपि साधुरिति वदन्ति । वस्तुतस्तु 'स्वे पुषः' (3-4-40) इत्यत्र यथा स्वशब्देन स्वशब्दपर्यायाणां रै, **गो**शब्दानां ग्रहणम्, तद्वदत्रापि (3-2-26) आत्मशब्देन शरीरावयववाचकेन शरीरावयववाचकानां उदर-कुक्षिप्रभृतीनामपि ग्रहणमित्यङ्गीकृत्य **उदरम्भरिः कुक्षिम्भरिः** इत्यादिप्रयोगाणां साधुत्वं साध्यमिति ज्ञेयम् ।
7. शाकं भरतीति **शाकम्भरी**=पार्वती । 'भृञः कुक्ष्यात्मनोर्मुम् च' (वा. 3-2-26) इत्यत्र **चकारात्** मुम् इन् च भवति । स्त्रियाम्, 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष् ।
8. अपो भरतीति **अब्भ्रम्** । कर्मण्युपपदे 'मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5) इति कप्रत्ययः । 'इको यणचि' (6-1-77) इति यण् ।

A. 'प्रायेण नीचानपि **मेदिनीभृतो** जनः समेनैव पथाऽधिरोहति ।' शि. व. 12-46.
B. 'घूर्जरान् पारशीकांश्च प्रागेव **भृतकी**कृतान् ।' या. अ. 22-89.
C. '**आत्मम्भरि**श्चरति यूथमसेवमानः ।' इति **भाष्ये** (3-2-26) उपात्तम् ।
D. ज्योत्स्नाकरम्भमु**दरम्भरय**श्चकोराः ॥' अनर्घराघवे 2.83.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मालभारी-उत्पलमालभारी, [2]विश्वम्भरः-विश्वम्भरा,
[3]ग्रामभर्ता, [4]बभ्रिः, भारः, बिभरिषुः-बुभूर्षुः[A], [5]बेभ्रियः ;
भर्तव्यम्, भारयितव्यम्, बिभरिषितव्यम्-बुभूर्षितव्यम्, बेभ्रीयितव्यम्;
भरणीयम्, भारणीयम्, बिभरिषणीयम्-बुभूर्षणीयम्, बेभ्रीयणीयम्;
[6]भृत्यः, भार्याः (क्षत्रियाः), [7]संभृत्यः-संभार्यः, [8]सम्भर्यम्, भार्यम्,
बिभरिष्यम्-बुभूर्ष्यम्, बेभ्रीय्यम्;
ईषद्भरः-दुर्भरः-सुभरः ; — —
[9]भ्रियमाणः, भार्यमाणः, बिभरिष्यमाणः-बुभूर्ष्यमाणः, बेभ्रीय्यमाणः ;
[10]भारः, भारः, बिभरिषः-बुभूर्षः, बेभ्रीयः;
भर्तुम्, भारयितुम्, बिभरिषितुम्-बुभूर्षितुम्, बेभ्रीयितुम्;

---

1. 'सुप्यजातौ—' (3-2-78) इति णिनिः। 'इष्टकेषीकामालानां चिततूलभारिषु' (6-3-65) इति पूर्वपदस्य ह्रस्वः। 'पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च' (परिभाषा-30) इत्यनेन तदुत्तरपदस्य च ह्रस्वः। तेन '**उत्पलमालभारी**' इत्यपि साधुः।
2. 'संज्ञायां भृतॄ—' (3-2-46) इति खच्। 'खित्यनव्ययस्य' (6-3-66) इति वर्तमाने, 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम्। **विश्वम्भरः**=विष्णुः। स्त्रियां टापि **विश्वम्भरा**=भूमिः। '**विश्वम्भरा**, साम रथन्तराख्यं पतिंवरा चापि धनञ्जयश्च।' इति **प्रक्रियासर्वस्वे**।
3. 'तृन्' (3-2-135) इति ताच्छील्ये तृन्। याजकादित्वात् (2-2-9) समासः।
4. तच्छीलादिषु कर्तृषु, 'आदृगमहनजनः किकिनौ लिट् च' (3-2-171) इत्यनेन किः किन् वा प्रत्ययः। तस्य च लिड्वद्भावेन द्विर्वचनादिके कृते, 'इको यणचि' (6-1-77) इति यणादेशः। **बभ्रिः**=आयुधविशेषाणां भरणशाली।
5. यङन्तात् पचाद्यचि, यङो लुकि संयोगपूर्वकत्वात् यणं बाधित्वा, इयङादेशे रूपमेवम्।
6. '**भृञोऽसंज्ञायाम्**' (3-1-112) इत्यत्र 'असंज्ञायाम्' इत्युक्तेः, संज्ञायां क्यपि तुकि **भृत्यः**=कर्मकरः। असंज्ञायां तु **भार्यः** इत्येव। **भार्याः** नाम क्षत्रियाः।
7. 'संपूर्वाद्वा' (वा. 3-1-112) इत्यनेन वा क्यप्। पक्षे ण्यत्।
8. अत्र बाहुलकात् यत्प्रत्यये, गुणः। **सम्भर्यम्** गवामयनरूपः सत्रविशेषः। **क्वचित्**, '**सम्भार्यम्**' इत्येव गवामयनस्य नाम दृष्टम्।
9. यकि, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः।
10. धातोरस्य ह्रस्वऋकारान्तत्वात् घञेव न्याय्यः; **क्षीरस्वामी** तु "'ऋदोरप्' (3-3-57) भरः।" इत्युक्तवान्। तच्चिन्त्यम्।

A. 'त्वां जिज्ञापयिषू शक्तिं **बुभूर्षू** नु जगन्ति किम्।' भ.का. 9.37.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भृतिः-सम्भृतिः, [1]उपभृत्, [2]भृत्या[A]-भार्या, [3]पङ्कभारिका, भारणा,
बिभरिषा-बुभूर्षा, बेभ्रीया;
भरणम्- [4]आभरणम्, भारणम्, बिभरिषणम्-बुभूर्षणम्, बेभ्रीयणम्;
भृत्वा, भारयित्वा, बिभरिषित्वा-बुभूर्षित्वा, बेभ्रीयित्वा;
सम्भृत्य, सम्भार्य, प्रबिभरिष्य-प्रबुभूर्ष्य, प्रबेभ्रीय्य;
[5]अग्रेभारं व्रजति, अग्रे भृत्वा व्रजति।

भारम् २, } भारम् २, } बिभरिषम् २-बुभूर्षम् २, } बेभ्रीयम् २; }
भृत्वा २, } भारयित्वा २, } बिभरिषित्वा २-बुभूर्षित्वा २, } बेभ्रीयित्वा २; }

[6]भरुः, [7]बभ्रुः, [8]भरतः, [9]अवभृथः, [10]भर्म.

## (1171) "डु भृञ् धारणपोषणयोः"

(III-जुहोत्यादिः-1087. सक. अनि. उभ.)

---

1. उप भ्रियतेऽनेनेत्यर्थे 'सम्पदादिभ्यः—' (वा. 3-3-108) इति भावे क्विप् भवति। अश्वत्थकाष्ठनिर्मितः दर्शपूर्णमासिको यज्ञपात्रविशेषः=**उपभृत्**।
2. 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' (3-3-99) इति क्यप् स्त्रियां भवति, तुक् च। असंज्ञायां तु **भार्या** इत्येव। 'क्तिन्नपीष्यते' (काशिका 3-3-94) इति वचनात्, 'कर्मणि **भृतौ**' (3-2-22) इति निर्देशाच्च क्तिन्नपि साधुः। तेन **भृतिः-सम्भृतिः** इत्यपि सिध्यति।
3. 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (3-3-111) इति अर्हणार्थे ण्वुच्प्रत्ययो भवति। **पङ्कभारिकामर्हति गौः**।
4. आ=समन्तात् भ्रियते इत्या**भरणम्**। 'कृत्यल्युटो बहुलम्' (3-3-113) इत्यत्र बहुलग्रहणात् कर्मणि ल्युट्।
5. 'विभाषाऽग्रेप्रथमपूर्वेषु' (3-4-24) इति वा णमुल्। पक्षे क्त्वाऽपि। एवं **प्रथमं-भारं-प्रथमं भृत्वा, पूर्वम्भारं-पूर्वं भृत्वा** इत्यपि बोध्यम्।
6. 'भृमृ—' [द. उ. 1.92.] इति उप्रत्ययः। प्राणिनो भरतीति **भरुः**=समुद्रः।
7. 'कुर्भ्रश्च' [द. उ. 1.107] इति कुप्रत्ययः, चकारात् द्वित्वं च। **बभ्रुः**=कपिलो वर्णः, नकुलो वा।
8. 'भृद—' (द. उ. 6-14) इत्यतच्प्रत्यये रूपमेवम्।
9. 'अवे भृञः' (द. उ. 6-28) इति अवोपपदादस्मात् क्थन्प्रत्ययः। **अवभृथः**= यज्ञान्तस्नानम्।
10. 'मनिन्' (द. उ. 6-73) इति मनिन्प्रत्ययः। **भर्म**=भरणम्।

A. '**कुमारभृत्या**कुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भ**भर्मणि**।' रघु. 3-12.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'भृञो बिभर्ति बिभृते भरते भरतीत्यपि ।
ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः ॥' (श्लो. 28) इति देवः ।

भारकः-रिका, भारकः-रिका, [1]बुभूर्षकः-र्षिका, बेभ्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकभरतिवत् (1170) ज्ञेयानि। [2]बिभ्रत्-बिभ्रतौ-बिभ्रतः, बिभ्राणः, [3]भृत्रिमम्, [4]भरथुः, [कवचं] [5]बिभ्राणः, [6]विश्वंभरः-[A]विश्वम्भरा, [7]भार्यम्, [8]इषुभृत्-देहभृत्, [B]उदरंभरिः, [9]भृतिः, [10]भृङ्गारः इत्यादीनि रूपाण्यस्य भवन्तीति विशेषः ।

---

1. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (7-2-49) इत्यत्र भर इति शपा निर्देशात्, अस्य न ग्रहणम्। तेनात्र नेड्विकल्पः। 'इको झल्' (1-2-9) इति सनः कित्त्वात्, 'अज्झनगमां सनि' (6-4-16) इति दीर्घः। 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्वम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. शतरि शपः, 'जुहोत्यादिभ्यः—' (2-4-75) इति श्लुः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'भृञामित्' (7-4-76) इत्यभ्यासस्येकारः। उत्तरखण्डे यणादेशः। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः। एवमेव शानजन्तेऽपि प्रक्रियोह्या।
3. भावे, 'ड्वितः क्त्रिः' (3-3-88) इति क्त्रिप्रत्ययः। तस्य, 'तेन' इति वर्तमाने निर्वृत्तार्थे, 'क्त्रेर्मम्नित्यम्' (4-4-20) इति नित्यं मप् तद्धितः।
4. धातुममुं द्रमिडाः 'टु भृञ्' इति पठन्तीति क्षीरस्वामिवाक्यादवगम्यते। तदानीम्, 'ट्वितोऽथुच्' (3-3-89) इति भावेऽथुच्प्रत्ययः। भरथुः=भारः। "सुधाकरः पुनरथुज्विधौ 'टु भृञ्' इत्युक्त्वा, 'डु भृञ्' इति द्रमिडाः पठन्ति। तेन भृत्रिमम्, भरथुः इति द्वयमिच्छति नन्दी।' इति। 'टु डु भृञ्' इत्यनुबन्धद्वयमिति शाकटायनः।" इति पुरुषकारवचनमिह ध्येयम्।
5. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इत्यनेनात्र वयोवचने चानश्-प्रत्ययः। कवचधारणयोग्यं वयः प्राप्तवान् इत्यर्थः।
6. 'संज्ञायां भृतॄ—' (3-2-46) इत्यादिना खच्प्रत्ययः। विश्वं बिभर्तीति विश्वंभरः विष्णुः।
7. 'ऋहलोः—' (3-1-124) इति कर्मणि ण्यत्।
8. 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप्। तुगागमः।
9. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच्। भृतिः=वेतनम्।
10. 'शृङ्गारभृङ्गारौ' (द. उ. 8-66) इति आरन्प्रत्ययः, नुगागम-गुगागमौ गुणाभावश्च निपात्यन्ते। बिभर्त्युदकं मङ्गलार्थिभिरिति भृङ्गारः=उदककलशः।

A. 'ततो बलिन्दमप्रख्यं कपिर्विश्वम्भराधिपम्।' भ. का. 6.108.
B. 'उञ्छवृत्तिरुदरम्भरिरासीत् तादृशेन तपसैव कृतान्तः॥' या. अ. 21.63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1172) " भृड निमज्जने " (VI-तुदादिः-1395. अक. सेट्. पर.)

कुटादिः ।

आत्रेयमैत्रेयादीनां मतेन मा. धा. वृत्ति-सि.कौमुद्यादिषु पठितोऽयं धातुः । तत्र मा. धा. वृत्तिपर्यालोचनया मैत्रेयः धातुममुं संवरणार्थकमेव पठतीत्यपि ज्ञायते ।

भर्डकः-र्डिका, भर्डकः-र्डिका, बिभृडिषकः-षिका, बरीभृडकः-डिका; इत्यादीनि सर्वाणि रूपाणि तौदादिककुडतिवत् (247) ज्ञेयानि ।

(1173) " भृशि भाषार्थः " (X-चुरादिः-1788. सक. सेट्. उभ.)

आस्वदीयः ।

भाषार्थानामकर्मकत्वमेव न्याय्यम् । तथापि 'आस्वदः सकर्मकात्' (ग. सू. चुरादौ) इति वचनात्, सम्भवत्कर्मणामेव णिजुत्पत्तेरत्रापि सकर्मकत्वमस्य धातोः कथञ्चिदुन्नेयम् । चुरादिषु भाषार्थकधातुदण्डके स्वामि-काश्यपानुसारेण लिखितेषु पञ्चदशसु धातुषु मध्येऽयमप्येकः मा. धा. वृत्तौ पठितः । इदित्करणादस्य णिज्विकल्पः ।

भृंशकः-शिका, बिभृंशयिषकः-षिका, भृंशकः-शिका, बिभृंशिषकः-षिका, [1]बरीभृंशकः-शिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि ।

(1174) " भृशु अधःपतने " (IV-दिवादिः-1224. अक. सेट्. पर.)

भर्शकः-र्शिका, भर्शकः-र्शिका, बिभर्शिषकः-षिका, बरीभृशकः-शिका; इत्यादीनि सर्वाण्यपि रूपाणि विशेषरूपाणि विना, दैवादिककृशयतिवत् (254) ज्ञेयानि । [2]भृशम्, [3]भर्शित्वा–भृष्ट्वा,

---

1. णिजभावपक्षे यङन्ते सर्वत्राभ्यासे, 'रीग् ऋत्वत इति वक्तव्यम्' (वा. 7-4-90) इति रीगागमो ज्ञेयः ।

2. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः । यद्यपि कप्रत्ययान्तानां पुँल्लिङ्गत्वमेव न्याय्यम्, तथापि लिङ्गस्य लोकाश्रयत्वात् नपुंसकलिङ्गत्वमत्रेति ज्ञेयम् । अत एवास्य 'भृशम्' इति शब्दस्य क्रियाविशेषणत्वे, अव्ययत्वमप्याहुः ।

3. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद् गुणः । इडभावपक्षे षत्वे च भृष्ट्वा इति रूपमिति ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भृष्टम्-भृष्टः-भृष्टवान्, [2]भृशाया, [A]भृश्यन्-न्ती, इत्यादीन्यस्य रूपाण्यधिकानि भवन्तीति विशेषः ।

## (1175) "भृषु हिंसासंघातयोः" (I-भ्वादिः-707. सक. सेट्. पर.)

भ्वादिषु 'पृषु वृषु मृषु सेचने' इत्यत्र क्षीरस्वामिसंमतः पाठोऽयम् । मा. धा. वृत्तावप्यत्र प्रकरणे काश्यपसम्मतपाठत्वेनोद्धृतः—'मृषु हिंसा-संक्लेशनदानेषु' इति पाठः 'भृषु—' इत्येव स्यादिति प्रतिभाति । क्षीरस्वामिग्रन्थादन्यत्र कुत्राप्ययं धातुर्नोपलभ्यते ।

भर्षकः-र्षिका, भर्षकः-र्षिका, बिभर्षिषकः-षिका, बरीभृषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपर्षतिवत् (1054) ज्ञेयानि ।

## (1176) "भृ भर्त्सने" (IX-क्र्यादिः-1491. अक. सेट्. पर.)

### प्वादिः, ल्वादिश्च ।

'—भरणे' इत्यप्येके । 'भृ भर्जने च' इति क्षीरस्वामी । 'ऋृदन्तस्य भृणातीति भर्त्सने श्नि, तथा भरः ॥' (श्लो-28) इति देवः । तत्र भरणार्थे, भर्जनार्थे च सकर्मकोऽयमिति ज्ञेयम् । [बोभुरकः-रिका; भारकः-रिका, भारकः-रिका, बुभूर्षकः-र्षिका, बिभरिषकः-बिभरीषकः-षिका, इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना जौहोत्यादिकपिपर्तिवत (1055) ज्ञेयानि । [3]भृणन्[B]-ती, [4]भूर्णम्-भूर्णः-भूर्णवान्, भावेऽप्प्रत्यये भरः इति रूपाण्यस्य भवन्तीति विशेषः ।

---

1. क्त्वायामस्य धातोर्विकल्पितेट्कत्वात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः । षत्वष्टुत्वयो रूपमेवम् ।
2. अभृशो भृशो भवतीत्यर्थे, 'भृशादिभ्यो भुव्यच्वेः—' (3-1-12) इत्यनेन क्यङ् । 'सनाद्यन्ता धातवः' (3-1-32) इति धातुसंज्ञा । 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः । स्त्रियाम्, 'अ प्रत्ययात्' (3-3-102) इति भावादौ प्रत्ययान्तत्वनिमित्तकोऽकारप्रत्ययः ।
3. शतरि, 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः । तस्य शित्त्वेन सार्वधातुकत्वम् । तेन ङित्त्वात् गुणवृद्धिनिषेधः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः । 'प्वादीनां ह्रस्वः' (7-3-80) इति प्रकृतेः ह्रस्वः । 'ऋवर्णा-न्नस्य—' (वा. 8-4-1) इति णत्वम् ।
4. निष्ठायाः कित्त्वात्, 'श्र्युकः किति' (7-2-11) इतीण्निषेधे, 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युकारे, रपरत्वे, दीर्घे णत्वे च रूपमेवमिति ज्ञेयम् ।

A. '.........भृश्यद्भ्रंशनवर्शकाक्रुशदयः तृष्णाहरो हृष्य मे ॥' धा. का. 2.66.
B. 'तत्र स्परीतुमनसं रुषमावृणन्तम् अम्बष्ठमुन्मदभरं स भृणन् बभाषे ।' धा.का.3.7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1177) "भेषृ भये" (I-भ्वादिः-883. अक. सेट्. उभ.)

'—गतौ' इति मैत्रेयः। '—अगतौ इत्येके' इति धा. का. (2-27)। भेषकः-षिका, भेषकः-षिका, [1]बिभेषिषकः-षिका, [2]बेभेषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। अस्यो-भयपदित्वात् शतरि भेषन्-न्ती, भेषिष्यन्-न्ती-ती, क्विपि-[3]भेट्-भेड्-भेषौ-भेषः इति रूपाणि सम्भवन्तीति विशेषः।

(1178) "भ्यस भये" (I-भ्वादिः-628. अक. सेट्. आत्म.)

"—'भेषृ—' इति चन्द्रः।" इति क्षीरस्वामी।

भ्यासकः-सिका, भ्यासकः-सिका, बिभ्यसिषकः-षिका, बाभ्यसकः-सिका; इत्यादीनि सर्वाण्यपि रूपाणि आदादिककशतिवत् (178) ज्ञेयानि। अस्य भौवादिकत्वाच्छानचि भ्यसमानः इति, क्विपि, सुभ्यः-सुभ्यसौ-सुभ्यसः इति, युचि— [4]भ्यसनः इति च रूपाणीति विशेषः। [A]भ्यसितः।

(1179) "भ्रक्ष अदने" (I-भ्वादिः-892. सक. सेट्. उभ.) [अ]

भ्रक्षकः-क्षिका, भ्रक्षकः-क्षिका, बिभ्रक्षिषकः-षिका, बाभ्रक्षकः-क्षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतक्षतिवत् (691) ज्ञेयानि।

---

1. सन्नन्ते सर्वत्र, द्वित्वे, अभ्यासस्य ह्रस्वः। स च, 'एच इग्घ्रस्वादेशे' (1-1-48) इति शास्त्रात् इकाररूपः।
2. यङन्ते द्वित्वे, अभ्यासस्य ह्रस्वे, 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणेन पुनरेकार इति ज्ञेयम्।
3. क्विपि, षकारस्य जश्त्वेन डकारः, तस्य चर्त्वविकल्पः।
4. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु युच्प्रत्ययेऽनादेशः।

A. '............सूतो ययाम समराभ्यसितान् तुरङ्गान्॥' धा. का. 1.79.

[अ] भ्वादिषु क्षीरस्वामिप्रभृतिभिः भ्रक्ष इत्ययं धातुरदनार्थकः पठित इति मा. धा. वृत्ति-पुरुषकार (श्लो. 177) ग्रन्थाभ्यामवगम्यते। परंतु मुद्रित-क्षीरतरङ्गिण्यां भ्वादिषु भ्लक्ष इत्येव पाठो दृश्यते। सोऽपि पाठो मुद्रणाशुद्धया स्यादिति भाति; यतः चुरादिषु क्षीरस्वामिनैव भक्षधातुं प्रकृत्य, 'भक्षतेर्घञ्, भक्षः।' इत्युक्तम्, भ्वादिषु भक्षधातुस्तेन न पठितश्च। अतोऽत्र क्षीरतरङ्गिण्यां भ्वादौ अदनार्थको धातुः, पुरुषकारधातुवृत्तिकारपक्षानुसारेण भ्रक्ष इति वा स्यात्, अथवा क्षीरस्वामिनैव चुरादिषूनूद्यमानेन पाठेन भक्ष इति वा स्यात्। नतु भ्लक्ष इति—इति युक्तमुत्पश्यामः। सिद्धान्तकौमुद्यनुसारेण धातुरयमस्माभिरत्र विलिखितः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1180) "भ्रण शब्दार्थः" (I-भ्वादिः-452. अक. सेट्. पर.)

भ्राणकः-णिका, भ्राणकः-णिका, बिभ्रणिषकः-षिका, बम्भ्रणकः-बंभ्रणकः-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्कणतिवत् (293) ज्ञेयानि। [A]भ्रणितम्।

(1181) "भ्रन्शु अवस्रंसने" (I-भ्वादिः-756. अक. सेट्. आत्म.)

भ्रंशकः-शिका, भ्रशकः-शिका, बिभ्रंशिषकः-षिका, [1]बनीभ्रंशकः-बाभ्रशकः-शिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकध्वंसतिवत् (942) ज्ञेयानि। निष्ठायाम् [2]भ्रष्टम्-भ्रष्टः-भ्रष्टवान्, क्तिनि—भ्रष्टिः, क्त्वायाम्—भ्रंशित्वा-भ्रष्ट्वा, क्विपि-[3]वाहाभ्रट्-वाहभ्रड्-वाहभ्रट्-भ्रशौ-भ्रशः, इति च रूपाणीति विशेषः।

(1182) "भ्रन्शु अधःपतने" (IV-दिवादिः-1225. अक. सेट्. पर.)

भ्रंशकः-शिका, भ्रंशकः-शिका, बिभ्रंशिषकः-षिका, बाभ्रशकः-शिका; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिकध्वंसतिवत् (942) ज्ञेयानि। [4]भ्रश्यन्-न्ती, वाहभ्रट्-वाहाभ्रट्, [5]भ्रष्टम्-भ्रष्टः-भ्रष्टवान्,

---

1. भ्वादिषु 'स्रन्सु ध्वन्सु भ्रन्सु अवस्रंसने' इति पठ्यते। अत्र 'भ्रन्सु' इत्यस्य स्थाने मैत्रेय-क्षीरस्वामि-बोधिन्यास-सम्मताकार-कविकल्पद्रुमकार-प्रभृतिभिः 'भ्रन्शु' इति पाठोऽङ्गीकृतः। सिद्धान्तकौमुद्यादिषु पक्षभेदेन पाठोऽयमुररीकृतश्च। एवमेव, 'नीग् वञ्चुस्रंसुध्वंसुभ्रंसु—' (7-4-84) इत्यत्रापि एतैस्सर्वैरपि भ्रन्शु इत्येव पाठोऽङ्गीकृतः। एवञ्चात्र यङन्ते, एतेषां मते नीगागमे, यङ्निमित्तक उपधानकारलोपे च रूपमेवम्। अन्येषां मते तु 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घे बाभ्राशकः इत्यादीनि रूपाणि यङन्ते सर्वत्र ज्ञेयानि।
2. उदित्त्वेन क्त्वायामिड्विकल्पनान्निष्ठायामिण्निषेधः। उपधानकारलोपः, शकारस्य षत्वम्, निष्ठातकारस्य ष्टुत्वेन टकार इति चात्र प्रक्रिया ज्ञेया। एवमेव क्तिन्नादिष्वपि प्रक्रियोह्या।
3. वाहोऽश्वः। तस्माद् भ्रंशते इत्यर्थे 'क्विप् च' (3-2-76) इति क्विपि शकारस्य 'व्रश्च—' (8-2-36) इत्यादिना षकारे, तस्य जश्त्वेन डकारे चर्त्वविकल्पे, 'अन्येषामपि दृश्यते' (6-3-137) इति पूर्वपदस्य दीर्घे च वाहाभ्रट् इति रूपम्। क्वचिद् वाहभ्रट् इति पाठो दृष्टः, तदानीं दीर्घः पूर्वपदस्य नेति ज्ञेयम्।
4. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन् विकरणप्रत्ययः।
5. क्त्वायामिड्विकल्पनान्निष्ठायामिण्निषेधे, षत्वे ष्टुत्वे च रूपमेवम्।

A. 'वनात् कुमाराः क्कणिताग्र्यवेणवो व्रणद्विषाणभ्रणितान्भ्रमायुः॥' धा.का. 1.58.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भ्रंशित्वा-भ्रष्ट्वा । [2]भ्रंशनः, इमानि रूपाणि विशेषेण संभवन्तीति विशेषः । [A]भ्रंशनम् ।

(1183) "भ्रन्सु अवस्रंसने" (I-भ्वादिः-756. अक. सेट्. आत्म.)

भ्रंसकः-सिका, भ्रंसकः-सिका, बिभ्रंसिषकः-षिका, [3]बनीभ्रसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकध्वंसतिवत् (942) ज्ञेयानि । क्विपि [4]पर्णभ्रः-पर्णभ्रसौ-पर्णभ्रसः इति रूपमिति विशेषः । [B]भ्रस्तः ।

(1184) "भ्रमु चलने" (I-भ्वादिः-850. अक. सेट्. पर.) ज्वलादिः।

'चलने भ्रमति भ्रम्येत् शमादेर्भ्राम्यति भ्रमेत् ॥' (श्लो. 147) इति देवः । [5]भ्रमकः-मिका, [6]भ्रमकः-मिका, बिभ्रमिषकः-षिका, बम्भ्रमकः-बंभ्रमकः-मिका, इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्लाम्यतिवत् (283) बोध्यानि । शतरि-[7]भ्रमन्-[C]भ्रम्यन्,

---

1. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पे रूपद्वयं बोध्यम् ।
2. तच्छीलादिषु कर्तृषु, 'चलनशब्दार्थात्—' (3-2-148) इति युच् ।
3. काशिकावृत्त्यादिषु प्राचीनग्रन्थेषु, मा. धा. वृत्त्यादिषु धातुविषयकग्रन्थेषु च सर्वत्र, 'नीग् वञ्चुस्रंसुध्वंसुभ्रंसु—' (7-4-84) इत्यत्राविगीतपाठः भ्रंसु इत्येव । तेनात्र यङन्ते नीगागमे, उपधानकारलोपे च बनीभ्रसकः इत्यादीनि रूपाणि इति ज्ञेयम् ।
4. क्विपि, उपधानकारलोपे, धातुसकारस्य रुत्वविसर्गयोश्च रूपमेवम् ।
5. 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति वृद्धिनिषेधः ।
6. 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च, (ग. सू. भ्वादौ) इत्यमन्तत्वेन मित्त्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ परतः उपधायाः ह्रस्वः ।
7. शतरि 'वा भ्राशभ्लाशभ्रमु—' (3-1-70) इत्यनेन वा श्यन् । तेन रूपद्वयं बोध्यम् ।

A. '...... मृश्यद्भ्रंशनवर्शकाक्रुशदयस्तृष्णाहरो हृष्य मे ॥' धा. का. 2. 66.

B. 'अभ्रस्तविस्रम्भजुषा बलेन समं प्रवृत्तो भुवनाभिवृद्ध्यै ।' धा. का. 2. 3.

C. 'तापं मथन्ती कणिका वमन्ती भ्रम्यत्तरङ्गा क्षरति स्फुटं या ॥' धा. का. 2.23. (अत्र धातुकाव्ये, क्षीरतरङ्गिण्यां च शतरि, भ्राम्यन् इत्येव दीर्घपाठः परिदृश्यते । परं तु दैवादिकस्यैव भ्रमुधातोः 'शमामष्टानां दीर्घः श्यनि' (7-3-74) इति दीर्घविधानाद् भौवादिकस्यास्य दीर्घाप्रसक्तेः मुद्रणाशुद्धिरेव ग्रन्थद्वयेऽपि प्रकृतस्थले इति मनीषयाऽस्माभिः भ्रम्यन् इति शास्त्रीयपाठ एवादृत इति ज्ञेयम् ।)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भ्रमः-भ्रमः, युचि-[2]भ्रमणः, क्विपि-[3]अग्रेभ्रूः-सुभ्रूः-सुभ्रुवौ-सुभ्रुवः, [4]भ्रमिः, [5]उरभ्रः, [6]भृमिः, [7]भ्रमरः, इत्यादीनि रूपाण्यस्य विशेषेण भवन्तीति विशेषः।

## (1185) "भ्रमु अनवस्थाने"

(IV-दिवादिः-1205. अक. सेट्. पर.) शमादिः।

अनवस्थानम्=देशान्तरगमनम्।

'चलने भ्रमति भ्रम्येत्, शमादेर्भ्राम्यति भ्रमेत्॥' (श्लो. 147) इति देवः। भ्रमकः-मिका, भ्रमकः-मिका, बिभ्रमिषकः-षिका, बम्भ्रमकः-बंभ्रमकः-मिका; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्राम्यतिवत् (283) ज्ञेयानि। [8]भ्रमी[A],

---

1. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि वा णप्रत्ययः। पक्षेऽच्प्रत्ययश्च। णप्रत्ययपक्षेऽपि, 'नोदात्तोपदेश-'(7-3-34) इति वृद्धिनिषेधः। क्षीरस्वामी तु "णे भ्रामः। भ्रमः इति दुर्गः।" इति रूपे प्रदर्शितवान्। 'निषेधाश्च बलीयांसः' (परिभाषा 122) इति न्यायेन वृद्धिनिषेध एवात्र णप्रत्ययपक्षेऽपि न्याय्य इति प्रतिभाति।
2. 'चलनशब्दार्थाद्—' (3-2-148) इति तच्छीलादिषु कर्तृषु युच्। णत्वम्।
3. क्विपि, 'ऊङ् च गमादीनामिति वक्तव्यम्' (वा. 6-4-40) इति वचनेन अनुनासिकलोपे, धात्वकारस्य ऊकारादेशे च रूपमेवम्। काशिकादिषु अग्रेभ्रूः इत्युदाहृतम्। भाष्ये तु प्रकृतसूत्रे (6-4-40) भ्रूः इत्येवोदाहृतम्।
4. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावे स्त्रियामिक्प्रत्ययः।
5. उरसा भ्रमतीति उरभ्रः = मेषः। 'अन्येष्वपि दृश्यते' (3-2-101) इति डप्रत्यये, पृषोदरादित्वात् (6-3-109) उरश्शब्दसकारस्य लोपे च रूपमेवम्। केचित्तु उरु भ्रमतीति व्युत्पत्तिं कृत्वा, पृषोदरादित्वादेव उरुशब्दस्थरेफोत्तरोकारस्याकारे च रूपं साधयन्ति।
6. 'भ्रमेः सम्प्रसारणं च' (द. उ. 1-49) इतीन्प्रत्यये, प्रत्ययस्य कित्वेन सम्प्रसारणे च रूपमेवम्। भृमिः= वायुः।
7. 'अर्त्तिकमिभ्रमि—' (द. उ. 8-62) इत्यरन्प्रत्यये रूपमेवम्। भ्रमरः=अलिः।
8. तच्छीलादिषु, कर्तृषु, 'शमित्यष्टाभ्यो घिनुण्' (3-2-141) इति घिनुण्प्रत्ययः। "अत्र आत्रेयः—' 'अभिधानवशात् अकर्मकादेव अयमिष्यते। तेन, 'भ्रमिता वनम्' इत्यत्र 'तृन्' (3-2-135) इति सूत्रेण तृन्नेव।' इति। एवञ्च अयं सकर्मकोऽकर्मकश्चेत्यनेनासूचि॥" इति मा. धा. वृत्तावुक्तमिहानुसन्धेयम्।

A. 'भ्रमी कदम्बसंभिन्नः पवनः शमिनामपि।' भ. का. 7.5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भ्रमन्-भ्राम्यन्-न्ती-ती, [2]बभ्रमिवान्-भ्रेमिवान्, इति रूपाण्यस्य भवन्तीति विशेषः ।

(1186) "भ्रस्ज पाके" (VI-तुदादिः-1284. सक. अनि. उभ.)

'भृज्जते भृज्जति भ्रस्जेः भर्जने भर्जते भृजेः ।' (श्लो. 68) इति देवः ।

[3]भर्जकः-र्जिका, भ्रज्जकः-ज्जिका, भर्जकः-र्जिका, भ्रज्जकः-ज्जिका, [4]बिभर्जिषकः-बिभर्क्षकः-बिभ्रज्जिषकः-बिभ्रक्षकः-क्षिका, [5]बरीभृज्जकः- ज्जिका ;

---

1. 'वा भ्राशभ्लाशभ्रमु—' (3-1-70) इति श्यन्विकल्पः । तेन पक्षे औत्सर्गिकः 'कर्तरि शप्' (3-1-68) इति शप् । श्यन्पक्षे, 'शमामष्टानां दीर्घः श्यनि' (7-3-74) इति दीर्घः । तेन रूपद्वयम् ।

2. कर्तरि लिटः क्वसौ, 'वा जॄभ्रमुत्रसाम्' (6-4-124) इत्येत्वाभ्यासलोपौ विकल्पेन भवतः । पक्षे, द्विर्वचने 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे बभ्रमिवान् इति रूपम् । तेन रूपद्वयं ज्ञेयम् ।

3. ण्वुलि, 'भ्रस्जो रोपधयो रमन्यतरस्याम्' (6-4-47) इति रेफोपधावर्णयोर्निवृत्तिः, रमागमश्च विकल्पेन भवतः । रमागमे रेफोत्तराकार उच्चारणार्थस्सन् इत्संज्ञां लब्ध्वा लुप्यति । रमागमाभावपक्षे, उपधाभूतस्य सकारस्य श्चुत्वेन शकारे, तस्य 'झलां जश् झशि' (8-4-53) इति जश्त्वेन जकारः । एवमेव रूपद्वयं तृजादिषु, ण्यन्ते च ज्ञेयम् ।

4. सन्नन्ते सर्वत्र, 'सनीवन्तर्धभ्रस्ज—' (7-2-49) इत्यादिना इड्विकल्पः । इट्पक्षे इडभावपक्षे च रमागमस्य वैकल्पिकत्वम् । तेन सन्नन्ते चातूरूप्यं सर्वत्रेति ज्ञेयम् । इडभावपक्षे रमागम-रेफोपधानिवृत्तिपक्षे च, 'व्रश्चभ्रस्ज—' (8-2-36) इत्यादिना धातुजकारस्य षकारे, 'षढोः कः सि' (8-2-41) इति षकारस्य ककारे, सनः षत्वे च बिभर्क्षकः इति रूपम् । इडभावपक्ष एव रेफोपधानिवृत्ति-रमागमाभावपक्षे, 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इत्यनेन झल्परकत्वेन सकारस्य निवृत्तिः, षत्वकत्वादिकं चेति ज्ञेयम् ।

5. यङन्ते, 'भ्रस्जादेशात् सम्प्रसारणं (पूर्वं) विप्रतिषेधेन' (वा. 6-4-47) इति वचनात्, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिभृज्जतीनां ङिति च' (6-1-16) इति सम्प्रसारणे पूर्वरूपे, द्विर्वचने, अभ्यासे 'उरत्' (7-4-66) इत्यनेनाकारः, स च रपरः । 'रीग् ऋत्वत इति वक्तव्यम्' (वा. 7-4-90) इति रीगागमः । उत्तरखण्डे सकारस्य जश्त्वेन दकारः, तस्य श्चुत्वेन जकारः इति काशिका (6-1-16) "नच श्चुत्वे दत्वमसिद्धम् ; '—भृज्जतीनाम्—' (6-1-16) इति निर्देशात् ।" इति व्याख्यातारोऽप्याहुः । मा. धा. वृत्तौ तु "... .. सकारस्यैव श्चुत्वे शकारः, तस्य, 'झलां जश् झशि' (8-4-53) इति जश्त्वेन जकारेऽपि रूपं सेत्स्यति ।" इत्युक्तम् ; एतदेव साध्विति प्रतिभाति । यङन्ते द्विजकारविशिष्टं रूपमेव सर्वत्रेति ज्ञेयम् । स्पष्टमिदं भाष्यप्रदीपोद्योते (6-4-47) ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]भर्ष्टा-भर्ष्ट्री-भ्रष्टा-भ्रष्ट्री, भर्जयिता-भ्रज्जयिता-त्री, बिभर्जिषिता-बिभर्क्षिता-बिभ्रज्जिषिता-बिभ्रक्षिता-त्री, बरीभृज्जिता-त्री ; — —

[2]भृज्जन्-न्ती-ती, भर्जयन्-भ्रज्जयन्-न्ती, बिभर्जिषन्-बिभर्क्षन्-बिभ्रज्जिषन्-बिभ्रक्षन्-न्ती ; — —

भर्क्ष्यन्-भ्रक्ष्यन्-न्ती-ती, भर्जयिष्यन्-भ्रज्जयिष्यन्-न्ती-ती, बिभर्जिषिष्यन्-बिभर्क्षिष्यन्-बिभ्रज्जिषिष्यन्-बिभ्रक्षिष्यन्-न्ती-ती ; —

भृज्जमानः, भर्जयमानः-भ्रज्जयमानः, बिभर्जिषमाणः-बिभर्क्षमाणः-बिभ्रज्जिषमाणः-बिभ्रक्षमाणः, बरीभृज्ज्यमानः ; — —

भर्क्ष्यमाणः-भ्रक्ष्यमाणः, भर्जयिष्यमाणः-भ्रज्जयिष्यमाणः, बिभर्जिषिष्यमाणः-बिभर्क्षिष्यमाणः-बिभ्रज्जिषिष्यमाणः-बिभ्रक्षिष्यमाणः, बरीभृज्जिष्यमाणः;

धानाभृट् [3]प्रभृट्-प्रभृड्-प्रभृज्जौ-प्रभृज्जः ; — —

[4]भृष्टम्[A]-भृष्टवान्, भर्जितः-भ्रज्जितः, बिभर्जिषितः-बिभर्क्षितः-बिभ्रज्जिषितः-बिभ्रक्षितः, बरीभृज्जितः-तवान् ; — —

---

1. तृचि, रेफोपधानिवृत्तौ रमागमे च जकारस्य षकारे ष्टुत्वे **भर्ष्टा** इति रूपम्। रमभावपक्षे तु, 'स्कोः—' (8-2-29) इति सकारलोपे षत्वष्टुत्वयोश्च **भ्रष्टा** इति रूपमिति ज्ञेयम्। एवमेव तव्यदादिष्वपि प्रक्रियोह्या।

2. शतरि, तुदादित्वेन कर्तरि शप्रत्यये, तस्य सार्वधातुकत्वेन, 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावः। तेन सम्प्रसारणादिषु रूपमेवम्। एवं शानच्यपि प्रक्रिया ज्ञेया।

3. क्विपि, पदान्तनिमित्तके संयोगादिलोपे, सम्प्रसारणे, जकारस्य षत्वे जश्त्वचर्त्वयोश्च रूपमेवम्। **धानाभृट्**=भ्राष्ट्रम्। **काशिकायाम्** (8-2-36) उदाहृतमेतत् पदम्।

4. निष्ठायाम्, सम्प्रसारणे पूर्वरूपे षत्वष्टुत्वयोश्च रूपम्। एवमेव क्त्वा-क्तिन्प्रभृतिष्वपि प्रक्रिया ज्ञेया। **क्षीरतरङ्गिण्यां** 'प्रसारणविषये नेष्यते—भृष्टलुचि (ञ्चि?) तल्लिङ्गात्।' इति वाक्यं लक्ष्यते। तस्यायमर्थः— संप्रसारणयोग्यस्थले '**भ्रस्जो रोपधयो रमन्यतरस्याम्**' (6-4-47) इति सूत्रस्य प्रवृत्तिर्न; तत्र निदानं तु राजदन्तादिगणे (2-2-31) भृष्टलुचि (ञ्चि?) तपदस्य निर्देशरूपात् लिङ्गात्—इति। अत्र गणे (2-2-31) **काशिकादिषु भृष्टलुञ्चितम्** इत्येव पदं पठितम्, **गणरत्नमहोदधौ** राजदन्तादिगणे (पु 120-121) "पूर्वं लुञ्चितम्=अपनीतम्, पश्चाद् **भृष्टम्**=पक्वम् भृष्टलुञ्चितम्। यथा—'यद्भृष्टलुञ्चितशशेव शशाङ्कपात्री।" इत्युक्तमिहावधेयम्।

A. '......**प्रभृष्ट**पललान् क्षिपन् अरिमर्तिं कृषन् माधवः।' धा. का. 2. 72.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भर्जः-भ्रज्जः, भर्जः-भ्रज्जः, बिभर्जिषुः-बिभर्क्षुः-बिभ्रज्जिषुः-[A]बिभ्रक्षुः, [1]बाभ्रज्जः ;
भर्ष्टव्यम्-भ्रष्टव्यम्, भर्जयितव्यम्-भ्रज्जयितव्यम्, बिभर्जिषितव्यम्-बिभर्क्षितव्यम्-बिभ्रज्जिषितव्यम्-बिभ्रक्षितव्यम्, बरीभृज्जितव्यम् ;
भर्जनीयम्-भ्रज्जनीयम्, भर्जनीयम्-भ्रज्जनीयम्, बिभर्जिषणीयम्-बिभर्क्षणीयम्-बिभ्रज्जिषणीयम्-बिभ्रक्षणीयम्, बरीभृज्जनीयम् ;
[2]भर्ग्यः-भ्रद्ग्यः, भर्ज्यम्-भ्रज्ज्यम्, बिभर्जिष्यम्-बिभर्क्ष्यम्-बिभ्रज्जिष्यम्-बिभ्रक्ष्यम्, बरीभृज्ज्यम् ;
ईषद्भर्जः-दुर्भर्जः-सुभर्जः, ईषद्भ्रज्जः-दुर्भ्रज्जः-सुभ्रज्जः ;
भृज्ज्यमानः, भर्ज्यमानः-भ्रज्ज्यमानः, बिभर्जिष्यमाणः-बिभर्क्ष्यमाणः-बिभ्रज्जिष्यमाणः-बिभ्रक्ष्यमाणः, बरीभृज्ज्यमानः ;
भर्गः-भ्रद्गः, भर्जः-भ्रज्जः, बिभर्जिषः-बिभर्क्षः-बिभ्रज्जिषः-बिभ्रक्षः, बरीभृज्जः ;
भर्ष्टुम्-भ्रष्टुम्, भर्जयितुम्-भ्रज्जयितुम्, बिभर्जिषितुम्-बिभर्क्षितुम्-बिभ्रज्जिषितुम्-बिभ्रक्षितुम्, बरीभृज्जितुम् ;
भृष्टिः, भर्जना-भ्रज्जना, बिभर्जिषा-बिभर्क्षा-बिभ्रज्जिषा-बिभ्रक्षा, बरीभृज्जा ;
भर्जनम्-भ्रज्जनम्, भर्जनम्-भ्रज्जनम्, बिभर्जिषणम्-बिभर्क्षणम्-बिभ्रज्जिषणम्-बिभ्रक्षणम्, बरीभृज्जनम् ;
भृष्ट्वा, भर्जयित्वा-भ्रज्जयित्वा, बिभर्जिषित्वा-बिभर्क्षित्वा-बिभ्रज्जिषित्वा-बिभ्रक्षित्वा, बरीभृज्जित्वा ;
[3]प्रभृज्ज्य, प्रभर्ज्य-प्रभ्रज्ज्य, प्रबिभर्जिष्य-प्रबिभर्क्ष्य-प्रबिभ्रज्जिष्य-प्रबिभ्रक्ष्य,

---

1. यङन्तात् पचाद्यचि, 'यङोऽचि च' (2-4-74) इति यङो लुकि, लुका लुप्ते स्थले स्थानिवत्त्वप्रतिषेधेन यङ्निमित्तकङित्त्वानाश्रयणात् सम्प्रसारणादिकं न भवति। आर्धधातुकपरत्वाभावात् रमागमरेफोपधानिवृत्त्यादिकमपि न भवति। तेनात्र यथाशास्त्रम्, अभ्यासे 'दीर्घोऽकितः' (7-4-83) इति दीर्घः। उत्तरखण्डे सकारस्य श्चुत्वजश्त्वे च भवत इति ज्ञेयम्।
2. धातोरस्य निष्ठायामनिट्त्वेन, ण्यति, रोपधनिवृत्तिरमागमपक्षे, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति जकारस्य कुत्वे **भर्ग्यम्** (:) इति रूपम्। रमागमाद्यभावपक्षे तु, 'पूर्वत्रासिद्धम्' (8-2-1) इति शास्त्रात् जश्त्वात् पूर्वं 'चजोः—' (7-3-52) इति कुत्वे, पश्चात् सकारस्य जश्त्वेन दकारे च **भ्रद्ग्यम्** (:) इति रूपमिति ज्ञेयम्। एवमेव घञ्यपि रूपद्वयस्य निष्पत्तौ निदानं ज्ञेयम्।
3. ल्यपः स्थानिवत्त्वेन कित्त्वात् सम्प्रसारणे, सकारस्य श्चुत्वे च रूपमेवम्।

A. 'आश्वास्याक्षः क्षणाल्लोकान् **बिभ्रक्षुरिव** तेजसा।
रुषा **बिभ्रज्जिषुप्रख्यं** कपिं बाणैरवाकिरत्॥' भ. का. 9. 34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



प्रबरीभृज्ज्य ;

| | | |
|---|---|---|
| भर्जम् २-भ्रज्जम् २, भृष्ट्वा २, | भर्जम् २-भ्रज्जम् २, भर्जयित्वा २-भ्रज्जयित्वा २, | बिभर्जिषम् २- बिभर्जिषित्वा २- |
| बिभर्क्षम् २-बिभ्रज्जिषम् २-बिभ्रक्षम् २, बिभर्क्षित्वा २-बिभ्रज्जिषित्वा २-बिभ्रक्षित्वा २, | बरीभृज्जम् २ ; बरीभृज्जित्वा २ ; | |

[1]भृगुः, [2]भृज्जनम्, [3]भ्राष्ट्रम् ।

(1187) " **टु भ्राजृ दीप्तौ** " (I-भ्वादिः-181. 823 अक.सेट्. आत्म.) [अ]

भ्राजकः-जिका, भ्राजकः-जिका, बिभ्राजिषकः-षिका, बाभ्राजकः-जिका ;

---

1. 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (द. उ. 1. 113) इत्यनेन कुप्रत्यये सम्प्रसारणे सकारलोपे, न्यङ्क्वादित्वात् (7-3-53) कुत्वे च रूपमेवम् । भृज्जति= परिपक्वविज्ञानो भवतीति **भृगुः**=महर्षिविशेषः ।
2. 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (द. उ. 5.25) इति क्युन्प्रत्यये सम्प्रसारणे च रूपम् । वाहुलकात् लोकेऽपि प्रयोगः ।
3. भ्रस्जिगमि—' [द. उ. 8-80] इत्यादिना ष्ट्रन्प्रत्ययः वृद्धिश्च, वाहुलकात् रमागमो न । उपधासकारस्य लोपस्तु भवत्येव । धातुजकारस्य षत्वे ष्टुत्वे च रूपमेवम् । **भ्राष्ट्रम्**=भर्जनसाधनीभूतः पात्रविशेषः ।

[अ] भ्वादौ प्रथमतः, '**भ्राजृ दीप्तौ**' इति पठित्वा, पुनर्घटादौ '**टु भ्राजृ दीप्तौ**' इति पठ्यते । इमौ उभावपि दीप्त्यर्थकौ ऋदितौ चेति ज्ञायते । **न्यासकारस्तु '**भ्राज दीप्तौ**'** इत्येव '**भ्राजभासधुर्वि—**' (3-2-177) इत्यत्र पपाठ । **पदमञ्जर्यामपि** (7-4-3) '**भ्राज** दीप्तौ' इत्येव पाठो लक्ष्यते । '**भ्राजधातोः** ऋदित्करणमपाणिनीयम् ।' इति **काशिका** (7-4-3) अत्र ज्ञेया । '...... ऋदित्त्वमनुदात्तेत्त्वमात्रफलम् ।' इति **मा. धा. वृत्तिः** । ऋदित्त्वस्य तिङन्त एवोपयोगादस्माभिरुभावपि धातू समुच्चित्योपात्तौ । घटादिष्वेव फणादयः सप्त धातवोऽन्ते पठिताः । तत्र '**टु भ्राजृ—**' इत्येव पाठः **न्यासकार-मैत्रेय-रक्षित-पुरुषकार-सायण-सिद्धान्तकौमुद्यादिसम्मतः** । **क्षीरस्वामी** तु '**भ्राजृ**, टु भ्राश्—' इत्यादि पठित्वा, 'टुरुभयस्य—**इत्येके** । 'ट्वितोऽथुच्' (3-3-89) **भ्राजथुः** ।" इत्याह । **चान्द्राणां काशकृत्स्नीयानां** च धातुपाठे **भ्राज** इत्येव घटादौ पठितः न तु '**टु भ्राजृ**' इति **क्षी. टीकायां** प्रतिपादितम् । एतत् सर्वमत्रानुसन्धेयम् । 'अवश्यपठितव्येन फ[फा ?]णादिकेन **भ्राजते** इत्यादीनां सिद्धेः इह (=घटादिभिन्नस्थले भ्वादिषु) पाठोऽनार्ष इव ।' इति **न्यासकारवचनं मा. धा. वृत्तौ** उपात्तमप्यत्रावधेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना, भौवादिककाशतिवत् (186) ज्ञेयानि। क्विपि — [1]विभ्राक्[A]-विभ्राग्-विभ्राजौ-विभ्राजः, [2]भ्राजिष्णुः[B], [3]विभ्राट्-विभ्राड्-विभ्राजौ-विभ्राजः, [4]भ्राजथुः, [5]बभ्राजिवान्, बभ्राजिवान्-भ्रेजिवान्, [6]भ्राता, [7]नभ्राट्, भ्राष्टिः, इति रूपाण्यस्य सम्भवन्तीति विशेषः।

---

1. 'भ्राजभासधुर्वि—' (3-2-177) इत्यादिना तच्छीलादिषु कर्तृषु क्विप्प्रत्ययः। 'चोः कुः' (8-2-30) इति पदान्ते कुत्वम्। एतच्च घटादिष्वपठितस्य 'भ्राजृ दीप्तौ, इति भौवादिकस्य भ्राजतेः क्विपि रूपमिति ज्ञेयम्।

2. 'भुवश्च' (3-2-138) इत्यत्र चकारेणास्मादपि धातोः इष्णुच्प्रत्यय इति काशिकादिषूच्यते। अत्रपि भ्राजिष्णुरिति द्विविधस्यापि भ्राजतेः सम्पद्यते इति बहवः। 'भ्राजिष्णुना लोहितचन्दनेन—' इति काशिकामुपादाय पदमञ्जर्याम्—'नैतद् भाष्ये समाश्रितम्।' इत्युक्तम्। इदानीं भाष्यकोशेषु 'भुवश्च' (3-2-138) इति सूत्रस्य भाष्यमेव नोपलभामहे। धातुकाव्यव्याख्याने तु (2-20) घाटादिकस्य 'टु भ्राजृ—' इति धातोः इष्णुच्प्रत्यय इति प्रतिपादितम्।

3 'टु भ्राजृ—' इत्यस्य ताच्छीलिके क्विपि, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राज—' (8-2-36) इत्यनेन षत्वे, जश्त्वचर्त्वयोश्च रूपमेवम्। क्विब्विधायके सूत्रे काशिकायाम् (3-2-177) विभ्राट् इत्युदाहृतत्वेऽपि, सूत्रे घटादिपठितयोः तदितरयोरुभयोरपि भ्राजधात्वोर्ग्रहणमेव ; षत्वं तु 'व्रश्चभ्रस्ज—' (8-2-36) इत्यत्र राजधातुसाहचर्यात् फणादि (घटादि) भ्राजतेरेव इत्यादिकं प्रकृतस्थले मा. धा. वृत्तौ स्फुटम्।

4. 'ट्वितोऽथुच्' (3-3-89) इति भावेऽथुच्प्रत्यये रूपमेवम्।

5. कर्तरि लिटः क्वसौ घटादेरन्यत्र पठितस्य भ्राजते रूपमेवम्। घाटादिकस्य क्वसौ तु, 'फणां च सप्तानाम्' (6-4-125) इत्येत्वाभ्यासलोपविकल्पः। तेन रूपद्वयमिति ज्ञेयम्।

6. 'भ्राजते इति भ्राता' इति रूपं क्षीरतरङ्गिण्यां, दशपाद्युणादिवृत्तौ च (द. उ. 2.3) भ्राजतेस्तृनि, तृचि वा, पृषोदरादित्वात् (6-3-109) जकारलोपे च साधितम्। भाष्ये (1-2-68) तु 'यदि तावद् बिभर्तीति भ्राता' इत्युक्तत्वात् बिभर्तेर्धातोरेव भ्रातृशब्दनिष्पादनं न्याय्यमिति प्रतिभाति।

7. 'न भ्राजते इति नभ्राट्। नञ्समासे, 'न भ्राण्नपात्—' (6-3-75) इत्यादिना नञः प्रकृतिभावः।

A. 'अभ्रेजि विभ्राग्भिर्नीजितैश्च यत् कदाऽप्यशोचद्भिरशेषजन्तुभिः।' धा. का. 1.25.

B. 'कृष्णोऽपि रेजे पथि गोपबालैः भ्राजिष्णुभिः भ्राशितपार्श्वदेशः।' धा. का.2.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1188) " टु आशृ दीप्तौ " (I-भ्वादिः-824. अक. सेट्. आत्म.)

'आशते भ्लाशते दीप्तौ आश्यते भ्लाश्यते तथा ॥' (श्लो. 167) इति देवः।

आशकः-शिका, आशकः-शिका, बिआशिषकः-षिका, बाआशकः-शिका ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककाशतिवत् (186) ज्ञेयानि ।

[1]आश्यमानः-आशमानः, इति शानचि रूपमिति विशेषः। [2]आशथुः, [A]आशितः।

(1189) " श्री भये " ( IX-क्र्यादिः-1505. सक. अनि. पर.)

प्वादिः, ल्वादिश्च ।

'— भरणे' इति मैत्रेयक्षीरस्वामिप्रभृतयः पठन्ति ।

श्रायकः-यिका, श्रायकः-यिका, बिश्रीषकः-षिका, बेश्रीयकः-यिका ;

श्रेता-त्री, श्राययिता-त्री, बिश्रीषिता-त्री, बेश्रीयिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिकप्लिनातिवत् (1081) ज्ञेयानि ।

[3]श्रीणम्-णः-णवान्, श्रीतम्-तः-तवान्, [4]श्रिणन्[B]-न्ती इति विशेषः।

(1190) " श्रुड संवरणे " (VI-तुदादिः-1395. सक. सेट्. पर.)

कुटादिः ।

मैत्रेयक्षीरस्वामिमतेनायं लिख्यतेऽस्माभिः। यद्यपि सिद्धान्तकौमुद्यादिषु, मा. धा. वृत्तौ च न पठ्यते, तथापि मा. धा. वृत्तौ चुडधातुप्रकरणे (तुदादौ) उद्धृतेन मैत्रेयरक्षितसम्मतपाठेन संवाददर्शनादूह्यते इत्यपि ज्ञेयम्।

श्रोडकः-डिका, श्रोडकः-डिका, बुश्रुडिषकः-षिका, बोश्रुडकः-डिका ;

इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि ।

---

1. शानचि, 'वा आश—' (3-1-70) इत्यादिना श्यन् विकल्पेन भवति ।
2. धातोरस्य द्वित्वात्, भावादौ 'द्वितोऽथुच्' (3-3-89) इति अथुच्प्रत्ययः।
3. 'अस्य ल्वादित्वमप्यस्ति इति द्रुमे' इति धा. का. व्याख्यायाम् (3-9) उपादानात् 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वे नकारस्य णत्वे च रूपमेवम्। ल्वादित्वाभावे श्रीतम् इति, अत्र निष्ठानत्वं नेति ज्ञेयम् ।
4. शतरि, 'क्र्यादिभ्यः —' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे णत्वे च रूपमेवम् ।

A. 'कृष्णोऽपि रेजे पथि गोपबालैर्भ्राजिष्णुभिश्राशितपार्श्वदेशः।' धा. का. 2. 20.

B. 'व्रीताशवृंहितजुषाऽश्रिणता गजेन प्रक्षेतुमज्ञमनसा समनुद्रुतेन ।' धा. का. 3.9.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1191) "भ्रूण आशायाम्" (X-चुरादिः-1691. अक. सेट्. आत्म.) आकुस्मीयः ।

'—आशाविशङ्कयोः' इति धातुपाठे पठ्यते। '—आशंसायाम्' इति मैत्रेयः ।

भ्रूणकः-णिका, बुभ्रूणयिषकः-षिका, भ्रूणयिता-त्री, बुभ्रूणयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि चौरादिककूटयतिवत् (240) ज्ञेयानि। भ्रूणः[A]।

(1192) "भ्रेजृ दीप्तौ" (I-भ्वादिः-180. अक. सेट्. आत्म.)

भ्रेजकः-जिका, भ्रेजकः-जिका, बिभ्रेजिषकः-षिका, बेभ्रेजकः-जिका, भ्रेजिता-त्री, भ्रेजयिता-त्री, बिभ्रेजिषिता-त्री, बेभ्रेजिता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि । क्विपि-विभ्रेक्-विभ्रेग्-विभ्रेजौ-विभ्रेजः; इति रूपमिति विशेषः ।

(1193) "भ्रेषृ गतौ" (I-भ्वादिः-884. अक. सेट्. उभ.)

'भेषृ—इत्यपि' इति मैत्रेयः। '—भये, चलने च' इति क्षीरस्वामी पपाठ। 'भ्लेषृ—' इत्यन्ये इति धा. का. (२-२७)।

भ्रेषकः-षिका, भ्रेषकः-षिका, बिभ्रेषिषकः-षिका, बेभ्रेषकः-षिका; भ्रेषिता-त्री, भ्रेषयिता-त्री, बिभ्रेषिषिता-त्री, बेभ्रेषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजेपतिवत् (429) बोध्यानि। अस्य धातोः उभयपदित्वात् शतरि भ्रेषन्[B]-न्ती, भ्रेषिष्यन्-न्ती-ती; इत्यादीनि रूपाण्यधिकानीति विशेषः।

(1194) "भ्लक्ष अदने" (I-भ्वादिः-893. अक. सेट्. उभ.)

'भक्ष' इति क्षीरस्वामी इति मा. धातुवृत्तावुक्तम्। पुरुषकारेऽप्येवमेव। 'भक्ष' इति मैत्रेयः। 'प्लक्ष' इति दुर्गः। मुद्रितक्षीरतरङ्गिण्यां तु 'भ्लक्ष—' इत्येव पाठो दृश्यते। चुरादिषु भक्ष (२१) धातौ क्षीरस्वामिनैव 'भक्षतेर्घञ्-भक्षः।' इत्युक्तत्वात् अदनार्थकस्य भक्षतेर्भ्वादिषु कुत्राप्यपाठात्, एनमेव

A. 'आकूणिताक्षमपि च स्मिततूणितास्यं
भ्रूणस्य शाठ्यजनयक्ष्यमवेक्ष्य गात्रम्।' धा. का. 3-35.

B. 'चाग्र्या व्ययद्दाशविलोकमेषभ्रेषज्झषा यासदर्घं स्पशन्ती ॥' धा. का. 2.27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



भक्षति मनुते इति भाति। **दुर्गादयस्तु** धातुममुं 'प्लुक्ष—' इति पठन्ति। "तस्य शिरः छित्त्वा मेधं प्राक्षारयन्, स प्रक्षोऽभवत्। तत् प्रक्षस्य प्रक्षत्वम्-यत् प्लुक्षशाखा—" (मैत्रायणीयसंहिता-6-3-10-2) इति श्रुत्यनुसारेण प्रपूर्वकात् क्षरतेः पचाद्यचि कपिलकादेराकृतिगणत्वात् (वा. 8-2-18) उपसर्गस्थरेफस्य लत्वे च प्लुक्षशब्दव्युत्पादनं कृतवतो **भाष्यकारस्य** न सम्मतमिति, अन्यथा (प्लुक्षधातुसद्भावे) अस्मादेव पचाद्यचि प्लुक्षशब्दसिद्धेः, श्रौतनिर्वचनस्याप्रसक्तेरिति मनीषया च सुदूरं विचार्य **माधवधातुवृत्तौ** पाठोऽयं निरस्त इति ज्ञेयम्। **शतपथब्राह्मणे** (3-8-3-12) 'प्रख्यो हवै नामैतत् यत् प्लुक्षः।' इत्युक्तमपीह ध्येयम्।

श्लक्षकः-क्षिका, श्लक्षकः-क्षिका, बिश्लक्षिषकः- षिका, बाश्लक्षकः-क्षिका; श्लक्षिता-त्री, श्लक्षयिता-त्री, बिश्लक्षिषिता-त्री, बाश्लक्षिता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिक**भ्रजति**वत् (926) ज्ञेयानि। अस्य धातोः उभयपदित्वात् शानचि-श्लक्षमाणः, श्लक्षिष्यमाणः, इति विशेषः। ल्यपि· [A]प्रश्लक्ष्य इति।

## (1195) "टु भ्लाशृ दीप्तौ" (I-भ्वादिः-825. अक. सेट्. आत्म.)

'भ्राशते भ्लाशते दीप्तौ भ्राश्यते भ्लाश्यते तथा॥' (श्लो. 167) इति **देवः**।

भ्लाशकः-शिका, भ्लाशकः-शिका, बिभ्लाशिषकः-षिका, बाभ्लाशकः-शिका; [1]भ्लाशमानः-भ्लाश्यमानः, कसुप्रत्यये [2]बभ्लाशिवान्-भ्लेशिवान्, [3]भ्लाशथुः; इत्यादीनि सर्वाणि रूपाणि भौवादिक**काशति**वत् (186) ज्ञेयानि। कर्तरि क्तप्रत्यये-[B]भ्लाशितः इति रूपम्।

## (1196) "भ्लेषृ गतौ" (I-भ्वादिः-885. अक. सेट्. उभ.)

अयं केवलं सि. **कौमुद्यामेव** उपात्तः। अन्येषु सर्वेषु ग्रन्थेषु 'भ्रेषृ' इत्यत्र 'भ्लेषृ इति अन्ये' इत्युक्तम्।

---

1. कर्त्रर्थे शानचि, 'वा भ्राशभ्लाश—' (3-1-70) इति श्यन् वा भवति। तेन रूपद्वयं बोध्यम्।
2. कसौ 'फणां च सप्तानाम्' (6-4-125) इत्येकाराभ्यासलोपयोर्विकल्पे रूपद्वयमिति ज्ञेयम्।
3. 'ट्वितोऽथुच्' (3-3-89) इति ट्वित्त्वात् अथुच्प्रत्यये रूपमेवम्।

A. 'लाषेण चाषांश्छषितान् ज्ञषित्वा **प्रश्लक्ष्य** भक्षन्ति यदम्बु नीचाः।' धा. का. 2.28.

B. '**विभ्लाशिते**ऽक्रूरथे सरामः स्मतपयोदस्वनभाजि तिष्ठन्॥' धा. का. 2.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



श्लेषकः-षिका, श्लेषकः-षिका, बिश्लेषिषकः-षिका, वेश्लेषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) बोध्यानि।

(1197) "**मकि मण्डने**" (I-भ्वादिः-89. सक. सेट्. आत्म.)

मङ्ककः-ङ्किका, मङ्ककः-ङ्किका, मिमङ्किषकः-षिका, मामङ्ककः-ङ्किका; मङ्किता-त्री, मङ्कयिता-त्री, मिमङ्किषिता-त्री, मामङ्किता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिककङ्कतिवत् (140) ऊह्यानि। [1]मङ्कनः, मङ्कणः, [2]प्रमङ्कनम्, [A]मङ्कितम्-तः-तवान्, [3]मङ्किः, [4]मङ्क्तिः; इत्यादीनि रूपाणि अस्य धातोः भवन्तीति विशेषः।

(1198) "**मख गत्यर्थः**" (I-भ्वादिः-132. अक. सेट्. पर.)

माखकः-खिका, माखकः-खिका, मिमखिषकः-षिका, मामखकः-खिका; इत्यादीनि सर्वाणि रूपाणि भौवादिककखतिवत् (141) ज्ञेयानि। शतरि-मखन्-न्ती इति विशेषः।

(1199) "**मखि गत्यर्थः**" (I-भ्वादिः-133. अक. सेट्. पर.)

मङ्खकः-ङ्खिका, मङ्खकः-ङ्खिका, मिमङ्खिषकः-षिका, मामङ्खकः-ङ्खिका; मङ्खिता-त्री, मङ्खयिता-त्री, मिमङ्खिषिता-त्री, मामङ्खिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि। णिनिप्रत्यये मङ्खी[B] इति।

(1200) "**मगि गत्यर्थः**" (I-भ्वादिः-148. अक. सेट्. पर.)

मङ्गकः-ङ्गिका, मङ्गकः-ङ्गिका, मिमङ्गिषकः-षिका, मामङ्गकः-ङ्गिका;

---

1. 'कुधमण्डार्थेभ्यश्च' (3-2-151) इति ताच्छीलिको युच्प्रत्ययः। बाहुलकादत्रैव णत्वे **मङ्कणः**=ऋषिविशेषः।
2. 'कृत्यचः' (8-4-29) इति प्राप्तस्य णत्वस्य 'इजादेः सनुमः' (8-4-32) इति इजादेरेवेति नियमात् णत्वं न।
3. औणादिके (द. उ. 1-46) इन्प्रत्यये रूपमेवम्।
4. 'वङ्क्यादयश्च' (द. उ. 1-35) इति क्तिन्प्रत्यये रूपम्। **मङ्क्तिः** = शवः।

A. 'फलाङ्कितान् वङ्कितवल्लिमङ्कितान् वनप्रदेशानुरुकाककोकिलान्।' धा. का. 1-13.
B. 'मखतकपोतं मदमङ्खिबर्हिणं लखत्पिकं नङ्खितखञ्जनोत्करम्।' धा. का. 1-19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मङ्गिता-त्री, मङ्गयिता-त्री, मिमङ्गिषिता-त्री, मामङ्गिता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिककङ्कतिवत् (140) बोध्यानि। [1]मङ्गलम्[A]।

## (1201) "मघि गत्याक्षेपे कैतवे च"

(I-भ्वादिः-111. अक. सेट्. आत्म.)

'गत्याक्षेपः=वेगगतिः, गमनारम्भो वा, कैतवम्-व्याजः' इति क्षीरस्वामी। 'आक्षेपो निन्दा, गतौ गमनारम्भे चेति स्वामी' इति मा. धा. वृत्तिः। मङ्घकः-ङ्घिका, मङ्घकः-ङ्घिका, मिमङ्घिषकः-षिका, मामङ्घकः-ङ्घिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि। ल्युटि-विमङ्घनम्[B] इति।

(1202) "**मघि मण्डने**" (I-भ्वादिः-160. अक. सेट्. उभ.) मङ्घकः-ङ्घिका, मङ्घकः-ङ्घिका, मिमङ्घिषकः-षिका, मामङ्घकः-ङ्घिका; मङ्घिता-त्री, मङ्घयिता-त्री, मिमङ्घिषिता-त्री, मामङ्घिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि। [2]मङ्घनः, [C]सुमङ्घितः-तवान् इतीमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1203) "**मच कल्कने**" (I-भ्वादिः-171. सक. सेट्. आत्म.)

'कल्कनम्=दम्भः शाठ्यं चेति मैत्रेयः' इति मा. धा. वृत्तिः। '—कत्थनं च' इति स्वामी। '—कथनं च' इति पुरुषकारः (श्लो. 47)। '—कथनम् इत्यन्ये' इति सि. कौमुदी। 'लोकरञ्जनार्थं साध्वाचारो दम्भः।' इति धा. का. (1.23)।

माचकः-चिका, माचकः-चिका, मिमचिषकः-षिका, मामचकः-चिका; मचिता-त्री, माचयिता-त्री, मिमचिषिता-त्री, मामचिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककचतिवत् (144) ज्ञेयानि। ल्युटि-[D]मचनम् इति।

---

1. 'मङ्गेरलच्' (द. उ. 8-123) इत्यलच्प्रत्यये रूपम्।
2. 'क्रुधमण्डार्थेभ्यश्च' (3-2-151) इति ताच्छीलिको युच्प्रत्ययः।

A. 'विलङ्घदेशं शबराङ्गनाजनप्रवङ्गितं मङ्गलधेनुतङ्गितम्॥' धा. का. 1-20.

B. 'प्रवङ्घमानस्य च तस्य सत्वरं विमङ्घनस्याधिकराघितात्मनः।' धा. का. 1.16.

C. 'सुमङ्घिताः शिङ्घितपुष्पसौरभा यद्वर्चमानाः पशुपाः प्रसेचिरे॥' धा. का. 1.22.

D. 'सकञ्चुकाः काञ्चनकाञ्चिभूषिता व्रजाङ्गना निर्मचनेन नर्मगा॥' धा. का. 1.23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1204) "मचि धारणोच्छ्रायपूजनेषु"

(I-भ्वादिः-173. अक. सेट्. आत्म.) [अ]

मञ्चकः-ञ्चिका, मञ्चकः-ञ्चिका, मिमञ्चिषकः-षिका, मामञ्चकः-ञ्चिका, इत्यादीनि सर्वाणि रूपाणि भौवादिककञ्चतिवत् (145) बोध्यानि। पचाद्यचि मञ्चः, क्तप्रत्यये-[A]मञ्चितः, [1]मञ्चिका, इतीमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1205) "मठ मदनिवासयोः" (I-भ्वादिः-332. अक. सेट्. पर.)

'मठ निवासे' इति **काशकृत्स्नधातुपाठ** इति क्षी. टीका।

'मण्ठते शपि शोकार्थे, **मठेन्मदनिवासयोः**॥' (श्लो. 82) इति **देवः**।

माठकः-ठिका, माठकः-ठिका, मिमठिषकः-षिका, मामठकः-ठिका; इत्यादीनि सर्वाणि रूपाणि प्रातिस्विकरूपाणि विना भौवादिककठतिवत् (148) ऊह्यानि। मठरः—बाहुलकादौणादिकेऽरप्रत्यये रूपम्। **मठरः**=अधमः।

## (1206) "मठि शोके" (I-भ्वादिः-263. अक. सेट्. आत्म.)

'**मण्ठते** शपि शोकार्थे, मठेन्मदनिवासयोः॥' (श्लो. 82) इति देवः।

**शोकः**= आध्यानम्=उत्कण्ठापूर्वकस्मरणम्। उत्कण्ठामात्रे तु **अकर्मकः**।

उन्मण्ठकः-ण्ठिका, मण्ठकः- ण्ठिका, मिमण्ठिषकः-षिका, मामण्ठकः-ण्ठिका; मण्ठिता-त्री, मण्ठयिता-त्री, मिमण्ठिषिता-त्री, मामण्ठिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। क्विपि-[B]प्रमन्-प्रमण्ठौ-प्रमण्ठः इति।

---

1. पचाद्यजन्तात् स्वार्थे कन्प्रत्यये रूपमेवम्। **मञ्चिका**=खट्वा।

A. 'अमुष्यनैर्**मञ्चित**चित्तपञ्चितत्रयीमतप्रस्तुचितैः शुभार्जकैः।' धा. का. 1.24.

B. 'अनन् कुमार्गेषु शुभाध्वनैव वन् **प्रमन्** भृशोत्कण्ठितगोपिके हरौ।' धा. का. 1.35.

[अ] **केचित्तु** धातुममुं न पठन्ति। **शाकटायन-धनपालादयस्तु** भञ्जयन्तरेणामुं पठन्ति। तद् यथा—'**मचुङ्**—' इति **शाकटायनः**। तस्य शास्त्रे उदितामेव धातूनां नुमागमः 'उदितः' (शा. सू. (4-2-197) इत्यनेन प्रतिपादितः। ङित्त्वादात्मनेपदम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1207) "**मडि विभाजने**" (I-भ्वादिः-272. सक. सेट्. आत्म.) [अ]

'भूषार्थे मण्डतीति स्यात् तत्र मण्डयतीति णौ ।
**मण्डते वेष्टने**............... ॥' (श्लो. 84) इति देवः ।

मण्डकः-ण्डिका, मण्डकः-ण्डिका, मिमण्डिषकः-षिका, मामण्डकः-ण्डिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। [1]मण्डिता, [2]मण्डूकः, [3]मण्डलम्, इत्यादीन्यस्माद् भवन्तीति विशेषः। [A]मण्डितः।

(1208) "**मडि भूषायाम्**" (I-भ्वादिः-321. अक. सेट्. पर.)

'भूषार्थे मण्डतीति स्यात्, तत्र मण्डयतीति णौ । (श्लो. 84) इति देवः। मण्डकः-ण्डिका, मण्डकः-ण्डिका, मिमण्डिषकः-षिका, मामण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्टतिवत् (146) ज्ञेयानि । अस्य

---

1. ताच्छीलिके तृनि रूपमेवम् । 'क्रुधमण्डार्थेभ्यश्च' (3-2-151) इत्यत्र युज्निधौ भूषणार्थकस्यैव मण्डधातोर्ग्रहणमिति **वृत्त्यादिषु** प्रतिपादितत्वादत्र न युजिति ज्ञेयम् । स्पष्टमिदं **मा. धा. वृत्तौ** ।

2. 'शलिमण्डिभ्यामूकण्' [द. उ. 3-47] इत्यूकण्प्रत्ययः । मण्डते क्षितिमिति **मण्डूकः**=मेकः ।

3. औणादिके [द. उ. 8-107] कलप्रत्यये रूपमेवम् । मण्ड्यते=वेष्ट्यते इति **मण्डलम्**=परिवारः ।

A. 'प्रहुण्डितानैक्षत चारुकुण्डलान् प्रचण्डितार्थान् **अविमण्डिताशयान्**।' धा.का.1.36.

[अ] धातुपाठे 'वडि विभाजने ; **मडि च**' इति पाठ्यते । तत्र 'वडि **मडि** विभाजने' इत्येकदैव पठितव्ये पृथक् सूत्रकरणात् अर्थान्तरेऽपि मडिधातुर्वर्तते इति **क्षीरस्वाम्यादयः** प्रतिपादयन्ति । तद् यथा **मण्डः**=रसाग्रम् । अत्र तण्डुलादीनां पचनावसरे क्वथनानन्तरं य ऊर्ध्वं रसस्यावरणरूपेणाविर्भावः स रसाग्रमित्युच्यते ; अत्रापि धातोरस्य वृत्तिरित्यर्थः । एवम्, **मण्डूरम्** (=लोहमलम्) **मण्डलम्, मण्डपः** इत्यादिष्वप्यस्य धातोरर्थान्तरवृत्तिर्ज्ञेया । **काशकृत्स्नधातुपाठीयव्याख्यायां** (कन्नडभाषामय्यां) 'वडि **मडि वेष्टने**' इति पठ्यते इति **क्षी· टीका** (पृ· ४९) । "नन्दी तु '**मडि वेष्टने**' इति पठति।" इति **धातुवृत्तिः**। परं तु **क्षीरतरङ्गिण्यां**—"**नन्दी** तु 'वटि विभाजने, वडि वेष्टने' इति भङ्ग्या पठति ।" इत्येव दृश्यते । ईदृशस्थलेषु शुद्धपाठः कीदृश इति ग्रन्थैर्निर्धारयितुं न शक्यते । सर्वथा **मडि**धातुरनेकार्थक इति सारः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ताच्छीलिके युचि—[1]मण्डनः[A] इति रूपमिति विशेषः। [2]मण्डयित्नुः।

## (1209) "मडि भूषायाम्, हर्षे च"

(X-चुरादिः-1587. सक. सेट्. उभ.) [अ]

'भूषार्थे मण्डतीति स्यात्, तत्र मण्डयतीति णौ। (श्लो. 84) इति देवः। मण्डकः-ण्डिका, मिमण्डयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुण्ठयतिवत् (210) ज्ञेयानि।

## (1210) "मण शब्दार्थः" (I-भ्वादिः-448. अक. सेट्. पर.)

माणकः-णिका, माणकः-णिका, मिमणिषकः-षिका, मम्मणकः-मंमणकः-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककणतिवत् (157) ज्ञेयानि। 'रण मण कणां गतौ मित्त्वं स्मर्यते।' इति क्षीरस्वाम्याह। क्षीरस्वामिनं विना अन्ये सर्वेऽपि घटादिषु न पठन्ति। प्रकरणान्तरे अर्थान्तरे च पठितानां धातूनामर्थविशेषे घटादिषु पाठस्य सर्वैर्यथाप्रमाणमभ्युपगमात्, अस्यापि घटादिपाठः स्यान्नाम। घटादिपाठपक्षे णौ 'मितां ह्रस्वः' (6-4-92) इति मित्त्वेन उपधाया ह्रस्वः। तेन मणकः-णिका, मणयिता-त्री, मणम् 2, माणम् 2, मणयित्वा 2, इत्यादीनि रूपाणि ण्यन्ते यथायथमूह्यानि। [3]मणितम्,

---

1. तच्छीलादिषु कर्तृषु 'क्रुधमण्डार्थेभ्यश्च' (3-2-151) इति युच्प्रत्ययः। मण्डार्थाः =भूषणार्थका धातवः।
2. ण्यन्तात् औणादिके [द. उ. 1-140] इत्नुच्प्रत्यये, 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशे च रूपमेवम्।
3. धातोरस्य शब्दार्थत्वेऽपि शब्दविशेष एव रूढिः। "मणितं सुरतकूजिते रूढम्, एवं कणितम् आर्ते... ..." इत्यादि सुदूरं शब्दार्थकानामेव धातूनां अर्थभेदं निरूप्य "इत्यादि प्रतिधातुस्थं कियद् व्याचक्ष्महे वयम्। लोकात् सूरिभिरित्यूह्यं लक्ष्यमूलं हि लक्षणम्॥" इति क्षीरस्वामिना प्रतिपादितमिहानुसन्धेयम्। एवमेव धातुपाठे कस्मिंश्चिदर्थविशेषे पठितानामपि धातूनां लोकप्रयोगतोऽर्थान्तरे वृत्तिरित्यूह्यमिति प्रदर्शनायास्माभिरेतदत्रोपात्तम्।

A. 'कुर्वन्ति कोपनं तारा मण्डना गगनस्य माम्॥' भ. का. 7.16.

[अ] "—'मडि भूषायाम्' इति भुवादौ पाठादेव मण्डति इति सिद्धेः, अस्येदित्वं नुम्मात्रार्थम्, न तु णिज्विकल्पार्थम्; तेन हर्षे मण्डति इति न भवति।" इति मा. धा. वृत्तिः। क्वचित् कोशे अत्र 'हर्षे च' इति न पठ्यते। पाठशुद्धिरत्र कीदृशीति न विद्मः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मणिः, [2]मणिकम्, मणिकः इत्यादीनि रूपाण्यस्माद् भवन्तीति विशेषः ।

## (1211) " मत्रि गुप्तपरिभाषणे "

(X-चुरादिः-1680. अक. सेट्. आत्म.) आकुस्मीयः ।

' —गुप्तभाषणे ' इत्येव प्रायशःपाठः । ' मन्त्रि— ' इति कुत्रचिद् दृष्टःपाठः । मन्त्रकः-न्त्रिका, मिमन्त्रयिषकः-षिका ; मन्त्रयिता-त्री, मिमन्त्रयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकतन्त्रयतिवत् (698) ज्ञेयानि । [3]मन्त्री, [4]मन्त्रः ।

## (1212) " मथि हिंसासंक्लेशनयोः" (I-भ्वादिः-46. सक. सेट्. पर.)

' मन्थ— ' इति क्षीरस्वामी ।

' हिंसासंक्लेशयोर्मन्थेत् मथेन्मथ्नाति लोडने । ' (श्लो. 98) इति देवः । मन्थकः-न्थिका, मन्थकः-न्थिका, मिमन्थिषकः-षिका, मामन्थकः-न्थिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुन्थतिवत् (220) ज्ञेयानि । सन्नन्तादुप्रत्यये-[A]मिमन्थिषुः, [5]खड्गोपमन्थम्-खड्गेनोपमन्थम् वा शत्रुं मारयति, खड्गेनोपमन्थ्य वा । [6]मन्थी[B] ।

---

1. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावादौ स्त्रियाम् इक्प्रत्यये रूपमेवम् ।
2. मणिरेव, मणिरिव इत्यादिष्वर्थेषु तद्धिते कन्प्रत्यये रूपमेवम् । 'मणिकः=महाकुम्भः ।' इति क्षीरस्वामी ।
3. ग्रह्यादिषु (3-1-134) 'मन्त्री' इति पाठात् णिनिप्रत्ययः ।
4. 'एरच्' (3-3-56) इति भावेऽच्प्रत्ययः ।
5. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल् । अत्रानुप्रयोगधातुना मारयतिना समानकर्मकत्वादस्य धातोर्णमुल् इति ज्ञेयम् । 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः । वासरूपन्यायेन क्त्वाऽप्यत्र ज्ञेयः । तेन ल्यबन्तस्यापि प्रयोगः प्रदर्शितः ।
6. ग्रह्यादित्वात् (3-1-134) कर्तरि णिनिप्रत्यये रूपमेवम् । ग्रह्यादिराकृतिगणः ।

A. 'स भोजराडद्य हरिं मिमन्थिषुः प्रमान्थनं सेधतु को निषेत्स्यति ? ॥'
धा. का. 1.7.

B. 'परिभावीणि ताराणां पश्य मन्थीनि चेतसाम् ।' भ. का. 6.75.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1213) "मथे विलोडने" (I-भ्वादिः-848. सक. सेट्. पर.)

ज्वलादिः । [अ]

'हिंसासंक्लेशयोर्मन्थेत्, मथेन्मथ्नाति लोडने ।' (श्लो. 98) इति देवः। माथकः-थिका, माथकः-थिका, मिमथिषकः-षिका, मामथकः-थिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्कथतिवत् (294) ज्ञेयानि। [1]मन्मथः, [2]मथः-माथः, [3]दण्डमाथः, [4]प्रमाथी[A], [5]मथुरा ।

## (1214) "मद तृप्तियोगे"

(X-चुरादिः-1706. अक. सेट्. आत्म. आकुस्मीयः)

'स्तुत्यादौ मन्दते, हर्षे माद्येत्, मादयते णिचि ॥' (श्लो. 112) इति देवः। '—तृप्तिशोधने, शोधनम्=सम्पत्तिः ।' इति क्षीरस्वामी । 'तृप्ति-शोधने=तर्पणशुद्धौ ।' इति पुरुषकार-माधवाभ्यां क्षीरस्वामिसम्मतपाठत्वे-नोपात्तं वाक्यम् । तत्तु मुद्रितक्षीरतरङ्गिणीकोशे न दृश्यते ।

मादकः-दिका, मिमादयिषकः-षिका; मादयिता-त्री, मिमादयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि ।

---

1. मनो मथतीति मन्मथः। पचादिषु पाठात् बाहुलकेन अत्राच्प्रत्ययः । कर्मण्यणोऽपवादः ।
2. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि विकल्पेन णप्रत्ययः । पक्षे पचाद्यच् । तेन रूपद्वयम् ।
3. मथ्यतेऽनेन इति माथः=पन्थाः । दण्डभावो माथः दण्डमाथः=ऋजुः पन्थाः ।
4. 'प्रे लपसृद्रुमथवदवसः' (3-2-145) इत्यनेन तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु घिनुण्प्रत्ययः ।
5. 'मन्दिवाशिमथि-' [द. उ. 8-21] इत्युरच्प्रत्यये रूपमेवम् । मथ्यतेऽसौ जनैरिति मथुरा । मथितावस्यां मधुलवणाविति मथुरा इत्यपि क्वचिद् व्युत्पादितम् ।

A. 'प्रमाथिनो वियुक्तानां हिंसकाः पापदुर्दुराः ॥' भ. का. 7-12.

[अ] '—विलोटने' इति पुरुषकारे (श्लो. 98) पाठः । विलोटनम्=क्षोभणम् । "गथे विलोडने...गथति....गथकः .... ... इत्यादिका काशकृत्स्नीयधातुपाठे, तट्टीकायां च पाठः ।" इति क्षी. टीकायामत्र प्रकरणे पाठान्तरमस्य धातोः प्रदर्शितम् । तत्र गथकः इति दर्शनात् काशकृत्स्नीयाः घटादिपाठमप्यस्यानुमेनिरे इति ज्ञायते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1215) "मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु"

(I-भ्वादिः-13. अक. सेट्. आत्म.)

'स्तुत्यादौ मन्दते, हर्षे माद्येत्, मादयते णिचि ॥' (श्लो. 112) इति देवः। "मोदो=हर्षः, मदो=गर्वः, स्वप्नः=आलस्यम्। चन्द्रस्तु 'मदि जाड्ये' इत्येव पपाठ। स्तुतिगतिभ्यामन्यत्राकर्मकः।" इति मा. धा. वृत्तिः। 'स्वप्नेनालस्यमपि लक्ष्यते।' इति क्षीरस्वामी। धातोरस्य कान्त्यर्थकत्वं केषाञ्चिदसम्मतम्।

मन्दकः-न्दिका, मन्दकः-न्दिका, मिमन्दिषकः-षिका, मामन्दकः-न्दिका; मन्दिता-त्री, मन्दयिता-त्री, मिमन्दिषिता-त्री, मामन्दिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि भौवादिकक्रन्दतिवत् (163) ज्ञेयानि। [1]मन्दनः, इदमेषां [2]मन्दितम्, [3]मन्दुरा, [4]मन्दिरम्, [5]मन्द्रः, [6]मन्दारः, [7]मन्दाकः।

## (1216) "मदी हर्षग्लेपनयोः"

(IV-दिवादिः-[815] 1208. अक. सेट. पर.)

शमादिः, घटादिश्च। 'ग्लेपनम्=दैन्यम्' इति मा. धा. वृत्तिः। 'ग्लपने' इति क्षीरतरङ्गिण्यां पाठः।

'स्तुत्यादौ मन्दते, हर्षे माद्येत्, मादयते णिचि ॥' (श्लो. 112) इति देवः।

---

1. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिके युचि रूपमेवम्।
2. 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (3-4-76) इति गत्यर्थकत्वात्, अकर्मकत्वाच्च अधिकरणे क्तप्रत्ययः।
3. 'मन्दिवाशि—' [द. उ. 8-21] इत्युरच्प्रत्ययः। मन्दन्तेऽस्यां वाजिन इति मन्दुरा=वाजिशाला।
4. 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दि—' (द. उ. 8-26) इति किरच्प्रत्यये रूपमेवम्। मन्दिरम्=आलयः।
5. 'स्फायितञ्चि—' (द. उ. 8-31) इत्यादिना रक्प्रत्यये रूपमेवम्। मन्द्रः= मधुरस्वरः, मन्दगतिश्च।
6. 'अञ्जिमदिमन्दिभ्यः—' (द. उ. 8-64) इत्यारन्प्रत्यये रूपमेवम्। मन्दारः= देववृक्षविशेषः।
7. बाहुलकादौणादिके आकन्प्रत्यये रूपमेवम्। मन्दाकशब्दात् मत्वर्थीये इनिप्रत्यये मन्दाकिनी इति सिद्ध्यति। मन्दाकिनी=नदीविशेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मादकः-दिका, [1]मदकः-निमादकः-मादकः-दिका, मिमदिषकः-षिका, मामदकः-दिका ;
मदिता-त्री, मदयिता-त्री, मिमदिषिता-त्री, मामदिता-त्री ;
[2]माद्यन्-न्ती, मदयन्-न्ती, मिमदिषन्-न्ती ; —
मदिष्यन्-न्ती-ती, मदयिष्यन्-न्ती-ती, मिमदिषिष्यन्-न्ती-ती ;—
—मदयमानः, मदयिष्यमाणः,—मामद्यमानः, मामदिष्यमाणः ;
सुमत्-सुमद्-सुमदौ-सुमदः ; — — —
[3]मत्तम्-मत्तः-मत्तवान्, मदितः, मिमदिषितः, मामदितः-तवान् ;
मदः, [4]प्रमद्वरः, [5]प्रमादी, [6]इरम्मदः[A], [7]उन्मदिष्णुः[B], मदः,
[8]मदनः, मिमदिषुः, मामदः ;
मदितव्यम्, मदयितव्यम्, मिमदिषितव्यम्, मामदितव्यम् ;

---

1. '**घटादयो** मितः' (ग. सू. भ्वादौ) इति मित्त्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाया ह्रस्वो भवति । एवं ण्यन्ते सर्वत्र ज्ञेयम् । '**मदी हर्षे**' इति दिवादिषु पठितस्यैव धातोर्मित्त्वार्थं घटादिषु (भ्वादौ) अनुवादः । तेन हर्षग्लेपनरूपार्थविशेष एव घटादिपाठात् मित्त्वेन **मदकः** इत्यादीनि ण्यन्ते रूपाणीति ज्ञेयम् । अन्यत्रार्थेषु **निमादकः** [=अक्षरव्यञ्जनानां स्पष्टमुच्चारयिता], **मादकः** [=चित्तविकारोत्पादयिता] इत्यादिषु मित्त्वं नेति ज्ञेयम् ।
2. श्यनि, '**शमामष्टानाम्—**' (7-3-74) इति दीर्घे रूपमेवम् ।
3. '**श्वीदितो** निष्ठायाम्' ( 7-2-14 ) इति निष्ठायामिण्निषेधे 'न ध्याख्यापृमूर्च्छिमदाम्' (8-2-57) इति निष्ठानत्वनिषेधे च रूपमेवम् ।
4. 'स्थेशभास-' (3-2-175) इत्यत्र "**प्रमद्वरो**ऽपि इति केचित् ।" इति **प्रक्रियाकौमुदी** ।
5. '**शमित्यष्टाभ्यः—**' (3-2-141) इति ताच्छील्ये घिनुण्प्रत्यये रूपमेवम् ।
6. इरया माद्यतीति **इरम्मदः**=मेघज्योतिः । इरा=उदकम् । 'उग्रम्पश्येरम्मदपाणिन्धमाश्च' (3-2-37) इति कर्तरि तृजाद्यपवादतया खश् निपात्यते । निपातनादेव श्यन् न । 'इरया=वारिणा माद्यन् वैद्युताग्निरिरम्मदः ।' इति **प्र. सर्वस्वे** ।
7. 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद—' (3-2-136) इत्यादिना तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययः ।
8. ण्यन्तात् 'नन्दिग्रहि—' (3-1-134) इति नन्द्यादित्वात् कर्तरि ल्युप्रत्यये रूपमेवम् । मदयतीति **मदनः** ।

A. '**इरम्मदं** ज्योतिरमुञ्चदभ्रं शनैश्शनैः प्रावृषिकं ररास ॥' वा. वि. 3.6.
B. 'व्यालद्विपा यन्तृभिरुन्मदिष्णवः कथंचिदारादपथेन निन्यिरे ॥' शि. व. 12.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| मदनीयम्, | मदनीयम्, | मिमदिषणीयम्, | मामदनीयम्; |
| माद्यम्-[1]मद्यम्, | मद्यम्, | मिमदिष्यम्, | मामद्यम्; |
| ईषन्मदः-दुर्मदः-सुमदः; | — | — | — |
| मद्यमानः, | मद्यमानः, | मिमदिष्यमाणः, | मामद्यमानः; |

मादः, [2]विद्यामदः-धनमदः, कुलमदः, [कन्यानाम्] [3]प्रमदः, [कोकिलानाम्]
सम्मदः, प्रमादः-सम्मादः-उन्मादः-विमादः, मदः, मिमदिषः, मामदः;

| | | | |
|---|---|---|---|
| मदितुम्, | मदयितुम्, | मिमदिषितुम्, | मामदितुम्; |
| मत्तिः, | मदना, | मिमदिषा, | मामदा; |
| मदनम्, | मदनम्, | मिमदिषणम्, | मामदनम्; |
| मदित्वा, | [A]मदयित्वा, | मिमदिषित्वा, | मामदित्वा; |
| प्रमद्य, | प्रमदय्य, | प्रमिमदिष्य, | प्रमामद्य; |
| मादम् २, मदित्वा २, | [4]मादम् २-मदम् २, [A]मदयित्वा २, | मिमदिषम् २, मिमदिषित्वा २, | मामदम् २; मामदित्वा २; |

[5]मदयित्नुः, [6]मदिरा, [7]मत्सरः, [8]मत्स्यः-मत्सी।

---

1. "मदसाधनम्—**मद्यम्**। बाहुलकात् करणे यत्।" इति **प्र. सर्वस्वे**।
2. '**मदोऽनुपसर्गे**' (3-3-67) इति अनुपसर्गेऽप्प्रत्ययः। घञोऽपवादः। **कुलमदः, धनमदः**, इत्यादिषु चैवं ज्ञेयम्।
3. '**प्रमदसम्मदौ** हर्षे' (3-3-68) इति हर्षेऽभिधेये एतौ शब्दौ निपात्येते। हर्षादन्यत्र, उपसर्गे च **प्रमादः, संमादः** इत्यादिषु घञ् इति ज्ञेयम्। 'सध **माद**-स्थयोश्छन्दसि' (6-3-96) इत्यत्र **माद** इति निर्देशबलात् केवलादप्यस्माद्-धातोर्घञ् भवतीति ज्ञेयम्।
4. **घटादिषु** पाठसामर्थ्यात् 'चिण्णमुलोः–' (6-4-93) इति णौ परतः दीर्घो विकल्पेन भवति। तेन रूपद्वयं ज्ञेयम्।
5. 'स्तनिहृषिपुषिगदि**मदि**—' [द. उ. 1-140] इति ण्यन्तात् इत्नुच्प्रत्यये रूपमेवम्। **मदयित्नुः**=मदिरा।
6. 'इषि**मदि**—' [द. उ. 8-26] इत्यादिना किरच्प्रत्यये रूपमेवम्। माद्यन्तेऽनयेति **मदिरा**=सुरा।
7. 'कृधू**मदिभ्यः** कित्' (द. उ. 8-53) इति सरन्प्रत्ययः, तस्य च कित्त्वम्। माद्यत्यसौ परव्यसनैरिति **मत्सरः**=ईर्ष्या।
8. 'ऋतन्यञ्चि—' (द. उ. 10-12) इत्यादिना स्यन्प्रत्यये रूपमेवम्। माद्यत्युदकं प्राप्य इति **मत्स्यः**। स्त्रियाम् गौरादिपाठात् (4-1-41) ङीष्। '**मत्स्यस्य** ङ्याम्—' (वा. 6-4-149) इति यकारलोपः।

A. 'कपितोयनिधीन् प्लवङ्गमेन्दुर्म**दयित्वा** मधुरेण दर्शनेन।' भ. का. 10. 28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1217) "मन ज्ञाने" (IV-दिवादिः-1176. सक. अनि. आत्म.)

'स्तम्भे मानयते, ज्ञाने मन्यते मनुते पदम् ॥ [इति देव:।
पूजायाम् मानयेन्मानेत्, यौ मीमांसेत तङ्सनोः।' (श्लो. 125-126)

मानकः-निका, मानकः-निका, [1]मिमंसकः-सिका, [2]मम्मनकः-मंमनकः-निका;
मन्ता-त्री, मानयिता-त्री, मिमंसिता-त्री, मम्मनिता-मंमनिता-त्री;
—मानयन्-न्ती, मानयिष्यन्-न्ती-ती ; — —
[3]मन्यमानः, मानयमानः, मिमंसमानः, मंमन्यमानः ;
मंस्यमानः, मानयिष्यमाणः, मिमंसिष्यमाणः, मंमनिष्यमाणः ;
[4]सुमत्-सुमतौ-सुमतः, हरिमत् ; — —
मतम्-[5]राज्ञां मतः-मतवान्, मानितः, मिमंसितः, मंमनितः-तवान् ;
मनः, [6]दर्शनीयमानी [भार्यायाः], [7]पण्डितम्मन्यः[A]-पण्डितमानी,

---

1. सन्नन्तात् ण्वुलि, द्विर्वचनादिकेषु कृतेषु 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनेन धातुनकारस्यानुस्वारे रूपमेवम्। एवमेव सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।

2. यङन्ते सर्वत्र द्विर्वचनादिकेषु कृतेषु, अभ्यासे, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः, तस्य च पदान्तवद्भाववचनात् परसवर्णविकल्पः। तेन रूपद्वयम्।

3. शतरि, दिवादित्वात् शपोऽपवादः श्यन्प्रत्ययोऽत्रेति ज्ञेयम्।

4. क्विपि, 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (6-4-37) इत्यनुनासिकलोपः। 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक्।

5. अनुदात्तोपदेशत्वादस्य धातोर्निष्ठायामनुनासिकलोपे, रूपाण्यूह्यानि। राज्ञां मतः इत्यत्र 'मतिबुद्धिपूजार्थेभ्यः—' (3-2-188) इति बुद्ध्यर्थकत्वादस्य वर्तमाने कर्तरि क्तः। 'क्तस्य च वर्तमाने' (2-3-67) इति कर्तरि षष्ठी।

6. दर्शनीयां मन्यते इत्यर्थे कर्मण्युपपदे 'मनः' (3-2-82) इत्यनेनात्र णिनिः। 'भार्यायाः' इत्यत्र कर्मणि षष्ठी। भार्याशब्दसापेक्षस्यापि दर्शनीयशब्दस्य गमकत्वात् समासः। 'क्यङ्मानिनोश्च' (6-3-36) इत्यनेन मानिन्शब्द उत्तरपदे दर्शनीयाशब्दस्य पुंवद्भावः।

7. पण्डितमात्मानं मन्यते इत्यर्थे, 'आत्ममाने खश् च' (3-2-83) इति पाक्षिकः खश्। पक्षे णिनिः। खशः शित्त्वात् विकरणप्रत्ययः श्यन्प्रवृत्तः। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति पूर्वपदस्य मुम्।

A. 'अखण्ड्यमानं परिखण्ड्य शक्रं त्वं पण्डितंमन्यमुदीर्णदण्डः।' भ. का. 12. 17.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[A]शूरमानी, [1]कालिम्मन्या, [2]दिवामन्या-दोषामन्यम्, [3]गाम्मन्यः, [4]स्त्रियम्मन्यः-स्त्रीम्मन्यः, [5]नरम्मन्यः, [6]भुवम्मन्यः, [7]श्रिमन्यं [कुलम्], [8]उपकुम्भम्मन्यः, [B]श्रियम्मन्या, श्रीमन्मन्यः, रजनिम्मन्यः,

1. कालीमात्मानं मन्यते इत्यर्थे खश्प्रत्यये, श्यनि च कृते, 'स्त्रियाः पुंवत्—' (6-3-34) इति प्राप्तं पुंवद्भावं परत्वाद् बाधित्वा, 'खित्यनव्ययस्य' (6-3-66) इति ह्रस्वः। तेन **कालिम्मन्या** इति सिद्ध्यति।

2. 'दिवा' इत्यधिकरणशक्तिप्रधानमव्ययम्। एवम्भूतस्याप्यस्य वृत्तिविषये कर्मत्वं बोध्यम्। तेन दिवा मन्यते इत्यर्थेऽत्र खशि, अव्ययत्वादुपपदस्य मुम्, ह्रस्वश्च नेति ज्ञेयम्। एवमेव **दोषामन्यम्** इत्यत्रापि ज्ञेयम्।

3. अत्रापि पूर्ववत् गाम् आत्मानं मन्यते इत्यर्थे खशि, 'इच एकाचोऽम्प्रत्ययवच्च' (6-3-68) इत्यनेन खिदन्ते परे एकाचः पूर्वपदस्य 'गो' इत्यस्य अम् इत्यागमो भवति, स च '—प्रत्ययवच्च' (6-3-68) इति वचनात् स्वादिप्रत्ययवद् भवति। तेन 'औतोऽम्शसोः' (6-1-93) इत्यनेन प्रत्ययाश्रित आकारोऽत्र भवति। तेन **गाम्मन्यः** इति रूपं सिद्ध्यति।

4. स्त्रियमात्मानं मन्यते इत्यर्थे खशि, पूर्ववत् 'इच एकाचः—' (6-3-68) इति अमागमे, 'वाऽम्शसोः'(6-4-80) इति विकल्पेन इयङ्। इयङ्पक्षे **स्त्रियम्मन्यः**, इति रूपम्। इयङभावपक्षे 'अमि पूर्वः' (6-1-107) इति पूर्वरूपे **स्त्रीम्मन्यः** इति रूपम्।

5. नरं आत्मानं मन्यते इत्यर्थे खशि, अमागमे, 'ऋतो ङिसर्वनामस्थानयोः' (7-3-110) इति गुणे **नरम्मन्यः** इति रूपम्। अत्र '—प्रत्ययवच्च' (6-3-68) इति वचनात् मुमपवादतया प्रवृत्तस्य **अमः** प्रत्ययत्वम्। प्रत्ययत्वादेव सर्वनामस्थान-संज्ञा, तदाश्रितो गुणश्चात्रेति ज्ञेयम्।

6. भुवमात्मानं मन्यते इत्यर्थे खशि, अमि, 'अचि श्नुधातु—' (6-4-77) इत्यादिना उवङत्रेति ज्ञेयम्।

7. श्रियमात्मानं मन्यते इत्यत्र **श्रिमन्यं** [ब्राह्मणकुलम्] इत्येव न्याय्यम् इति 'इच एकाच :—' (6-3-68) इति सूत्र**भाष्य**वाक्यम् 'तस्मात् **श्रिमन्य**-मित्येव भवितव्यम्।' इत्याकारकमवलम्ब्य **सिद्धान्तकौमुद्यामुक्तम्**। प्रकृतसूत्रे **उद्द्योते नागेशभट्टैस्तु** उपात्तभाष्यवाक्यस्य एकदेशयुक्तित्वं प्रसाध्य, **श्रियम्मन्यम्** इत्येव प्रामाणिकं रूपमिति स्थापितम्। **भट्टिकाव्येऽ**पि (5-71) **श्रियम्मन्य**पदस्य प्रयुक्तत्वात् **नागेश**पक्ष एव ज्यायानिति भाति।

8. कुम्भस्य समीपे **उपकुम्भम्**। 'अव्ययं विभक्ति—' (2-1-6) इत्यादिना सामीप्ये अव्ययीभावसमासे, 'अव्ययीभावश्च' (1-1-41) इत्यनेन अव्ययी-भावसमासस्याव्ययत्वम्। 'अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः' (वा. 1-1-41) इति वचनात् उपकुम्भमात्मानं मन्यते इत्यर्थेऽव्ययत्वाभावात् मुमागमोऽत्रेति ज्ञेयम्। स्पष्टमिदं प्रकृतसूत्रे (1-1-41) **भाष्यादौ**।

A. 'राममुच्चैरुपालभ्य **शूरमानी** कपिप्रभुः।
व्रणवेदनया ग्लायन् **साधुम्मन्यमसाधुवत्**॥' भ का. 6. 128.

B. 'मिथ्यैव श्रीः **श्रियम्मन्या श्रीमन्मन्यो** मृषा हरिः।' भ. का. 5. 71.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



साधुम्मन्यः, [1]पट्वमानिनी, [2]मेनका, मानः, मिमंसुः, मम्मनः ;
मन्तव्यम्, मानयितव्यम्, मिमंसितव्यम्, मम्मनितव्यम् ;
मननीयम्, माननीयम्, मिमंसनीयम्, मम्मननीयम् ;
मान्यम्, मान्यम्, मिमंस्यम्, मम्मन्यम् ;
ईषन्मनः-दुर्मनः-सुमनः ; — —
मन्यमानः, मान्यमानः, मिमंस्यमानः, मम्मन्यमानः ;
मानः, मानः, मिमंसः, मम्मनः ;
मन्तुम्, मानयितुम्, मिमंसितुम्, मम्मनितुम् ;
[3]मन्या,[A] सुमत्, मतिः, [4]मन्तिः, अनुमतिः, मानना, मिमंसा, मम्मना ;
मननम्, माननम्, मिमंसनम्, मम्मननम् ;
मत्वा ; मानयित्वा, मिमंसित्वा, मम्मनित्वा ;
अनुमत्य, अनुमान्य, अनुमिमंस्य, अनुमम्मन्य ;

---

1 पट्वीमात्मानं मन्यते इत्यर्थे, पाक्षिके णिनिप्रत्यये 'स्त्रियाः पुंवत्—' (6-3-34) इति पुंवद्भावे रूपमेवम् । पक्षे **पट्वम्मन्या** इत्यपि भवति ।

2. 'आशिषि च' (3-1-150) इति वुन्प्रत्यये, 'प्रत्ययस्थात्—' (7-3-44) इति प्राप्तस्येत्वस्य 'आशिषि वुनश्च न' (वा. 7-3-45) इति निषेधः । 'आशीरर्थेऽके **मनेः** एत्वं वाच्यम्' इति वचनेन एकारः इति **प्र. कौमुद्यामुक्तम्** । **मेनका**= अप्सरोविशेषः ।

3. स्त्रियाम्, 'संज्ञायां समजनिषदनिपत**मन**—' (3-3-99) इत्यादिना संज्ञायां क्यपि रूपमेवम् । '**मन्या**=गलपार्श्वशिरा (सिरा), मन्यन्तेऽनयेति कृत्वा । तया हि क्रुद्धो ज्ञायते ।' इति **पदमञ्जरी** । **न्यासकारस्तु** 'संज्ञायाम्' इत्युक्तत्वात् अझलादित्वेऽपि प्रत्ययस्थं कित्त्वमाश्रित्यानुनासिकलोपे तुकि च **मत्या** इति रूपमनुमेने । '**मन्या**=पश्चाद्ग्रीवासिरा ।' इति **मा. धा. वृत्तिः** । '**सुमत्**' इति सम्पदादित्वात् (3-3-94) क्विपि अनुनासिकलोपे, तुकि च रूपम् । **सुमत्**=लक्ष्मीः ।

4. क्तिचि रूपमेवम् । 'न क्तिचि दीर्घश्च' (6-4-39) इत्यनेन क्तिचि अनुनासिकलोपदीर्घयोर्निषेधः । **मतिः** इत्यत्र तु क्तिनि अनुनासिकलोपो भवत्येव । 'मन्त्रे वृषेषपच**मन**—' (3-3-96) इत्यनेन मन्त्रे एव मन्यतेः क्तिन्विधानात् लोके न **मति**रित्यस्य प्रयोग इति न मन्तव्यम् । उदात्तस्वरार्थं सूत्रस्यास्य (3-3-96) प्रवृत्तेः ।

A. 'पुरोहिताऽमात्यमुखाश्च योधा विवृद्धमन्युप्रतिपूर्ण**मन्याः** ॥' भ. का. 3.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मानम् २, मत्वा २, ; मानम् २, मानयित्वा २, ; मिमंसम् २, मिमंसित्वा २, ; मम्मनम् २ ; मम्मनित्वा २ ;

[1]मुनिः, [2]मनुः-मनुष्यः-मनुषी, [3]मन्तुः, [4]मन्युः, [5]मन्त्रः, [6]मठरः, [7]मांसम् , [8]मधु, [9]मनः ।

(1218) "मन स्तम्भे" (X-चुरादिः-1710. अक. सेट्. आत्म.)

आकुसमीयः । 'स्तम्भः=गर्वः ........ । पक्षे मनतीति चन्द्रः' इति क्षीरस्वामी ।

'स्तम्भे मानयते, ज्ञाने मन्यते मनुते पदम् ॥' (श्लो. 125) इति देवः ।

मानकः-निका, मिमानयिषकः-षिका ; मानयिता-त्री, मिमानयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि ।

---

1. 'मनेरुच' (द. उ. 1-51) इति इन्प्रत्यये अकारस्य उकारादेशे च रूपमेवम् । मुनिः=ऋषिः ।

2. औणादिके उप्रत्यये रूपमेवम् । मन्यते मनुते वा मनुः । मनुशब्दात् 'मनोर्जातावञ्यतौ षुक् च' (4-1-161) इति अञ् यत् इत्येतौ प्रत्ययौ भवतः ; तत्सन्नियोगेन षुगागमश्च । मानुषः, मनुष्यः इति जातिशब्दौ एतौ । स्त्रियाम् , 'हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः' (वा. 4-1-63) इति प्रतिप्रसवेन ङीपि, 'हलस्तद्धितस्य' (6-4-150) इति यलोपे मनुषी इति रूपम् ।

3. 'कमिमनि—' (द. उ. 1-125) इति तुप्रत्यये रूपमेवम् । 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी इति अमरकोशव्याख्याने (2.26) ।

4. 'यजिमनि—' (द. उ. 1-134) इति युच्प्रत्यये रूपमेवम् । मन्युः=दैन्यम्, यागः, अन्तर्गतः क्रोधश्च ।

5. 'गुधृवीपचिवचियमिमनि—' (द. उ. 8.89) इति त्रप्रत्यये रूपमेवम् । 'वेदभेदे गुह्यवादे मन्त्रः—' इति अमरः (3.167) ।

6. 'वनिमनिभ्याम्—' (द. उ. 8.99) इति अरप्रत्यये ठकारे चान्तादेशे रूपमेवम् । मठरः=ज्ञानी, गोत्रं च । मूढः इति क्षीरस्वामी ।

7. 'मनेर्दीर्घश्च' (द. उ. 9.23) इति सप्रत्यये दीर्घे च रूपमेवम् । मन्यते तदिति मांसम्=पिशितम् इत्यर्थः ।

8. 'फलिपाटिनमिमनि—' (द. उ. 1.103) इति उप्रत्यये धकारादेशे च रूपम् । मन्यते तदतिशयेन इति मधु=माध्वी ।

9. 'असुन्' (द. उ. 9. 49) इति असुन्प्रत्यये रूपमेवम् ।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



**(1219) "मनु अवबोधने"** (VIII-तनादिः-1471. सक.सेट्. आत्म.)
'स्तम्भे मानयते, ज्ञाने मन्यते **मनुते** पदम् ॥' (श्लो. 125) इति देवः।
'—बोधने इति मैत्रेयः।' इति मा. धा. वृत्तिटीका।

मानकः-निका, मानकः-निका, [1]मिमनिषकः-षिका, मम्मनकः-मंमनकः-निका; मनिता-त्री, मानयिता-त्री, मिमनिषिता-त्री, मम्मनिता-मंमनिता-त्री; इत्यादीनि सर्वाणि रूपाणि दैवादिकमन्यतिवत् (1217) ज्ञेयानि। क्विपि [2]हरिमत्-हरिमतौ-हरिमतः; [3]मतः-तम्-तवान्, [4]मनितम्-तः-तवान्, [5]मनित्वा-मत्वा, [6]मेनका, [7]अभिमत्य, [8]मन्तिः, [A]मन्वानः इतीमानि रूपाणि अस्य धातोः विशेषेण संभवन्तीति विशेषः।

---

1. अस्य धातोः सेट्त्वात् सनि रूपमेवम्। एवं सन्नन्ते सर्वत्र बोध्यम्। शुद्धात् तृजादिषु च एवमेव ऊह्यम्।
2. 'गमः क्वौ' (6-4-40) इत्यत्र 'गमादीनामिति वक्तव्यम्' इति वचनात् क्विपि अनुनासिकलोपे, 'ह्रस्वस्य—' (6-1-71) इति तुकि च रूपमेवम्।
3. निष्ठायाम्, 'अनुदात्तोपदेशवनतितनोत्यादीनाम्—' (6-4-37) इति अनुनासिकलोपे रूपमेवम्।
4. निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति निषेधस्यानित्यत्वादिट्। तदनित्यत्वे च, '**कृती छेदने**' (तु. से. पर.) इतीदित्करणं लिङ्गम्। अन्यथा, 'सेऽसिचि—' (7-2-57) इति वेट्कत्वात् सिद्धे किं तेन? ' इति **अमरव्याख्यायाम्** (1-107) प्रतिपादितत्वात् **मनितम्** इत्यपि साधुरिति ज्ञेयम्। तथा—'बुद्धं बुधितं **मनितम्**' इत्यमरः। 'एवमेव **स्वामी**' इति **प्र. सर्वस्वे**।
5. '**उदितो** वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे **मनित्वा**। इडभावपक्षे, अनुनासिकलोपे **मत्वा** इति रूपद्वयं बोध्यम्।
6. 'आशिषि च' (3-1-150) इति वुन्। 'नशिमन्योरलिट्येत्वं वक्तव्यम्' (वा. 6-4-120) इति वचनात् एत्वे रूपमेवम्। "—'**मेनका**' इत्यपि भाषायां न प्राप्नोति। यदि तु इष्यते पृषोदरादित्वाद्भविष्यति। ... ....'आशिषि चोपसंख्यानम्' (वा. 7-3-45) इति इत्वाभावः।" इति प्रकृतसूत्रभाष्ये (6-4-120) **कैयटे** प्रतिपादितम्।
7. ल्यपि, 'वा ल्यपि' (6-4-38) इत्यस्य व्यवस्थितविभाषाश्रयणाद् अत्र नान्तानिटां नित्यम् अनुनासिकलोपः। तेन **अभिमत्य** इत्येकमेव रूपम्।
8. तनोत्यादित्वात् क्तिचि 'न क्तिचि दीर्घश्च' (6-4-39) इति दीर्घानुनासिकलोप-निषेधे रूपमेवम्।

A. 'कंसस्तृणीकृतरिपुः घृणिमान् वतासिं **मन्वान** एकमथ मल्लमलञ्चकार ॥' धा.का.3-4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1220) "मन्थ विलोडने" (I-भ्वादिः-42. सक. सेट्. पर.) [अ]
'विलोडनम्=क्षोभणम्' इति मा. धा. वृत्तिः। अयं द्विकर्मकः।
'हिंसासंक्लेशयोर्मन्थेत्, मथेन्मथ्नाति लोडने।' (श्लो. 98) इति देवः।
मन्थकः-न्थिका, मन्थकः-न्थिका, मिमन्थिषकः-षिका, मामथकः-थिका; मन्थिता-त्री, मन्थयिता-त्री, मिमन्थिषिता-त्री, मामथिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि कुथ्नातिवत् (223) बोध्यानि। क्विपि-मत्-मथ्-मथौ-मथः; [1]मन्थन्-न्ती, [2]मन्थः, मन्थनम्-[3]मन्थनी, [4]मथित्वा-मन्थित्वा, [5]मन्थानः इमानि रूपाणि अस्य धातोः विशेषः।

(1221) "मन्थ विलोडने" (IX-क्र्यादिः-1511. सक. सेट्. पर.)
'—विलोटने' इति पुरुषकारे (श्लो. 98) पाठः।
'हिंसासंक्लेशयोर्मन्थेत्, मथेन्मथ्नाति लोडने।' (श्लो. 98) इति देवः।
मन्थकः-न्थिका, मन्थकः-न्थिका, मिमन्थिषकः-षिका, मामथकः-थिका; मन्थिता-त्री, मन्थयिता-त्री, मिमन्थिषिता-त्री, मामथिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिकग्रथ्नातिवत् (437) बोध्यानि। [6]मन्थाः इति रूपं विशेषः।

---

1. अस्य धातोः भ्वादित्वाद् औत्सर्गिके शपि रूपमेवम्।
2. 'हलश्च' (3-3-121) इति करणे संज्ञायां घञ्।
3. 'करणाधिकरणयोश्च' (3-3-117) इति अधिकरणे ल्युडन्तात् स्त्रियाम्, 'टिड्ढाणञ्—' (4-1-15) इति ङीपि रूपमेवम्।
4. क्त्वायाम्, 'नोपधात् थफान्ताद्वा' (1-2-23) इति कित्त्वविकल्पनात् पक्षे नलोपः। तेन रूपद्वयं ज्ञेयम्।
5. बाहुलकात् आनच्प्रत्यये रूपम्।
6. 'मन्थः' (द. उ. 6-62) इति इनिप्रत्ययः किच्च। मथ्नातीति मन्थाः=वायुः, वैशाखः, वज्रश्च। 'पथिमथि—' (7-1-85) इत्याकारे 'इतोऽत्—' (7-1-86) इत्यकारे च प्रथमैकवचने रूपमेवम्। 'वैशाखो मन्थमन्थानमन्थानो मन्थदण्डके' इत्यमरः (2.74)।

[अ] "अत्रायं धातुर्यद्यपि क्षीरस्वाम्यादिभिः न पठ्यते, तथापि मैत्रेय-चन्द्र-दुर्गैः पठितत्वात्, 'शमीगर्भादग्निं मन्थति', 'ततो यथा प्राशु मन्थति। यदि मथ्यमानो न जायेत' इत्यादिदर्शनाचास्त्येव।" इति मा. धा. वृत्तिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1222) "मभ्र गत्यर्थः" (I-भ्वादिः-558. सक. सेट्. पर.)

मभ्रकः-भ्रिका, मभ्रकः-भ्रिका, मिमभ्रिषकः-[1]मिमब्भ्रिषकः-षिका, मामभ्रकः-भ्रिका ; मभ्रिता-त्री, मभ्रयिता-त्री, मिमभ्रिषिता-त्री, मामभ्रिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्बतिवत् (173) बोध्यानि । कर्मणि क्तप्रत्यये-[A]मभ्रितः इति ।

(1223) "मय गतौ" (I-भ्वादिः-477. सक. सेट्. आत्म.)

मायकः-यिका, मायकः-यिका, मिमयिषकः-षिका, मामयकः-यिका ; मयिता-त्री, माययिता-त्री, मिमयिषिता-त्री, मामयिता-त्री ; [2]प्रमत्-प्रमतौ-प्रमतः, [3]मयिता, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचयतिवत् (502) ज्ञेयानि । ल्यपि-[B]प्रमय्य इति ।

(1224) "मर्च शब्दार्थे" (X-चुरादिः-1650. अक. सेट्. उभ.)

अयं धातुः क्षीरतरङ्गिण्यां, सि. कौमुद्यादिषु च स्वतन्त्रेण पठ्यते । अन्ये तु पाठान्तरत्वेनाहुः । 'मर्ज—' इत्यपि क्षीरस्वामी । मर्चकः-र्चिका, मिमर्चयिषकः-षिका ; मर्चयिता-त्री, मिमर्चयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगर्जयतिवत् (378) बोध्यानि । शतरि मर्चयन्-[C]न्ती इति ।

---

1. सनि 'अनचि च' (8-4-47) इति भकारस्य पक्षे द्विर्वचने 'झलां जश् झशि' (8-4-53) इति भकारस्य जश्त्वे रूपमेवम् । द्विर्वचनाभावे मिमभ्रिषकः इति सन्नन्ते सर्वत्र रूपद्वयं बोध्यम् ।
2. क्विपि 'लोपो व्योर्वलि' (6-1-66) इति यकारलोपे 'ह्रस्वस्य पिति —' (6-1-71) इति तुकि च रूपमेवम् ।
3. तच्छीलादिषु कर्तृषु 'अनुदात्तेतश्च हलादेः' (3-2-149) इति प्राप्तस्य युचः, 'न यः' (3-2-152) इति निषेधात् 'तृन्' (3-2-135) इत्यौत्सर्गिकस्तृन्नेव ।

A. 'क्ष्मरन् मनोदुर्गमसभ्भ्रमेचकं वभ्रद्दधूविभ्रमवृष्टिमभ्रितम् ॥' धा. का. 1.71.
B. 'पयः प्रदोहादिरताः प्रमय्य तं प्रेक्षन्त नूनाचयितं कुतूहलात् ॥' धा. का. 1.61.
C. 'इत्थं सुगाजितमृदङ्गविमार्जनानि संवार्य मर्चयति घारितशङ्कमस्मिन् ।' धा. का. 3.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1225) "**मर्ब गतौ**" (I-भ्वादिः-419. सक. सेट्. पर.)

मर्बकः-र्बिका, मर्बकः-र्बिका, मिमर्बिषकः-षिका, मामर्बकः-र्बिका ;
मर्बिता-त्री, मर्बयिता-त्री, मिमर्बिषिता-त्री, मामर्बिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कर्बति**वत् (173) बोध्यानि। ल्यपि-उपमर्ब्य[A] इति।

(1226) "**मर्व पूरणे**" (I-भ्वादिः-578. सक. सेट्. पर.)

'गतौ च द्रुमे' इति **धा. का. व्याख्यायाम्** (1.73.)।

[B]मर्वकः-र्विका, मर्वकः-र्विका, मिमर्विषकः-षिका, मामर्वकः-र्विका ;
मर्विता-त्री, मर्वयिता-त्री, मिमर्विषिता-त्री, मामर्विता-त्री ;
इत्यादीनि सर्वाणि रूपाणि भौवादिक**कर्वति**वत् (173A) ज्ञेयानि। क्विपि-[1]मः-मरौ-मरः इति रूपमिति विशेषः।

(1227) "**मल धारणे**" (I-भ्वादिः-493. सक. सेट्. आत्म.)

मालकः-लिका, मालकः-लिका, मिमलिषकः-षिका, मामलकः-लिका ;
मलिता-त्री, मालयिता-त्री, मिमलिषिता-त्री, मामलिता-त्री ;
इत्यादीनि सर्वाणि रूपाणि प्रातिस्विकरूपाणि विना भौवादिक**कलति**वत् (174) ज्ञेयानि। [2]मलम्, [3]कमलम्, [4]परिमलम्, [5]माला-माली,

---

1. 'राल्लोपः' (6-4-21) इति वकारस्य लोपः। रुत्वविसर्गौ च भवतः।
2. शरीरं मल्यते धार्यते इत्यर्थे अच्प्रत्यये एवं रूपम्।
3. केन मल्यते इति 'घञर्थे कविधानम्—' (वा. 3-3-58) इति कः। 'कर्तृकरणे कृता बहुलम्' (2-1-32) इति समासः।
4. मल्यते=धार्यते इति 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति कर्मणि संज्ञायां विषये घञ्प्रत्ययः। संज्ञापूर्वकत्वात् वृद्ध्यभावः। 'घनो घ च' (3-3-125) इति घो वा। चकारात् घञ् च। यद्वा मलते धारयतीत्यर्थे अचि रूपमेवम्। 'विमर्दोत्थे **परिमलो** गन्धे जनमनोहरे।' **इत्यमरः** (1.10)।
5. 'मल्यते धार्यते इति माला, घञ्। संज्ञायां पुंस्त्वं प्रायिकम्' इति **प्र. सर्वस्वे**। व्रीह्यादित्वात् (5-2-116) इनिप्रत्यये **माली** इति।

A. 'प्रवर्ब्य शैलानुप**मर्ब्य** पद्मिनीं प्रकर्ब्य चाशाः श्रमशोणितैरिव॥' धा. का. 1.54.

B. 'अफर्विताकाङ्क्षित**मर्वकं** सतां मांसादिसंचर्वकदुष्टभर्वकम्।' धा. का. 1.74.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मालभारी [2]माल्यम्, [3]मलिनः-मलीमसः, [4]आमलकम्-आमलकी, [5]मलयः; इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति विशेषः। यङन्तात् शानचि-[A]मामल्यमानः इति।

(1228) "मल्ल धारणे" (I-भ्वादिः-494. सक. सेट्. आत्म.)

मल्लकः-ल्लिका, मल्लकः-ल्लिका, मिमल्लिषकः-षिका, मामल्लकः-ल्लिका; मल्लिता-त्री, मल्लयिता-त्री, मिमल्लिषिता-त्री, मामल्लिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककड्डतिवत् (156) बोध्यानि। [6]मल्लिका,[A] [7]मल्लकः, [8]मल्लमल्लम् इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1229) " मव बन्धने " (I-भ्वादिः-599. सक. सेट्. पर.)

मावकः-विका, मावकः-विका, मिमविषकः-षिका, मामवकः-विका; मविता-त्री, मावयिता-त्री, मिमविषिता-त्री, मामविता-त्री; इत्यादीनि सर्वाणि रूपाणि विशेषरूपाणि विना भौवादिककसतिवत्

---

1. 'इष्टकेषीकामालानां चिततूलभारिषु' (6-3-65) तति भारिन्शब्दे उत्तरपदे **माला**शब्दस्य ह्रस्वे रूपमेवम्=**मालभारिणी**=कन्या। 'तदन्तस्यापि ग्रहणम्' इति वचनात् **उत्पलमालभारिणी**=कन्या इत्यपि भवति।
2. 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यति रूपमेवम्।
3. 'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्**मलिनमलीमसाः**' (5-2-114) इति मत्वर्थे संज्ञायां विषये एते शब्दाः निपात्यन्ते। इनच्प्रत्यये—**मलिनः**, ईमसप्रत्यये-**मलीमसः** इति ज्ञेयम्।
4. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3.5) इति क्वुन्प्रत्यये, स्त्रियाम्, 'षिद्गौरादिभ्यश्च' (4-1-41) इति ङीषि च रूपमेवम्।
5. 'वलि**मलि**तनिभ्यः कयन्' (द. उ. 8. 10) इति कयन्प्रत्यये रूपमेवम्। **मलयः**= भूधरविशेषः।
6. 'संज्ञायाम्' (3-3-109) इति संज्ञायां विषये स्त्रियां ण्वुलि रूपमेवम्। '**मल्लिका** तृणशून्येऽपि' इति **मेदिनी**।
7. संज्ञायां क्वुन्प्रत्यये **मल्लकः** इति रूपम्।
8. मलं मल्लते धार्यते इति **मलमल्लम्**=कौपीनम्। 'कर्मण्यण्' (3-2-1) इत्यण्।

A. '**मामल्यमानं** स्मित**मल्लिका**वलीमाभाल्यदैत्याधिपभल्लनोद्धुरम्।'
धा. का. 1.64.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(180) बोध्यानि। क्विपि [1]मूः-मुवौ-मुवः, निष्ठायाम्-[2]मवितम्-तः-तवान्, मूतम्-मूतः-मूतवान्, क्तिनि[A]मूतिः; इमानि रूपाण्यस्य धातोः विशेषेण भवन्तीति विशेषः।

(1230) "मव्य बन्धने" (I-भ्वादिः-508. सक. सेट्. पर.)

मव्यकः-व्यिका, मव्यकः-मव्यिका, मिमव्यिषकः-षिका, [3]मामव्यकः-व्यिका; मव्यिता-त्री, मव्ययिता-त्री, मिमव्यिषिता-त्री, [4]मामविता-मामव्यिता-त्री; [B]मव्यन्-न्ती, मव्ययन्-न्ती, मिमव्यिषन्-न्ती; — —

मव्यिष्यन्-न्ती-ती, मव्ययिष्यन्-न्ती-ती, मिमव्यिषिष्यन्-न्ती-ती; — व्यतिमव्यमानः, मव्ययमानः, व्यतिमिमव्यिषमाणः, मामव्व्यमानः-मामव्यमानः; व्यतिमव्यिष्यमाणः; मव्ययिष्यमाणः, व्यतिमिमव्यिषिष्यमाणः, मामव्यिष्यमाणः; [5]मौः-मावौ-मावः; — — —

मव्यितम्-तः, मव्यितः, मिमव्यिषितः, मामव्यितः-तवान्; मव्यः, मव्यः, मिमव्यिषुः, मामव्यः; मव्यितव्यम्, मव्ययितव्यम्, मिमव्यिषितव्यम्, मामव्यितव्यम्; मव्यनीयम्, मव्यनीयम्, मिमव्यिषणीयम्, मामव्यनीयम्; [6]मव्यम्-मव्व्यम्, मव्यम्, मिमविष्यम्, [7]मामव्व्यम्-मामव्यम्;

---

1. क्वौ परतः 'ज्वरत्वर[स्रि]स्त्र्यविमवामुपधायाश्च' (6-4-20) इति उपधायाः वकारस्य च स्थाने ऊठादेशे सवर्णदीर्घे विसर्गे च रूपमेवम्। एवं क्तिन्यपि ज्ञेयम्।
2. धातोरस्य सेट्त्वात् **मवितम्** इति रूपम्। **काशिकायां** तु (6-4-20) **मूतम्-तः-तवान्** इति दृश्यते।
3. यङन्तात् ण्वुलि अल्लोपयलोपयो रूपमेवम्।
4. यङन्तात् तृजादिषु अल्लोपयलोपयोः, 'हलो यमां यमि लोपः' (8-4-64) इति यकारलोपे च **मामविता** इति रूपम्। 'हलो यमाम्—' (8-4-64) इति लोपस्य पाक्षिकत्वात्, तदभावे **मामव्यिता** इति रूपमिति ज्ञेयम्।
5. क्विपि, 'लोपो व्योर्वलि' (6-1-66) इति धातुयकारलोपे धातुवकारस्य ऊठि, 'एत्येधत्यूठ्सु' (6-1-89) इति वृद्धौ च रूपमेवम्।
6. ण्यति, 'हलो यमाम्—' (8-4-64) इति यलोपस्य पाक्षिकत्वाद्रूपद्वयम्। एवमेव यकि, ल्यपि च रूपद्वयं ज्ञेयम्।
7. यङन्तात् यत्प्रत्यये 'हलो यमां यमि—' (8-4-64) इति लोपस्य वैकल्पिकत्वाद् रूपद्वयम्। एवमेव यकि, ल्यपि शानजन्तेऽपि ज्ञेयम्।

A. 'कृण्वन्तमाश्वयंगतीरमूतिदं जगन्त्यवन्तं त्रिदशोपधावितम्॥' धा. का. 1.76.

B. 'प्रम्लेवितं रेवितवत्समण्डलीं मव्यद्भिराभीरजनैरसूर्क्ष्यकैः॥' धा. का. 1.65.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| ईषन्मव्यः-दुर्मव्यः-सुमव्यः ; | — | — | — |
| मव्यमानः-मव्ययमानः, मव्यमानः, | | मिमव्यिष्यमाणः, | माममव्यमानः ; |
| मव्यः, | मव्यः, | मिमव्यिषः, | माममव्यः ; |
| मव्यितुम् , | मव्ययितुम् , | मिमव्यिषितुम् , | माममव्यितुम् ; |
| [1]मव्या, | मव्यना, | मिमव्यिषा, | माममव्या ; |
| मव्यनम् , | मव्यनम् , | मिमव्यिषणम् , | माममव्यनम् ; |
| मव्यित्वा, | मव्ययित्वा, | मिमव्यिषित्वा, | माममव्यित्वा ; |
| प्रमव्य-प्रमव्य्य, | प्रमव्य्य, | प्रमिमव्यिष्य, | प्रमामव्य-प्रमामव्य्य ; |
| मव्यम् २, मव्यित्वा २, | मव्यम् २, मव्ययित्वा २, | मिमव्यिषम् २, मिमव्यिषित्वा २, | माममव्यम् २; ममव्यित्वा २; |

[2]मवाका.

## (1231) " मश शब्दे रोषकृते च "

(I-भ्वादिः-724. अक. सेट्. पर.)

'शब्दने, रोषक्रियायां चार्थे—' इति क्षीरस्वामी । " शब्दकोपयोः-इति द्रुमोक्त्या रोषकृतम्=रोष एव ।" इति धा. का. व्याख्यायाम्(1-90)। माशकः-शिका, माशकः-शिका, मिमशिषकः-षिका, मामशकः-शिका ; मशिता-त्री, माशयिता-त्री, मिमशिषिता-त्री, मामशिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि आदादिककशतिवत् (178) ज्ञेयानि । शतरि—मशन्-न्ती, क्विपि-[3]मट्-मड्-मशौ-मशः ; इत्यादीनि रूपाण्यस्य भवन्तीति विशेषः । [4]मशकः । [5]मशनः ।

## (1232) " मष हिंसार्थः " (I-भ्वादिः-692. सक. सेट्. पर.)

माषकः-षिका, माषकः-षिका, मिमषिषकः-षिका, मामषकः-षिका ; मषिता-त्री, माषयिता-त्री, मिमषिषिता-त्री, मामषिता-त्री ; इत्यादीनि

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये रूपमेवम् ।
2. 'वलाकादयश्च' (द. उ. 3.32) इति आकप्रत्यये यलोपे च निपात्यते। **मवाका**=करेणुबन्धनम् ।
3. क्विपि, 'व्रश्च—' (8-2-36) इत्यादिना षत्वे जश्त्वचर्त्वयोश्च रूपमेवम् ।
4. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3.5) इति संज्ञायां क्वुन्प्रत्यये रूपमेवम् ।
5. 'चलनशब्दार्थात्—' (3-2-148) इति ताच्छीलिके युचि रूपमेवम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सर्वाण्यपि रूपाणि भौवादिकखषतिवत् (346) ज्ञेयानि। [1]दण्डोपमाषम्-दण्डेनोपमाषं वा गाः कालयति। [2]माषः, [3]मषी।

(1233) "मसी परिणामे" (IV-दिवादिः-1221. अक. सेट्. पर.)

परिणामः—विकारः।

'—परिमाणे' इति कविकल्पद्रुम-माधवीयधातुवृत्त्योः पाठः। 'समी—' इति क्वचित् पाठः।

मासकः-सिका, मासकः-सिका, मिमसिषकः-षिका, मामसकः-सिका; मसिता-त्री, मासयिता-त्री, मिमसिषिता-त्री, मामसिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिकग्रसतिवत् (440) ज्ञेयानि। [4]मस्तः-मस्तवान्, मस्तकम्, [5]मासः, [6]मस्यन्-न्ती-ती, [7]मः-मसौ-मसः, इतीमानि रूपाण्यस्मात् सम्भवन्तीति विशेषः।

(1234) "मस्क गत्यर्थे" (I-भ्वादिः-102. सक. सेट्. आत्म.)

मस्ककः-स्किका, मस्ककः-स्किका, मिमस्किषकः-षिका, मामस्ककः-स्किका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्जतिवत् (169) ज्ञेयानि। क्विपि [8]मक्-मस्कौ-मस्कः इति रूपम्। [9]मस्कनः। अस्य आत्मनेपदित्वात् शानचि मस्कमानः इति भवति।

---

1. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल्। 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः।
2. मष्यते = हिंस्यते बुद्धिभ्रंशसम्पादनेन इति माषः = धान्यविशेषः। संज्ञायाम्, 'हलश्च' (3-3-121) इति करणे घञ्।
3. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इतीक्प्रत्यये, 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीषि च मषी इति सिद्ध्यति। मषी = स्याही।
4. ईदित्वात्, 'श्वीदितो निष्ठायाम्' (7-2-14) इति निष्ठायामिण्निषेधे रूपमेवम्। निष्ठान्तात् संज्ञायां कन्प्रत्यये मस्तकम् इति भवति।
5. मस्यते = परिमीयतेऽनेनेति मासः = त्रिंशद्दिनावधिकः कालविशेषः। एतच्च धातोरस्य परिमाणार्थकत्वे ज्ञेयम्। परिणामार्थकत्वे तु मस्यति = पदार्थान् परिणमयतीत्यर्थे बाहुलकात् संज्ञायां घञि मासः इति सिद्ध्यति। मास्शब्दस्तु प्रकृत्यन्तरम्, नास्माद्धातोः सिद्धमिति ज्ञेयम्।
6. शतरि दिवादित्वात् श्यनि रूपमेवम्।
7. क्विपि धातुसकारस्य रुत्वे विसर्गे च रूपमेवम्।
8. 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति सकारस्य पदान्तनिमित्तको लोपः।
9. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिके युचि रूपम्।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1235) "टु मस्जो शुद्धौ" (VI-तुदादिः-1415. अक. अनि. पर.)

'शुद्धया स्नानम्, त्रुडनं च लक्ष्यते।' इति क्षीरस्वामी। त्रुडनम्=संवरणम्।

[1]मज्जकः-ज्जिका, मज्जकः-ज्जिका, [2]मिमङ्क्षकः-क्षिका, मामज्जकः-ज्जिका;
[3]मङ्क्ता-मङ्क्त्री, मज्जयिता-त्री, मिमङ्क्षिता-त्री, मामज्जिता-त्री;
[4]मज्जन्-ती, मज्जयन्-न्ती, मिमङ्क्षन्-न्ती; —
मङ्क्ष्यन्-न्ती-ती, मज्जयिष्यन्-न्ती-ती, मिमङ्क्षिष्यन्-न्ती-ती; —
— [5]मज्जयमानः, — मामज्जयमानः;
— मज्जयिष्यमाणः, — मामज्जिष्यमाणः;
[6]सुमक्-सुमग्-सुमज्जौ-सुमज्जः; — — —
[7]मग्नः-मग्नवान्, मज्जितः, मिमङ्क्षितः, मामज्जितः-तवान्;
मज्जः, मज्जः, मिमङ्क्षुः, मामज्जः;
मङ्क्तव्यम्, मज्जयितव्यम्, मिमङ्क्षितव्यम्, मामज्जितव्यम्;
मज्जनीयम्, मज्जनीयम्, मिमङ्क्षणीयम्, मामज्जनीयम्;

---

1. ण्वुलि, 'झलां जश् झशि' (8-4-53) इति सकारस्य दकारे, तस्य श्चुत्वेन जकारः। एवमेव ण्यन्तेषु, यङन्तेषु, शुद्धे अजादिप्रत्ययेषु च रूपनिष्पत्तिरिति ज्ञेयम्।

2. सन्नन्तात् ण्वुलि, धातोरनिट्त्वेन झलादिप्रत्ययपरकत्वात्, '**मस्जि**नशोर्झलि' (7-1-60) इति नुमागमः। अत्र च 'मिदचोऽन्त्यात् परः' (1-1-47) इति नियमं बाधित्वा, '**मस्जे**रन्त्यात् पूर्वं नुममिच्छन्ति अनुषङ्गादिलोपार्थम्' (वा. 1-1-47) इति **भाष्या**युक्तप्रकारेण धातुजकारात् पूर्वं नुम्। तेन सकारस्य संयोगादिलोपे, कुत्वे च रूपमेवम्। एवमेव सन्नन्ते सर्वत्र प्रक्रियोह्या।

3. तृचि अन्त्यात् पूर्वं नुमि, 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति संयोगादिलोपे रूपमेवम्। एवमेव तव्यदादिष्वपि ज्ञेयम्।

4. शतरि, तुदादित्वात् शपोऽपवादत्वेन शप्रत्यये जश्त्वश्चुत्वयो रूपमेवम्।

5. शुद्धेश्चेतनकर्तृकत्वे, ण्यन्तात्, 'अणावकर्मकात्—' (1-3-88) इति परस्मैपदमेव। अचित्तवत्कर्तृकत्वे तु आत्मनेपदमपीष्यतोऽत्रात्मनेपदम्।

6. क्विपि, संयोगादिलोपे, जकारस्य कुत्वे च रूपमेवम्।

7. निष्ठायाम्, '**मस्जि**नशोः—' (7-1-60) इति नुमि, सकारस्य संयोगादिलोपे, नुमो नकारस्य 'अनिदिताम्—' (6-4-24) इति लोपे, 'ओदितश्च' (8-2-45) इति निष्ठानत्वे, नत्वस्यासिद्धत्वेन झल्परकत्वात् 'चोः कुः' (8-2-30) इति कुत्वे च रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]मद्ग्यम्-मद्ग्यः, | मज्जयम्, | मिमङ्क्ष्यम्, | मामज्ज्यम् ; |
| ईषन्मज्जः-दुर्मज्जः-सुमज्जः ; | — | — | — |
| मज्ज्यमानः, | मज्ज्यमानः, | मिमङ्क्ष्यमाणः, | मामज्ज्यमानः; |
| मद्गः, | [2]मज्जथुः[A] मज्जः, | मिमङ्क्षः, | मामज्जः ; |
| मङ्क्तुम् , | मज्जयितुम्, | मिमङ्क्षितुम्, | मामज्जितुम् ; |
| [3]मज्जा, | मज्जना, | मिमङ्क्षा, | मामज्जा ; |
| मज्जनम्, | मज्जनम्, | मिमङ्क्षणम्, | मामज्जनम् ; |
| [4]मङ्क्त्वा[B]-मक्त्वा, | मज्जयित्वा, | मिमङ्क्षित्वा, | मामज्जित्वा ; |
| प्रमज्ज्य, | प्रमज्ज्य, | प्रमिमङ्क्ष्य, | प्रमामज्ज्य ; |
| मज्जम् २<br>मङ्क्त्वा २<br>मक्त्वा २ | मज्जम् २<br>मज्जयित्वा २ | मिमङ्क्षम् २<br>मिमङ्क्षित्वा २ | मामज्जम् २ ;<br>मामज्जित्वा २; |
| [5]मद्गुः, | [6]मज्जा-मज्ज नौ-मज्जानः, | [7]मञ्जूषा, | [8]मद्गुरः । |

---

1. ण्यति, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति धातुजकारस्य कुत्वे सकारस्य जश्त्वेन दकारे च रूपमेवम्। घञ्यप्येवमेव रूपनिष्पत्तिरिति ज्ञेयम्।
2. भावे, 'ट्वितोऽथुच्' (3-3-89) इत्यथुच्प्रत्यये रूपमेवम्।
3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्यये रूपमेवम्। **केचित्तु** क्तिनि, नुमि नलोपे च **मक्ति**रिति साधयन्ति। 'प्रसज्य चापवादविषयं तत उत्सर्गोऽभिनिविशते' (परि. 65) इति न्यायानुसरणे तु **मज्जा** इत्यकारप्रत्ययान्तं रूपमेव न्याय्यमिति प्रतिभाति।
4. क्त्वाप्रत्यये, '**जान्त**नशां विभाषा' (6-4-32) इत्यनुनासिकलोपनिषेधविकल्पः। निषेधविकल्पे विधिविकल्पपर्यवसानात् अनुनासिकलोपो विभाषा भवतीति ज्ञेयम्। तेन रूपद्वयम्।
5. 'भृमृशीतॄचरित्सरितनिमि**मस्जिभ्य** उः' (द. उ-1-92) इत्युप्रत्यये रूपमेवम्। मज्जत्यम्भसीति **मद्गुः**=जलपक्षिविशेषः। न्यङ्क्वादि (7-3-53) पाठात् जकारस्य कुत्वेन गकारः।
6. 'श्वन्नुक्षन्—' (द. उ. 6-55) इत्यादिना कनिन्प्रत्यये रूपमेवम्। मज्जत्यस्थिष्विति **मज्जा**=अस्थ्यन्तसारः। नकारान्तोऽयं शब्दः।
7. '**मस्जेर्नुम्** च' (द. उ. 9-18) इत्यूषन्प्रत्यये, नुमागमे च रूपमेवम्। मज्जत्यस्यामिति **मञ्जूषा**=पेटिका।
8. बाहुलकादौणादिकेऽरप्रत्यये न्यङ्क्वादित्वात् (7-3-53) कुत्वे च रूपम्। **मद्गुरः**=जलपक्षिविशेषः।

A. 'तल्पे कान्तान्तरैः सार्धं मन्येऽहं धिङ् **निमज्जथुम्**॥' भ. का. 5.20.
B. 'अध्यास्त यं नक्रकुलं स्थवीयो द्विपोऽप्यमङ्क्त्वा न यमुत्ततार।' वा.वि. 3.38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1236) "मह पूजायाम्" (I-भ्वादिः-730. सक. सेट्. पर.)

'महयेन्महतीत्येते पूजायां णौ शपि क्रमात्।' (श्लो. 196) इति देवः।
क्षीरस्वामी नामुं धातुं पठति।

माहकः-हिका, माहकः-हिका, मिमहिषकः-षिका, मामहकः-हिका; महिता-त्री, माहयिता-त्री, मिमहिषिता-त्री, मामहिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचहतिवत् (514) बोध्यानि। [1]मही, [2]महिषः-महिषी, महिष्मान्, [3]महत्-महान्-महान्तौ-महान्तः, [4]माहिनम्-महिनम्, महिमा, इत्यादीनि रूपाणि अस्य धातोः विशेषेण संभवन्तीति विशेषः। कर्मणि क्तप्रत्यये [A]महितम्-तः इति।

## (1237) "मह पूजायाम्" (X-चुरादिः-1868. सक. सेट्. उभ.)

अदन्तः, कथादिश्च।

'महयेत् महतीत्येते पूजायां णौ शपि क्रमात्।' (श्लो. 196) इति देवः।
[5]महकः-हिका, मिमहयिषकः-षिका; महयिता-त्री, मिमहयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचहयतिवत् (515) बोध्यानि। [6]महः-मही, [7]मघवन्, इति रूपाणि विशेषेण भवन्ति इति ज्ञेयम्।

---

1. पचाद्यजन्तात् महशब्दात् गौरादित्वात् (4-1-41) स्त्रियां ङीषि रूपमेवम्।
2. 'अविमह्योष्टिषच्' (द. उ. 9-3) इति टिषच्प्रत्यये महिषः इति रूपम्। टित्त्वात् स्त्रियां महिषी इति भवति। महिषा अस्मिन् सन्तीति महिष्मान् = देशः। 'महिषाच्चेति वक्तव्यम्' (वा. 4-2-87) इति 'तदस्मिन्नस्तीति देशे तन्नाम्नि' (4-2-67) इति विषये ड्मतुप्प्रत्यये डित्त्वाट्टिलोपे च रूपमेवम्।
3. 'वर्तमाने पृषद्बृहन्महद्—' (द. उ. 6-5) इति वर्तमानकाले कतिप्रत्यये शतृवद्भावातिदेशान्नुमि, 'सान्तमहतः संयोगस्य' (6-4-10) इत्यसंबुद्धौ सर्वनामस्थाने परतः उपधायाः दीर्घे च महान् इति रूपं सिध्यति।
4. 'महेरिनण् च' (द. उ. 5.19) इति इनण्प्रत्यये माहिनम् इति, चकारात् इनन्प्रत्यये महिनम् इति च रूपम्। महिनम् = राज्यम्।
5. अस्य धातोः अदन्तेषु पाठसामर्थ्यात् अल्लोपस्य स्थानिवद्भावेन णिच्परत्वाभावात् 'अत उपधायाः' (7-2-116) इति वृद्धिर्नेति ज्ञेयम्।
6. 'पुंसि संज्ञायां घः—' (3-3-118) इति घप्रत्यये रूपमेवम्। स्त्रियां गौरादिपाठात् (4-1-41) ङीषि मही इति सिद्ध्यति।
7. 'श्वन्नुक्षन्.... ...' (द. उ. 6-55) इति कनिन्प्रत्यये घकारेऽन्तादेशे वुगागमे च निपातिते रूपमेवम्।

A. 'चाहेनामहितस्य चास्य निघनोयोगं रहस्यूचिवान्......॥' धा. का. 1.91.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



णमुलि महम् २, महयित्वा २, इत्येकमेव रूपम्।

(1238) "महि वृद्धौ" (I-भ्वादिः-634. अक. सेट्. आत्म.)

मंहकः-हिका, मंहकः-हिका, मिमंहिषकः-षिका, मामंहकः-हिका; मंहिता-त्री, मंहयिता-त्री, मिमंहिषिता-त्री, मामंहिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। कर्तरि क्तप्रत्यये मंहितः[A] इति, युचि-मंहनः इति च विशेषः।

(1239) "महि भाषार्थः" (X-चुरादिः-1800. सक. सेट्. उभ.)

आस्वदीयः। '—भासार्थः' इति क्षीरस्वामी।

मंहकः-हिका, मिमंहयिषकः-षिका, मंहकः-हिका, मिमंहिषकः-षिका, मामंहकः-हिका; मंहयिता-त्री, मिमंहयिषिता-त्री, मंहिता-त्री, मिमंहिषिता-त्री, मामंहिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि।

(1240) "मा माने" (II-अदादिः-1062. सक. अनि. पर.)

'मिमीते मायते माने माति तत्रैव शब्लुकि।' (श्लो. 9) इति देवः।
'मानम्=वर्तनम्' इति क्षीरस्वामी। '—अन्तर्भावः' इति मा. धा. वृत्तिः।
'आधेयस्याधाराद् अनधिकपरिमाणताऽत्र मानम्।' इति पुरुषकारः।

[1]मायकः-यिका, [2]मापकः-पिका, [3]मित्सकः-त्सिका, [4]मेमीयकः-यिका; माता-त्री, मापयिता-त्री, मित्सिता-त्री, मेमीयिता-त्री;

1. ण्वुलि 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः। एवं घञ्णमुलादिष्वपि ज्ञेयम्।
2. ण्यन्ते सर्वत्र 'अर्त्तिह्रीव्ली—' (7-3-36) इति आदन्तलक्षणे पुगागमे रूपमेवम्।
3. 'सनि मीमाघु—' (7-4-54) इत्यादिना इस्भावे, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपे, 'सः स्यार्धधातुके' (7-4-49) इति सकारस्य तकारे, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वेन गुणाभावे च रूपमेवम्। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
4. यङन्ते सर्वत्र, 'घुमास्था—' (6-4-66) इतीकारे, 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासे गुणः।

A. 'अक्रूर एत्य बहुधागतमंहितांहः... ...॥' धा. का. 1.80.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]निर्मान्-[A]न्ती-ती, मापयिष्यन्-न्ती-ती, मित्सिष्यन्-न्ती-ती ; —

— मापयमानः, मापयिष्यमाणः, — मेमीयमानः, मेमीयिष्यमाणः;

प्रमीः-प्रम्यौ-प्रम्यः ; — — —

[2]मितम्-तः-तवान् ; मापितः, मित्सितः, मेमीयितः-तवान् ;

[3]प्रमः, [4]मायः, माया-मायावी-मायिकः-मायी, [5]धान्यमायः, मापः,

मित्सुः, [6]मेम्यः ;

मातव्यम्, मापयितव्यम्, मित्सितव्यम्, मेमीयितव्यम् ;

[7]प्रनिमानीयम्-प्रणिमानीयम्, मापनीयम्, मित्सनीयम्, मेमीयनीयम् ;

[8]मेयम्, [9]पाय्यम्, माप्यम्, मित्स्यम्, मेमीय्यम् ;

ईषन्मानः-दुर्मानः-सुमानः ; — —

---

1. शतरि, अदादित्वेन शपो लुकि, सवर्णदीर्घे, 'आच्छीनद्योर्नुम्' (7-1-80) इति स्त्रियां नुम्विकल्पे च **निर्मान्ती-निर्माती** इति रूपद्वयम् इति ज्ञेयम्।

2. 'द्यतिस्यतिमास्थाम् इत् ति किति' (7-4-40) इति क्तप्रत्यये परतः प्रकृतेः इकारः। गुणनिषेधः। एवं क्त्वाक्तिन्प्रभृतिष्वपीकारो बोध्यः।

3. '**आत**श्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः। '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपः।

4. 'श्याऽऽद्व्यध—' (3-1-141) इत्यादिना कर्तरि आदन्तलक्षणो णप्रत्ययः। '**आतो** युक् चिण्कृतोः' (7-3-33) इति युगागमः। स्त्रियां टापि **माया** इति सिद्ध्यति। **मायाशब्दात्** मत्वर्थीये विनिप्रत्यये **मायावी** इति, व्रीह्यादित्वात् (5-2-116) इनिठन्प्रत्यययोश्च **मायी-मायिकः** इति च रूपाणि सिद्ध्यन्ति।

5. कर्मण्युपपदे कर्तरि, 'ह्वावा**म**श्च' (3-2-2) इत्यण्प्रत्यये युगागमे च रूपमेवम्। '**आतो**ऽनुपसर्गे कः' (3-2-3) इति प्राप्तस्य कप्रत्ययस्यापवादः।

6. यङन्तात् पचाद्यचि (3-1-134), 'यङोऽचि च' (2-4-74) इति यङो लुकि ईकारे, उत्तरखण्डे यणि च रूपमेवम्।

7. 'शेषे विभाषा—' (8-4-18) इति नेर्णत्वविकल्पः। 'नेर्गदनदपतपदघुमा—' (8-4-17) इत्यत्र नास्य धातोर्ग्रहणम्, अपि तु माङ्मेङोरेव ग्रहणम् इति बहवः।

8. यति परे, 'ईद् यति' (6-4-65) इति ईकारे गुणे च रूपमेवम्।

9. माने=परिमाणेऽभिधेये '**पाय्य**सान्नाय्यनिकाय्यधाय्या **मा**नहविर्निवाससामिधेनीषु' (3-1-129) इत्यनेन ण्यदायादेशौ आदेः पकारश्च निपात्यन्ते।

A. 'ख्यान्त्यः कथाः प्राणमुदां पतीनां **निर्मान्त्य** इष्टानि चद्धन् वचत्यः।' धा. का. 2.50.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]मीयमानः, | माप्यमानः, | मित्स्यमानः, | मेमीय्यमानः ; |
| मायः, [2]आमः, | मापः, | मित्सः, | मेमीयः; |
| मातुम्, | मापयितुम्, | मित्सितुम्, | मेमीयितुम्; |
| [3]प्रमा-उपमा-अनुमा, प्रमितिः, | | मापना, मित्सा, | मेमीया ; |
| प्रमाणम्, | मापनम्, | मित्सनम्, | मेमीयनम् ; |
| मित्वा, | मापयित्वा, | मित्सित्वा, | मेमीयित्वा ; |
| [4]प्रमाय, | प्रमाप्य, | प्रमित्स्य, | प्रमेमीय्य ; |
| मायम् २, मित्वा २, | मापम् २, मापयित्वा २, | मित्सम् २, मित्सित्वा २, | मेमीयम् २ ; मेमीयित्वा २; |

[5]मेरुः, [6]मात्रा, [7]मासः ।

---

1. यगन्ताच्छानशि ईकारे **मीयमानः** इति सिद्ध्यति। **क्षीरस्वामी** तु '**घुमास्था**—' (6-4-66) इति सूत्रे नास्य धातोर्ग्रहणमिति 'सर्वत्र हि पामाग्रहणं लुग्विकरणस्य णत्ववर्जम्' इति वचनं किञ्चिदुपादाय **मायते** इति यकि रूपं साधितवान्, **भाष्यादिषु** नैतादृशं वचनमुपलभ्यते । **प्रक्रियाकौमुदीकारं** वर्जयित्वा सर्वेऽपि '**गामा**दाग्रहणेष्वविशेषः' (परि. 116) इति परिभाषामवलम्ब्य '**घुमास्था**–' (6-4-66) इत्यादिषु सर्वत्र माग्रहणेष्वस्यापि ग्रहणमिच्छन्ति। स्पष्टमिदं **माधवधातुवृत्त्यादिषु**।
2. आ = समन्तात् मीयतेऽत्रेति **आमः** = अपक्वपदार्थः। अधिकरणे 'घञर्थे कविधानम्—' (वा. 3-3-58) इति कप्रत्यये, आकारलोपे रूपमेवम्।
3. स्त्रियां भावादौ, '**आतश्चोपसर्गे**' (3-3-106) इति क्तिन्नपवादोऽङ्प्रत्ययः। '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपे अदन्तत्वेन टापि **प्रमा, उपमा** इत्यादिकं सिद्ध्यति। **प्रमितिः, उपमितिः, अनुमितिः** इत्यादयस्तु बाहुलकात् क्तिनि सिद्ध्यन्तीति ज्ञेयम्।
4. समासे क्त्वाप्रत्ययस्य ल्यबादेशे, 'न ल्यपि' (6-4-69) इतीकारनिषेधः।
5. '**मापो** रुरी च' (द. उ. 1-157) इति रुप्रत्यये ईकारे चान्तादेशे गुणे रूपमेवम्। माति सूर्येन्दुभ्यामिति **मेरुः** = सुरगिरिः।
6. '**हुयामा**—' (द. उ. 8.84) इति त्रन्प्रत्यये रूपमेवम्। मीयतेऽनेनेति **मात्रा** = अल्पपरिमाणम्।
7. मातीत्यर्थे '**मासश्च**' (द. उ. 9.27) इति सप्रत्ययो निपात्यते। **मासः**= त्रिंशद्दिनपरिच्छिन्नः कालविशेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1241) "माक्षि काङ्क्षायाम्" (I-भ्वादिः-669. सक. सेट्. पर.)

माङ्क्षकः-क्षिका, माङ्क्षकः-क्षिका, मिमाङ्क्षिषकः-षिका, मामाङ्क्षकः-क्षिका; माङ्क्षिता-त्री, माङ्क्षयिता-त्री, मिमाङ्क्षिषिता-त्री, मामाङ्क्षिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककाङ्क्षतिवत् (183) ज्ञेयानि। [A]ण्यति माङ्क्षयः।

(1242) "माङ् माने शब्दे च"

(III-जुहोत्यादिः-1088. सक-अक. अनि. आत्म.)

'मिमीते मायते माने माति तत्रैव शब्लुकि।
मयते प्रणिदानेऽर्थे—॥' (श्लो. 9) इति देवः।

मायकः-यिका, मापकः-पिका, मित्सकः-त्सिका, मेमीयकः-यिका; माता-त्री, मापयिता-त्री, मित्सिता-त्री, मेमीयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकमातिवत् (1240) बोध्यानि। [1]मिमानः, [2]वातप्रमीः-वातप्रम्यौ-वातप्रम्यः, [3]प्रणिमानम्-प्रणिमापनम्, मेयम्, पाय्यम्, [B]व्योममायः, [4]चन्द्रमाः इमानि रूपाण्यधिकान्यत्रेति विशेषः। अस्य धातोः आत्मनेपदित्वात् शानचि-अनुमिमानः, मित्समानः, मास्यमानः, मित्स्यमानः, इति विशेषः।

---

1. शानचि, 'जुहोत्यादिभ्यः—' (2-4-75) इति शपः श्लुः। 'श्लौ' (6-1-10) इति द्विर्वचने, 'भृञामित्' (7-4-76) इत्यभ्यासस्येकारः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः।
2. वातं प्रमिमीते इत्यर्थे 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विपि 'घुमास्थागापाजहातिसां हलि' (6-4-66) इतीकारे रूपमेवम्। 'ईत्वे वकारप्रतिषेधः—' (वा. 6-4-66) इति वचनं तु श्रूयमाणवकारादिप्रत्ययविषयकमिति नात्र प्रवर्तते। **वातप्रमीः** शमीवृक्षः, पक्षिविशेषश्च।
3. 'नेर्गदनदपतपदघुमा—' (8-4-17) इत्यादिना उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वम्। एवं ण्यन्तेऽपि णत्वं ज्ञेयम्।
4. 'चन्द्रे मो डित्' (द. उ. 9-88) इत्यनेन चन्द्रशब्द उपपदे धातोरस्मात्असिप्रत्यये तस्य च डिद्वद्भावेन टिलोपे च रूपमेवम्।

A. 'सूर्य्य! त्वदीक्षा चिरकाङ्क्षिता नो वाङ्क्षाम्यमाङ्क्षयान् न तु नीचलोकान्।' धा. का. 1.85.

B. 'जगाम सपरीवारो व्योममायमिवोत्थितम्॥' भ.का. 6.88.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1243) "माङ् माने" (IV-दिवादिः-1142. सक. अनि. आत्म.)

'मिमीते मायते माने माति तत्रैव शब्लुकि ।' (श्लो. 9) इति देवः । दुर्गादयः केचिदेवामुं धातुं पठन्ति । क्षीरस्वामिप्रभृतयस्तु न पठन्ति । मायकः-यिका, मापकः-पिका, मित्सकः-त्सिका, मेमीयकः-यिका; माता-त्री, मापयिता-त्री, मित्सिता-त्री, मेमीयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकमातिवत् (1240) ज्ञेयानि । शानचि, [1]मायमानः इति रूपम् ।

(1244) "मान पूजायाम्"

(I-भ्वादिः-972. सक. सेट्. आत्म.) [अ]

'पूजायां मानयेत् मानेत् यौ, मीमांसेत तङ्सनोः ।' (श्लो. 126) इति देवः । [2]मीमांसकः-सिका, मीमांसकः-सिका, मीमांसयिषकः-षिका, [3]मानकः-निका; मीमांसिता-त्री, मीमांसयिता-त्री, मीमांसयिषिता-त्री, मानयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकदीदांसतिवत् (832) ज्ञेयानि । अस्यात्मनेपदित्वात् शानजेव, न शतेति विशेषः । [4]माता ।

---

1. शानचि, 'दिवादिभ्यः—' (3-1-69) इति श्यनि, रूपमेवम् । अत्र श्यनोऽपित्सार्वधातुकत्वेन ङिद्वद्भावात् 'घुमास्था—' (6-4-66) इति ईकारे सति मीयमानः इत्येव न्याय्यम् । 'गामादाग्रहणेष्वविशेषः' (परि. 116) इति वचनमप्यस्य ईकारेऽनुकूलम् । तथापि सर्वैरपि वैयाकरणैः 'घुमास्था—' (6-4-66) सूत्रे भौवादिकादादिकजौहोत्यादिकमाधातूनामेव ग्रहणस्योक्तत्वात् अत्र न ईकार इति ज्ञेयम् ।
2. 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (3-1-6) इति स्वार्थे सन् । अभ्यासकार्येषु प्रवृत्तेषु दीर्घश्चाभ्यासस्य भवति । एवमेवोत्तरत्र सर्वत्रापि ज्ञेयम् ।
3. 'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' (भाष्यम् 3-1-6) इति वचनात् स्वार्थसन्नन्तादेवास्यात्मनेपदत्वम्, अर्थान्तरे तु चुरादिपाठ उन्नेयः । तदानीं 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदम् । स्वार्थसन्नपि अर्थान्तरे न भवति इत्यतः मानकः-निका, मानयिता-त्री, मानयन्-न्ती इत्यादीनि रूपाण्यूह्यानि ।
4. 'नप्तृनेष्टृ –' (द. उ. 2-3) इत्यादिना तृन्तृचोः प्रत्यययोः नकारलोपे च रूपमेवम् । माता = जननी ।

[अ] 'मानेर्जिज्ञासायाम्' इति (काशिका 3-1-6) वचनात् पूजितविचारे धातोरस्य नित्यसन्नन्तत्वम् । न तु इच्छार्थकः सन् । 'नित्यसन्नन्तत्वसाधनाच्च धातोः पृथक् प्रयोगाभावात् पूजायर्थपाठो व्यर्थः' इति हरदत्तादयः । स्वार्थसन्नन्तात् क्रमेण ण्यन्तस्य, इच्छासन्नन्तस्य च प्रयोगः प्रदर्शित इति ज्ञेयम् ।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.



(1245) "मान पूजायाम्" (X-चुरादिः-1844. सक. सेट्. उभ.)

आधृषीयः।

'पूजायां मानयेत् मानेत् यौ, मीमांसेत तङ्सनोः।' (श्लो. 126) इति देवः। मानकः-निका, मिमानयिषकः-षिका, मानकः-निका, मिमानिषकः-षिका, मामानकः-निका; मानयिता-त्री, मिमानयिषिता-त्री, मानिता-त्री, मिमानिषिता-त्री, मामानिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचीकयतिवत् (529) ज्ञेयानि। धातोरस्याधृषीयत्वेन 'आधृषाद्वा' (ग. सू. चुरादौ) इति णिज्विकल्पः। तेन णिंजभावपक्षे क्रमेण शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, शुद्धप्रकृतिकयङन्तादपि रूपाणि विलिखितानीति ज्ञेयम्।

(1246) "मान्थ हिंसासंक्लेशनयोः"

(I-भ्वादिः-46. सक. सेट्. पर.)

"—'मथि–' इत्यपि दौर्गाः" इति क्षीरस्वामी। सिद्धान्तकौमुद्यादिषु, धातुरयं न पठ्यते। 'हिंसा=प्राण्युपघातः, संक्लेशः=बाधा।' इति क्षीरस्वामी। मान्थकः-न्थिका, मान्थकः-न्थिका, मिमान्थिषकः-षिका, [1]मामाथकः-थिका; मान्थिता-त्री, मान्थयिता-त्री, मिमान्थिषिता-त्री, मामाथिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिककुथ्नातिवत् (223) ज्ञेयानि। [2]मान्थित्वा-माथित्वा, [A]प्रमान्थनम्।

(1247) "मार्ग संस्कारगत्योः"

(X-चुरादिः-1618. सक. सेट्. उभ.) [अ]

---

1. यङन्ते सर्वत्र यङ्निमित्तकः, 'अनिदिताम्—' (6-4-24) इत्युपधानकारलोपः। क्षीरस्वाम्युपात्तदौर्गमते तु धातोरिदित्वात् नोपधानकारलोपस्य प्रसक्तिः, तदानीम्, मामान्थकः-न्थिका, मामान्थिता-त्री, इत्यादीनि रूपाणि यथायथमूह्यानि।

2. क्त्वायाम्, 'नोपधात् थफान्ताद् वा' (1-2-23) इति कित्त्वविकल्पनाद् उपधानकारलोपपक्षे माथित्वा इति, तदभावपक्षे मान्थित्वा इति च रूपद्वयम्। दौर्गमते तु मा[म]न्थित्वा इत्येकमेव रूपमिति ज्ञेयम्।

A. 'स भोजराडव हरिं मिमन्थिषुः प्रमान्थनं सेधतु, को निषेत्स्यति ॥'

धा. का. 1-7.

[अ] चुरादिषु 'व्रज मार्ग संस्कारगत्योः' इति पठ्यते। तत्र 'मार्ग' इति पृथग्धातुरिति बहूनां पक्षः। तन्मतानुसारेणास्माभिरयमत्र लिख्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'अन्वेषणेऽर्थे मृगयेत णौ यो मार्गेर्भवेन्मार्गति **मार्गयेच्च** ॥'
(श्लो. 44) इति देवः ।

मार्गकः-र्गिका, मिमार्गयिषकः-षिका; मार्गयिता-त्री, मिमार्गयिषिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**गर्जयतिवत्** (378) ज्ञेयानि । यति–[A]मार्ग्यम् ।

## (1248) "मार्ग अन्वेषणे"

(X-चुरादिः-1847. सक. सेट्. उभ. आधृषीयः)

'अन्वेषणेऽर्थे मृगयेत णौ यो मार्गेर्भवेन्**मार्गति मार्गयेच्च** ॥' (श्लो. 44) इति देवः । आधृषीयत्वादस्य धातोर्णिज्विकल्पः । णिजभावपक्षे धातोरस्य भौवादिकत्वमिति ज्ञेयम् ।

मार्गकः-र्गिका, मिमार्गयिषकः-षिका, मार्गकः-र्गिका, मिमार्गिषकः-षिका, मामार्गकः-र्गिका; मार्गयिता-त्री, मिमार्गयिषिता-त्री, मार्गिता-त्री, मिमार्गिषिता-त्री, मामार्गिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**चर्पयतिवत्** (554) ज्ञेयानि ।

## (1249) "मार्ज शब्दार्थः" (X-चुरादिः-1649. अक. सेट्. उभ.)

'शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥
मार्ष्टि शुद्धौ तथा मार्जेः **शब्दार्थाद् मार्जयेण्णिचि** ।' (श्लो. 60.61) इति देवः।
'**शुद्धौ च इति द्रुमे** ।' इति **धा. का. व्या.** (3-28) ।

मार्जकः-र्जिका, मिमार्जयिषकः-षिका; मार्जयिता-त्री, मिमार्जयि-षिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**गर्जयतिवत्** (378) ज्ञेयानि । [B]विमार्जनम् ।

## (1250) "माह माने" (I-भ्वादिः-895. सक. सेट्. उभ.)

'मानम्=वर्तनम् ।' इति **क्षीरस्वामी** ।

माहकः-हिका, माहकः-हिका, मिमाहिषकः-षिका, मामाहकः-हिका; माहिता-त्री, माहयिता-त्री, मिमाहिषिता-त्री, मामाहिता-त्री; इत्यादि-

---

A. 'सुत्राजितेन मनसा **परिमार्ग्य** एषां तोषं व्यशुल्कयदसौ नयनप्रचम्पैः' ॥ धा.का.3.23.

B. 'इत्थं सुगाजितमृदङ्ग**विमार्जनानि** —' धा. का. 3.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



कानि सर्वाण्यपि रूपाणि भौवादिककाशतिवत् (186) ज्ञेयानि। क्विपि प्रमाट्-प्रमाड्-प्रमाहौ-प्रमाहः इति रूपमिति विशेषः। अस्योभयपदित्वात् प्रमाहन्-न्ती-ती, माहिष्यन्-न्ती-ती, इत्यादीन्यपि रूपाणि शतरि स्यप्रत्यये च सम्भवन्ति। ण्यति-[A]अमाह्यः।

(1251) "मिच्छ उत्क्लेशे" (VI-तुदादिः-1297. सक. सेट्. पर.)

'उत्क्लेशः=बाधनम्' इति क्षीरस्वामी। अस्य मते सकर्मकत्वम्। उत्क्लेशः=पीडा।' इति धातुवृत्तिः। तदानीमकर्मकत्वम्।

[1]मिच्छकः-च्छिका, मिच्छकः-च्छिका, [2]मिमिच्छषकः-षिका, मेमिच्छकः-च्छिका; मिच्छिता-त्री, मिच्छयिता-त्री, मिमिच्छिषिता-त्री, मेमिच्छिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचिल्लतिवत् (528) ज्ञेयानि। शतरि-स्त्रियाम्, मिच्छन्-न्ती-ती, इति नुम् वा।

(1252) "मिजि भाषार्थः" (X-चुरादिः-1757. सक. सेट्. उभ.)

आस्वदीयः। इदित्करणात् णिचो वैकल्पिकत्वम्।
धातुरयं क्षीरस्वामिना नोपात्तः।

[3]मिञ्जकः-ञ्जिका, मिमिञ्जयिषकः-षिका, मिञ्जकः-ञ्जिका, मिमिञ्जिषकः-षिका, मेमिञ्जकः-ञ्जिका; मिञ्जयिता-त्री, मिमिञ्जयिषिता-त्री, मिञ्जिता-त्री, मिमिञ्जिषिता-त्री, मेमिञ्जिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि।

(1253) "डु मिञ् प्रक्षेपणे" (V-स्वादिः-1250. सक. अनि. उभ.)

'मिनोति मिनुते स्वादेः गतौ मयति माययेत्।' (श्लो. 17) इति देवः।

---

1. 'मिछ' इत्येव धातुरुपदेशे पठ्यते। तस्य, 'छे च' (6-1-73) इति तुकि, श्चुत्वे च मिच्छ इति सम्पद्यते। एवमेव सर्वत्रास्य तुग् ज्ञेयः।
2. सन्नन्ते गुणात् पूर्वम्, अन्तरङ्गत्वात् तुकि लघूपधत्वाभावात् न गुणः। एवमेव सर्वत्र ज्ञेयम्।
3. इदित्वान्नुमि, अनुस्वारे परसवर्णे च रूपमेवम्। एवमेत्र सर्वत्र ज्ञेयम्।
A. 'या दासते मोदममाह्यधाम्नां गूढाशयानामपि तापसानाम्॥' धा. का. 2.28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]मायकः-यिका, | [2]मापकः-पिका, | [3]मित्सकः-त्सिका, | [4]मेमीयकः-यिका ; |
| माता-त्री, | मापयिता-त्री, | मित्सिता-त्री, | मेमीयिता-त्री ; |
| [5]मिन्वन्-न्ती, | मापयन्-न्ती, | मित्सन्-न्ती ; | — |
| मास्यन्-न्ती-ती, | मापयिष्यन्-न्ती-ती, | मित्सिष्यन्-न्ती-ती ; | — |
| मिन्वानः, | मापयमानः, | मित्समानः, | मेमीयमानः ; |
| मास्यमानः, | मापयिष्यमाणः, | मित्सिष्यमाणः, | मेमीयिष्यमाणः ; |
| प्रमाः-प्रमौ-प्रमाः ; | — | — | — |
| [6]मितम्-[A]तः-तवान्, | मापितः, | मित्सितः, | मेमीयितः-तवान् ; |

---

1. ण्वुलि वृद्धौ सत्यां एजन्तत्वेन 'मीनातिमिनोतिदीङाम्—' (6-1-50) इत्यनेन आत्वे, 'आतो युक् चिण्कृतोः' (7-3 33) इति युगागमः। एवं घञादिष्वपि बोध्यम्।

2. णिच्प्रत्ययोत्पत्तेरनन्तरं वृद्धौ कृतायाम् एजन्तत्वात् आत्वे, आदन्तलक्षणे पुगागमे च रूपमेवम्। ण्यन्ते सर्वत्र एवमेव प्रक्रिया ज्ञेया।

3. 'इको झल्' (1-2-9) इति सनः कित्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे 'सनि मीमा—' (7-4-54) इति इस्भावे 'सः स्यार्धधातुके' (7-4-49) इति सकारस्य तत्वे, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपे च रूपम्। एवं सन्नन्ते सर्वत्र बोध्यम्। माधवधातुवृत्तौ सन्नन्तरूपप्रदर्शनावसरेऽत्र, "—मित्सति, मित्सते, 'इको झल्' (1-2-9) इति सनः कित्वात्, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे—" इत्याद्युक्तम्। अस्यायं भावः। अनैमित्तिक आकारः प्रथमतो न प्रवर्तते। धातोः इगन्तत्वेन 'इको झल्' (1-2-9) इत्यादिसूत्रे सनः कित्वात्, एज्विषय एवाकारविधानात् इति।

4. यङन्ते 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घे द्विर्वचनादिकेषु च कृतेषु, 'गुणो यङ्लुकोः' (7-4-82) इति गुणः।

5. शतरि, 'स्वादिभ्यः—' (3-1-73) इति श्नुप्रत्यये, 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यणि च रूपमेवम्। शानजन्तेऽप्येवमेव।

6. निष्ठायामाकारो न प्रवर्तते; आकारविधायके सूत्रे (6-1-50) 'आदेच उपदेशेऽशिति' (6-1-45) इत्यतः 'एचः' इत्यनुवर्तनात्, तस्य च गुणयोग्यप्रत्ययेष्वेव परेषु आत्वमिति ज्ञापनात्। अतश्च निष्ठाप्रत्ययस्य कित्वात् न गुणः, तेन रूपमेवम्। स्पष्टमिदं प्रकृतसूत्रे (6-1-50) भाष्ये। एवमेव क्त्वाक्तिन्प्रभृतिष्वपि ज्ञेयम्।

A. 'धुन्वत्प्रियं तमथ रागसिताशिताग्रम्
आरोन्मिताञ्चविचयास्तृतमानसान्ता।' धा का. 2.68.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]मयः, | [2]मायी, मापः, | मित्सुः, | [3]मेम्यः ; |
| मातव्यम्, | मापयितव्यम्, | मित्सितव्यम्, | मेमीयितव्यम् ; |
| [4]प्रणिमानीयम्, | प्रणिमापनीयम्, | मित्सनीयम्, | मेमीयनीयम् ; |
| [5]मेयम्, | माप्यम्, | मित्स्यम्, | मेमीय्यम् ; |
| [6]ईषत्प्रमयः-दुष्प्रमयः-सुप्रमयः ; | | — | — |
| मायमानः, | माप्यमानः, | मित्स्यमानः, | मेमीय्यमानः ; |
| [7]मयः, | मापः, | मित्सः, | मेमीयः ; |
| मातुम्, | मापयितुम्, | मित्सितुम्, | मेमीयितुम् ; |
| मितिः, | मापना, | मित्सा, | मेमीया ; |
| मानम्, | मापनम्, | मित्सनम्, | मेमीयनम् ; |
| मित्वा, | मापयित्वा, | मित्सित्वा, | मेमीयित्वा ; |
| [8]प्रमाय, | प्रमाप्य, | प्रमित्स्य, | प्रमेमीय्य ; |
| मायम् २, } मित्वा २, } | मापम् २, } मापयित्वा २, } | मित्सम् २, } मित्सित्वा २, } | मेमीयम् २ ; } मेमीयित्वा २ ; } |

---

1. पचाद्यचि, '**निमिमीलियां खलचोः** प्रतिषेधः' (वा. 6-1-50) इति आकार-प्रतिषेधः। गुणेऽयादेशे च रूपमेवम्। अत्र **वार्तिके** 'अच्' पदेन पचाद्यचः (3-1-134), एरच (3-3-56) श्च ग्रहणमिति **कैयटादौ** प्रतिपादितम्। अत्र **वार्तिके** निपूर्वकस्यैव **मिनोतेः** ग्रहणाद्, उपसर्गान्तरे, उपपदे शुद्धे च आकार एव भवेदिति ज्ञायते। तदानीम्, '**आत**श्चोपसर्गे' (3-1-136) इति कप्रत्यये, '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपे च **प्रमः** इति रूपमपि साध्विति प्रतिभाति।
2. नन्द्यादित्वात् कर्तरि णिनिप्रत्यये युगागमे च रूपमेवम्।
3. यङन्तात् पचाद्यचि यङो लुकि 'एरनेकाचः—' (6-4-82) इति यणि च रूपमेवम्।
4. 'नेर्गदनदपतपदघुमा—' (8-4-17) इति नेर्णत्वे रूपमेवम्।
5. यत्प्रत्यये, अनैमित्तिक आकारे, 'ईद् यति' (6-4-65) इतीकारे गुणे च रूपम्।
6. धातोरस्य सकर्मकत्वात् कर्मणि खल्प्रत्यये, '**निमिमीलियां** खलचोः प्रतिषेधः' (वा. 6-1-50) इति आकारप्रतिषेधे गुणायादेशयो रूपमेवम्।
7. धातोरस्येवर्णान्तात्वत्, घञपवादतया 'एरच्' (3-3-56) इति भावेऽच्प्रत्यये आकारप्रतिषेधे च रूपमेवम्।
8. ल्यपि, 'मीनाति**मिनोति**दीङां **ल्यपि च**' (6-1-50) इति आकारे रूपमेवम्। अन्यथा क्त्वाप्रत्ययादेशभूतस्य ल्यप एज्विषयत्वाभावेन आकारो न स्यात्, तदर्थमेव '**—ल्यपि च**' (6-1-50) इत्युक्तमिति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]वातप्रमीः, [2]मायुः-गोमायुः, [3]मयुः, [4]जामाता, [5]मीरः ।

## (1254) " मिथृ मेधाहिंसनयोः "

(I-भ्वादिः-868. सक. सेट्. उभ.)

उत्तरत्र विलेखिष्यमाणस्य मेदृधातोः **क्षीरस्वामिसम्मतः** पाठ एवम् । मेथकः-थिका, मेथकः-थिका, मिमिथिषकः-मिमेथिषकः-षिका, मेमिथकः-थिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**केटतिवत्** (190) ज्ञेयानि । पचाद्यचि—**मेथः** । स्त्रियां गौरादित्वात् ङीषि **मेथी**=पशूनां पाशविशेषः । **मेथिः** इत्यपि तस्य क्वचिन्नाम ।

'**मेथी**बद्धोऽपि हि भ्राम्यन् घासग्रासं करोति गौः ।'

(सुभाषितावलिः 2958) इति **क्षीरस्वामिना** उद्धृतम् ।

## (1255) " ञि मिदा स्नेहने " (I-भ्वादिः-743. सक. सेट्. आत्म.)

'**मेदते** मेथतीत्येते स्नेहने, मिन्दयेण्णिचि ।

ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥' (श्लो. 104) इति **देवः** ।

**हरदत्त**स्तु धातोरस्य भ्वादिषु पाठं नानुमेने इति 'निष्ठा शीङ्—' (1-2-19) इति सूत्रे **पदमञ्जर्यां** व्यक्तम् ।

मेदकः-दिका, मेदकः-दिका, मिमेदिषकः-मिमिदिषकः-षिका, मेमिदकः-दिका; मेदिता-त्री, मेदयिता-त्री, मिमेदिषिता-मिमिदिषिता-त्री; मेमिदिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**क्ष्वेदतिवत्** (326) ज्ञेयानि ।

---

1. '**वातप्रमीः**' (उ. उ-1-85) इति सूत्रेण प्रपूर्वकात् वातशब्दे उपपदे वातं प्रमिणोतीत्यर्थे ईप्रत्यये निष्पन्नोऽयं शब्दः । **वातप्रमीः**=शमीवृक्षः, पक्षी च ।
2. 'कृवापाजिमि—' (द. उ. 1-86) इत्युण्प्रत्यये युगागमः । मीयतेऽनेनेति **मायुः** मानम् । गां **मिनोति** = हिनस्तीति **गोमायुः**=शृगालः ।
3. 'भृमृशीतृचरित्सरितनिमि—' (द. उ. 1-92) इत्युप्रत्यये बाहुलकादाकाराभावे गुणायादेशयोश्च रूपमेवम् ।
4. 'नमृनेष्टृ—' (द. उ. 2-3) इति तृन्प्रत्यये तृच्प्रत्यये वा **जायां मिनोती**त्यर्थे जायाशब्दस्य जादेशे च निपातितोऽयं शब्दः । **जामाता**=दुहितुः पतिः ।
5. '**शुषिचिमिभ्यो** दीर्घश्च' (द. उ. 8.43) इति क्रन्प्रत्यये प्रकृतेर्दीर्घे च रूपमेवम् । मिनोति इति **मीरः**= देशसीमा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



निष्ठायाम्—[1]मिन्नः,[A] [2]प्रमेदितम्-प्रमिन्नम्-[अनेन], प्रमिन्नः, [B]प्रमेदितः, [3]मेदुरः,[C] [4]मेदः, [5]मेदिनी, [6]मित्रम्-मित्रा, [7]मेदः, इतीमानि धातोरस्माद् विशेषेण भवन्ति। अस्यात्मनेपदित्वात् शानचि मेदमानः, मेदिष्यमाणः, इत्यादीनि रूपाणि भवन्तीति ज्ञेयम्।

(1256) "ञि मिदा स्नेहने" (IV-दिवादिः-1243. सक. सेट् .पर.)

'मेदते मेद्यतीत्येते स्नेहने, मिन्दयेण्णिचि।' (श्लो. 104) इति देवः।

मेदकः-दिका, मेदकः-दिका, मिमेदिषकः-मिमिदिषकः-षिका, मेमिदकः दिका; मेदिता-त्री, मेदयिता-त्री, मिमेदिषिता-मिमिदिषिता-त्री, मेमिदिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्ष्विद्यतिवत् (327) ज्ञेयानि। शतरि—[8]प्रमेद्यन्-[D]न्ती, मेदिष्यन्-न्ती-ती, इति रूपाणि भवन्त्यस्येति विशेषः।

---

1. 'ञीतः क्तः' (3-2-187) इति वर्तमाने कर्तरि क्तप्रत्यये, 'आदितश्च' (7-216) इति इण्निषेधे च, 'रदाभ्यां निष्ठातो नः, पूर्वस्य च दः' (8-2-42) इति निष्ठातकारधातुदकारयोर्नत्वे च रूपमेवम्।
2. अस्यैव धातोर्निष्ठायाम् भावे आदिकर्मणि च, 'विभाषा भावादिकर्मणोः' (7-2-17) इतीड्विकल्पे, इट्पक्षे, 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः' (1-2-19) इति सेटो निष्ठायाः कित्त्वनिषेधाद् गुणे **प्रमेदितम्, प्रमेदितः** इति भवतः। इडभावपक्षे तु कर्त्रर्थकक्तप्रत्ययान्तवत् प्रक्रिया ज्ञेया।
3. 'भञ्जभासमिदो घुरच्' (3-2-161) इति तच्छीलादिषु कर्तृषु घुरच्प्रत्यये गुणे च रूपमेवम्। **मेदुरः**= वसाविशेषवान् पश्वादिः।
4. कर्तरि पचाद्यचि गुणे च रूपमेवम्। **मेदः**=असुरविशेषः।
5. ग्रह्यादित्वात् (3-1-134) कर्तरि णिनिप्रत्यये स्त्रियाम्, 'ऋन्नेभ्यः—' (4-1-5) इति ङीपि च रूपमेवम्। **मेदिनी**=भूमिः।
6. 'अमिचिमिदिशसिभ्यः क्त्रः' (द. उ. 8.86) इति क्त्रप्रत्यये रूपमेवम्। मेदतीति **मित्रम्**= सुहृत्। सुहृदि अभिधेये नपुंसकलिङ्गत्वम्, सूर्ये तु पुँल्लिङ्गता, गन्धद्रव्ये तु स्त्रीलिङ्गत्वमस्यैव पदस्येति ज्ञेयम्।
7. 'असुन्' (द. उ. 9-49) इत्यस्मादसुन्प्रत्यये गुणे च रूपमेवम्। **मेदः**=वसा।
8. शतरि, 'दिवादिभ्यः—' (3-1-69) इति विकरणप्रत्यये श्यनि, तस्यापित्सार्वधातुकत्वेन ङिद्वद्भावाद् अङ्गस्य गुणनिषेधे प्राप्ते सति, '**मिदेर्गुणः**' (7-3-86)-इति गुणो विधीयते, तेन रूपमेवमिति ज्ञेयम्।

A. 'उद्वृत्तनयनो **मिन्नान्** मन्त्रिणः स्वान् व्यसर्जयन्॥' भ. का. ९.16.
B. '**प्रमेदिताः** सपुत्रास्ते सुस्वान्ता बाढविक्रमाः।' भ. का. 9.17.
C. 'प्रद्योतनस्योदयमाप्य गोपाः श्वेतांशुकोन्**मेदुर**चारुवेषाः।' धा. का. 2.1.
D. 'नभ्यांस्तुभ्य विभो जयेति नुवते क्लियन् **प्रमेद्यद्**रुजम्—॥' धा. का. 2.67.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1257) " मिदि स्नेहने " (X-चुरादिः-1541. सक. सेट्. उभ.)

' मेदते मेद्यतीत्येते स्नेहने, मिन्दयेर्णिणचि ।' (श्लो. 104) इति देवः । इदित्करणात् णिचो वैकल्पिकत्वम् । "—'मिद—' इति कौशिकः ।" इति क्षीरस्वामी । मिन्दकः-न्दिका, मिमिन्दयिषकः-षिका, मिन्दकः-न्दिका, मिमिन्दिषकः-षिका, मेमिन्दकः-न्दिका ; मिन्दयिता-त्री, मिमिन्दयिषिता-त्री, मिन्दिता-त्री, मिमिन्दिषिता-त्री, मेमिन्दिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचिन्तयतिवत् (523) ज्ञेयानि । [A]मिन्दितः ।

(1258) " मिदृ मेधाहिंसनयोः " (I-भ्वादिः-868. सक. सेट्. उभ.)

'ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥' (श्लो. 104) इति देवः । क्षीरस्वामी तु 'मिथृ–' इति तवर्गद्वितीयान्तं पपाठ । 'षिद्भिदादिभ्योऽङ्' (3-3-104) इत्यत्र न्यासकारस्तु 'मिधृ–' इति तवर्गचतुर्थान्तं पपाठ— मेधाशब्दनिष्पादनार्थम् । दैव-पुरुषकार-दुर्ग-मा. धा. वृत्ति-सिद्धान्तकौमुद्याद्यनुसारेण तवर्गतृतीयान्तपाठ एव प्रामाणिक इति कृत्वा अस्माभिरपि विलिख्यते । मेदकः-दिका, मेदकः-दिका, मिमेदिषकः-मिमिदिषकः-षिका, मेमिदकः-दिका ; मेदिता-त्री, मेदयिता-त्री, मिमेदिषिता-मिमिदिषिता-त्री, मेमिदिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकश्चेटतिवत् (190) ज्ञेयानि ।

(1259) " मिल श्लेषणे" (VI-तुदादिः-1364. सक. सेट्. पर.) [अ]

---

A. '......तत्रास कुन्दकसुलालितमिन्दितश्रीः ॥' धा. का. 3.13.

[अ] चुरादिषु 'बहुलम् ; एतन्निदर्शनम्' (ग. सू.) इति पठ्यते। तस्यायमर्थः— भ्वादिगणपठिता धातवो निदर्शनार्थाः। धातूनामसङ्ख्येयत्वात् बहुलमुपलम्भाच्च, अनुक्ता अपि धातवो यथासम्भवं तत्तद्विकरणेषु शिष्टप्रयोगानुसारेणोन्नेयाः इति। अत्रानुक्तेषु=अपठितेषु धातुष्वयमप्येक इति मत्वा भोजप्रभृतिभिः 'मिलन्त्याशासु जीमूताः, विक्लवन्ते दिवि ग्रहाः।' इत्यादीनां बहूनां धातूनां सङ्ग्राहकाः श्लोकाः पठिताः। परं तु मिलधातोरस्य तुदादावेव द्विवारं पाठोऽधुनोपलभ्यते। क्षीरस्वामी तु भ्वादावपि मिलधातुं 'मील—' धातुस्थाने पाठान्तरत्वेन पपाठ। काव्यालङ्कारसूत्रवृत्तौ (5-2-2) वामनोऽपि—" तत्र मिलि क्लविक्षपिप्रभृतीनां कथं



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'श्लेषे मिलेत्, संगमे तु मिलते मिलतीति च।' (श्लो. 160) इति देवः। मेलकः-लिका, मेलकः-लिका, मिमिलिषकः-मिमेलिषकः-षिका, मेमिलकः-लिका; मेलिता-त्री, मेलयिता-त्री, मिमिलिषिता-मिमेलिषिता-त्री, मेमिलिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककिलतिवत् (193) ज्ञेयानि।

(1260) "मिल संगमे" (VI-तुदादिः-1429. सक. सेट्. उभ.)

'श्लेषे मिलेत्, संगमे तु मिलते मिलतीति च।' (श्लो. 160) इति देवः। मेलकः-लिका, मेलकः-लिका, मिमिलिषकः-मिमेलिषकः-षिका, मेमिलकः-लिका; मेलिता-त्री, मेलयिता-त्री, मिमिलिषिता-मिमेलिषिता-त्री, मेमिलिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककिलतिवत् (193) ज्ञेयानि। "— 'मिल संश्लेषणे' इति पठितस्येह पुनःपाठः—कर्त्रभिप्राये तङर्थः। इति आत्रेयः।" इति **मा. धा. वृत्तिः**। **क्षीरस्वामी** त्वमुं धातुं न पठति। अस्य धातोरुभयपदित्वात् शानचि—[1]मिलमानः,[A] मिलिष्यमाणः, मिमिलिषमाणः, मिमेलिषमाणः, मिमिलिषिष्यमाणः, इत्यादीनि तत्तत्प्रत्यये रूपाण्यूह्यानि। [2]मेलनम्। [3]मेला-कुम्भमेला।

---

धातुत्वम्? गणापाठात्, गणपठितानामेव धातुसंज्ञाविधानात्। तत्राह धातुगणस्यासमाप्तेः। 'वर्धते धातुगणः' इति हि **शब्दविद** आचक्षते। तेनैषां गणपाठोऽनुमतः, शिष्टप्रयोगात्—इति।" इत्युक्तवान्। एतेन ज्ञायते—**मिल**प्रभृतीनां धातुपाठे औपदेशिकः पाठः प्राङ् नासीत् इति। **भोजवामन**ग्रन्थदर्शिभिः पाश्चात्यैः पुनः एकस्यैव धातोः एकविकरणकेऽपि गणे द्विवारमपि पाठोऽत्यल्पप्रयोजनकः प्रक्षिप्त इति। विद्वांसोऽत्र प्रमाणम्।

1. शानचि, '**तुदादिभ्यः**—' (3-1-77) इति विकरणप्रत्ययः शः। तस्य ङिद्वद्भावेनाङ्गस्य गुणो न।

2. ल्युटि अनादेशे गुणे च रूपमेवम्। '**परिमिलन**मप्राप्य हरितम्', 'मुक्तांशुजाल**मिलनाद्** रुचिरैः प्रवालैः बिम्बाधरं स्मितविशेषयुतं प्रियाणाम्।' (पादुकासहस्रे 552 श्लो.) इत्यादिषु 'संज्ञापूर्वको विधिरनित्यः' (परि॰ 95) इति गुणनिषेधः इति तत्तद्व्याख्यासु प्रतिपादितम्। **बोपदेव**व्याकरणे **मुग्धबोधे** तु **मिल**धातोः (**लिख**धातोश्च) **कुटादित्व**मङ्गीकृत्य, ल्युटि 'गाङ्**कुटादिभ्यो**ऽञ्णिन्ङित्' (1-2-1) इति ङिद्वद्भावेन गुणनिषेधः साधितः। अत एव '**लिखन**संक्षेपनिर्बन्धवतो **दीधितिकारस्य**—' इत्यादिकानि **गदाधरादि**वाक्यान्यपि साधून्येवेति ज्ञेयम्।

3. स्त्रियां भावादौ, भिदादेः (3-3-104) आकृतिगणत्वेन अङ्प्रत्ययः, उपधागुणश्च। मिलन्त्यत्रेति अधिकरणेऽङ्।

A. '**मित्रैः सम्मिलमान** एव नगरोद्यानं विमुञ्चन् भियम्......।' धा. का. 2.85.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1261) "मिवि सेवने" (I-भ्वादिः-589. सक. सेट्. पर.)

'— सेचने' इति क्षीरतरङ्गिणी। 'स्रंसने इति मैत्रेयः।' इति धातुवृत्तिटीका। धातुवृत्तौ तु "— 'सेवने', इति क्षीरतरङ्गिण्याम्। 'सेचने' इति पाठो मैत्रेयस्य च।" इत्युक्तम्।

मिन्वकः-न्विका, मिन्वकः-न्विका, मिमिन्विषकः-षिका, मेमिन्वकः-न्विका; मिन्विता-त्री, मिन्वयिता-त्री, मिमिन्विषिता-त्री, मेमिन्विता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजिन्वतिवत् (604) ज्ञेयानि।

(1262) "मिश शब्दे रोषकृते च" (I-भ्वादिः-723. अक. सेट्. पर.)

'शब्दने रोषक्रियायाञ्चार्थे' इति क्षीरस्वामी। "—'शब्दकोपयोः' इति द्रुमोक्त्या रोषकृतम्=रोष एव।" इति धा. का. व्या. (1-90)।

मेशकः-शिका, मेशकः-शिका, मिमेशिषकः-मिमिशिषकः-षिका, मेमिशकः-शिका; मेशिता-त्री, मेशयिता-त्री, मिमेशिषिता-मिमिशिषिता-त्री, मेमिशिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेटतिवत् (190) ज्ञेयानि। कप्रत्यये मिशः = व्याजः। [A]मेशः।

(1263) "मिश्र संपर्के" (X-चुरादिः-1921. सक. सेट्. उभ.)

अदन्तः।

"'— संपर्चने' संपर्चनम् = श्लेषः।" इति क्षीरस्वामी।

मिश्रकः-श्रिका, मिमिश्रयिषकः-षिका, मिश्रयिता-त्री, मिमिश्रयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचित्रयतिवत् (525) बोध्यानि। [1]गुडमिश्रः।

(1264) "मिष स्पर्धायाम्" (VI-तुदादिः-1352. सक. सेट्. पर.)

'सेचने मेषतीति स्यात् स्पर्धायां मिषतीति शे।' (श्लो. 174) इति देवः।

---

1. गुडेन मिश्रः इत्यर्थे 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्र—' (2-1-31) इति तृतीयान्तेन समस्यते।

A. '..........मेशोद्धुतारिमशकस्य नृपस्य वृत्तम्॥' धा. का. 1-90.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'—अयमुन्मीलनार्थोऽपि' इति **धा. का.** (2.78)।
मेषकः-षिका, मेषकः-षिका, मिमेषिषकः-मिमिषिषकः-षिका, मेमिषकः-षिका ; मेषिता-त्री, मेषयिता-त्री, मिमेषिषिता-मिमिषिषिता-त्री, मेमिषिता-त्री; इत्यादीनि रूपाणि तौदादिक**किलति**वत् (193) ऊह्यानि। [1]मेषः-मेषी, [2]निमेषः-[3]निमिषः, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

**(1265) "मिषु सेचने"** (I-भ्वादिः-699. सक. सेट्. पर.)

'—सेवने' इति **धा. का.** (1-87)।

**'सेचने मेषतीति** स्यात्, स्पर्धायां मिषतीति शे।' (श्लो. 174) इति **देवः**।
मेषकः-षिका, मेषकः-षिका, मिमेषिषकः-मिमिषिषकः-षिका, मेमिषकः-षिका ; मेषिता-त्री, मेषयिता-त्री, मिमेषिषिता-मिमिषिषिता-त्री, मेमिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**जेमति**वत (602) ज्ञेयानि। [4]मेषः-मेषी, शतरि-मेषन्, इत्यादीनि रूपाणि विशेषेण भवन्ति। ण्यति [A]मेष्यम्।

**(1266) "मिह सेचने"** (I-भ्वादिः-992. सक. अनि. पर.)

मेहकः-हिका, मेहकः-हिका, मिमिक्षकः-क्षिका, मेमिहकः-हिका; मेढा-

---

1. पचादिषु **'मेष'** इति पाठात कर्तर्यच्प्रत्यये रूपमेवम्। 'येषां धातूनां प्रयोगे गुणादिकं दृष्टं ते धातवः पचादेराकृतिगणत्वेन तत्र पाठादूह्याः' इति **प्रक्रियासर्वस्वम्**। वस्तुतोऽत्र पचादिषु पाठो दृश्यत एवेत्यस्मिन् विषये आकृतिगणत्वेन समाधिर्नादर्तव्या। स्त्रियां जातिलक्षणे (4-1-63) ङीषि **मेषी** इति भवति।
2. 'घञ्—**निमेषः**।' इति **क्षीरतरङ्गिणी**। एवमेव **धातुवृत्ता**वपि।
3. 'घञर्थे कविधानम्—' (वा. 3-3-58) इत्यत्र परिगणनानादरेण भावे घञपवादतया बाहुलकात् कप्रत्यये **निमिषः, आमिषम्** इत्यादयोऽपि साधवः। एवमेव **निमेष** इत्यपि बाहुलकादेव, यतोऽयं कप्रत्ययो घञपवादस्ततोऽत्रैव घञोऽप्रसक्तेरिति ज्ञेयम्।
4. 'नन्दिग्रहिपचादिभ्यः' (3-1-134) इति अच्प्रत्यये रूपमेवम्। **मेषट्** इति पचादिषु पाठात् टित्त्वात् स्त्रियां ङीपि-**मेषी** इति भवति।

A. 'वेषैर्मेष्यतमैः प्रपोषदशुभप्रश्रेषिभिः श्लेषति...... ।' धा. का. 1.88.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मेढ़ी, मेहयिता-त्री, मिमिक्षिता-त्री, मेमिहिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना आदादिकदेग्धिवत् (842) ज्ञेयानि। [1]मेघः, [2]मेढ्रम्, [3]मीढ्वान्, [4]मेहः, [5]मिहिरः इमानि रूपाणि अस्य धातोः विशेषेण संभवन्तीति विशेषः।

(1267) "मी गतौ" (X-चुरादिः-1825. सक. सेट्. (अनि.) उभ.)

आधृषीयः।

'—गतौ, मनने' इति क्षीरस्वामी।

'मीञो मीनाति मीनीते हिंसायां मीयते ङितः॥
मिनोति मिनुते स्वादेः, गतौ मयति माययेत्।' (श्लो. 16-17) इति देवः।

मायकः-यिका, मिमाययिषकः-षिका, मायकः-यिका, [6]मिमीषकः-षिका,

---

1. धातोः इगुपधत्वेऽपि पचादिषु (3-1-134) पाठात् अच्प्रत्यये, गुणे, 'न्यङ्क्वादीनां च' (7-3-53) इत्यत्र गणे पाठात् हकारस्य कुत्वेन घकारे च मेघ इति सिद्ध्यति। मेहति=वर्षति इति मेघः।

2. 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' (3-2-182) इति करणे ष्ट्रन्प्रत्यये गुणे, 'हो ढः' (8-2-31) इति धातुहकारस्य ढत्वे, धत्वष्टुत्वढलोपेषु च प्रवृत्तेषु 'पर्जन्यवल्लक्षणं प्रवर्तते' (परि. 121) इति न्यायेन दीर्घे च रूपमेवम् मिह्यतेऽनेनेति मेढ्रम्।

3. धातोरस्मात् कर्तरि लिटः क्वसौ वेदे भाषायां चाविशेषेण 'दाश्वान् साह्वान् मीढ्वांश्च' (6-1-12) इति निपातनात्, द्वित्वाभावः, अनिट्त्वम्, ढत्वम्, उपधादीर्घश्चेति ज्ञेयम्। 'मीढ्वस्तोकाय तनयाय मृडय—' इति वैदिकः प्रयोगः।

4. 'हलश्च' (3-3-121) इति संज्ञायां घञि गुणे च रूपमेवम्। मेहः=मधुमेहः, रोगविशेषः।

5. मेहति, मेहयति वाऽयमिति मिहिरः=सूर्यः। 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहि—' (द. उ. 8-26) इत्यादिना किरच्प्रत्यये रूपमेवम्।

6. 'सनि मीमा—' (7-4-54) इत्यत्र अचौरादिकैर्धातुभिः सह साहचर्यात् नास्य ग्रहणम्। अतोऽत्र न 'इस्' भावादिकमित्यतः, 'इको झल्' (1-2-9) इति सनः कित्त्वम्, 'अज्झनगमां सनि' (6-4-16) इत्यनेन (पर्जन्यन्यायेन) दीर्घः। 'श्रिडीङ्विर्णेष्वथ शीङ्श्रियावपि' (व्याघ्रभूतिकारिका, भाष्ये, 7-2-10) इति नियमाण्णिजभावपक्षे इडागमो नेत्यादिकं यथायथमूह्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मेमीयकः-यिका ; माययिता-त्री, मिमाययिषिता-त्री, [1]मेता-त्री, मिमीषिता-त्री, मेमीयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि ण्यन्तात् ण्यन्तप्रकृतिकसन्नन्ताच्च **गोमयति**वत् (433) ज्ञेयानि। आधृषीयत्वेन णिज्विकल्पः। तेन णिजभावपक्षे शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, शुद्धप्रकृतिकयङन्ताच्च भौवादिक**नयति**वत् (680) सर्वाण्यपि रूपाणि (नयतेः प्रातिस्विकरूपाणि विना) ज्ञेयानि। णिजभावपक्षे तु—शतरि—[2]मयन्-न्ती इति रूपम्।

## (1268) " मीङ् हिंसायाम् "

(IV-दिवादिः-1137. सक. अनि. आत्म.)

'मीञो मीनाति मीनीते, **हिंसायां मीयते** ङितः ॥' (श्लो. 16) [इति देवः।' **हिंसा**ऽत्र मृतिः।' इति **धा. का. व्याख्यायाम्** (2.58)। मायकः-यिका, मायकः-यिका, मिमीषकः-षिका, [3]मित्सकः-त्सिका, मेमीयकः-यिका ; मेता-त्री, माययिता-त्री, मिमीषिता-त्री, मित्सिता-त्री, मेमीयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**क्षयति**वत् (302) ज्ञेयानि। शतरि मीयन्-न्ती-ती इति रूपमिति विशेषः।

---

1. शुद्धे तृजन्ते इडभावात् गुणे रूपमेवम्।

2. णिजन्तस्थले धातोरस्योभयपदित्वेऽपि णिजभावपक्षे आत्मनेपदप्रवृत्तिनिमित्ताभावात्, 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदं शतेति ज्ञेयम्।

3. 'सनि **मीमा**—' (7-4-54) इत्यत्र मीनातिमिनोत्योरुभयोरपि **'मी'** इत्यनेन ग्रहणम्-इति **वृत्तिकारः**। तेन नास्य 'मी' इत्यनेन ग्रहणमिति ज्ञायते। **काश्यप-क्षीरस्वामि-वर्धमान**प्रभृतयस्तु धातोरस्यापि तत्र ग्रहणमिति कृत्वा, इस्भावे, अभ्यासलोपादिके, सकारस्य तकारे च कृते '**मित्सते**' इति सन्नन्ते रूपं प्रदर्शयन्ति। "लाक्षणिकमीरूपस्य मिनोतेः अग्रहणशङ्कापनोदनपरा **वृत्तिः** ; न त्वस्याग्रहणपरा।" इति तेषामुपपादनं **माधवधातुवृत्ति**प्रतिपादितमिहानुसन्धेयम्। वस्तुतस्तु '**इको झल्**' (1-2-9) इत्यत्र, 'मीनातिमिनोत्योः—' इति **भाष्यो**क्त्या, 'सनि **मीमा**—' (7-4-54) इत्यत्र मीनातिमिनोत्योर्द्वयोरेव ग्रहणं न्याय्यम्; अन्यथा निरुक्त**भाष्यस्यो**पलक्षणत्वापत्तेः। अस्य धातोरपि ग्रहणे उपलक्षकत्वकल्पनायां च प्रमाणाभावाच्चेत्यलम्। **अन्यत्र** विस्तरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1269) " **मीङ्‌ हिंसायाम्‌** " (IX. क्र्यादिः-1476. सक. अनि. उभ.)
'**मीञो मीनाति मीनीते,** हिंसायां मीयते ङितः ॥' (श्लो. 16) इति **देवः**।
[1]मायकः-यिका, [2]मापकः-पिका, [3]मित्सकः-त्सिका, [4]मेमीयकः-यिका; माता-मात्री, मापयिता-त्री, मित्सिता-त्री, मेमीयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि सौवादिक**मिनोति**वत् (1253) ज्ञेयानि। [5]मीनन्‌-प्रमीणन्‌-ती, प्रमीणानः, इति शतरि शानचि च रूपम्‌। मीतम्‌-मीतः-मीतवान्‌, मीत्वा, [6]प्रमाय, [7]ईषत्प्रमयः-दुष्प्रमयः-सुमयः, मयः-[A]प्रमयः, इत्यादीन्यस्य प्रातिस्विकरूपाणीति ज्ञेयानि।

(1270) "**मीमृ गतौ**" (I-भ्वादिः-468. सक. सेट्‌. पर.)
'—शब्दे च' इति **क्षीरस्वामी**। शब्दार्थे त्वकर्मकः। '**मीम—**' इत्यपि **धातुकाव्ये** (1-60) पाठः।
मीमकः-मिका, मीमकः-मिका, मिमीमिषकः-षिका, मेमीमकः-मिका; मीमिता-त्री, मीमयिता-त्री, मिमीमिषिता-त्री, मेमीमिता-त्री;

---

1. '**मीनाति**मिनोतिदीङां ल्यपि च' (6-1-50) इति एज्विषये आकारः। युगागमः। एवमेव णमुल्प्रभृतिष्वपि ज्ञेयम्‌।
2. ण्यन्तेऽप्येज्विषयत्वेनाकारे, आदन्तलक्षणे पुगागमे च रूपमेवं सर्वत्र ज्ञेयम्‌।
3. 'सनि **मीमा—**' (7-4-54) इत्यनेन इस्‌, अभ्यासलोपतकारादिकं यथयथं सन्नन्ते सर्वत्र ज्ञेयम्‌।
4. यङ एज्विषयत्वाभावेन आकारो न। अभ्यासे गुणः। एवमेव यङन्ते सर्वत्र ज्ञेयम्‌।
5. शतरि, '**क्र्यादिभ्यः—**' (3-1-81) इति श्ना विकरणप्रत्ययः। प्रत्ययस्य शित्त्वेन ङिद्वद्भावादङ्गस्य गुणो न। '**श्नाऽभ्यस्तयोरातः**' (6-4-112) इत्याकारलोपः। **प्रमीणन्‌** इत्यत्र '**हिनुमीना**' (8-4-15) इति णत्वम्‌। "........परनिमित्तकस्य आल्लोपस्य (च) पूर्वविधौ स्थानिवत्त्वाद्‌ 'एकदेशविकृतस्यानन्यत्वात्‌' (परि. 37) वा णत्वम्‌।" इति **माधवो**क्तमिहानुसन्धेयम्‌। एवमेव **प्रमीणानः** इत्यत्रापि ज्ञेयम्‌।
6. '**मीनाति**मिनोतिदीङां **ल्यपि च**' (6-1-50) इत्यनेन ल्यप्यप्याकारः।
7. 'निमिमी**लियां खलचोरात्वं न**' (वा. 6-1-51) इति खल्प्रत्यये, अच्प्रत्यये चाकारनिषेधः। तेनैवं रूपम्‌। अत्र **वार्तिके** 'अच्‌' इत्यनेन पचाद्यचः (3-1-134), एरचः (3-3-57) च ग्रहणमिति ज्ञेयम्‌। **दुष्प्रमयः**=रिपुः।

A. '.......मांसश्रियां **प्रमय**कृत्‌ सितपीतचेलः।' धा. का. 3. 5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षीजतिवत् (309) ज्ञेयानि । क्विपि [1]प्रमीन्-प्रमीमौ-प्रमीमः इति रूपमिति विशेषः । [A]मीमितः ।

(1271) "मील निमेषणे" (I-भ्वादिः-517. अक. सेट्. पर.)

निमेषणम्=सङ्कोचः ।

मीलकः-लिका मीलकः-लिका, मिमीलिषकः-षिका, मेमीलकः-लिका ; मीलिता-त्री, मीलयिता-त्री, मिमीलिषिता-त्री, मेमीलिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककीलतिवत् (195) ज्ञेयानि ।

(1272) "मीव स्थौल्ये" (I-भ्वादिः-564. सक. सेट्. पर.)

मीवकः-विका, मीवकः-विका, मिमीविषकः-षिका, मेमीवकः-विका ; मीविता-त्री, मीवयिता-त्री, मिमीविषिता-त्री, मेमीविता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजीवतिवत् (606) ज्ञेयानि । [B]मीवितः । [2]मीवरः ।

(1273) "मुच प्रमोचने" (X-चुरादिः-1744. अक. सेट्. उभ.) [अ]

'—मोदने च' इति माधवधातुवृत्ति-सिद्धान्तकौमुद्यादिषु पाठः ।

'कल्कने मुञ्चते मुञ्चेर्मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न त्वलृदित् ॥' (श्लो. 47) इति देवः ।

मोचकः-चिका, मुमोचयिषकः-षिका ; मोचयिता-त्री, मुमोचयिषिता-त्री ; इत्यादिकानि समस्तान्यपि रूपाणि चौरादिकच्योसयतिवत् (560) ज्ञेयानि ।

---

1. क्विपि 'मो नो धातोः' (8-2-64) इति पदान्तनिमित्तको नकारः।
2. बाहुलकादौणादिकेऽरप्रत्यये रूपमेवम् । 'मीवरः=मानी।' इति मा. धा. वृत्तिः।

A. 'वनाद् वनं सानुममन् द्रमन् गृहं
व्याधोत्करोऽहम्मतिमीमिताशयः।' धा. का. 1.60.

B. 'अपीवितां नाप्यतिमीवितां श्रितं तनुं सुतीवोरुमनीवमध्यमाम् ॥'
धा. का. 1.72.

[अ] अत्र प्रमोचनम्=शरादीनां सन्धानरूपं कायिकं कर्मेति क्षीरतरङ्गिण्यां 'मोचयति शरान्' इत्युदाहरणदानेन ज्ञायते। मा. धा. वृत्तौ तु 'ऋणं निर्मोचयति प्रतिददातीत्यर्थः।' इत्युदाहृतत्वात् मानसिकव्यापारविशेष इति प्रतीयते। उभयथाऽपि सकर्मकत्वं ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1274) " **मुचि कल्कने** " (I-भ्वादिः-172. अक. सेट्. आत्म.)
'कल्कने मुञ्चते मुञ्चेः मोक्षे मुञ्चति मुञ्चते ।' (श्लो. 47) इति **देवः** । 'मुच—' इति चन्द्रसंमतः पाठः । '**कल्कनम्** = दम्भः, कथनं च ।' इति क्षीरतरङ्गिणी । 'शाठ्यम्' इति मैत्रेयः । "कत्थनं चेति स्वामी ।" इति मा. धा. वृत्तिः । 'कथनम् इत्यन्ये ।' इति **सिद्धान्तकौमुदी** । एवञ्च बह्वर्थकत्वं कल्कनशब्दस्येति ज्ञेयम् ।

मुञ्चकः-ञ्चिका, मुञ्चकः-ञ्चिका, मुमुञ्चिषकः-षिका, मोमुञ्चकः-ञ्चिका; मुञ्चिता-त्री, मुञ्चयिता-त्री, मुमुञ्चिषिता-त्री, मोमुञ्चिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिककुण्ठतिवत् (209) ज्ञेयानि । अस्यात्मनेपदित्वात् शानचि—मुञ्चमानः, मुञ्चिष्यमाणः, मुञ्चयमानः, मुञ्चयिष्यमाणः, मुमुञ्चिषमाणः, मुमुञ्चिषिष्यमाणः, मोमुञ्च्यमानः, मोमुञ्चिष्यमाणः; इति रूपाणि यथायथं सम्भवन्तीति विशेषः । ल्युटि—[A]मुञ्चनम् ।

(1275) " **मुच्लृ मोक्षणे** " (VI-तुदादिः-1430. सक. अनि. उभ.)

**मुचादिः ।**

'कल्कने मुञ्चते मुञ्चेः, मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न त्वलृदित् ॥' (श्लो. 47) इति **देवः** ।

मोचकः-चिका, मोचकः-चिका, [1]मुमुक्षकः-मोक्षकः-क्षिका, मोमुचकः-चिका; मोक्ता-मोक्त्री, मोचयिता-त्री, मुमुक्षिता-मोक्षिता-त्री, मोमुचिता-त्री; [2]मुञ्चन्-न्ती, मोचयन्-न्ती, मुमुक्षन्-मोक्षन्-न्ती; —

1. सन्नन्ते, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, गुणनिषेधे च रूपमेवं ज्ञेयम् । कर्मकर्तरि, कर्मणोऽविवक्षितत्वे वा **मुचिरयमकर्मको** भवति । तदानीम्, '**मुचो-ऽकर्मकस्य गुणो वा**' (7-4-57) इति सकारादौ सनि परतः गुणे, 'अत्र लोपो-ऽभ्यासस्य' (7-4 58) इत्यभ्यासस्य लोपे च **मोक्षकः-क्षिका** इत्यादीनि रूपाणि यथायथं सर्वत्र भवन्तीति ज्ञेयम् ।
2. शतरि, '**तुदादिभ्यः—**' (3-1-77) इति शप्रत्यये 'शे **मुचादीनाम्**' (7-1-59) इति नुमि च **मुञ्चन्** इति रूपम् । एवमेव शानजन्तेऽपि **मुञ्चान** इत्यत्र प्रक्रियोह्या ।

A. '**अमुञ्चनैर्म**ञ्चितचित्तरञ्चितत्रयीमतप्रस्तुचितैः शुभाजकैः ।' धा. का. 1-24.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मोक्ष्यन्-न्ती-ती, मोचयिष्यन्-न्ती-ती, मुमुक्षिष्यन्-मोक्षिष्यन्-न्ती-ती ;—
मुच्यमानः, मोचयमानः, मुमुक्षमाणः-मोक्षमाणः, मोमुच्यमानः ;
मोक्ष्यमाणः, मोचयिष्यमाणः, मुमुक्षिष्यमाणः-मोक्षिष्यमाणः, मोमुचिष्यमाणः ;
विमुक्-विमुचौ-विमुचः ; — — —
मुक्तम्-मुक्तः-मुक्तवान्, [1]चक्रमुक्तः, [2]स्तोकान्मुक्तः-अल्पान्मुक्तः-कृच्छ्रान्मुक्तः,
मोचितः, मुमुक्षितः-मोक्षितः, मोमुचितः-तवान् ;
मुचः, [3]जलमुक्-पयोमुक्, [4]नखमुचानि (धनूंषि), [5]मुक्तः-मुक्ता, [6]मोचनः,
मोचः, [A]मुमुक्षुः-मोक्षुः, मोमोचः ; —
मोक्तव्यम्, मोचयितव्यम्, मुमुक्षितव्यम्-मोक्षितव्यम्, मोमुचितव्यम् ;
मोचनीयम्, मोचनीयम्, मुमुक्षणीयम्-मोक्षणीयम्, मोमुचनीयम् ;
[7]मोक्यम्-मोच्यम्, मोच्यम्, मुमुक्ष्यम्-मोक्ष्यम्, मोमुच्यम् ;
ईषन्मोचः-दुर्मोचः-सुमोचः ; — — —

---

1. चक्रान्मुक्त इत्यर्थे 'अपेतापोढमुक्त—' (2-1-38) इति पञ्चमीतत्पुरुषसमासः ।
2. अत्रापि पञ्चमीतत्पुरुषसमासे सति, 'सुपो धातुप्रातिपदिकयोः' (2-4-71) इति प्राप्तस्य सुब्लुकोऽपवादतया, 'पञ्चम्याः स्तोकादिभ्यः' (6-3-2) इति अलुक् । एवमेव **अल्पान्मुक्तः** इत्यादिष्वपि ज्ञेयम् ।
3. जलं मुञ्चतीत्यर्थे 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप् । कर्मण्यण् अत्र न भवति ।
4. नखानि मुञ्चतीत्यर्थे कर्मण्यणोऽपवादतया, 'कप्रकरणे—मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5) इति कप्रत्यये कित्वात् गुणनिषेधे च रूपमेवम् । मूलविभुजादिराकृतिगणः । **नखमुचानि**=मुष्टेर्बहिर्भूतानीत्यर्थः ।
5. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तप्रत्यये रूपमेवम् । **मुक्तः**= प्रकृतिबन्धादुत्थित इत्यर्थः । **मुक्ता** इति तु संज्ञायां क्तप्रत्ययान्तात् टापि रूपमिति ज्ञेयम् । **मुक्ता**=मौक्तिकोत्पत्तिस्थानम् ।
6. चलनार्थकत्वादस्य '**चलन**शब्दार्थाद्—' (3-2-148) इति ताच्छीलिके युचि रूपमेवम् । अकर्मकत्वमपि विवक्षातोऽत्रेति ज्ञेयम् ।
7. निष्ठायामनिट्त्वादस्य, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति ण्यति कुत्वे रूपमेवम् । एवमेव घलन्तेऽपि कुत्वमिति बोध्यम् । आवश्यकार्थे ण्यत्प्रत्यये तु कुत्वं न । ततः **मोच्यम्** इत्यपि साधुः । "—'**अमोच्य**मश्वं यदि मन्यसे........ ।' (रघुवंशे 3-65) इत्यत्रावश्यके ण्यः । 'ण्य आवश्यके' (7-3-65) इति कुत्वनिषेधः ।" इति **मा. धा. वृत्ति**वचनमिहानुसन्धेयम् ।

A. 'वाचंयमान् स्थण्डिलशायिनश्च युयुक्षमाणाननिशं **मुमुक्षून्**।' भ. का. 3-41.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मुच्यमानः, मोच्यमानः, मुमुक्ष्यमाणः-मोक्ष्यमाणः, मोमुच्यमानः ;
मोकः-निर्मोकः, मोचः, मुमुक्षः-मोक्षः, मोमुचः ;
मोक्तुम्, मोचयितुम्, मुमुक्षितुम्-मोक्षितुम्, मोमुचितुम् ;
मुक्तिः, मोचना, मुमुक्षा-मोक्षा, मोमुचा ;
मोचनम्, मोचनम्, मुमुक्षणम्-मोक्षणम्, मोमुचनम् ;
मुक्त्वा, मोचयित्वा, मुमुक्षित्वा-मोक्षित्वा, मोमुचित्वा ;
विमुच्य, विमोच्य, विमुमुक्ष्य-विमोक्ष्य, विमोमुच्य ;
मोचम् २, } मोचम् २, } मुमुक्षम्-मोक्षम् २, } मोमुचम् २ ; }
मुक्त्वा २, } मोचयित्वा २, } मुमुक्षित्वा-मोक्षित्वा २, } मोमुचित्वा २ ; }
[1]मुचिः-नमुचिः, [2]मुचिरः, [3]मूत्रम् ।

(1276) "मुज शब्दार्थः" (I-भ्वादिः-250. अक. सेट्. पर.) [अ]

मोजकः-जिका, मोजकः-जिका, मुमोजिषकः-मुमुजिषकः-षिका, मोमुजकः-जिका ; मोजिता-त्री, मोजयिता-त्री, मुमोजिषिता-मुमुजिषिता-त्री, मोमुजिता-त्री ; इत्यादीनि रूपाणि सर्वाणि भौवादिककुचधातुवत् (200) ज्ञेयानि । यङ्लुकि शता-मोमुजन्[A] इति । [4]मुजितम् अनेनमोजितम्, इति वा ।

---

1. 'इगुपधात् कित्' [द. उ. 1-48) इति इन्प्रत्यये, तस्य कित्त्वेन गुणनिषेधे च रूपमेवम् । न मुञ्चतीति **नमुचिः** । 'न भ्राण्नपान्नवेदानासत्यानमुचि—' (6-3-75) इत्यादिना नञः प्रकृतिभावे रूपमेवम् ।
2. मुच्यन्तेऽनेन दुःखेभ्य इति **मुचिरः** = मोचकः । 'इषिमदि—' [द. उ. 8.26] इत्यादिना किरच्प्रत्यये रूपमेवम् ।
3. 'षिविमुच्योष्टेरू च' [द. उ. 8.83] इति ष्ट्रन्प्रत्यये टेरूकारे च रूपमेवम् । मुच्यते तदिति **मूत्रम्** । **मनोरमायां** तु **मूत्र**धातोरेव प्रकृतरूपे सिद्धेऽत्रैवं साधनं स्वरार्थमित्युक्तम् ।
4. निष्ठायाम् 'उदुपधात्—' (1-2-21) इति कित्त्वविकल्पनात् रूपद्वयम् ।

A. 'गर्जत्खरं गृञ्जितधेनु**मोमुज**द्वत्सोत्करं भुञ्जदजं वजन् व्रजम् ॥' धा. का. 1-33.

[अ] '**मज मुजि**' इति **क्षीरस्वामी, चन्द्रश्च** । '**मृज मृजी**त्यप्याहुः' इति **पुरुषकारः** (श्लो. 59) । **क्षीरतरङ्गिण्यां** तु '**मृज मृजी**त्यप्याहुः' इति पाठ उपलभ्यते । "मुद्रिते **चान्द्र**धातुपाठे तु 'मुज मुजि' इति पाठ उपलभ्यते (चा. धा. सू. 1-80)" इति **क्षी. टीका** । **माधवीयधातुवृत्तौ** तु **स्वामिचन्द्रयो**र्मते '**मृज मृजीति**' पाठः प्रदर्शितः । मूलशुद्धिस्त्वत्र कीदृशीति न विद्मः । युक्तायुक्तत्वे स्वत्र सूरयः प्रमाणम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1277) **"मुजि शब्दार्थः"** (I-भ्वादिः-251. अक. सेट्. पर.)

मुञ्जकः-ञ्जिका, मुञ्जकः-ञ्जिका, मुमुञ्जिषकः-षिका, मोमुञ्जकः-ञ्जिका ;
मुञ्जिता-त्री, मुञ्जयिता-त्री, मुमुञ्जिषिता-त्री, मोमुञ्जिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) बोध्यानि । पचाद्यचि
**मुञ्जः**=तृणविशेषः । घञि-मुञ्जः, निष्ठायां सेट्त्वात्, न्यङ्क्वादित्वात्
कुत्वमत्रेति ज्ञेयम् ।

(1278) **"मुट प्रमर्दने"** (I-भ्वादिः-सक. सेट्. पर.)

'प्रमर्दने चाक्षेपे च मुटेद् आद्ये तु **मोटति** ॥' (श्लो. 71) इति **देवः** ।

दुर्गसंमतः पाठोऽयम् इति **क्षीरस्वामी** । "—'म्रुड' इति **धनपालः** ।
'पुड' इति........**शाकटायनः** । **क्षीरस्वामी** तु द्वावपि इदितौ पपाठ ।
**मैत्रेयस्तु** अमुं टान्तमेव पठित्वा........" इति **मा. धा. वृत्तिः** । **देवश्लोकात्**
(श्लो. 71) **मा. धा. वृत्तौ 'मुट सञ्चूर्णने'** (चुरादौ) इत्यत्र 'मोटति
इति **मर्दने** शपि' इत्युक्तत्वाच्च अयं धातुः स्वतन्त्र इति ज्ञायते। युक्तायुक्तत्वे
त्वत्र सूरयः प्रमाणम् । 'पुड म्रुड' इति अमुं **केचित्** पठन्ति ।
**सि. कौमुद्यादिषु** न पठितोऽयम् ।

मोटकः-टिका, मोटकः-टिका, मुमोटिषकः-मुमुटिषकः-षिका, मोमुटकः-
टिका ; इत्यादीनि रूपाणि सर्वाणि भौवादिक**कोचति**वत् (200) ज्ञेयानि ।
प्रमुटितः-प्रमोटितः, आमोटनम्, इतीमानि रूपाण्यधिकान्यत्रेति ज्ञेयम् ।

(1279) **"मुट आक्षेपप्रमर्दनयोः"** (VI-तुदादिः-1374.सक. सेट्. पर.)

**कुटादिः** ।

'प्रमर्दने चाक्षेपे च **मुटेत्**, आद्ये तु मोटति ॥' (श्लो. 71) इति **देवः** ।
मोटकः-टिका, मोटकः-टिका, मुमुटिषकः-षिका, मोमुटकः-टिका ;
मुटिता-त्री, मोटयिता-त्री, मुमुटिषिता-त्री, मोमुटिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि तौदादिक**कुटति**वत् (204) ज्ञेयानि ।

(1280) **"मुट सञ्चूर्णने"** (X-चुरादिः-1614. सक. सेट्. उभ.)

'सञ्चूर्णने चुरादेर्णौ **मोटयेद्**तङन्त्रयः ।' (श्लो. 72) इति **देवः** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



क्षीरस्वामिनं विना इतरे सर्वेऽपि 'मुट' इत्यस्यानुकूलाः। पुट इति क्षीरस्वामी इति मा. धा. वृ. टिप्पण्याम्।
मोटकः-टिका, मुमोटयिषकः-षिका; मोटयिता-त्री, मुमोटयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककोटयतिवत् (205) बोध्यानि। विमोटितः[A]।

(1281) "मुठि पालने" (I-भ्वादिः-265. सक. सेट्. आत्म.) '—पलायने' इति क्षीरस्वामी। 'काशकृत्स्नचन्द्रौ च' इति क्षी. टीका। मुण्ठकः-ण्ठिका, मुण्ठकः-ण्ठिका, मुमुण्ठिषकः-षिका, मोमुण्ठकः-ण्ठिका; मुण्ठिता-त्री, मुण्ठयिता-त्री, मुमुण्ठिषिता-त्री, मोमुण्ठिता-त्री; इत्यादीनि रूपाणि सर्वाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि। अस्य धातोः आत्मनेपदित्वात् शानचि-मुण्ठमानः, मुण्ठिष्यमाणः; मुमुण्ठिषमाणः, मुमुण्ठिषिष्यमाणः, इति रूपाणीति विशेषः। क्विपि-पापमुन्[B]-पापमुण्ठौ पापमुण्ठः इति।

(1282) "मुडि मार्जने" (I-भ्वादिः-275. सक. सेट्. आत्म.) मार्जनम्=शुद्धिर्न्यग्भावश्च। '—मज्जने' इति क्षीरस्वामी। "—'मज्जने' इति काशकृत्स्नधातुपाठीयकन्नडटीकायां (पृष्ठ 100) पाठः। मज्जनम्=स्नानम् इत्यपि तत्रैव।" इति क्षी-टीका।
'मुण्डते मार्जने खण्डेः, खण्डने शपि मुण्डति॥' (श्लो. 83) इति देवः। मुण्डकः-ण्डिका, मुण्डकः-ण्डिका, मुमुण्डिषकः-षिका, मोमुण्डकः-ण्डिका; मुण्डिता-त्री, मुण्डयिता-त्री, मुमुण्डिषिता-त्री, मोमुण्डिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि। अस्य धातोः आत्मनेपदित्वात् मुण्डमानः, मुण्डिष्यमाणः, मुमुण्डिषमाणः, मुमुण्डिषिष्यमाणः; इति शानचि रूपाणि इति विशेषः।

(1283) "मुडि खण्डने" (I-भ्वादिः-326. सक. सेट्. पर.)
'मुण्डते मार्जने मुण्डेः, खण्डने शपि मुण्डति॥' (श्लो. 83) इति देवः।

---

A. 'इत्यादिवादिषु जनेषु विमोटितारिः...... ।' धा. का. 3-23.

B. 'स पापमुन्भिः बुधहेड्भिरुन्मदैः अनेठितां क्ष्मां पुनरप्यहिण्डत॥'
धा. का. 1.35.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



अर्थभेदात् पुनः पाठः । "अत एव, 'मुडि खण्डनप्रमर्दनयोः' इति भोजदेवः । 'मुटि' इति कौशिकदुर्गौ–मुण्टति।" इति क्षीरतरङ्गिण्याम् । 'मुड' इति धा. का. व्याख्यायाम् (1-42) ।

मुण्डकः-ण्डिका, मुण्डकः-ण्डिका, मुमुण्डिषकः-षिका, मोमुण्डकः-ण्डिका; मुण्डिता-त्री, मुण्डयिता-त्री, मुमुण्डिषिता-त्री, मोमुण्डिता-त्री, इत्यादीनि सर्वाणि रूपाणि भौवादिककुण्ठतिवत् (209) बोध्यानि । [1]मुण्डयन्-न्ती, [2]यवनमुण्डः-का[क]म्बोजमुण्डः, इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1284) "मुण प्रतिज्ञाने" (VI-तुदादिः-1334. सक. सेट्. पर.)

मोणकः-णिका, मोणकः-णिका, मुमोणिषकः-मुमुणिषकः-षिका, मोमुणकः-णिका; मोणिता-त्री, मोणयिता-त्री, मुमोणिषिता-मुमुणिषिता-त्री, मोमुणिता-त्री; इत्यादीनि सर्वाणि रूपाणि प्रातिस्विकरूपाणि विना तौदादिकपुणतिवत् (1017) ज्ञेयानि । शतरि-[A]मुणन् इति ।

(1285) "मुद हर्षे" (I-भ्वादिः-16. अक. सेट्. आत्म.)

'संसर्गे णिचि मोदयेदिति भवेत् हर्षे पुनर्मोदते ॥' (श्लो. 113) इति देवः । मोदकः-दिका, मोदकः-दिका, मुमोदिषकः-मुमुदिषकः-षिका, मोमुदकः-दिका; मोदिता-त्री, मोदयिता-त्री, मुमोदिषिता-मुमुदिषिता-त्री, मोमुदिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोकतिवत् (197) ज्ञेयानि । [3]कुमुदम्, [4]मोदनः, [5]प्रमुदितम्-प्रमोदितम्-[अनेन], प्रमुदितः-प्रमोदितः,

---

1. मुण्डं करोतीत्यर्थे, 'मुण्डमिश्र—' (3-1-21) इत्यादिना णिच् । 'सनाद्यन्ता धातवः' (3-1-32) इति धातुसंज्ञायां शतरि रूपमेवम् ।
2. मुण्डो यवन इव इति समासे मयूरव्यंसकादित्वात् (2-1-72) विशेषणस्य परनिपातः । एवं का[क]म्बोजमुण्ड इत्यादिष्वपि ।
3. कुं मोदयतीति कुमुदम् । अन्तर्भावितण्यन्तात् मूलविभुजादित्वेन (वा. 3-2-5) कप्रत्यये रूपमेवम् । कौ = पृथिव्यां मोदते इत्यपि विगृह्णन्ति ।
4. 'अनुदात्तेतश्च हलादेः' इति तच्छीलादिषु कर्तृषु युच्प्रत्ययः ।
5. निष्ठायाम् 'उदुपधाद्भावादिकर्मणोः—' (1-2-21) इति कित्त्वविकल्पनात् रूपद्वयम् । भावादिकर्मभ्यामन्यत्र मुदितः, मुदितवान् इत्येव भवति ।

A. 'ईशस्य पुण्यसुगमस्य वधं मुणन्तो मल्लाश्च यत्र चुकुणुः शुनका इवोच्चैः ।'
धा. का. 2. 76.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



प्रमुदितवान्-प्रमोदितवान्, [1]मुत्[A]-मुदौ-मुदः, [2]मुद्गः-मौद्गम्, [3]मुदिरः, [4]मुद्रा इत्यादीनि रूपाणि अस्य विशेषेण भवन्तीति विशेषः ।

## (1286) "मुद संसर्गे" (X-चुरादिः-1741. सक. सेट्. उभ.)

'संसर्गे णिचि मोदयेदिति भवेत् हर्षे पुनर्मोदते ॥' (श्लो. 113.) इति देवः । मोदकः-दिका, मुमोदयिषकः-षिका ; मोदयिता-त्री, मुमोदयिषिता-त्री ; इत्यादीनि रूपाणि शतरं विना चौरादिककोटयतिवत् (205) बोध्यानि । अस्य धातोः उभयपदित्वात् शतरि [सर्पिषा सक्तून्] मोदयन्-न्ती, मुमोदयिषन्-न्ती, मोदयिष्यन्-मुमोदयिषिष्यन्-न्ती-ती ; इति विशेषः ।

## (1287) "मुर संवेष्टने" (VI-तुदादिः-1343. सक. सेट्. पर.)

'—परिवेष्टने' इति मा. धा. वृत्तिः ।

मोरकः-रिका, मोरकः-रिका, मुमोरिषकः-मुमुरिषकः-षिका, मोमुरकः-रिका ; मोरिता-त्री, मोरयिता-त्री, मुमोरिषिता-मुमुरिषिता-त्री, मोमुरिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुरतिवत् (229) ज्ञेयानि । क्विपि-मूः-मुरौ-मुरः ; [5]मुरः-मुरा, [6]मुरी इमानि रूपाण्यधिकानीति विशेषः ।

## (1288) "मुर्छा मोहसमुच्छ्राययोः" (I-भ्वादिः-212. अक.सेट्.पर.)

मूर्छकः-र्छिका, मूर्छकः-र्छिका, मुमूर्छिषकः-षिका, मोमूर्छकः-र्छिका ; मूर्छिता-त्री, मूर्छयिता-त्री, मुमूर्छिषिता-त्री, मोमूर्छिता-त्री ; इत्यादीनि

---

1. स्त्रियाम्, 'संपदादिभ्यः—' (वा. 3-3-108) इति क्विपि रूपमेवम् ।
2. 'मुद्ग्रिभ्यां गग्गौ' [द. उ. 3-66] इति गक्प्रत्यये रूपम् । कित्त्वान्न गुणः । मोदयन्त्यनेनेति मुद्गः = सस्यजातिविशेषः । मुद्गेन संसृष्टं = मौद्गम् ।
3. 'इषिमदिमुदि—' [द. उ. 8-26] इत्यादिना किरच्प्रत्यये रूपम् । मोदन्तेऽनेनेति मुदिरः = मेघः ।
4. 'स्फायितञ्चि—' (द. उ. 8-31) इत्यादिना रक्प्रत्यये रूपमेवम् ।
5. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः । मुरा= ओषधिविशेषः ।
6. गौरादिपाठात् (4-1-41) स्त्रियां ङीषि रूपमेवम् ।

A. 'मुदा स चेतो ददते चिरं हरौ स्वादासुरैः स्वर्दितमङ्गलोर्दने ।' धा. का. 1-4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सर्वाणि रूपाणि भौवादिककूजतिवत् (239) बोध्यानि । [1]मूर्तम्-मूर्तः-मूर्तवान् । क्विपि, मूः-मूर्छौ-मूर्छः ; क्तिनि [2]मूर्तिः, [3]मूर्छितः,[A] मूर्छा, इत्यादीनि रूपाण्यस्य धातोः विशेषेण भवन्ति ।

(1289) "मुर्वी बन्धने" (I-भ्वादिः-575. अक. सेट्. पर.)

मूर्वकः-र्विका, मूर्वकः-र्विका, मुमूर्विषकः-षिका, मोमूर्वकः-र्विका ; मूर्विता-त्री, मूर्वयिता-त्री, मुमूर्विषिता-त्री, मोमूर्विता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकगूर्वतिवत् (416) ज्ञेयानि । [4]मूर्वा, [5]मौर्वी, मूः-मुरौ-मुरः, इमानि रूपाणि अस्य धातोः विशेषः । शतरि [B]मूर्वन् इति ।

(1290) "मुष स्तेये" (IX-क्र्यादिः-1530. अक. सेट्. पर.) [अ]

'अयं द्विकर्मकः' इति मा. धा. वृत्तिः ।

मोषकः-षिका, मोषकः-षिका, [6]मुमुषिषकः-षिका, मोमुषकः-षिका ; मोषिता-त्री, मोषयिता-त्री, मुमुषिषिता-त्री, मोमुषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि ।

---

1. निष्ठायाम्, 'न ध्याख्यापॄमूर्छिमदाम्' (8-2-57) इति नत्वनिषेधे रूपमेवम् । 'राल्लोपः' (6-4-21) इति छकारस्य लोपः । दीर्घः ।
2. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिचि रूपमेवम् ।
3. मूर्छाऽस्य सञ्जाता इत्यर्थे 'तदस्य सञ्जातं तारकादिभ्य इतच्' (5-2-36) इतीतच्प्रत्यये रूपम् ।
4. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः ।
5. मूर्वाया विकार इत्यर्थे 'तस्य विकारः' (4-3-134) इत्यणि ङीपि च रूपमेवम् ।
6. क्त्वासनोः 'रुदविदमुष—' (1-2-8) इति नित्यं कित्त्वविधानात्, 'रलो व्युपधात्—' (1-2-26) इति वैकल्पिकं कित्त्वं न । तेन सन्नन्ते सर्वत्र एकमेव रूपमिति ज्ञेयम् । एवं क्त्वाप्रत्ययेऽपि मुषित्वा इत्येकमेव रूपम् ।

A. 'अहूर्णचित्ताः परिमूर्छितव्रताः स्फूर्णमिया अप्रमुशः कृतोञ्छनाः ।' धा. का. 1-29.

B. 'दुदूर्विपून् धूर्वितुमेव गूर्वणं मूर्वन्तमापूर्वितपर्वताध्वरम् ॥' धा. का. 1-73.

[अ] 'मुष हिंसार्थः' इति भ्वादिष्वपि क्षीरस्वामी पपाठ । अन्यैः सर्वैरप्यपाठादस्माभिरयं न लिखितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मुष्णन्[A]-ती, [2]आमोषी[B], मुषितम्-तः-तवान्, [3]मुष्टम्-ष्टः, मुषित्वा, मुष्टिः, [4]मूषिकः-षिका, [5]मुष्कः, इत्यादीनि रूपाणि अस्य धातोः प्रातिस्विकरूपाणि इति ज्ञेयम्। सन्नन्तादुप्रत्यये मुमुषिषुः[C] इति।

(1291) "मुस खण्डने" (IV-दिवादिः-1220. सक. सेट्. पर.)

"आत्रेयस्तु कातन्त्रे मूर्धन्यान्तोऽयम्। तथा च 'राघवस्यामुषः कान्ताम्' (भ. का. 15-16) इति प्रयोगश्च, इति पाठान्तरमप्याह।" इति **मा. धा. वृत्तौ।**

मोसकः-सिका, मोसकः-सिका, मुमोसिषकः-मुमुसिषकः-षिका, मोमुसकः-सिका; मोसिता-त्री, मोसयिता-त्री, मुमोसिषिता-मुमुसिषिता-त्री, मोमुसिता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिककोसतिवत् (234) ज्ञेयानि।

---

1. 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। '**श्नाऽभ्यस्तयोरातः**' (6-4-112) इत्याकारलोपः। णत्वम्।

2. 'संपृचानुरुध.......**आमुषाभ्याहनश्च**' (3-2-142) इत्यादिना तच्छीलादिषु घिनुण्प्रत्यये रूपमेवम्।

3. 'आदितश्च' (7-2-16) इत्यत्र **चकारस्यानुक्तसमुच्चयार्थकत्वात् मुष्ट** इत्यादीनां सिद्धिः; 'चोरिते **मुषितं मुष्टम्—**' इति **स्वामी** च।' इति **प्रक्रियासर्वस्वे** (पु. 26)। तेन '**मुष्टं** प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन' इति **कालिदास** (५.) प्रयोग उपपद्यते।

4. '**मुषेर्दीर्घश्च**' (द. उ. 3-14) इति किकन्प्रत्ययो धातोः दीर्घश्च भवति। मुष्णातीति **मूषिकः**। "'**मूष** स्तेये' भौवादिकः। तस्मात् किकन्प्रत्यये दीर्घवचनमन्तरेणापि **मूषिकशब्दस्य** सिद्धत्वात् दीर्घवचनं स्पष्टार्थम्। एवं च मूषेर्ण्वुलि **मूषकः** इत्यपि साधुः। इति **श्वेतवनवासी**" इति **द. उ. टिप्पण्याम्।**

5. '**स्वृभूशुषिमुषिभ्यः** कित्' (द. उ. 3-19) इति कप्रत्ययः किच्च भवति। **मुष्कः**=चौरो, मांसलो वा। 'अण्डः फलं च' इति **क्षीरस्वामी**।

A. '......पुष्णन् मुदं मृगदृशां रिपुधाम **मुष्णन्**।' धा. का. 3-12.

B. 'द्रोहि खद्योतसंपर्कि नयना**मोषि** दुःसहम्॥' भ. का. 7-6.

C. 'किं **मुमुषिषुवद्** यात द्विषो नापचिकीर्षया॥' भ. का. 7-99.

131

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मुसलम्-मुसली, [2]मुस्ता,[A] [3]मुस्तकम्, इत्यादीनि रूपाण्यस्य धातोः विशेषेण भवन्ति।

(1292) **" मुस्त संघाते "** (X-चुरादिः-1632. सक. सेट्. उभ.)

**मा. धा. वृत्तिः** अमुं धातुं न पठति। अन्ये सर्वेऽपि ' मुस्त ' इत्यस्यानुकूला एव। 'अस्त–' इत्यस्य पाठभेदः इति **मा. धा.**; **धा. का.** (3. 26) च। मुस्तकः-स्तिका, मुमुस्तयिषकः-षिका; मुस्तयिता-त्री, मुमुस्तयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि **चौरादिककुस्मयतिवत्** (236) बोध्यानि। अस्य धातोः उभयपदित्वात् शतरि-मुस्तयन्-न्ती, मुमुस्तयिषन्-न्ती; मुस्तयिष्यन्-न्ती-ती, मुमुस्तयिषिष्यन्-न्ती-ती, इमानि रूपाण्यधिकानीति विशेषः।

(1293) **" मुह वैचित्त्ये "** (IV-दिवादिः-1198. अक. वेट्. पर.)

**रधादिः। वैचित्त्यम्**=विचित्तता, अविवेकः।

मोहकः-हिका, मोहकः-हिका, [4]मुमुहिषकः-मुमोहिषकः-मुमुक्षकः-क्षिका,

---

1. 'वृषादिभ्यश्चित्' (द. उ. 8-109) इति कलप्रत्यये **मुसलम्** इति रूपम्। गौरादिपाठान्ङीषि **मुसली** इति रूपम्। **मुसली**= गृहगोधिका।

2. बाहुलकात् औणादिके तन्प्रत्यये 'तितुत्र—' (7-2-9) इतीण्निषेधे रूपम्। अथवा, 'व्रातालातसुतपुतचित्तनिमित्तमुस्त—' इत्यादिना **भोजेन** क्तप्रत्यये निपातितः।' इति **धा. का. व्याख्यानात्** (2-66) एवं रूपमिति ज्ञेयम्।

3. 'संज्ञायाम्' (4-3-117) इति कन्प्रत्यये रूपं भवति। अर्धर्चादिगणे (2-4-31) पाठात् पुंनपुंसकलिङ्गत्वम्। 'भद्रं स्यान्मङ्गले हेम्नि **मुस्तके** करणान्तरे' इति **मेदिनी**।

4. '**रधादिभ्यश्च**' (7-2-45) इति इड्विकल्पः। इट्पक्षे, 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। इडभावपक्षे, 'वा द्रुहमुह—' (8-2-33) इति घत्वपक्षे, चर्त्वे षत्वे च **मुमुक्षकः** इति रूपम्। इडभावपक्ष एव, ढत्वपक्षे, 'षढोः कः सि' (8-2-41) इति कत्वेऽपि **मुमुक्षक** इति रूपं तुल्यमेव। एवं सन्नन्ते सर्वत्र रूपत्रय(चतुष्टय)स्य निष्पत्तिर्ज्ञेया।

A. '**मुस्तामोष्यमस**: किटिस्त्वमसमो लुब्ध्यन् खलानोकसः ...... ॥' धा. का. 2.66.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मोमुहकः-हिका ; मोहिता-त्री, [1]मोग्धा-ग्ध्री, मोढा-ढ्री, मोहयिता-त्री, मुमोहिषिता-मुमुहिषिता-मुमुक्षिता-त्री, मोमुहिता-त्री ; मुह्यन्-न्ती, [2]मोहयन् परिमोहयन्-न्ती, [A]परिमोहयमाणः, इत्यादीनि सर्वाण्यपि प्रातिस्विकरूपाणि विना दैवादिकद्रुह्यतिवत् (885) ज्ञेयानि । [3]परिमोही,[B] क्विपि उन्मुक्, उन्मुट्, [4]मूर्खः इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

## (1294) "मूङ् बन्धने" (1-भ्वादिः-967. सक. सेट्. आत्म.)

मावकः-विका, मावकः-विका, [5]मुमूषकः-षिका, [6]मिमावयिषकः-षिका, मोमूयकः-यिका ; मविता-त्री, मावयिता-त्री, मुमूषिता-त्री, मोमूयिता-त्री ; इत्यादीनि सर्वाणि रूपाणि भौवादिकपवतिवत् (1033) ज्ञेयानि । [7]मूतम्-तः-तवान् , [8]जीमूतः, क्त्वाप्रत्यये मूत्वा, [9]मूषा इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

---

1. रधादित्वादिड्विकल्पः । इडभावपक्षे घत्वविकल्पः । तेन रूपत्रयं तृजादिषु सर्वत्र ज्ञेयम् ।
2. मोहस्य चित्तवत्कर्तृकत्वात् **मोहयन्** इत्यत्र, '**अणावकर्मकात् चित्तवत्कर्तृकात्**' (1-3-88) इति ण्यन्ताच्छतैव। **परिमोहयन् परिमोहयमाणः** इत्यत्र तु 'न पादम्याङ्यमाङ्यसपरिमुह—' (1-3-89) इति परस्मैपद निषेधात् चित्तवत्कर्तृकत्वेऽकर्मकत्वेऽपि 'णिचश्च' (1-3-74) इति उभयपदं भवतीति ज्ञेयम् ।
3. तच्छीलादिषु कर्तृषु 'सम्पृच—' (3-2-142) इत्यादिना घिनुण्प्रत्यये रूपमेवम् ।
4. '**मुहेर्खो मूर् च**' [द. उ. 3-52] इति खप्रत्यये, धातोः 'मूर्' इत्यादेशे च रूपमेवम् ।
5. सन्नन्ते 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः । 'इको झल्' (1-2-9) इति सनः कित्त्वात् गुणनिषेधः ।
6. ण्यन्तात् सनि 'ओः पुयण्ज्यपरे' (7-4-80) इत्यनेन पवर्गपरकत्वात् अभ्यासस्य इकारः ।
7. निष्ठायाम् , 'श्र्युकः किति' (7-2-11) इति इण्निषेधः । एवं क्त्वा क्तिन्प्रभृतिष्वपि ज्ञेयम् ।
8. जीवनस्य मूतः **जीमूतः**=मेघः । पृषोदरादित्वात् (6-3-109) जीवनशब्दस्य '**जी**' इत्यादेशः ।
9. '**मूङ्ध्वोर्लोपश्च**' (द. उ. 9-17) इत्यूषन्प्रत्यये धातूकारलोपे च रूपमेवम् ।

A. '**परिमोहयमाणाभी** राक्षसीभिः समावृताः ॥' भ. का. 8-63.

B. 'कुर्याद् योगिनमप्येष स्फूर्जावान् **परिमोहिनम्** ।' भ. का. 7-10.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1295) **"मूत्र प्रस्रवणे"** (X-चुरादिः-1909.अक.सेट्.उभ.) **अदन्तः।**

मूत्रकः-त्रिका, मुमूत्रयिषकः-षिका ; मूत्रयिता-त्री, मुमूत्रयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कत्रयति**वत् (161) ज्ञेयानि। मोमूत्रकः[1]-त्रिका, मोमूत्रितः[A] इमानि रूपाणि अस्य धातोः भवन्तीति विशेषः।

(1296) **"मूल प्रतिष्ठायाम्"** (I-भ्वादिः-529. अक. सेट्. पर.)

'**मूलेः प्रतिष्ठितौ मूलेद्** रोहणे मूलयेदिति ।' (श्लो. 157) इति **देवः**।

मूलकः-लिका, मूलकः-लिका, मुमूलिषकः-षिका, मोमूलकः-लिका ; मूलिता-त्री, मूलयिता-त्री, मुमूलिषिता-त्री, मोमूलिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कूलति**वत् (244) बोध्यानि। [2]मूलम्-अमूला-शतमूली, इमानि रूपाणि अस्य धातोः विशेषेण भवन्ति।

(1297) **"मूल रोहणे"** (X-चुरादिः-1603. सक. सेट्. उभ.)

'मूलेः प्रतिष्ठितौ मूलेद् **रोहणे मूलयेदि**ति ।' (श्लो.157) इति **देवः**।

'**मुल**—इति नन्दी' इति **क्षीरस्वामी**।

मूलकः-लिका, मुमूलयिषकः-षिका, मूलयिता-त्री, मुमूलयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कूटयति**वत् (240) ज्ञेयानि। अस्य धातोः उभयपदित्वात् शतरि-मूलयन्-न्ती, मुमूलयिषन्-न्ती, मूलयिष्यन्-न्ती-ती, मुमूलयिषिष्यन्-न्ती-ती ; इति विशेषः। [3]मूलकः।

(1298) **"मूष स्तेये"** (I-भ्वादिः-676. सक. सेट्. पर.)

मूषकः-षिका, मूषकः-षिका, मुमूषिषकः-षिका, मोमूषकः-षिका ;

1. 'सूचिसूत्रि**मूत्र्य**ट्यर्त्यशूर्णोतिग्रहणं यङ्विधावने**काजहलार्थम्**' (वा. 3-1-22) इत्यनेनानेकाच्त्वेऽपि धातोः अस्य यङ् भवति। यङन्तात् ण्वुलि एवं रूपम्। एवमेव तृजादिष्वपि प्रक्रिया ऊह्या।
2. पचाद्यचि रूपमेवम्। लिङ्गस्य लोकाश्रयत्वादजन्तत्वेऽपि क्लीबत्वमस्येति ज्ञेयम्। **अमूला** इति तु '**मूलान्नञः**' (ग-सू. 4-1-4) इति टापि रूपमेवम्। **शतमूली** इति तु 'पाककर्णपर्णपुष्पफल**मूल**—' (4-1-64) इत्यादिना ङीषि सिध्यति। एवं **दर्भमूली** इत्यादिष्वपि ज्ञेयम्।
3. स्वार्थे कन्प्रत्यये रूपमेवम्। **मूलकः**=शाकविशेषः।

A. '**मोमूत्रिता**रिरतिरूक्षणया रणेषु।' धा. का. 3-59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मूषिता-त्री, मूषयिता-त्री, मुमूषिषिता-त्री, मोमूषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचूषतिवत् (552) ज्ञेयानि । [1]मूषा, [2]मूषकः-षिका, इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1299) "मृक्ष संघाते" (I-भ्वादिः-664. अक. सेट्. पर.)

'मक्ष—इत्यप्येके इति मैत्रेयः' इति धातुवृत्तिः । 'म्रक्ष—इत्येके' इति धा. का. (1-84) । क्षीरस्वामी तु धातुममुं न पठति । '........ म्रक्षेत् संघाते ........ ॥' (श्लो. 171) इति देवः ।

मृक्षकः-क्षिका, मृक्षकः-क्षिका, मिमृक्षिषकः-षिका, मरीमृक्षकः-क्षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतृक्षतिवत् (765) बोध्यानि । 'मक्ष' इति पाठे [3]मक्षकः-मक्षिका ।

(1300) "मृग अन्वेषणे" (X-चुरादिः-1900. सक. सेट्. आत्म.)

अदन्तः, कथादिः, आगर्वीयश्च । [अ]

'अन्वेषणेऽर्थे मृगयेत णौ यो मार्गेर्भवेन्मार्गति मार्गयेच्च ॥'
(श्लो. 44) इति देवः ।

मृगकः-गिका, मिमृगयिषकः-षिका ; मृगयिता-त्री, मिमृगयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककृपयतिवत् (251) ज्ञेयानि । अस्या-

---

1. 'गुरोश्च हलः' (3-3-103) इति अकारप्रत्ययः । 'तैजसावर्तनी मूषा' इत्यमरः ।
2. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति संज्ञायां क्वुन्प्रत्यये रूपमेवम् । स्त्रियां जातिलक्षणं ङीषं बाधित्वा टापि मूषिका इति रूपम् ।
3. संज्ञायाम्, 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3.5) इति क्वुन्प्रत्यये रूपमेवम् । स्त्रियां जातिलक्षणं ङीषं बाधित्वा 'अजाद्यतष्टाप्' (4-1-4) इति टापि मक्षिका इति रूपम् ।

[अ] 'मृग्यति इति कण्ड्वादिपाठात् ।' इति मैत्रेयः— इति धातुवृत्तौ प्रतिपादितम् । दिवाद्यन्ते तु "—'दिवादयस्त्वपरिसमाप्ताः' इत्याहुः । तेन क्षीयते, मृग्यते इत्यादिसिद्धिरिति ।" इत्यप्युक्तम् । कण्ड्वादिष्वपि मृगधातुः न पठ्यते । "दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादिसिद्धिरित्याहुः ।" इति दिवाद्यन्ते सिद्धान्तकौमुदीवाक्यात् परस्मैपदमेव दिवादिपाठेऽप्येतस्येति ज्ञायते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



गर्वीयत्वेन 'आगर्वादात्मनेपदिनः' (ग. सू. चुरादिः) इत्यात्मनेपदमेवेति विशेषः । [1]मृगया ।

(1301) "मृङ् प्राणत्यागे" (VI-तुदादिः-1403. अक. अनि. आत्म.)

'मृणाति हिंसार्थे स्वादेर्मृङस्तु म्रियते पदम् ॥' (श्लो. 34) इति देवः । मारकः-रिका, मारकः-रिका, मुमूर्षकः-र्षिका, मेम्रीयकः-यिका ; मर्ता-मर्त्री, मारयिता-त्री, मुमूर्षिता-त्री, मेम्रीयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1044) ज्ञेयानि । [2]म्रियमाणः[A], [3]मरिष्यन्-न्ती-ती, [श्वा][4]मुमूर्षन्, [5]अमृतम्, [6]मरः-अमरः, [B]दुर्मरम्,

---

1. 'परिचर्यापरिसर्यामृगयाऽटाट्यानामुपसंख्यानम्' (वा. 3-3-101) इति स्त्रियां भावादौ शप्रत्यये, अतो लोपे, णेर्गुणे च रूपम् । मृगया=आखेटकः । 'मृगि-कम्प्योः शविधिः' इति वचनेन शप्रत्ययोऽत्रेति क्षीरस्वामी । नैतादृशं वचनं भाष्यादिषु दृश्यते । व्याकरणान्तरीयं वाक्यमिति क्षी-टीका ।

2. शानचि, 'तुदादिभ्यः—' (3-1-77) इति शप्रत्यये, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशे इयङादेशे च रूपमेवम् ।

3. 'म्रियतेर्लुङ्लिङोश्च' (1-3-61) इत्यात्मनेपदस्य नियमितत्वात्, स्यप्रत्ययस्य च शित्प्रत्ययत्वादिनिदानाभावादत्र परस्मैपदं भवति । विस्तरस्तु माधवधातुवृत्त्यादिषु बोध्यः । 'ऋद्धनोः स्ये' (7-2-70) इतीडागमोऽत्रेति विशेषः ।

4. सन्नन्ताच्छतरि, 'इको झल्' (1-2-9) इति सनः कित्वात्, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युकारे, रपरत्वे च, 'हलि च' (8-2-77) इति दीर्घः । अत्र, 'पूर्ववत् सनः' (1-3-62) इति शानज् न, म्रियतिधातुमात्रस्यात्मनेपदनिमित्तत्वाभावात् शिल्लुङ्लिङां च निमित्तत्वात् । अतो यथासम्भवं परस्मैपदप्रयोग उपपन्नः । तथा च भाष्ये (3-1-7) प्रयुक्तम् 'श्वा मुमूर्षति' इति । अत्र शुनश्चेतनत्वात् जीवितस्य प्रियत्वात् व्याध्याद्यभिभवेऽपि तिर्यक्त्वात् मर्तुमिच्छा नास्तीत्यत इच्छार्थकस्सन् न, अपि तु 'आशंकायाम्—' (वा. 3-1-7) इति वार्तिकेन आशंकने (आशंसने) सन्-इति बोध्यम् । शङ्के, श्वा मुमूर्षति (मुमूर्षन् अस्ति) इति वाक्यार्थः । स्पष्टमिदं 'धातोः कर्मणः—' (3-1-7) इत्यत्र भाष्य-कैयटादिषु ।

5. न म्रियते इत्यमृतम् । 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् वर्तमाने क्तः । ततो नञ्समासः ।

6. पचाद्यचि—मरः । नञ्समासे अमरः = देवः ।

A. 'म्रियमाणः स सुग्रीवं प्रोचे सद्भावमागतः ।' भ. का. 6.141.

B. 'अकाले दुर्मरमहो यज्जीवामस्त्वया विना ॥' भ. का. 6.14.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[A]मुमूर्षा, [1]मरीचिः, [2]मरुः, [3]मृत्युः, [4]मरूकः, [5]मरुत्, [6]मर्तः-मर्त्यः इतीमान्यस्माद् भवन्तीति विशेषः।

(1302) "मृजू शुद्धौ" (II-अदादिः-1066. अक. वेट्. पर.) [अ]

'शौचालंकारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥
मार्ष्टि शुद्धौ तथा मार्जेः शब्दार्थान्मार्जयेण्णिचि।'

(श्लो. 60-61) इति देवः।

मार्जकः-र्जिका, मार्जकः-र्जिका, [7]मिमार्जिषकः-षिका-मिमृक्षकः-क्षिका,

---

1. 'मृकणिभ्यामीचिः' [द. उ. 1-38] इतीचिप्रत्यये रूपमेवम्। म्रियते इति **मरीचिः** = रश्मिः, ऋषिविशेषश्च।

2. 'भृमृ—' [द. उ. 1-92] इत्युप्रत्यये रूपम्। म्रियन्तेऽस्मिन् प्राणिनः सलिलार्थिन इति **मरुः** = जलतृणविवर्जितो देशः।

3. 'भुजिमृङ्भ्यां युक्त्युकौ [द. उ. 1.135] इति त्युक्प्रत्यये, कित्त्वाद् गुणनिषेधे च रूपमेवम्।

4. 'मृकणिभ्यामूकोकणौ' [द. उ. 3.44] इत्यूकप्रत्ययः। **मरूकः**=प्राणिविशेषः।

5. 'मृग्रोरुतिः' [द. उ. 6.1] इत्युतिप्रत्यये रूपमेवम्। **मरुत्**=वायुः, देवो वा।

6. 'हसिमृ—' [द. उ. 6-7] इति तन्प्रत्यये रूपमेवम्। **मर्तः** = प्राणी। **मर्त**शब्दात्, 'नवसूरमर्तयविष्ठेभ्यो यत्' (वा. 5-4-36) इति स्वार्थे यत्प्रत्यये **मर्त्यः** इति सिद्ध्यति। **मर्त्यः** = मनुष्यः।

7. धातोरस्य ऊदित्त्वेन, 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इतीड्विकल्पः। इट्पक्षे रूपमेवम्। इडभावपक्षे, झलादित्वेन सनः कित्त्वेन गुणनिषेधे, 'व्रश्चभ्रस्जसृजमृज—' (8-2-36) इत्यादिना षत्वे, 'षढोः कः सि' (8-2-41) इति ककारे षत्वे च रूपमेवम्। एवमेव सन्नन्ते सर्वत्र रूपद्वयस्योपपत्तिर्ज्ञेया।

A. 'ज्याघुष्टकठिनाङ्गुष्ठं राममायान्मुमूर्षया ॥' भ. का. 5.57.

[अ] 'मृजूष्—' इति **क्षीरस्वामी** षितममुं पठित्वा, उत्तरत्र, 'भिदादौ (3-3-104) मृजा।' इत्यप्याह। अनूदितश्चायं पक्षः **पुरुषकारे** (श्लो. 61), खण्डितश्च। 'षकारोऽनर्थः।' इति च **क्षीरस्वामि**वाक्यं किञ्चिदनूदितमत्र **पुरुषकारे**। परं तु **क्षीरतरङ्गिण्यां** नैतादृशं वाक्यमधुनोपलभ्यते। यदि धातोः षित्त्वं प्रामाणिकं स्यात्—तर्हि षित्त्वेनैन निदानेनाङ्सिद्धेर्भिदादिपाठपरिकल्पनमन्याय्यमिति तदाशयः। वस्तुतस्तु **क्षीरतरङ्गिण्यां** धातोरस्य षित्करणं लेखकदोषादापतितमिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मरीमृजकः-जिका ;

[2]मार्जिता-मार्ष्टा-मार्ष्ट्री, मार्जयिता-त्री, मिमार्जिषिता-मिमृक्षिता-त्री, मरीमृजिता-त्री ;

[3]मार्जन्-मृजन्-ती, मार्जयन्-न्ती, मिमार्जिषन्-मिमृक्षन्-न्ती; मार्जिष्यन्-[4]मार्क्ष्यन्-न्ती-ती, मार्जयिष्यन्-न्ती-ती, मिमार्जिषिष्यन्-मिमृक्षिष्यन्-न्ती-ती ; —

[5]व्यतिमार्जानः, व्यतिमृजानः, मार्जयमानः, व्यतिमिमार्जिषमाणः-व्यतिमिमृक्षमाणः, मरीमृज्यमानः- [6]मर्मृज्यमानासः व्यतिमार्जिष्यमाणः-व्यतिमार्क्ष्यमाणः, मार्जयिष्यमाणः, व्यतिमिमार्जिषिष्यमाणः-व्यतिमिमृक्षिष्यमाणः, मरीमृजिष्यमाणः ;

[7]कंसपरिमृट्-कंसपरिमृड्-कंसपरिमृजौ-कंसपरिमृजः ; —

---

1. 'न धातुलोप आर्धधातुके' (1-1-4) इत्यत्रत्यभाष्यपरामर्शनात् यङन्ते सर्वत्र वृद्धिविकल्पः इति ज्ञायत इति **बृहच्छब्देन्दुशेखरे** (पु. 1878) स्पष्टम् । ततश्चात्र सर्वत्र **मरीमार्जकः-र्जिका, मरीमार्जिता-त्री**; इत्यादीनि रूपाणि यथासम्भवं तत्तत्प्रत्ययेषु ज्ञेयानि । एवं '**मर्मृज्यते मर्मृज्यमानास** इति चोपसंख्यानम्' (वा. 7-4.91) इत्युक्तत्वात् ण्वुलादिष्वप्यस्य रुकि रूपनिष्पत्तिर्भवतीति न मन्तव्यम् ; यतोऽत्र निपातनस्थलेष्विव स्वरूपग्रहणात्, निर्दिष्टरूपस्यैव साधुत्वज्ञापनात्, यङ्लुकि विहितस्य रुको यङन्तेऽपि निर्दिष्टयोरुभयोर्विषयेऽप्युपसंख्यानार्थमेव **वार्तिका**वताराच्च इति स्पष्टं **कैयटादौ** ।
2. तृजादिष्वप्यूदित्त्वादिड्विकल्पः । इडभावपक्षे, इट्पक्षेऽपि लघूपधलक्षणं गुणं बाधित्वा, '**मृजेर्वृद्धिः**' (7-2-114) इति वृद्धिः । एवमेव तव्यदादिष्वपि ज्ञेयम् ।
3. शतरि, '**अदिप्रभृतिभ्यः—**' (2-4-72) इति शब्लुकि, '**इहान्ये वैयाकरणाः मृजेरजादौ** सङ्क्रमे विभाषा वृद्धिमारभन्ते' (भाष्यवाक्यम् 1-1-3) इति वृद्धिविकल्पः । वृद्ध्यभावपक्षे, शतुरपित्सार्वधातुकत्वेन ङिद्वद्भावादङ्गस्य गुणो न ।
4. स्यप्रत्यये इडभावपक्षे षत्वकत्वषत्वेषु रूपमेवम् ।
5. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् । वृद्धिविकल्पः ।
6. यङन्ताच्छानचि, 'मर्मृज्यते **मर्मृज्यमानास** उपसंख्यानम्' (वा. 7-4-91) इति वचनात् रीगपवादतया पाक्षिके रुकि, बहुवचने जसः, 'आज्जसेरसुक्' (7-1-50) इत्यसुकि रूपमेवम् । "छन्दोऽधिकारः 'आज्जसेरसुक्' (7-1-50) इति यावत् ।" इति **काशिकायाम्** (7-1-38) उक्तत्वात् वैदिकेष्वेवास्य प्रयोग इति ज्ञेयम् ।
7. कंसं परिमार्ष्टि इत्यर्थे, 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप् । पदान्तनिमित्तके षत्वे जश्त्वे चर्त्वविकल्पे च रूपमेवम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मृष्टम्-मृष्टः-मृष्टवान्, मार्जितः, मिमार्जिषितः-मिमृक्षितः, मरीमृजितः-तवान्; परिमार्जः, [2]तुन्दपरिमृजः[A]-तुन्दपरिमार्जः, [3]परिमाक्ष्णुः, [4]मार्जनः, मार्जः, मिमार्जिषुः-मिमृक्षुः, मरी[मार्जः]मृजः;

मार्जितव्यम्-मार्ष्टव्यम्, मार्जयितव्यम्, मिमार्जिषितव्यम्-मिमृक्षितव्यम्, मरीमृजितव्यम्;

मार्जनीयम्, मार्जनीयम्, मिमार्जिषणीयम्-मिमृक्षणीयम्, मरीमृजनीयम्;

[5]मृज्यः-[B]मार्ग्यः, [6]अवश्यमार्ज्यः, मार्ज्यम्, मिमार्जिष्यम्-मिमृक्ष्यम्, मरीमृज्यम्;

ईषन्मार्जः-दुर्मार्जः-सुमार्जः; — — —

मृज्यमानः, मार्ज्यमानः, मिमार्जिष्यमाणः-मिमृक्ष्यमाणः, मरीमृज्यमानः;

---

1. ऊदित्त्वेनेड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। षत्वे ष्टुत्वे च रूपमेवम्।

2. तुन्दं परिमार्ष्टीत्यर्थे, '**तुन्दशोकयोः परिमृजापनुदोः**' (3-2-5) इति कर्मण्युपपदे अणोऽपवादतया कप्रत्ययः। कित्त्वेन गुणनिषेधः। 'आलस्यसुखाहरणयोः—' (वा. 3-2-5) इति वचनात् आलस्यविशिष्टे कर्तर्येवायं प्रत्यय इति ज्ञेयम्। तदभावपक्षे **तुन्दपरिमार्जः** इत्यत्र, 'कर्मण्यण्' (3-2-1) इति अण्प्रत्यये वृद्धौ च रूपम्। अत्र कप्रत्ययस्य कित्त्वात्, '**मृजेरजादौ** सङ्क्रमे विभाषा वृद्धिम्—' (भाष्यवाक्यम् 1-1-3) इति वचनात् आलस्यरूपार्थे एव वृद्धिविकल्पमाशङ्क्य, 'सा भवत्येव सत्यभिधाने' इति **उद्योते** (3-1-5) समाहितम्। उत्तरत्र च यद्यनभिधानमभिमतम्, तदानीम्, 'इको गुणवृद्धी' (1-1.3) इति सूत्रे **भाष्य**स्वारस्यात् निरुक्तभाष्यवाक्ये '**अजादौ**' इत्यस्य आतिदेशिकक्ङिदजादिप्रत्यये इत्यर्थपरकत्वमाश्रित्य, अत्र कप्रत्ययस्यौपदेशिककित्त्वेन वृद्धिनिषेध एवेति च समाहितम्।

3. ताच्छीलिके, "–'परिक्षिपच्च **परिमृजः** क्स्नुः' इति क्स्नुप्रत्ययः। **परिमाक्ष्णुः**।" इति **प्रक्रियाकौमुदी**। **भाष्यादिषु** तु नैतादृशं वचनमुपलभ्यते।

4. बाहुलकात्, नन्द्यादेः (3-1-134) आकृतिगणत्वाद्वा ण्यन्तात् कर्तरि ल्युप्रत्यये रूपमेवम्।

5. '**मृजेर्विभाषा**' (3-1-113) इति विभाषा क्यप्। पक्षे ण्यति निष्ठायामनिट्त्वात् 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे वृद्धौ च **मार्ग्यः** इति रूपम्।

6. आवश्यकार्थे ण्यति, 'ण्य आवश्यके' (7-3-65) इति कुत्वनिषेधः।

A. 'इह युवतिवदनकान्तिभिराप्यायित**तुन्दपरिमृजः** शेते।' अनर्घराघवे 7-110.

B. 'मन्युस्तस्य त्वया **मार्ग्यो मृज्यः** शोकश्च तेन ते॥' भ.का. 6-57.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मार्गः, [1]अपामार्गः, मार्जः, मिमार्जिषः-मिमृक्षः, मरीमर्जः ;
मार्जितुम्-मार्ष्टुम्, मार्जयितुम्, मिमार्जिषितुम्-मिमृक्षितुम्, मरीमृजितुम् ;
[2]मृजा,[A] मृष्टिः, मार्जना, मिमार्जिषा-मिमृक्षा, मरीमृजा ;
परिमार्जनम्- [3]सम्मार्जनी, [4]सांमार्जनम्, मार्जनम्, मिमार्जिषणम्-मिमृक्षणम्, मरीमृजनम् ;
मार्जित्वा-मृष्ट्वा, मार्जयित्वा, मिमार्जिषित्वा-मिमृक्षित्वा, मरीमृजित्वा ;
विमृज्य-अपमृज्य, विमार्ज्य, विमिमार्जिष्य-विमिमृक्ष्य, विमरीमृज्य ;
मार्जम् २, मार्जित्वा २-मृष्ट्वा २, } मार्जम् २, मार्जयित्वा २, } मिमार्जिषम् २-मिमृक्षम् २, मिमार्जिषित्वा २-मिमृक्षित्वा २, }
मरीमृजम् २ ; मरीमृजित्वा २; } [5]मर्जूः, [6]मार्जारः, [7]मार्जालीयः ।

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञि, कुत्वे, 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति 'अप' इत्युपसर्गान्त्याकारस्य दीर्घे रूपमेवम्। अपमृज्यतेऽनेन व्याध्यादिरिति **अपामार्गः** = ओषधिविशेषः ।

2. स्त्रियां भावादौ भिदादिपाठात् (3-3-104) अङि, औपदेशिकङित्त्वादस्य प्रत्ययस्य '**मृजेर**जादौ—' (भाष्यवाक्यम् 1-3-5) इत्यत्र नास्य ग्रहणमिति निर्णयात्, 'क्ङिति च' (1-1-5) इति वृद्धिनिषेधे च रूपमेवम्। बाहुलकात् क्तिनि वृद्धौ च **मार्ष्टिः** इत्यपि रूपमिति ज्ञेयम्। **मा. धा. वृत्तौ** तु '**मार्ष्टि**रिति चुरादौ वक्ष्यते' इत्युक्तम्। चुरादिषु तु कुत्रापि **मार्ष्टि**शब्दनिष्पत्तिः तेन न क्रियते। **मृष्टि**रिति तु बाहुलकात् क्तिनि, क्तिचि वा निष्पद्यत इति ज्ञेयम्।

3. **सम्मार्जनी** इति करणल्युडन्तात् स्त्रियां टित्त्वेन ङीपि रूपम्। **सम्मार्जनी**= शोधनसाधनी।

4. सम्पूर्वकादस्माद् भावे 'अभिविधौ भाव इनुण्' (3-3-44) इतीनुणि, तदन्तात् 'अण् इनुणः' (5-4-15) इति स्वार्थिके अण्प्रत्यये, 'इनण्यनपत्ये' (6-4-164) इति नान्तस्य प्रकृतिभावे च रूपमेवम्। क्लीबत्वं लोकादत्रेति ज्ञेयम्। **काशिकायाम्** (6-4-164) उदाहृतमिदं पदम्।

5. '**मृजेर्गुणश्च**' (द. उ. 1-165) इत्यूप्रत्यये, वचनादेव वृद्ध्यपवादे गुणे च रूपम्। **मर्जूः**=शुद्धिः।

6. '**कञ्जिमृजिभ्यां** चित्' (द. उ. 8-67) इत्यारन्प्रत्यये रूपसिद्धिः। मार्ष्टि भवनमिति **मार्जारः**=बिडालः।

7. '**स्थाचतिमृजेः** आलवालजालीयरः' (द. उ. 10-1) इत्यनेन यथासंख्यमालीयर् प्रत्यये रूपमेवम्। मार्ष्टि अशुभं रक्षांसि चेति **मार्जालीयः** = अग्निः।

A. 'पयोधरांश्चन्दनपङ्कदिग्धान् वासांसि **चामृष्टमृजानि** दृष्ट्वा।' भ. का. 11.27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1303) "मृजू शौचालङ्कारयोः" (X-चुरादिः-1849. सक. सेट्. उभ.)

आधृषीयः ।

'शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥' (श्लो. 60) इति देवः ।

'मृजूष्—' इति क्षीरस्वामी । ऊदित्त्वस्य ण्यन्ते प्रयोजनाभावात्, शुद्ध एवोपयोगाच्चास्य णिज्विकल्प इति ज्ञेयम् । यद्वा, आधृषीयत्वेनेड्विकल्प इति बोध्यम् ।

मार्जकः-र्जिका, मिमार्जयिषकः-षिका, मार्जकः-र्जिका, मिमार्जिषकः-षिका, मिमृक्षकः-क्षिका, मरीमृजकः-मरीमार्जकः-र्जिका ; मार्जयिता-त्री, मिमार्जयिषिता-त्री, मार्जिता-त्री, मार्ष्टा-मार्ष्ट्री, मिमार्जिषिता-मिमृक्षिता-त्री, मरीमृजिता-मरीमार्जिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि यथासम्भवमूह्यानि । णिजभावपक्षे पूर्वलिखितादादिकमार्ष्टिवत् (1302) सन्नन्ते, यङन्ते च रूपाणि बोध्यानि । ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्ताच्च, णिन्निमित्तकं लघूपधलक्षणं गुणं बाधित्वा, 'मृजेर्वृद्धिः' (7-2-114) इति वृद्धिरिति विशेषः । वृद्धिविधायके सूत्रे उत्सृष्टानुबन्धस्य मृजेरविशेषेण ग्रहणमिति विवेकः ।

(1304) "मृड सुखने" (VI-तुदादिः-1327. अक. सेट्. पर.)

'मृडेर्मृड्णाति सुखने तत्रैव मृडतीति शे ॥' (श्लो. 87) इति देवः ।

मर्डकः-र्डिका, मर्डकः-र्डिका, मिमर्डिषकः-षिका, मरीमृडकः-डिका ; मर्डिता-त्री, मर्डयिता-त्री, मिमर्डिषिता-त्री, मरीमृडिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिकगर्जतिवत् (422) ज्ञेयानि । [1]मृडः-मृडानी, क्तिनि-[2]मृढिः, [3]मृडित्वा,[A] इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

---

1. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्यये रूपम् । मृडस्य स्त्री इति विवक्षायां 'इन्द्रवरुणभवशर्वरुद्रमृड—' (4-1-49) इत्यादिना पुंयोगे ङीषि आनुगागमे मृडानी इति रूपं भवति ।
2. 'तितुत्र—' (7-2-9) इतीण्निषेधे ढत्वे ष्टुत्वे च रूपमेवम् ।
3. 'मृडमृद—' (1-2-7) इति सेटः क्त्वायाः कित्त्वात् गुणनिषेधे रूपमेवम् । 'न क्त्वा सेट्' (1-2-18) इत्यस्य प्रतिषेधः ।

A. 'अमृडित्वा सहस्राक्षं क्लिशित्वा कौशलैर्निजैः ।' भ. का. 7.96.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1305) "मृड क्षोदे" (IX-क्र्यादिः-1516. सक. सेट्. पर.)

'मृड सुखे चेति केचित् ।' इति मा. धा. वृत्तिः । '—सुखने' इति क्षीरस्वामी, पुरुषकारश्च । तत्र (पुरुषकारे श्लो. 87) "अन्ये........क्षोदे, मृड सुखने च" इति पठन्ति इति ।

'मृडेर्मृड्णाति सुखने तत्रैव मृडतीति शे ॥' (श्लो. 87) इति देवः ।

मर्डकः-र्डिका, मर्डकः-र्डिका, मिमर्डिषकः-षिका, मरीमृडकः-डिका; मर्डिता-त्री, मर्डयिता-त्री, मिमर्डिषिता-त्री, मरीमृडिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिकतृपतिवत् (772) ज्ञेयानि । [1]मृड्णन्-ती-न्ती, व्यतिमृडाणः, [2]मृडीकम्-मृडङ्कणः, इमानि रूपाणि अस्य धातोः विशेषः ।

(1306) "मृण हिंसायाम्" (VI-तुदादिः-1331. सक. सेट्. पर.)

मर्णकः-र्णिका, मर्णकः-र्णिका, मिमर्णिषकः-षिका, मरीमृणकः-णिका; मर्णिता-त्री, मर्णयिता-त्री, मिमर्णिषिता-त्री, मरीमृणिता-त्री; इत्यादीनि सर्वाणि रूपाणि प्रातिस्विकरूपाणि विना तानादिकतर्णोतिवत् (766) बोध्यानि । [3]मृणालम् ।

(1307) "मृद क्षोदे" (IX-क्र्यादिः-1515. अक. सेट्. पर.) [अ]

'क्षोदनम्=सञ्चूर्णनम्' इति धा. का. (3-10) ।

मर्दकः-र्दिका, मर्दकः-र्दिका, मिमर्दिषकः-षिका, मरीमृदकः-दिका; मर्दिता-त्री, मर्दयिता-त्री, मिमर्दिषिता-त्री, मरीमृदिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिकतृपतिवत् (772) ज्ञेयानि । क्विपि-

---

1. शतरि, 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे णत्वे च रूपम् ।
2. 'मृडः कीकन् कङ्कणौ' (द. उ. 10-11) इति कीकन् कङ्कणः इत्येतौ प्रत्ययौ भवतः । मृडीकम्=हिरण्यम् । मृडङ्कणः=शिशुः ।
3. 'तमिविडिविलिमृणि—' (द. उ. 8-115) इत्यादिना कालच्प्रत्यये रूपम् । मृणालम्=बिसम् ।

[अ] क्वचित् सिद्धान्तकौमुद्यां 'मृद मर्दने' इति भ्वादिष्वपि (767) पठ्यते । वस्तुतस्तत्र 'म्रद—' इति भाव्यम् इत्याशयेनाऽस्माभिर्नायं विलिखित इति ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



मृत्-मृद्-मृदौ-मृदः, [1]मृत्तिका, मृत्सा-मृत्स्ना, [2]मुरमर्दनः, मर्दनम्, [3]मृध्यः, [4]महिषासुरमर्दनी, [5]मृदित्वा, [6]मृदङ्गः, इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्ति ।

## (1308) "मृधु उन्दने" (I-भ्वादिः-874. सक. सेट्. उभ.)

उन्दनम्=क्लेदनम् ।

मर्धकः-र्धिका, मर्धकः-र्धिका, मिमर्धिषकः-षिका, मरीमृधकः-धिका; मर्धिता-त्री, मर्धयिता-त्री, मिमर्धिषिता-त्री, मरीमृधिता-त्री; इत्यादीनि प्रातिस्विकरूपाणि विना सर्वाण्यपि रूपाणि तानादिकतर्णोतिवत् (766) ज्ञेयानि । शतरि-मर्धन्-न्ती, [A]मृद्धम्-द्धः-मृद्धवान्, [7]मर्धित्वा-मृद्ध्वा, [8]मृधम्, इमानि रूपाणि अस्य धातोः भवन्तीति विशेषः ।

## (1309) "मृश आमर्शने" (VI-तुदादिः-1425. सक. अनि. पर.)

आमर्शनम्=स्पर्शः ।

मर्शकः-र्शिका, मर्शकः-र्शिका, [9]मिमृक्षकः-क्षिका, मरीमृशकः-शिका;

---

1. 'मृदस्तिकन्' (5-4-39) इति मृच्छब्दात् स्वार्थे तिकन्प्रत्यये रूपमेवम् ।
2. नन्द्यादेः (3-1-134) आकृतिगणत्वात् कर्तरि ल्युप्रत्ययः । मुरं मर्दयतीति मुरमर्दनः ।
3. 'ऋदुपधात्—' (3-1-110) इति क्यप्प्रत्ययः ।
4. बाहुलकात् 'कृत्यल्युटो बहुलम्' (3-3-113) इति कर्मण्युपपदे कर्तरि ल्युटि, स्त्रियां टित्त्वात् ङीपि च रूपमेवम् ।
5. 'मृडमृद—' (1-2-7) इति सेटः क्त्वायाः कित्त्वात् गुणनिषेधे रूपमेवम् ।
6. 'विडादिभ्यः कित्' (द. उ. 3-61) इति अङ्गच्प्रत्ययः । मृदङ्गः= वाद्यविशेषः ।
7. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणे मर्धित्वा इति रूपम् । तेन रूपद्वयं ज्ञेयम् ।
8. 'घञर्थे कविधानम्' (वा. 3-3-58) इति कप्रत्यये रूपमेवम् । बाहुलकाद्वा भावे कप्रत्ययः । मृधम् = समरः इति क्षीरस्वामी ।
9. सन्नन्तात् ण्वुलि, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वात् '—अकिति' (6-1-59) इत्युक्तत्वात् अमभावे 'व्रश्च—' (8-2-36) इत्यादिना धातुशकारस्य षकारे 'षढोः कः सि' (8-2-41) इति ककारे षत्वे च रूपमेवम् । एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया ।

A. 'या नेदितोर्वीपरिशर्धिवीचीविमृद्धवृक्षादिविबोध्यशैत्या ॥' धा. का. 2.26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]म्रष्टा-मर्ष्टा-र्ष्ट्री, मर्शयिता-त्री, मिमृक्षिता-त्री, मरीमृशिता-त्री, इत्यादीनि सर्वाणि रूपाणि भौवादिककर्षतिवत् (255) ज्ञेयानि। शतरि-[2]आमृशन्-न्ती-ती, म्रक्ष्यन्-मर्क्ष्यन्-न्ती-ती; इति विशेषः।

(1310) **"मृष तितिक्षायाम्"** (IV-दिवादिः-1164. सक. सेट्. उभ.)

'— —क्षमायां यौ मर्षेन्मर्षेत मर्षयेत्।

**मृष्यते मृष्यतीति** स्यात् स्नेहने शपि मर्षति ॥' (श्लो. 173) इति **देवः**। मर्षकः-र्षिका, मर्षकः-र्षिका, मिमर्षिषकः-षिका, मरीमृषकः-षिका; मर्षिता-त्री, मर्षयिता-त्री, मिमर्षिषिता-त्री, मरीमृषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिक**तृष्यतिवत्** (775) ज्ञेयानि। [3]परिमृष्यन्-न्ती, [4]मर्षितः-मर्षितवान्, [A]अपमृषितम् (वाक्यम्), [5]दुर्मर्षणः,

---

1. 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (6-1-59) इति वा अमागमः। ततः यण्। तेन रूपद्वयं बोध्यम्। एवमेव अकिति झलादिप्रत्यये परतः सर्वत्र अमागमो विकल्पेन भवति।

2. '**तुदादिभ्यः** शः' (3-1-77) इति शः विकरणप्रत्ययः। अपित्सार्वधातुकस्य शस्य ङिद्वद्भावाद् अङ्गस्य गुणो न। स्त्रियां नुम्विकल्पे रूपद्वयं ज्ञेयम्।

3. '**परेर्मृषः**' (1-3-82) इति परिपूर्वकस्यास्य कर्तृगामिन्यपि क्रियाफले परस्मैपदं शतैव। तेन शतरि, श्यनि अङ्गस्य गुणनिषेधे च रूपमेवम्।

4. '**मृषस्तितिक्षायाम्**' (1-2-20) इति सेटो निष्ठायाः कित्त्वनिषेधात् गुणे रूपमेवम्। अत्र धातुपाठ एवास्य धातोस्तितिक्षार्थनिर्देशात्, भौवादिक**मर्षते**-रुदित्त्वेन निष्ठायामिटः प्राप्त्यभावात्, पारिशेष्यात् दैवादिकस्यास्यैव ग्रहणस्य सम्भवेन (1-2-20) सूत्रे पुनः '**तितिक्षायाम्**' इत्युपादानं व्यर्थं सत् धातोरर्थान्तरत्वे गमकमिति **शाब्दिकाः**। तेन तितिक्षा (क्षमा) भिन्नार्थे निष्ठायाः कित्त्वमेव। यथा— '**अपमृषितं** वाक्यमाह' इति। अत्र धातोरुपसर्गयोगवशात् अविस्पष्टरूपार्थान्तरे वृत्तिरिति ज्ञेयम्।

5. ईषदाद्युपपदेषु, 'भाषायां शासियुधिदृशिधृषि**मृषिभ्यो** युज् वाच्यः' (वा.3-3-130) इति खलपवादो युच्। 'वा इत्येके' इति **प्रक्रियाकौमुदी**। तन्मते ईषन्मर्षः-दुर्मर्षः-सुमर्षः इति रूपाण्यपि बोध्यानि।

A. 'विहितं मयाऽद्य सदसीदमपमृषितमच्युतार्चनम्।' शि. व. 15-46.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]मर्षित्वा-मृषित्वा, [2]मर्षणः, इतीमान्यस्य विशेषरूपाणीति ज्ञेयम्। [A]मृष्यमाणः ।

(1311) "मृष तितिक्षायाम्" (X-चुरादिः-1850. सक. सेट्. उभ.)

आधृषीयः । तेन णिज्विकल्पः ।

'—क्षमायां यौ मर्षेन्मर्षेत मर्षयेत् ।' (श्लो. 173) इति देवः ।

मर्षकः-र्षिका, मिमर्षयिषकः-षिका, मर्षकः-र्षिका, मिमर्षिषकः-षिका, मरीमृषकः-षिका ; मर्षयिता-त्री, मर्षिता-त्री, मिमर्षयिषिता-त्री, मिमर्षिषिता-त्री, मरीमृषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्षतिवत् (554) ज्ञेयानि । णिजभावपक्षे क्विपि-मृट्-मृड्-मृषौ-मृषः, मृषित्वा-मर्षित्वा, इत्यादीनि रूपाण्यस्य धातोरिति विशेषः ।

(1312) "मृषु सेचने सहने च" (I-भ्वादिः-707. सक. सेट्. पर.)

'—हिंसाक्लेशदैन्येषु इत्येके' इति धा. का. (1.88)। '—स्नेहने' इति देवसम्मतः पाठः (श्लो. 173) इति ज्ञायते ।

'मृष्यते मृष्यतीति स्यात्, स्नेहने शपि मर्षति ॥' (श्लो. 173) इति देवः ।

मर्षकः-र्षिका, मर्षकः-र्षिका, मिमर्षिषकः-षिका, मरीमृषकः-षिका ; मर्षिता-त्री, मर्षयिता-त्री, मिमर्षिषिता-त्री, मरीमृषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपर्षतिवत् (1054) ज्ञेयानि । युचि-मर्षणः, [3]मृष्टम्-ष्टः-मृष्टवान्, [4]मर्षित्वा-मृष्ट्वा, इमानि रूपाण्यधिकानीति विशेषः ।

---

1. क्त्वायाम्, 'तृषिमृषिकृशेः काश्यपस्य' (1-2-25) इति कित्त्वविकल्पः । तेन रूपद्वयम् ।

2. नन्द्यादेः (3-1-134) आकृतिगणत्वात् , बाहुलकाद् वा कर्तरि, ण्यन्तात्, शुद्धाद्वा ल्युप्रत्यये रूपमेवम् ।

3. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम् 'यस्य विभाषा' (7-2-15) इतीण्निषेधः । ष्टुत्वं च ।

4. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः । तेन रूपद्वयम् ।

A. 'तन्मृष्यमाणास्त्वथ शुच्यदज्ञका भृत्याः सुनद्धं बहुरक्तमंशुकम् ।' धा. का. 2.61.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1313) "मृ हिंसायाम्" (IX-क्र्यादिः-1492. सक. सेट्. पर.)
प्वादिः, ल्वादिश्च ।

'मृणाति हिंसार्थे प्वादेर्मृङस्तु म्रियते पदम् ॥' (श्लो. 34) इति देवः ।
मारकः-रिका, मारकः-रिका, मुमूर्षकः-मिमरिषकः-मिमरीषकः-षिका, मोमुरकः-रिका ; मरिता-मरीता-त्री, मारयिता-त्री, मुमूर्षिता-मिमरिषिता-मिमरीषिता-त्री, मोमुरिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिक पिपर्तिवत् (1055) ज्ञेयानि । [1]मृणन्-मृणती, [2]मूर्णम्-मूर्णः-मूर्णवान्, [3]मूर्णिः, इतीमानि रूपाण्यस्माद् भवन्ति ।

(1314) "मेङ् प्रणिदाने" (I-भ्वादिः-961. सक. अनि. आत्म.)

'मिमीते मायते माने, माति तत्रैव शब्लुकि ।
मयते प्रणिदानेऽर्थे............................॥' (श्लो. 9) इति देवः ।
"प्रणिदानम्=विनिमयः । 'प्रत्यर्पणम्' इत्यपरे ।" इति मा. धा. वृत्तिः । "—प्रतिदाने-इति काशकृत्स्नः । तथैव कातन्त्रे, चान्द्रे च । 'प्रणिधाने' इति पाठान्तरम् ।" इति क्षी. टीका ।
मायकः-यिका, मापकः-पिका, मित्सकः-त्सिका, मेमीयकः-यिका ; माता-मात्री, माययिता-त्री, मित्सिता--त्री, मेमीयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकमातिवत् (1240) ज्ञेयानि । शानचि-[4]मयमानः-प्रणिमयमानः, [5]अपमित्य,[A] अपमाय वा याचते । याचित्वा अपमयते ।

---

1. शतरि क्र्यादित्वात् श्नाप्रत्यये, 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे, 'श्नाभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे णत्वे च रूपमेवम् ।
2. धातोरुत्वे रपरत्वे 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वे, दीर्घे णत्वे च रूपमेवम् ।
3. 'ऋल्वादिभ्यः क्तिन् निष्ठावद् वाच्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नत्वे उत्वादिके च रूपमेवम् ।
4. शानचि, शपि अयादेशे च रूपमेवम् । '— अशिति' (6-1-45) इत्युक्तत्वात् आत्वं नेति ज्ञेयम् । प्रणिमयमानः इत्यत्र 'नेर्गदनदपतपदघुमा—' (8-4-17) इत्यादिना नेर्णत्वम् ।
5. अपपूर्वकादस्मात्, 'उदीचां माङो व्यतीहारे' (3-4-19) इति क्त्वाप्रत्यये, तस्य सामासिके ल्यपि, 'मयतेरिदन्यतरस्याम्' (6-4-70) इति इकारेऽन्तादेशे च अपमित्य इति रूपम् । पक्षे अपमाय इति च । अपूर्वकालार्थं वचनमिदम् । अत्र (3-4-19) 'उदीचाम्' इत्युक्तत्वात्, प्राचां मते तु 'याचित्वाऽपमयते' इत्यपि प्रयोगः साधुः । 'उदीचाम्—' (3-4-19) इति सूत्रे 'माङ' इति, मेङः कृतात्वस्य निर्देश इति 'दाधा घ्वदाप्' (1-1-20) सूत्रे भाष्ये स्पष्टम् ।

A. 'अपमित्य तपोवित्तैरस्या भागं भगीरथः ।' सुभद्राहरणे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]धान्यमायः, इतीमानि रूपाण्यस्माद् भवन्तीति ज्ञेयम् ।

(1315) "मेदृ मेधाहिंसनयोः" (I-भ्वादिः-869. सक. सेट्. उभ.)

'ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥' (श्लो. 104) इति देवः । क्षीरस्वामी मेथृ—' इति पपाठ ।

मेदकः-दिका, मेदकः-दिका, मिमेदिषकः-षिका, मेमेदकः-दिका; मेदिता-त्री, मेदयिता-त्री, मिमेदिषिता-त्री, मेमेदिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि ।

(1316) "मेधृ सङ्गमे च" (I-भ्वादिः-870. सक. सेट्. उभ.)

अत्र चकारात् धातुपाठे पूर्वधातुगतं मेधाहिंसनरूपमर्थद्वयं विवक्षितम् । भोजराजस्तु 'यतोऽङ्विधौ मेधाशब्दसाधनार्थं मिधृधातोर्गुणं विधत्ते' तेन ज्ञायते—नास्यायं धातुः संमत इति । कौमाराश्चात्रैवानुकूलाः । स्पष्टमिदं प्रकृतस्थले मा. धा. वृत्तौ ।

मेधकः-धिका, मेधकः-धिका, मिमेधिषकः-षिका, मेमेधकः-धिका; मेधिता-त्री, मेधयिता-त्री, मिमेधिषिता-त्री, मेमेधिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि । [2]मेधा, [3]गृहमेधी, [4]अश्वमेधः, [5]मेधिः, [6]मेध्यः-(पशुः), [A]प्रमेधितः इतीमानि धातोरस्य विशेषरूपाणीति ज्ञेयम् ।

---

1. कर्मणि उपपदे आदन्तलक्षणं कप्रत्ययं बाधित्वा, 'ह्वावामश्च' (3-2-2) इत्यण् । आत्वे कृते, 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः ।
2. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादौ अकारः । मेधा=बुद्धिः ।
3. गृहान्=दारान् मेधति=सङ्गच्छत इति गृहमेधी=गृहस्थः । 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिप्रत्ययः ।
4. अश्वं मेधयति=हिंसयतीत्यर्थे ण्यन्तात्, अन्तर्भावितण्यन्तात् शुद्धाद्वा धातोः 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्यये रूपमेवम् । अश्वमेधः=तन्नामको यज्ञविशेषः । एवमेव पुरुषमेधः इत्यत्रापि ज्ञेयम् । पितृमेधः इत्यत्र तु पितृभिः सह मेधः (मेधति=संगच्छते इत्यर्थे) इति पचाद्यजन्तेन समासो ज्ञेयः ।
5. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावे स्त्रियाम् इक्प्रत्यये रूपम् । मेधिः=पशूनां बन्धविशेषे साधनीभूतो रज्जुविशेषः ।
6. कर्मणि ण्यत्प्रत्यये रूपमेवम् । मेध्यः=यज्ञार्ह इत्यर्थः ।

A. 'नित्यं प्रमोद्यामिदितोऽमेदैः प्रमेधिता सद्भिरनियमानैः ।' धा. का. 2.26.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1317) " मेपृ गतौ " (I-भ्वादिः-371. सक. सेट्. आत्म.)

मेपकः-पिका, मेपकः-पिका, मिमेपिषकः-षिका, मेमेपकः-पिका ; मेपिता-त्री, मेपयिता-त्री, मिमेपिषिता-त्री, मेमेपिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि ।

(1318) " मेवृ सेवने " (I-भ्वादिः-505. सक. सेट्. आत्म.)

मा. धा. वृत्तौ तु मैत्रेयसम्मतपाठत्वेनायमुपात्तः ।

मेवकः-विका, मेवकः-विका, मिमेविषकः-षिका, मेमेवकः-विका ; मेविता-त्री, मेवयिता-त्री, मिमेविषिता-त्री, मेमेविता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षेवतिवत् (320) ज्ञेयानि । [1]मेवितम्-तः-तवान्, मेवमानः, मेवित्वा, इतीमान्यस्य विशेषरूपाणीति ज्ञेयम् । [A]मेव्यम् ।

(1319) " मोक्ष असने " (X-चुरादिः-सक. सेट्. उभ.)

सिद्धान्तकौमुद्यादिषु धातुरयं नोपात्तः । '—सहने' इति पाठान्तरम् । मोक्षकः-क्षिका, मुमोक्षयिषकः-षिका ; मोक्षयिता-त्री, मुमोक्षयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि । युचि—[B]मोक्षणा ।

(1320) " म्ना अभ्यासे " (I-भ्वादिः-929. अक. अनि. पर.)

प्रायेणायमाङ्पूर्वक एव प्रयुज्यते । 'अभ्यासः=पारम्पर्येण वृत्तिः ।' इति क्षीरस्वामी ।

म्नायकः-यिका, म्नापकः-पिका, मिम्नासकः-सिका, माम्नायकः-यिका ; म्नाता-त्री ; म्नापयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि

---

1. अस्य धातोः सेट्त्वात् निष्ठायामेवं रूपम् ।

A. 'सेव्यं सतां शङ्करशैलेव्यमञ्जभूर्गेव्यं सुरैः पेव्यममेव्यमुन्मदैः ।' धा. का. 1-65.

B. 'उत्तंसभूषणविमोक्षणयाऽर्हिताभौ ।' धा. का. 3.40.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



विना भौवादिकधमतिवत् (924) ज्ञेयानि। [1]आमनन्-ती, [2]व्यत्यामनमानः, [3]निम्नम्, [4]द्युम्नम्, [5]सुम्नम्, [6]आम्नायः इतीमानि रूपाण्यस्येति विशेषः।

(1321) "म्रक्ष म्लेच्छने" (X-चुरादिः-1662. अक. सेट्. उभ.)

'म्लेच्छनम्=अपशब्दनम्।' इति धातुवृत्तिः। 'म्रक्ष रोषे' इति चान्द्रसम्मतः पाठ इति क्षीरतरङ्गिणीतो ज्ञायते।

'म्रक्ष च्छेदने' इत्यपि क्वचित्पठ्यते—इति मा. धा. वृत्तिः।

'म्लेच्छने म्रक्षयेत्, [7]म्रक्षेत् संघाते—॥' (श्लो. 171) इति देवः।

म्रक्षकः-क्षिका, मिम्रक्षयिषकः-षिका; म्रक्षयिता-त्री, मिम्रक्षयिषिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि। [8]अनयम्रक्[B]-म्रक्षौ-म्रक्षः।

---

1. शतरि, शपि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमन—' (7-3-78) इत्यादिनाऽस्य मनादेशे पररूपे च रूपमेवम्।
2. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानचि, शपि मनादेशे रूपमेवम्।
3. नीचभावमभ्यस्तीति निम्नम्। 'सुपि—' (3-2-4) इति योगविभागात्, 'आतश्चोपसर्गे' (3-1-136) इति वा कप्रत्यये, 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे च रूपमेवम्। अत्र धातुवृत्तौ तु—"—'आतोऽनुपसर्गे कः' (3-2-3) इति वा कः। नेर्नीचभाववचनत्वेन मन्य (न ?) त्यर्थस्याविशेषणान्न तं प्रतीहोपसर्गत्वम्।" इत्युक्तम्। तदिहावधेयम्।
4. दिने आम्नायते इति द्युम्नम्। द्युशब्दो दिनवचनः। अत्रापि कप्रत्यये रूपम्।
5. सुतरामाम्नायते इति सुम्नम्=सुखम्। 'घञर्थे कविधानम्—' (वा. 3-3-58) इति घञर्थे कप्रत्यये रूपम्।
6. आ=समन्तात् म्नायते इति आम्नायः=वेदः। घञि 'आतो युक्—' (7-3-33) इति युगागमे च रूपमेवम्।
7. देवश्लोकदर्शनेनास्य भ्वादिषु 'म्रक्ष संघाते' इति पाठः संमत इति ज्ञायते। परं तु सर्वत्र धातुपाठेषु भ्वादिष्वस्य मृक्ष इत्येव पाठ उपलभ्यते। मा. धा. वृत्तौ तु चुरादिषु म्रक्षधातुप्रस्तावे 'म्रक्षति इति संघाते शपि।' इत्युक्तम्। धातुवृत्तावेव भ्वादिषु म्रक्ष इत्येव पाठो दृश्यते। ईदृशेषु स्थलेषु कतमः पाठः सर्वसम्मत इति दुर्निरूपं भवति।
8. क्विपि संयोगान्तलोपे रूपमेवम्।

A. 'सोऽजुहोत् कृष्णवर्त्मानिम् आमनन् मन्त्रमुत्तमम् ॥' भ. का. 17-30.

B. 'धर्मेतरम्यग् अनयम्रगयं हि राजा।' धा. का. 3-30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1322) **"म्रद मर्दने"** (I-भ्वादिः-767. सक. सेट्. आत्म.)

घटादिः, षित्।

'**मृद—**' इति बालमनोरमापाठः। स च '**अत् स्मृदृत्वरप्रथम्रद—**' (7-4-95) इति सूत्रे **म्रद** इत्यनेनास्यैव ग्रहणस्य सर्वैरप्युक्तत्वात् चिन्त्यः।
म्रादकः-दिका, म्रदकः-दिका, मिम्रदिषकः-षिका, माम्रदकः-दिका;
म्रदिता-त्री, म्रादयिता-त्री, मिम्रदिषिता-त्री, माम्रदिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्नपतिवत् (272) ज्ञेयानि। [1]मृदुः।

(1323) **"म्रुचु गत्यर्थः"** (I-भ्वादिः-195. सक. सेट्. पर.)

म्रोचकः-चिका, म्रोचकः-चिका, मुम्रोचिषकः-मुम्रुचिषकः-षिका, मोम्रुचकः-चिका;
म्रोचिता-त्री, म्रोचयिता त्री, मुम्रोचिषिता-मुम्रुचिषिता-त्री, मोम्रुचिता-त्री;
इत्यादिकानि समस्तान्यपि रूपाणि भौवादिकग्रोचतिवत् (443) ज्ञेयानि।
[2]म्रुक्तः-म्रुक्तवान्।

(1324) **"म्रुन्चु गत्यर्थः"** (I-भ्वादिः-193. सक. सेट्. पर.)

अयं नोपधः, सन्धिवशाञ्ञकार इति ज्ञेयम्।

म्रुञ्चकः-ञ्चिका, म्रुञ्चकः-ञ्चिका, मुम्रुञ्चिषकः-षिका, मोम्रुचकः-चिका;
म्रुञ्चिता-त्री, म्रुञ्चयिता-त्री, मुम्रुञ्चिषिता-त्री, मोम्रुचिता-त्री;
इत्यादिकानि समस्तान्यपि रूपाणि भौवादिकग्लुञ्चतिवत् (447) ज्ञेयानि।
[A]म्रुक्तम्।

---

1. '**प्रथिम्रदि—**' (द. उ. 1.113) इति कुप्रत्ययः, सम्प्रसारणं च। म्रदते ऽसाविति **मृदुः**= अकठिनः।

2. उदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः। **माधवधातुवृत्तौ** तु "भावादिकर्मणोः '**उदुपधात्—**' (1-2-21) इति कित्त्वविकल्पनात् '**म्रुचितमनेन म्रोचितमनेन**' इत्यादि।" इत्युक्तम्। अत्र, '**निषेधाश्च बलीयांसः**' (परि. 122) इति न्यायेन, पुरस्तादिण्णिषेधकाण्डारम्भसामर्थ्यात्, 'उदुपधात्—' (1-2-21) इति सूत्रे उदिद्भिन्नस्योदुपधस्य धातोरेव सर्वैरपि व्याख्यातृभिः उदाहरणप्रत्युदाहरणसमये उपादानाच्च, अत्रापि इण्णिषेध एव भावादिकर्मणोः निष्ठायां प्रामाणिक इति प्रतिभाति।

A. 'आवकचञ्चूपुटतश्चदारवतत्वगतखगम्रुक्तशिखैर्लताद्रुमैः।' धा. का. 1-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1325) "म्रेट्टृ उन्मादे" (I-भ्वादिः-अक. सेट्. पर.)

सिद्धान्तकौमुद्याद्यनुपात्तत्वेऽपि प्राचीनैः मैत्रेय-क्षीरस्वामि-सायण-प्रभृतिभिरुपात्तत्वादयं धातुरस्माभिरप्यत्र विलिख्यते। 'मेट्टृ—' इति दुर्ग-नारायणभट्टादिसंमतः पाठः।

म्रेटकः-टिका, म्रेटकः-टिका, मिम्रेटिषकः-षिका, मेम्रेटकः-टिका; म्रेटिता-त्री, म्रेटयिता-त्री, मिम्रेटिषिता-त्री, मेम्रेटिता-त्री; इत्यादिकानि सर्वाणि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि।

(1326) "म्रेडृ उन्मादे" (I-भ्वादिः-293. अक. सेट्. पर.)

'मेडृ—' इति काशकृत्स्नसम्मतः पाठः।

म्रेडकः-डिका, म्रेडकः-डिका, मिम्रेडिषकः-षिका, मेम्रेडकः-डिका; म्रेडिता-त्री, म्रेडयिता-त्री, मिम्रेडिषिता-त्री, मेम्रेडिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षेपतिवत् (261) ज्ञेयानि। [A]आम्रेडितम्।

(1327) "म्लुचु गत्यर्थः" (I-भ्वादिः-196. सक. सेट्. पर.)

म्लोचकः-चिका, म्लोचकः-चिका, मुम्लोचिषकः-मुम्लुचिषकः-षिका, मोम्लुचकः-चिका; म्लोचिता-त्री, म्लोचयिता-त्री, मुम्लोचिषिता-मुम्लुचिषिता-त्री, मोम्लुचिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-ग्रोचतिवत (443) ज्ञेयानि। [1]मलिम्लुचः।

(1328) "म्लुन्चु गत्यर्थः" (I-भ्वादिः-194. सक. सेट्. पर.)

म्लुञ्चकः-ञ्चिका, म्लुञ्चकः-ञ्चिका, मुम्लुञ्चिषकः-षिका, मोम्लुचकः-चिका; म्लुञ्चिता-त्री, म्लुञ्चयिता-त्री, मुम्लुञ्चिषिता-त्री, मोम्लुचिता-त्री; इत्यादीनि

---

1. 'कप्रकरणे मूलविभुजादिभ्यः—' (वा. 3-2-5) इति कप्रत्यये रूपमेवम्। 'मलिम्लुच' शब्दव्युत्पादनावसरे अमरसुधायां 'म्लुच स्तेये' (भ्वा. से. पर.) इति कश्चन धातुः उपात्तः। परन्तु धातुपाठकोशेषु कुत्रापि स नोपलभ्यते।

A. 'प्रशौटदुल्लागणयौदितान्तिकान् मेटद्वृषाम्रेडितघोषमेदुरान्।' धा. का. 1-39.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



सर्वाण्यपि रूपाणि भौवादिकग्लुश्चतिवत् (447) ज्ञेयानि। कर्तरि क्तप्रत्यये [I]म्लुक्तः[A] इति।

## (1329) "म्लेच्छ अव्यक्ते शब्दे" (I-भ्वादिः-205. अक. सेट्. पर.)

'अव्यक्तायां वाचि' इति क्षीरस्वामी।

[2]म्लेच्छकः-च्छिका, म्लेच्छकः-च्छिका, मिम्लेच्छिषकः-षिका, मेम्लेच्छकः-च्छिका; म्लेच्छिता-त्री, म्लेच्छयिता-त्री, मिम्लेच्छिषिता-त्री, मेम्लेच्छिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि दैवादिकक्लिश्यतिवत् (287) ज्ञेयानि। [3]म्लिष्टम्, शतरि-म्लेच्छन्-न्ती, क्विपि—[4]म्लेट्-म्लेड्-म्लेडौ-म्लेडः, इति विशेषः। [5]म्लेच्छितवै।

## (1330) "म्लेच्छ अव्यक्तायां वाचि"

(X-चुरादिः-1663. अक. सेट्. उभ.)

---

1. उदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। उपधानकारलोपः।

2. धातुरयमुपदेशे **म्लेछ** इत्येव पठ्यते। पश्चात्, 'दीर्घात्' (6-1-75) इति तुक्। तुकश्चुत्वेन चकारे सर्वत्र **म्लेच्छ** इति श्रूयते।

3. 'क्षुब्धस्वान्तध्वान्तलग्न**म्लिष्ट**विरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु' (7-2-18) इत्यादिना यथासम्भवमस्य निष्ठायाम्, अविस्पष्टार्थे इडभावो निपात्यते। षत्व-ष्टुत्वादिकेषु **म्लिष्टम्** इति भवति। अन्यत्र **म्लेच्छितम्** इत्यपि साधुः।

4. क्विपि, 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति सतुक्कस्य छकारस्य शकारे, षत्वे, जश्त्वचर्त्वयोश्च रूपमेवम्।
'वृत्तिप्रदीपे तु वितुक्कस्य शादेश उक्तः, तुगभावस्तु 'अकृतव्यूहाः **पाणिनीयाः** (परि 57...) कृतमपि शास्त्रं निवर्तयन्तीति।" इति **मा. धा. वृत्तौ** अत्र पक्षभेदः प्रोक्त इहावधेयः।

5. 'कृत्यार्थे तवैकेन्केन्यत्वनः' (3-4-14) इति छन्दसि विषये धातोरस्मात् तवैप्रत्यये इडागमे च रूपमेवम्। तथा च किञ्चित् श्रुतिवाक्यमुपात्तं **महाभाष्ये** (1-1-1) "तस्माद् ब्राह्मणेन न **म्लेच्छितवै** नापभाषितवै, **म्लेच्छो** ह वा एष यदपशब्दः।" इति।

A. 'अम्लुक्तरश्मौ शशिना निमुम्रुचे निमुम्लुचेऽर्केण च यत्र सन्ततम्॥' धा.का. 1.26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'इहाव्यक्तवागपशब्दनम् ।' इति माधवः । चान्द्रास्तु धातुममुमत्र (चुरादौ) न पठन्तीति क्षीरतरङ्गिण्यां स्पष्टम् ।

म्लेच्छकः-च्छिका, मिम्लेच्छयिषकः-षिका ; म्लेच्छयिता-त्री, मिम्लेच्छयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचित्रयतिवत्(525)ज्ञेयानि ।

(1331) "म्लेटृ उन्मादे" (I-भ्वादिः-292. अक. सेट्. पर.)

'म्लेडृ—' इति कुत्रचिद् दृष्टः पाठः । धातुवृत्तौ—'म्रेटृ म्रेडृ म्लेटृ उन्मादे' इत्युपादाय, 'म्लेडति' इत्युदाहृतम् । धातुवृत्तावेव प्राचीनमुद्रणे 'म्रेटृ—' इति नोपात्तम् ।

म्लेटकः-टिका, म्लेटकः-टिका, मिम्लेटिषकः-षिका, मेम्लेटकः-टिका ; म्लेटिता-त्री, म्लेटयिता-त्री, मिम्लेटिषिता-त्री, मेम्लेटिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगेपतिवत् (429) ज्ञेयानि । [A]म्लेटकः।

(1332) "म्लेवृ सेवने" (I-भ्वादिः-506. सक. सेट्. आत्म.)

म्लेवकः-विका, म्लेवकः-विका, मिम्लेविषकः-षिका, मेम्लेवकः-विका ; म्लेविता-त्री, म्लेवयिता-त्री, मिम्लेविषिता-त्री, मेम्लेविता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिकक्लेवतिवत् (291) ज्ञेयानि । [B]म्लेवितम् ।

(1333) "म्लै हर्षक्षये" (I-भ्वादिः-904 अक. अनि. पर.)

"—'गात्रविनामे' विनामः=कान्तिक्षयः ।" इति क्षीरस्वामी । 'हर्षक्षयः=धातुक्षयः ।' इति माधवः ।

म्लायकः-यिका, म्लापकः-पिका, मिम्लासकः-सिका, माम्लायकः-यिका ; म्लाता-त्री, म्लापयिता-त्री, मिम्लासिता-त्री, माम्लायिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकग्लायतिवत् (452) ज्ञेयानि । अस्य मित्संज्ञा-

---

A. 'अम्लेटकैश्चाकटुचाटुभाषितैरटैः पटत्सम्रटिताञ्जनोत्करैः ॥' धा. का. 1-39.

B. 'प्रम्लेवितं रेवितवत्समण्डलीं मव्यद्भिराभीरजनैरसूर्य्यके: ॥' धा. का. 1-65.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



विधानाभावात् मित्संज्ञाकार्यं नेति विशेषः। तेन ण्यन्ते ग्लायकः-यिका, इत्यादिकानि एकविधान्येव रूपाणि। [1]ग्लानिः।

(1334) "यक्ष पूजायाम्" (X-चुरादिः-1693. सक. सेट्. आत्म.)

आकुस्मीयः। [अ]

यक्षकः-क्षिका, यियक्षयिषकः-षिका; यक्षयिता-त्री, यियक्षयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकपक्षयतिवत् (956) बोध्यानि। [2]यक्षः, यक्ष्मा[3], [A]यक्ष्यम्, इमानि रूपाण्यधिकानीति विशेषः।

(1335) "यज देवपूजासङ्गतिकरणदानेषु"

(I-भ्वादिः-1002. सक. अनि. उभ.)

याजकः-जिका, याजकः-जिका, [4]यियक्षकः-क्षिका, यायजकः-जिका;
[5]यष्टा-यष्ट्री, याजयिता-त्री, यियक्षिता-त्री, यायजिता-त्री;
यजन्-न्ती, याजयन्-न्ती, यियक्षन्-न्ती; —
यक्ष्यन्-न्ती-ती, याजयिष्यन्-न्ती-ती, यियक्षिष्यन्-न्ती-ती; —
यजमानः, याजयमानः, [B]यियक्षमाणः, यायज्यमानः;
यक्ष्यमाणः, याजयिष्यमाणः, यियक्षिष्यमाणः, यायजिष्यमाणः;

---

1. बाहुलकात् क्तिनस्तकारस्य नकारे रूपमेवम्।
2. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति कर्मणि घञ्प्रत्यये रूपमेवम्। यक्ष्यतेऽसौ इति यक्षः।
3. 'अर्तिस्तु......' (द. उ. 7-26.) इति मन्प्रत्यये रूपमेवम्। यक्ष्मा = व्याधिः।
4. सन्नन्ते सर्वत्र, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (8-2-36) इति षत्वे, 'षढोः कः सि' (8-2-41) इति ककारे, षत्वे च रूपनिष्पत्तिरिति ज्ञेयम्।
5. तृजादिषु, 'व्रश्च—' (8-2-36) इति षत्वे, ष्टुत्वे च रूपम्। एवं तव्यदादिष्वपि प्रक्रियोह्या।

A. '........भ्रूणस्य शाठ्यजनयक्ष्यमवेक्ष्य गात्रम्।' धा. का. 3-35.
B. 'यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम्।' शि. व. 2. 1.
[अ] "अत्रात्रेयः—'केचित् रामायणे यक्षशब्दस्य भक्षणार्थत्वेन व्युत्पादनादन्तस्थादिमाहुः; तच्चिन्त्यम्। इत्युक्तवान्।' रामायणोक्तिस्तु 'यक्ष पूजायाम्' इत्यस्यानेकार्थत्वाश्रयणेन निर्वाह्या।" इति 'जक्ष—' धातौ (अदादिषु) माधवोक्तमिहावधेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]देवेट्-देवेड्-देवेजौ-देवेजः ; — —

[2]इष्टम्-इष्टः-इष्टवान्-इष्टी, याजितः, यियक्षितः, यायजितः-तवान् ; यजः, [3]सोमयाजी-हविर्याजी[A], अग्निष्टोमयाजी, [4]यज्वा,[B] [5]यजमानः, [6]ऋत्विक्, 'त्वं यज्ञे वरुणस्य [7]अवया असि।' [8]उपयट्, [9]साधुयाजी, याजः, यियक्षुः, [10]यायजूकः,[C] यायजः ;

---

1. देवान् यजतीति **देवेट्**। कर्मण्युपपदे, 'क्विप् च' (3-2-76) इति क्विपि 'वचिस्वपियजादीनां किति' (6-1-15) इति यकारस्य सम्प्रसारणे, 'सम्प्रसारणाच्च' (6-1-108) इति पूर्वरूपे, षत्वे, जश्त्वे च रूपमेवम्।
2. निष्ठायाम्, **यजादि**त्वेन सम्प्रसारणे पूर्वरूपे, षत्वे ष्टुत्वे च रूपमेवम्। 'इष्टादिभ्यश्च' (5-2-88) इतीन्प्रत्यये **इष्टी** इति रूपम्। एवमेव क्त्वाप्रभृतिष्वपि प्रक्रिया ज्ञेया।
3. 'भूते' (3-2-84) इत्यधिकारे, 'करणे **यजः**' (3-2-85) इति णिनिप्रत्यये रूपमेवम्। सोमेन इष्टवान् **सोमयाजी**। एवमेव **अग्निष्टोमयाजी** इत्यादिसिद्धिरूह्या।
4. भूतार्थे, 'सुयजोर्ङ्वनिप्' (3-2-103) इति ङ्वनिप्प्रत्यये प्रथमैकवचने उपधादीर्घे नकारलोपे च **यज्वा** इति रूपम्।
5. तच्छीलादिषु कर्तृषु 'पूङ्**यजोः** शानन्' (3-2-128) इति शानन्प्रत्ययः। शित्त्वात् शपि, 'आने मुक्' (7-2-82) इति मुगागमे **यजमानः** इति रूपम्। यस्त्वसकृत् यागादिकं करोति स एवमुच्यते।
6. ऋतौ यजते, ऋतुं यजते, ऋतुप्रयुक्तो वा यजतीत्यर्थे धातोरस्मात् ऋतुशब्द उपपदे, '**ऋत्विक्**—' (3-2-59) इत्यादिना क्विन्। सम्प्रसारणे, पूर्वरूपे च कृते, निपातनात्, व्रश्चादिषत्वापवादतया 'क्विन्प्रत्ययस्य कुः' (8-2-62) इति कुत्वे च **ऋत्विक्** इति सिद्ध्यति।
7. '**अवे यजः**' (3-2-72) इति मन्त्रे ण्विन्प्रत्यये, उपधावृद्धौ '**अवयाः** श्वेतवाः पुरोडाश्च' (8-2-67) इति निपातनाद्रुत्वे च रूपमेवम्। छन्दस्येवायं प्रयोगः।
8. 'विजुपे छन्दसि (3-2-73) इति छन्दसि विषये उपोपपदे धातोरस्य विच्प्रत्यये षत्वे जश्त्वे च रूपमेवम्।
9. 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिप्रत्यये रूपमेवम्।
10. '**यज**जपदशां यङः' (3-2-166) इति यङन्तादूकप्रत्यये, 'दीर्घोऽकितः' (7-4 83) इत्यभ्यासदीर्घे च रूपमेवम्।

A. 'मृषाऽसि त्वं **हविर्याजी** राघव च्छद्मतापसः।' भ. का. 6-129.

B. '**यज्वा**नश्च ससुत्वानो यानगोपीन्मखेषु सः॥' भ. का. 5-37.

C. 'तं **यायजूकाः** सह भिक्षुमुख्यैस्तपःकृशाः शान्त्युदकुम्भहस्ताः।' भ. का. 2-20.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



यष्टव्यम्, याजयितव्यम्, यियक्षितव्यम्, यायजितव्यम्;
यजनीयम्, याजनीयम्, यियक्षणीयम्, यायजनीयम्;
[1]याज्यम्, [2]देवयज्या, [3]याज्या, याज्यम्, यियक्ष्यम्, यायज्यम्;
ईषद्यजः-दुर्यजः-सुयजः; — —
[4]इज्यमानः, याज्यमानः, यियक्ष्यमाणः, यायज्यमानः;
[5]यागः-अनुयागः-प्रयागः, [6]प्रयाजः-अनुयाजः, [7]उपांशुयाजः-पत्नीसंयाजः-ऋतुयाजः-उपयाजः, [8]यज्ञः, याजः, यियक्षः, यायजः;
यष्टुम्, [9]यष्टुं, याजको [वा याति], याजयितुम्, यियक्षितुम्, यायजितुम्;

---

1. ण्यति, '**यजयाचरुच**—' (7-3-66) इति कुत्वनिषेधः।
2. देवशब्द उपपदे छन्दसि विषये कर्मणि यत्प्रत्यये रूपमेवम्। निपातनात् स्त्रीलिङ्गत्वम्।
3. यजन्त्यनेनेति **याज्या** = ऋक्। बाहुलकात् करणे ण्यत्।
4. कर्मणि, यगन्ताच्छानचि सम्प्रसारणे पूर्वरूपे च रूपम्।
5. 'हलश्च' (3-3-121) इति संज्ञायां घञि, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे च रूपमेवम्। **अनुयागः**=भोजनम्, उपसर्गवशाद्धातोरर्थान्तरे वृत्तिः। **प्रयागः**=क्षेत्रविशेषः। अत्र सङ्गतिकरणं धातोरर्थः। नदीत्रयसङ्गतिकरणं ह्यत्र देशे वदन्ति।
6. घञि, '**प्रयाजानुयाजौ** यज्ञाङ्गे' (7-3-62) इति निपातनात् यज्ञाङ्गविषये कुत्वं न। पञ्च **प्रयाजाः**। त्रयोऽ**नुयाजाः**। 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घे **अनूयाज** इत्यपि भवति।
7. "**प्रयाजानुयाज**ग्रहणं प्रदर्शनार्थम्—अन्यत्राप्येवंप्रकारे कुत्वं न भवति। 'एकादश **उपयाजाः**', '**उपांशुयाज**मन्तरा यजति', 'अष्टौ **पत्नीसंयाजा** भवन्ति' '**ऋतुयाजै**श्चरन्ति'—इत्येवमादि सिद्धं भवति।' इति **काशिका**-(7-3-62) वाक्यमिहावधेयम्। तेनैतेषां साधुत्वं बोध्यम्। 'जाघन्या **पत्नीः संयाजयन्ति**' (शतपथब्राह्मणे-3-7-6-1) इति श्रौतनिर्वचनपर्यालोचनायां तु पत्नीः संयाजयन्तीति **पत्नीसंयाजः** इति ण्यन्तात् 'कर्मण्यण्' (3-2-1) इत्यणेवात्रेति न कुत्वप्रसक्तिः। अतोऽत्रेतरेषां विषये कुत्वाभावस्योपपत्तिकल्पनेऽपि **पत्नीसंयाज**शब्दविषये नोपपत्तिकल्पनपरिश्रमः कार्यः इति ज्ञेयम्।
8. भावे, '**यजयाच**—' (3-3-90) इत्यादिना नङ्प्रत्यये, जकारस्य श्चुत्वे च रूपमेवम्।
9. '**तुमुन्ण्वुलौ** क्रियायां क्रियार्थायाम्' (3-3-10) इति क्रियार्थक्रियायां तुमुन्, ण्वुल् च भवतः। **यष्टुं याति**—यागाय यातीत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]इष्टिः- [2]इज्या[A], [3]यष्टिः, याजना, यियक्षा, यायजा ;
यजनम्, याजनम्, यियक्षणम्, यायजनम् ;
इष्ट्वा, याजयित्वा, यियक्षित्वा, यायजित्वा ;
अन्विज्य, प्रयाज्य, प्रयियक्ष्य, प्रयायज्य ;
याजम् २, } याजम् २, } यियक्षम् २, } यायजम् २ ; }
इष्ट्वा २, } याजयित्वा २, } यियक्षित्वा २, } यायजित्वा २ ; }
[4]यजेणुः ; [5]यज्युः, [6]यजत्रम्, [7]यजुः ।

## (1336) "यत निकारोपस्कारयोः"

(X-चुरादिः-1736. सक. सेट्. उभ.) [अ]

'—खेदे च' इति क. क. द्रुमे ।

---

1. 'श्रुयजीषिस्तुभ्यः—' (वा. 3-3-95) इति करणे क्तिन्प्रत्यये सम्प्रसारणादिके च रूपम् ।
2. 'व्रजयजोर्भावे क्यप्' (3-3-98) इति स्त्रियां भावे क्यपि, कित्त्वेन सम्प्रसारणादिकेषु चैवं रूपम् ।
3. बाहुलकादौणादिके [द. उ. 1-74] तिप्रत्यये रूपमेवमिति **क्षीरतरङ्गिणी** ।
4. बाहुलकादौणादिके [द. उ. 1-133] एणुप्रत्यये रूपम् । **यजेणुः**=याजकः, ऋत्विक् ।
5. 'यजिमनि—' [द. उ. 1-134] इति युच्प्रत्यये, प्रत्ययस्याननुनासिकत्वेनानादेशाभावे च रूपमेवम् । **यज्युः**=अध्वर्युः ।
6. 'अमिनक्षियजि—' [द. उ. 8-56] इत्यत्रन्प्रत्ययः । इज्यन्तेऽस्मिन् देवता इति **यजत्रम्**=यज्ञस्थानम् । अग्निहोत्रमिति **केचित्** ।
7. 'अर्तिपृवपियजि—' [द. उ. 9-39] इत्युसिप्रत्ययः । **यजुः**=वेदः ।

A. 'निर्व्याजमिज्या ववृते वचश्च भूयो बभाषे मुनिना कुमारः ॥' भ. का. 2-37.

[अ] '**निराकारे**' इति दैवपाठमुपाश्रित्य **पुरुषकारे** व्याख्यातम्—"...'निराकारः=परिभवः।' इति च **क्षीरस्वामी** । उपस्कारोपसंस्कारयोः पुनः पाठकृतः (=ग्रान्थिकाः) विप्रवदन्ते । तथा च **आख्यातनिघण्टुः**—'यत्ने प्रैषे निराकारे यातयेदप्युपस्कृतौ।' इति । **श्लोकधातुपाठश्च**—'**यत** उपसंस्कारनिकारार्थः स निरश्च धान्यधनवाची ।' इति ।" इति । अत्रेदमवधेयम्—**माधवधातुवृत्ति-प्रौढमनोरमा**प्रभृतिष्वप्येवमेव **क्षीरस्वामि**पाठ उद्ध्रियते । परं तु **क्षीरतरङ्गिण्या**मधुना पाठोऽन्यादृश एवोपलभ्यत इत्युपर्येव प्रदर्शितम् । प्रायः सर्वेऽप्याधुनिकाः वैयाकरणाः धातुविषये **क्षीरस्वामि**मतं **पुरुषकारो**पात्तस्थलेषु **पुरुषकार**वाक्यानुसारेणैवोद्धरन्ति ; न तु स्वयं दृष्ट्वेनेत्यपि ज्ञायते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



'यतते तु प्रयत्नार्थे, **निराकारे तु यातयेत्**।' (श्लो. 96) इति देवः। '**निकारः**=स्वेदनम्।' इति **क्षीरस्वामी**। 'यत्नः प्रैषो वा **निकारः**' इति **बालमनोरमा**। 'परिभवसंस्कारौ तौ' इति **धा. का. व्याख्या** (3-40)। यातकः-तिका-यियातयिषकः-षिका; यातयिता-त्री, यियातयिषिता-त्री; इत्यादिकानि रूपाणि समस्तान्यपि चौरादिक**कालयति**वत् (175) ज्ञेयानि। यातना=तीव्रवेदना। 'ण्यासश्रन्थः—' (3-3-107) इति युचि रूपम्।

(1337) **"यती प्रयत्ने"** (I-भ्वादिः-30. अक. सेट्. आत्म.)

'**यतते तु प्रयत्नार्थे**, निराकारे तु यातयेत्।' (श्लो. 96) इति देवः। यातकः-तिका, यातकः-तिका, यियतिषकः-षिका, यायतकः-तिका; यतिता-त्री, यातयिता-त्री, यियतिषिता-त्री, यायतिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**चेतति**वत् (524) ज्ञेयानि। [1]यत्यम्, [2]यत्नः, [3]आयत्तः-आयत्तवान्, [4]यतिः, [5]यतमानः, इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः।

(1338) **"यत्रि सङ्कोचने"** (X-चुरादिः-1536. अक. सेट्. उभ.) [अ]

यन्त्रकः-न्त्रिका, यियन्त्रयिषकः-षिका; यन्त्रयिता-त्री, यियन्त्रयिषिता-त्री;

---

1. 'तकिशसिचति**यति**जनीनामुपसंख्यानम्' (वा. 3-1-97) इति हलन्तलक्षणण्यदपवादतया यत्प्रत्यये रूपमेवम्।
2. भावे, 'यजयाच**यत**विच्छप्रच्छरक्षो नङ्' (3-3-90) इति नङ्प्रत्यये रूपम्।
3. निष्ठायाम्, '**श्वीदितः**—' (7-2-14) इति इण्निषेधः।
4. सर्वधातुभ्यो विहित औणादिके कर्तरि इन्प्रत्यये रूपमेवम्।
5. '**ताच्छील्य**वयोवचनशक्तिषु चानश्' (3-2-129) इत्यनेन ताच्छील्यार्थे चानश्प्रत्यये रूपमेवम्। शानच्प्रत्ययेऽप्येवमेव। **यतमानः**=यमनियमाद्यङ्गविशिष्टयोगाभ्यासकविशेषः।

[अ] '**यन्तृ**—' इति ऋदिदत्र पाठ इति **आभरणकार**मतत्वेन **धातुवृत्तावु**पादाय—"अयं पाठः चिरन्तनव्याख्यानेषु न दृश्यते; प्रत्युत **यन्त्रणा**दिशब्दमस्मादेव **मैत्रेयादयो** व्युदपादयन्।" इति विवेचितम्। "अत्रापि पूर्ववत् (चितिधातुवत्) इदित्करणात् **यन्त्रती**त्याद्यपि भवति।" इति **मा. धा. वृत्तिः**। "**यन्त्र**—इति पठितुं युक्तम्। यत्तु-इदित्करणात् **यन्त्रतीति माधवेनो**क्तम्—तच्चिन्त्यम्।" इति **सिद्धान्तकौमुद्युक्तिरेव** साधुः। यतः—'**चिन्त्यात्**' इत्यादौ उपधानकारसद्भावेन, णिजभावपक्षे नलोपव्यावृत्त्या सार्थकतां लभमान इकारः णिजभावं चिन्तेर्ज्ञापयतीति तूचितम्। इह तु रेफस्यैवोपधात्वप्रसङ्गेन नलोपप्रसक्त्यभावात्—इति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकतन्त्रयतिवत् (698) ज्ञेयानि। यति—[A]अयन्त्यम्।

(1339) "यभ मैथुने" (I-भ्वादिः-980. अक. अनि. पर.) [अ] याभकः-भिका, याभकः-भिका, [1]यियप्सकः-सिका, यायभकः-भिका; [2]यब्धा-यब्ध्री, याभयिता-त्री, यियप्सिता-त्री, यायभिता-त्री; इत्यादिकानि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिकतपतिवत् (703) ज्ञेयानि। [B]याभः।

---

1. '—अथ मैथुने यभिः' इत्यनिट्कारिकासु (भाष्ये 7-2-10) पाठात् धातोरस्यानिट्त्वम्। 'खरि च' (8-4-55) इति चर्त्वेन भकारस्य पकारः।

2. तृजादिषु, 'झषस्तथोर्धोऽधः' (8-2-40) इति धत्वेन धकारे, 'झलां जश् झशि' (8-4-53) इति जश्त्वे च रूपनिष्पत्तिर्ज्ञेया।

A. 'संचोरयन्तमरिगर्वमशेषभद्रं चिन्तन्तमन्तकमिवाप्तमयन्त्यवीर्यम्।' धा. का. 3-13.

B. 'याभायकामैर्नमनाद् गतार्यैः सुप्योऽसि विष्णो यमिभिर्विताप्यैः॥' धा. का.2-39.

[अ] 'यभ विपरीतमैथुने' इति क्षीरस्वामि-माधवादिसम्मतः पाठः। '—विपरीते मैथुने' इति धा. का. व्याख्या (2-39) दृष्टः पाठः। "भय विपरीतो मैथुने'; विपरीत इति—यभ इत्यर्थः।" इति पुरुषकारः। 'जभ —' इति चवर्गतृतीयादिं केचित् पठन्ति। धनपाल-काश्यपादयः 'यभ —' इति पठित्वा, 'जभ च' इति पठन्तीति ग्रन्थेषु तत्र तत्रोदाहरणाज्ज्ञायते। 'रभिश्च भान्तेष्वथ मैथुने यभिः' (अनिट्कारिका, भाष्ये 7-2-10) इत्यत्र वृत्त्यादिषु यभतेरेवोदाहरणात् 'जभ—' इति पाठोऽप्रामाणिक इति च पुरुषकारे (श्लो. 145) निरूपितम्। 'जभि—' इत्यपि कुत्रचिद् दृष्टः पाठः। "—'विपरीत इति। विपरीतानुष्ठित इत्यर्थः।' इति मैत्रेयः॥" इति धातुवृत्तिः। "तच्च पुरुषायितम्।" इति धा. का व्याख्या। एवं बहुधाऽत्र धातौ, स्वरूपविषयेऽर्थविचारे च विप्रतिपत्तिः ग्रन्थकृतां दृश्यते। प्रसिद्धपाठस्तु यभ इत्येवेति प्रामाणिकाः। 'यभस्व नित्यं यदि शक्तिरस्ति—' (मुक्तकम्) इत्यादिषु धातोरस्यात्मनेपदप्रयोगो दृश्यते। तत्र प्रमाणं मृग्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1340) **"यम उपरमे"** (I-भ्वादिः-819-984. सक. अनि. पर.) [अ]

'यमेरुपरमे यच्छेद् यमयेत् परिवेषणे।' (श्लो. 148) इति देवः।

यामकः-मिका, [1]यमकः-मिका, [2]आयामकः-मिका, [3]यियंसकः-सिका,
[4]यंयमकः-यँय्यमकः-मिका;

[5]यन्ता-यन्त्री, यमयिता-आयामयिता-त्री, यियंसिता-त्री, यंयमिता-त्री;

---

1. **'यमोऽपरिवेषणे'** (ग. सू. भ्वादौ) इति पठ्यते। तस्य चायमर्थः— 'न कम्यमिचमाम्' (ग. सू. भ्वादौ) इत्यतो नेति वर्तते। उपरमार्थे पठितो यो **यम**धातुः स एव परिवेषणरूपार्थभिन्नार्थ एव घटादिपाठं न प्राप्नोति—अर्थात् परिवेषणार्थे घटादिः—इति। तथा च **'नियमयन्** ब्राह्मणान्' इत्यादिषु परिवेषणार्थकत्वात् घटादित्वम्। तेन मित्त्वात्, 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाह्रस्वे रूपमेवं सर्वत्र बोध्यम्। यदा तु परिवेषणभिन्नार्थकत्वं—तदानीं **आयामयन्** (=द्राघयन्, व्यापारयन् वा इत्यर्थः) इत्यादिषु मित्त्वनिषेधात् उपधावृद्धिरेवेति बोध्यम्। एवमुत्तरत्रापि।

2. **मैत्रेयरक्षित - काशिकाकार - न्यासकार-धातुवृत्तिकार - सिद्धान्त-कौमुदीकार**मतानुसारेणात्र प्रयोगे मित्त्वनिषेधात् रूपमेवम्। **क्षीरस्वामी** तु **'यमोऽपरिवेषणे'** (ग. सू. भ्वादिः) इत्यत्र पूर्वस्मात् गणसूत्रात् 'न' इत्यननुवर्त्य **आयमयन्** इत्येव साधुरिति विपरीतेन साधयति—तथाहि— "**यमयति, नियमयति,** परिवेषणे तु—**यामयति** श्राद्धेऽन्नम्, **आयामयति** चन्द्रम्।" इति। तदेतत् **पुरुषकारा**दिषु बहुधा खण्डितमिति नेह प्रतन्यते।

3. सन्नन्तात् द्वित्वादिके मकारस्य नत्वे, 'नश्चापदान्तस्य—' (8-3-24) इति अनुस्वारे च रूपमेवम्।

4. यङन्तात् **'नुगतोऽनुनासिकान्तस्य'** (7-4-85) इति नुगागमः, तस्य पदान्तवद्भावेन परसवर्णविकल्पः।

5. तृजादिषु **'यमिरंमन्तेष्वनिडेक इष्यते'** (व्याघ्रभूतिकारिका, **भाष्ये** 7-2-10) इति वचनाद् धातोरनिट्त्वम्। मकारस्यानुस्वारे परसवर्णे चैवं रूपम्।

[अ] **'यमो गन्धने'** (1-2-15) इति सूत्रे **गन्धन**रूपस्य (**गन्धनम्**=सूचनम्' परदोषाविष्कार इति यावत्।) अर्थस्याप्युपादानात्, धातोरस्योपसर्गवशात्, स्वभावाद् वा तत्राप्यर्थे वृत्तिरिति ज्ञेयम्। भ्वादिष्वेव पुरस्तात् (819 संख्यायां) **'यमोऽपरिवेषणे'** (ग. सू. भ्वादौ) इति यत् पठ्यते—तत्तु **'यम उपरमे'** इत्युत्तरत्रात्रैव विकरणे पठितस्यार्थविशेषे घटादिपाठ-तन्निषेधार्थरूपप्रयोजनद्वय-वशादिति ज्ञेयम्। उत्तरत्र चैतद् व्यक्तीभविष्यति। 'परिवेष्टने एव मित्' इति **काशकृत्स्नः**। इति **केचित्**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]यच्छन्-न्ती, नियमयन्-यामयन्-न्ती, यियंसन्-न्ती ; —
यंस्यन्-न्ती-ती, नियमयिष्यन्-यामयिष्यन्-न्ती-ती, यियंसिष्यन्--न्ती-ती ;—
[2]आयच्छमानः,[A] [[3]भार्याम्] उपयच्छमानः, [[4]पाणिम्] आयच्छमानः, [व्रीहीन्] [5]संयच्छमानः, [भारम्] उद्यच्छमानः, [वस्त्रम्] आयच्छमानः, यमयमानः, नियमयमानः, [6]आयामयमानः, [7]आयियंसमानः, यंयम्यमानः ;
आयंस्यमानः, उपयंस्यमानः, संयंस्यमानः-उद्यंस्यमानः-आयंस्यमानः, आयामयिष्यमाणः, यमयिष्यमाणः-नियमयिष्यमाणः, आयियंसिष्यमाणः, यंयमिष्यमाणः ;

---

1. शतरि, 'इषुगमियमां छः' (7-3-77) इति छकारेऽन्तादेशे तुकि, तस्य श्चुत्वेन चकारे च रूपमेवम् । एवं शानजन्तेष्वपि प्रक्रियोह्या ।

2. 'आङो यमहनः' (1-3-28) इति अकर्मकादस्मादाङ्पूर्वकादात्मनेपदं शानच् । अकर्मकादित्युक्तत्वात् 'आयच्छन् कूपाद् रज्जुम्' इत्यत्र शतैव ।

3. 'उपाद् यमः स्वकरणे' (1-3-56) इत्यात्मनेपदम् । स्वकरणम्=स्वीकरणम् । पाणिग्रहणमिति भट्टोजिप्रभृतयः । तत्तु भाष्यायनारूढत्वादुपेक्ष्यमिति शेखरकारादयः । स्वकरणभिन्नार्थे 'देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छन्' इत्यत्र शतैव ।

4. 'स्वाङ्गकर्मकाच—' (वा. 1-3-27) इति वचनादात्मनेपदम् ।

5. 'समुदाङ्भ्यो यमोऽग्रन्थे' (1-3-75) इति सम् उत् आङ् पूर्वकादस्मात् यमधातोः ग्रन्थभिन्नविषये वर्तमानात् आत्मनेपदम् । 'अग्रन्थे' इत्युक्तत्वात् 'उद्यच्छन् चिकित्सां वैद्यः' इत्यादिषु शतैव । 'स्वान् व्रीहीन् संयच्छन्' इत्यादिषु तु 'विभाषोपपदेन प्रतीयमाने' (1-3-77) इति पक्षे शताऽपि साधुरेवेति ज्ञेयम् ।

6. 'न पादम्याङ्यम—' (1-3-89) इति ण्यन्तात् परस्मैपदनिषेधः । 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति प्राप्तस्य परस्मैपदस्यापवादोऽयम् । केचित् तु कर्त्रभिप्रायक्रियाफलार्थतया अत्रात्मनेपदमिति न ; परं तु परगामिनि क्रियाफले परस्मैपदमपीति वदन्ति ।

7. 'पूर्ववत् सनः' (1-3-62) इति सनः प्रकृतेर्निदान एव सन्नन्तादत्रापि शानजिति ज्ञेयम् ।

A. 'श्रियमायच्छमानाभिरुत्तमाभिरनुत्तमाम् ॥' भ. का. 8.46.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रिपुयत्-रिपुयतौ-रिपुयतः ; [2]वियत्-वियतौ-वियतः ;
[3]यतम्-यतः-यतवान्, नियमितः-आयामितः, यियंसितः, यंयमितः-तवान् ;
[4]यमः, [5]वाचंयमः[A], [6]यतिः, [7]आयामी, [8]वाग्यामः, यमः, नियमः-आयामः, [9]संयमनः, यियंसुः, यंयमः ;
यन्तव्यम्, यमयितव्यम्-आयामयितव्यम्, यियंसितव्यम्, यंयमितव्यम् ;
यमनीयम्, यमनीयम्-यामनीयम्, यियंसनीयम्, यंयमनीयम् ;
[10]यम्यम्, [11]अनियम्यम्-विनियम्यम्, नियाम्यम्, यम्यम्-आयाम्यम्, यियंस्यम्, यंयम्यम् ;

---

1. रिपून् यच्छति=उपरतं करोति इत्यर्थे कर्मण्युपपदे, 'क्विप् च' (3-2-76) इति क्विप्। 'गमादीनाम्—' (वा. 6-4-40) इति वचनादनुनासिकलोपे तुकि रूपमेवम्।
2. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति क्विपि रूपमेवम्। **वियत्**=विष्णुपदम्।
3. निष्ठायाम्, 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (6-4-37) इत्यनुनासिकलोपे रूपम्। एवमेव क्त्वाक्तिन्प्रभृतिष्वपि रूपनिष्पत्तिर्ज्ञेया।
4. यच्छतीति **यमः**। कर्तरि पचाद्यच्।
5. 'वाचि **यमो** व्रते' (3-2-40) इति वाग्रूपे कर्मण्युपपदे खच्प्रत्ययः। '**वाचंयम**-पुरन्दरौ च' (6-3-69) इत्यनेनामन्तत्वं निपात्यते। निपातनाद् द्वितीयायाः अलुक्। **वाचंयमः**=मौनव्रती।
6. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति कर्तरि संज्ञायां क्तिच्प्रत्ययः, बाहुलकात् 'न क्तिचि दीर्घश्च' (6-4-39) इति न प्रवर्तते। नितरां मन आदिकं यच्छतीति **यतिः**। अनुनासिकलोपोऽपि बाहुलकादेवेति ज्ञेयम्। **केचित्** तु 'स्त्रियां क्तिन्' (3-3-94) इति क्तिन्, बाहुलकात् पुँल्लिङ्गत्वमिति वदन्ति।
7. तच्छीलादिषु कर्तृषु, 'सम्पृचानुरुधाङ्यम—' (3-2-142) इत्यादिना, आङ्पूर्वकादस्माद् घिनुण्प्रत्यये रूपमेवम्।
8. व्रतभिन्नार्थे विवक्षिते, वाचं यच्छतीत्यर्थे 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्यये रूपमेवम्।
9. ण्यन्तात्, नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्यये अनादेशे च रूपम्।
10. 'गदमदचर**यमश्चानुपसर्गे**' (3-1-100) इति हलन्तलक्षणण्यदपवादतया यत्प्रत्ययः। यद्यपि, '**पोरदुपधात्**' (3-1-98) इत्येवात्र यत् सिद्धः, तथापि स यत् अनुपसृष्टादेव धातोरिति समर्थनाय पृथक् **यम**धातोरुपादानमिति ज्ञेयम्। एवं निरूढत्वात्, उपसृष्टे तु **नियाम्यम्** इत्यादिकानि ण्यदन्तान्येव साधूनि।
11. '—अनुपसर्गे' (3-1-100) इत्युक्तत्वात्, कथमत्र सोपसर्गस्थले यत्प्रत्ययस्योपपत्तिरिति शङ्कित्वा, 'तेन न तत्र भवेद् **विनियम्यम्**।' इति **व्याघ्रभूतिकारिकायां** '**विनियम्यम्**' इत्युक्तत्वात्, विपूर्वकात्, निपूर्वकाच्च यदेवेति **व्याख्यातारः** समर्थयन्ति। तेन, '**अनियम्यस्य** नायुक्तिः—' (न्यायकुसुमाञ्जलिः 3-19) 'त्वया **नियम्या** ननु दिव्यचक्षुषा—' इत्यादिप्रयोगा उपपन्ना इति ज्ञेयम्।

A. '**वाचम्यमान्** स्थण्डिलशायिनश्च युयुक्षमाणाननिशं मुमुक्षून्।' भ. का. 3-41.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



ईषद्यमः-दुर्यमः-सुयमः ; — — —
यम्यमानः, यम्यमानः-आयाम्यमानः, यियंस्यमानः, यंयम्यमानः ;
आयामः, [1]उद्यमः, [2]संयामः[A]-उपयमः-उपयामः-नियमः-नियामः,
यमः-यामः, यियंसः, यंयमः ;
यन्तुम्, यमयितुम्-आयामयितुम्, यियंसितुम्, यंयमितुम् ;
[3]यतिः, [4]संयत्, यमना-आयामना, यियंसा, यंयमा ;
यमनम्, [B]यमनम्-आयामनम्, यियंसनम्, यंयमनम् ;
[5]यत्वा, यमयित्वा-यामयित्वा, यियंसित्वा, यंयमित्वा ;
[6]प्रयत्य-प्रयम्य, [7]प्रयमय्य-प्रयाम्य, प्रयियंस्य, प्रयंयम्य ;

---

1. उत्पूर्वकादस्माद् घञि, यद्यपि वृद्धौ सत्याम्—**उद्यामः** इति न्याय्यम् ; तथापि 'अड उद्यमे' (भ्वादिः अक. सेट्.) इत्यादिनिर्देशबलादत्र भावेऽबेवेति व्याख्यानेषु समर्थितम्
2. '**यमः समुपनिविषु च**' (3-3-63) इति वैकल्पिकोऽप्प्रत्ययः । पक्षे घञ् । तेन रूपद्वयमत्र सर्वत्रेति ज्ञेयम् । बाहुलकात्, संज्ञायां पुंसि घप्रत्यये वा **यमः** इत्यपि साधुः । यमोऽस्यास्तीति **यमी** ।
3. स्त्रियां भावादौ क्तिन्प्रत्ययेऽनुनासिकलोपे च रूपमेवम् । **यतिः**=वृत्तेषु विच्छित्ति-विशेषद्योतकोऽवसानविशेषः ।
4. '**सम्पदादिभ्यः**—' (वा. 3-3-108) इति भावे स्त्रियां क्विपि, 'गमादीनामिति वक्तव्यम्' (वा. 6-4-40) इत्यनुनासिकलोपे तुकि च रूपमेवम् । बाहुलकादत्र क्विबिति ज्ञेयम् । **संयत्**=युद्धम् । सुरूपिणी कन्या च ।
5. क्त्वायामनुनासिकलोपे रूपमेवम् । "उदिदिति **श्रीभोजः**। **यत्वा, यमित्वा**।" इति **क्षीरस्वामी**। तन्मते धातोरस्य वलाद्यार्धधातुकेषु सर्वत्र **यमिता-यन्ता** इत्यादिकानि रूपाणि ज्ञेयानि । परं तु **भाष्ये** (7-2-10) अनिट्कारिकाप्रकरणे **यम**धातोरस्योपसंग्रहणात् पक्षोऽयमप्रामाणिक इति, **यमित्वा** इत्यादयः प्रयोगा अपाणिनीया इति, यदि तेषां प्रामाणिकत्वं, तदा व्याकरणान्तररीत्या, बाहुलकाद्वा निर्वाहः करणीय इति च ज्ञेयम् ।
6. 'वा ल्यपि' (6-4-38) इत्यत्र व्यवस्थितविभाषाश्रयणात्, मकारान्तानामनिटां विकल्पेनानुनासिकलोपः । तेनानुनासिकलोपपक्षे तुकि, तदभावपक्षे च रूपद्वयमत्रेति ज्ञेयम् ।
7. ण्यन्तात्ल्यपि, मित्त्वपक्षे उपधाह्रस्वे, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।

A. '**संयामवन्तो यतिवत्**, निनादानपरेऽमुचन् ॥' भ. का. 7. 57.
B. 'निशम्यया मञ्जुगिरा कदा नः स **यामये**द्वा **यमना**दिकार्ये ॥' धा. का. 2.18.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



यामम् २, } [1]यमम् २-यामम् २-आयामम् २, } यियंसम् २, }
यत्वा २, } यमयित्वा २-यामयित्वा २, } यियंसित्वा २, }
[2]यमुना, [3]यन्त्रम्, [4]यमकम्। यंयमम् २; }
यंयमित्वा २; }

(1341) "यम च परिवेषणे" (X-चुरादिः-1626. सक. सेट्. उभ.) [अ]

'यमेरुपरमे यच्छेत् यमयेत् परिवेषणे।' (श्लो. 148) इति देवः।
यमकः-यमिका, यियमयिषकः-षिका, यमयिता-त्री, यियमयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचहयतिवत् (515) ज्ञेयानि। शतरि [A]सुयमयन्।

(1342) "यसु प्रयत्ने" (IV-दिवादिः-1210. अक. सेट्. पर.)

यासकः-सिका, यासकः-सिका, यियसिषकः-षिका, यायसकः-सिका; यस्ता-यस्त्री, यासयिता-त्री, यियसिषिता-त्री, यायसिता-त्री;

---

1. ण्यन्तात् मित्त्वपक्षे, 'चिण्णमुलोः—' (6-4-93) इति दीर्घविकल्पनाद्रूपद्वयमिति बोध्यम्।
2. 'अजियमिशीङ्भ्यश्च' [द. उ. 5-61] इत्युनन्प्रत्ययः। यमुना=नदीविशेषः।
3. 'गृधृवीपचिवचियमि—' [द. उ. 8.89] इति त्रप्रत्ययः। यच्छतीति यन्त्रम्=शरीरसाधनम्, पीडनञ्च।
4. 'क्वुन् शिल्पिसंज्ञयोः—' [द. उ. 3.5] इति संज्ञायां क्वुनि रूपमेवम्। यमकम्=शब्दालङ्कारविशेषः।

A. 'चण्डातकं सुयमयन् चहको बभाषे।' धा. का. 3-25.

[अ] चुरादिषु ज्ञपादिपञ्चकधातुप्रकरणे 'यम च परिवेषणे' (ग. सू. चुरादौ) इति पठ्यते। तस्यायमर्थः—परिवेषणे = परिवेष्टनेऽर्थे यमधातुश्चुरादिषु बोध्यः; तस्य च क्रमप्राप्तो मित्त्वादिस्तु भवतीति। परिवेषणभिन्नार्थे तु औत्सर्गिके भ्वादिपाठे, तस्माद्धेतुमण्णिचि नियामयति, नियामकः इत्यादिकानि रूपाणि तिङन्तादिषु भवन्तीति ज्ञेयम्। 'यम च—' इति दुर्गादिसम्मतः पाठः। चकाररहितपाठस्तु क्षीरतरङ्गिणीदृष्टः। 'अपरिवेषणे' इत्यपि केषाञ्चित्पाठ इति क्षीरतरङ्गिण्यादितो ज्ञायते; स च पाठः पुरुषकार-माधवधातुवृत्तिप्रभृतिषु खण्डित इत्यलम्। परिवेषणम्=वेष्टनम्। भ्वादिषु पठितस्य 'यमोऽपरिवेषणे' इत्यस्य तु 'परिवेषणम्=भोजनम्' इत्यर्थ इति बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकग्रसतिवत् (440) ज्ञेयानि। शतरि—[1]यस्यन्-न्ती, यसन्-न्ती, प्रयस्यन्-[A]आयस्यन्-न्ती, [2]संयस्यन्-संयसन्-न्ती, [3]आयासी,[B] [4]आयासयन्-न्ती, आयासयमानः, [5]यस्त्वा-यसित्वा, [6]प्रयासी, यस्तः-यस्तवान् इतीमानि रूपाण्यस्य विशेषेण भवन्तीति ज्ञेयम्।

## (1343) "या प्रापणे" (II-अदादिः-1049. सक. अनि. पर.)

## प्रापणम्=गतिः।

यायकः-यिका, यापकः-पिका, यियासकः-सिका, यायायकः-यिका; याता-त्री, यापयिता-त्री, यियासिता-त्री; यायायिता-त्री, इत्यादिकानि सर्वाण्यपि रूपाणि

---

1. शतरि दिवादित्वात् नित्यं श्यन्प्रत्यये प्राप्ते, '**यसोऽनुपसर्गात्**' (3-1-71) इति विकल्पेन श्यन्। पक्षे औत्सर्गिके शपि **यसन्-न्ती** इति रूपमिति बोध्यम्।

2. '**संयसश्च**' (3-1-72) इति संपूर्वकादपि श्यन्विकल्पः। '—अनुपसर्गात्' (3-1-71) इत्युक्तत्वात् अप्राप्तेऽनेन सूत्रेण सम्पूर्वकस्यापि वैकल्पिकः श्यन् इति ज्ञेयम्।

3. तच्छीलादिषु कर्तृषु 'सम्पृचानुरुधाङ्यमाङ्यस—' (3-2-142) इत्यादिना घिनुण्प्रत्यये रूपमेवम्।

4. प्रयत्नस्य चित्तवत्कर्तृकत्वादस्मात् ण्यन्तात् 'अणावकर्मकात्—' (1-3-88) इत्यादिना परस्मैपदे प्राप्ते, 'न पादम्याङ्यमाङ्यस—' (1-3-89) इत्यादिना आङ्पूर्वकात् परस्मैपदनिषेधः। तेन परगामिनि क्रियाफले परस्मैपदम्, आत्मगामिनि क्रियाफले तु 'णिचश्च' (1-3-74) इति आत्मनेपदं भवतीति ज्ञेयम्। एतच्च **माधवा**यनुरोधेनोक्तम्। **क्षीरस्वामी** तु—"—'न पादमि—' (1-3-89) इति तङ्-**आयासयते**।" इत्युक्तवान्। तेनास्य मते परस्मैपदनिषेधादात्मनेपदमेव न्याय्यमिति ज्ञायते। वस्तुतस्तु **माधवो**क्तमेव न्याय्यमित्यलम्।

5. '**उदितो** वा' (7-2-56) इति क्त्वायामिड्विकल्पः। तेन रूपद्वयम्। एतेन निष्ठायामिण्निषेधे **यस्तः**, **यस्तवान्** इति रूपनिष्पत्तिरिति ज्ञेयम्।

6. बाहुलकात्, ग्रह्यादेराकृतिगणत्वेन 'आवश्यकाधमर्ण्ययोर्णिनिः' (3·3·170) इत्यनेनावश्यकार्थे वा प्रपूर्वकादस्मात् णिनिप्रत्यये **प्रयासी** इति रूपम्। वस्तुतः प्रपूर्वकादस्माद्घञि, घञन्तात् मत्वर्थीय इनिप्रत्ययेऽपि रूपनिष्पादनं न्याय्यमिति बोध्यम्।

A. '**अथायस्यन्** कषायाक्षः खिन्नःस्वेदकणोल्बणः।' भ. का. 5. 83.

B. 'संज्वारिणेव मनसा ध्वान्त**मायासिना** मया।' भ. का. 7. 6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



आदादिकभातिवत् (1153) ज्ञेयानि। [1]प्रणियान्-ती-न्ती, [2]यानीयः, [3]येयः, [4]अध्वन्यतुरङ्गयायी,[A] अनुयायी, [5]प्रयायी-प्रतियायी, [6]सङ्ग्रामयायी,[B] [7]शुभंयाः अभियाः[C], [8]यायावरः,[D] प्रयाणम्, [9]प्रयापणम्-प्रयापनम्,

---

1. शतरि, अदादित्वाच्छपो लुकि, 'नेर्गदनदपतपदघुमास्यतिहन्तियाति—' (8-4-17) इत्यादिना उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वे रूपमेवम्। स्त्रियाम्, 'आच्छीनद्योः—' (7-1-80) इति नुम्विकल्पः।

2. 'कृत्यल्युटो बहुलम्' (3-3-113) इति बाहुलकत्वाभ्यनुज्ञानादत्र करणेऽनीयर्-प्रत्ययः। यान्त्यनेनेति **यानीयः**=अश्वः।

3. कर्मणि यत्प्रत्यये, 'ईद् यति' (6-4-65) इतीकारे गुणे च रूपमेवम्।

4. अध्वन्यतुरङ्गेन यातीति **अध्वन्यतुरङ्गयायी**। 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिप्रत्ययः। '**आतो** युक्—' (7-3-33) इति युगागमः। एवम् **अनुयायी** इत्यत्रापि रूपनिष्पत्तिर्ज्ञेया। उपसर्गोपपदेऽप्यनेन णिनिरिति **भाष्यादौ** स्पष्टम्।

5. 'भविष्यति **गम्यादयः**' (3-3-3) इत्यत्र गम्यादिगणे पाठात् औणादिके णिनि-प्रत्यये युगागमे च रूपमेवम्। भविष्यत्कालेऽयं प्रत्यय इति ज्ञेयम्। **आयायी** इति **काशिका** (3-3-3) पाठः।

6. 'आवश्यकाधमर्ण्ययोर्णिनिः' (3-3-170) इत्यावश्यकार्थे णिनिप्रत्यये रूपमेवम्।

7. शुभं यातीति **शुभंयाः**=शुभान्वितः। 'क्विप् च' (3-2-76) इति क्विप्।

8. यङन्तात्, '**यश्च यङः**' (3-2-176) इति ताच्छीलिके वरचि द्विर्वचनादि-केषु रूपमेवम्। अत्र धातोरस्य गत्यर्थकत्वात् 'नित्यं कौटिल्ये गतौ' (3-1-23) इति कौटिल्यार्थे=कुटिलं गच्छतीत्यर्थ एव यङ्—इति **प्राञ्चः**। **अन्ये** तु **यायावरः** इत्यस्य एकत्रानियतस्थानार्थकतया विवरणात्, मुनिविशेषे पद-स्यास्य रूढत्वादत्र कौटिल्यार्थकयङोऽसंभवात्, 'धातोरेकाचो हलादेः—' (3-1-22) इत्यादिना क्रियासमभिहारे (=पौनःपुन्ये, भृशार्थे वा) यङेव इति वदन्ति।

9. 'णेर्विभाषा' (8-4-30) इति णत्वविकल्पः। **प्रयाणम्** इत्यत्र तु 'कृत्यचः' (8-4-29) इति नित्यं णत्वमिति बोध्यम्।

A. 'क्षिप्रं ततोऽध्वन्यतुरङ्गयायी यविष्ठवद् वृद्धतमोऽपि राजा।' भ. का. 2. 44.

B. 'स्मरन्तः पश्चिमामाज्ञां भर्तुः **सङ्ग्रामयायिनः**।' रघुवंशे—17. 8.

C. '**अभियाऽ**अतऽऽआवरं तुङ्गं भूभृतं रुचिरं पुरः।' भ. का. 10-21.

D. '**यायावरा** लाक्षणिकाः कठाश्च कौशिक्यनुब्राह्मणिपैप्पलादाः।' वा. वि. 3. 18.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]अयय:,[A] प्रयियासयन्त:,[B] [2]अप्रयाणि:, [3]ययाति:, [4]याता, [5]ययु:, [6]मृगयु:-देवयु:-केवलयु:-ग्रहयु:-मित्रयु:-मन्त्रयु:-अध्वर्यु:, [7]यातु:, [8]याम:, [9]यात्रा ।

## (1344) "टु याचृ याच्ञायाम्" (I-भ्वादि:-863. द्विक. सेट्. उभ.)

याचक:-चिका, याचक:-चिका, यियाचिषक:-षिका, यायाचक:-चिका ; याचिता-त्री, याचयिता-त्री, यियाचिषिता-त्री, यायाचिता-त्री ; [बलिं वसुधां]

---

1. अय:=शुभावहो विधि:, अयं यातीति **अयय:** । 'आतोऽनुपसर्गे क:' (3-2-3) इति कर्तरि कप्रत्यय: ।
2. 'आक्रोशे नञ्यनि:' (3-3-112) इति नञुपपदादस्माद् अनिप्रत्यय: । आक्रोश:=शाप: ।
3. "क्तिनि बाहुलकाद् द्विर्वचनम्" इत्यात्रेय:—इति **मा. धा. वृत्ति:** । स्त्रियामेव क्तिनो विधानात् क्तिचस्तु पुँल्लिङ्गेऽपि सद्भावात् क्तिचि, बाहुलकादेव द्विर्वचनमिति ज्ञेयम् ।
4. ताच्छीलिके, औणादिके वा तृनि, रूपमेवम् । स्त्रियाम्, 'न षट्स्वस्रादिभ्य:' (4-1-10) इति ङीब्निषेध: । **याता**=देवरपत्नी ।
5. '**यो द्वे च**' [द. उ. 1-106] इत्युप्रत्यये द्विर्वचने, ङिद्वद्भावेनाकारलोपे च रूपम् । **ययु:**=अश्वमेधीय:, स्वर्गमार्गश्च ।
6. '**मृगय्वादयश्च**' [द. उ. 1-121] इति कुप्रत्यये, आकारलोपे च रूपाण्येतानि । अत्रैव गणे अध्वरशब्दस्यान्तलोपश्च निपातनादेवेति ज्ञेयम् । **मृगयु:**=व्याध:, **देवयु:**=धार्मिक: । **केवलयु:**=मानी । **ग्रहयु:**=ग्रहपति:, **मित्रयु:**=मित्रवत्सल:, ऋषिविशेषश्च । **मन्त्रयु:**=मन्त्री, **अध्वर्यु:**=ऋत्विग्विशेष: । मृगम् आत्मन इच्छतीत्यर्थे 'सुप आत्मन: क्यच्' (3-1-8) इति क्यच्प्रत्यये, 'सनाद्यन्ता धातव:' (3-1-32) इति धातुसंज्ञायाम्, 'क्याच्छन्दसि' (3-2-170) इति उप्रत्यये रूपनिष्पत्तिरपीदृशस्थलेषु नानुपपन्नेति ज्ञेयम् । तथाहि—'**मित्रयु:, संस्वेदयु:, सुम्नयु:**' इतीमानि **काशिकायाम्** एवमेव (3-1-170) साधितानि ।
7. 'कमिमनिजनिगाभापायाहिभ्यश्च' [द. उ. 1-125] इति तुप्रत्यये रूपमेवम् । **यातु:**=पावक:, मनश्च । राक्षस इति **क्षीरस्वामी** ।
8. औणादिके [द. उ. 7-26] मन्प्रत्यये रूपम् । **याम:**=कालविशेष: ।
9. '**हुयामा—**' [द. उ. 8-84] इति त्रन्प्रत्यय: । **यात्रा**=गमनम्, आचारश्च । अभ्यवहार इति **केचित्** ।

A. 'स सासि: साससू: सासो **येया**येयाययायय: ।' किरातार्जुनीये 15-5.
B. 'अशिश्रवन् आत्ययिकं तमेत्य दूता यदार्थं **प्रयियासयन्त:** ।' भ. का. 3.25.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]याचन्-न्ती, [A]याचमानः, इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिककासतिवत् (188) ज्ञेयानि। [2]याचथुः, याचित्रिमम्, [3]याच्ञा, [4]अयाची, [5]याच्यम्, [6]याचितम्-याचितकम्, याचा, इतीमानि रूपाणि धातोरस्माद्भवन्तीति विशेषः।

(1345) "यु मिश्रणे" (II-अदादिः-1033. सक. सेट्. पर.)

'—अमिश्रणे च' इत्यपि क्वचित् पाठः।

'यावयेत जुगुप्सायाम्, मिश्रणे यौति, बन्धने।
युनाति च युनीते च—........॥' (श्लो. 24) इति देवः।

यावकः-विका, यावकः-विका, [7]यियविषकः-युयूषकः-षिका, [8]योयूयकः-यिका;

---

1. 'अकथितं च' (1-4-51) इत्यत्र भाष्ये 'दुहियाचिरुधि—' (व्याघ्रभूतिकारिका. 1-4-51) परिगणनात् द्विकर्मकत्वम्। धातोरस्य उभयपदित्वात् शता, शानचेति ज्ञेयम्।
2. 'ट्वितोऽथुच्' (3-3-89) इति भावेऽथुच्प्रत्ययः। क्षीरस्वाम्यादयः धातुममुं ड्वितं पठित्वा 'ड्वितः क्त्रिः' (3-3-88) इति क्त्रिप्रत्यये, 'क्त्रेर्मम्नित्यम्' (4-4-20) इति मप्प्रत्यये याचित्रिमम् इति रूपं साधयन्ति। "केचित् ड्वितं पठन्ति—तदपि प्रमाणम्।" इति धातुवृत्तिरिहानुसन्धेया।
3. 'यजयाच—' (3-3-90) इत्यादिना भावे नङ्प्रत्ययः। 'नेड् वशि' (7-2-8) इतीण्निषेधः। 'स्तोः श्चुना—' (8-4-40) इति श्चुत्वम्। स्त्रीलिङ्गत्वं स्वभावात्।
4. 'याचृव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम्' (ग. सू. 3-1-134) इति णिनिप्रत्ययः। प्रतिषिद्धानाम्=नञ्पूर्वाणामित्यर्थः। अयाची=यः सर्वात्मना याचनं विनैव देहयात्रां करोति स एवमुच्यते।
5. ण्यति, 'यजयाचरुचप्रवचर्चश्च' (7-3-66) इति कुत्वनिषेधः। '-निष्ठायामनिटः कुत्ववचनात्' (वा. 7-3-52) इति वार्तिकानुसरणे तु निष्ठायामस्य धातोः सेट्त्वात् कुत्वमेव न प्रवर्तते। यथोत्तरं मुनीनां प्रामाण्यात् वार्तिकानुसरणमेव युक्तम्।
6. निष्ठायामेवं रूपम्। निष्ठान्तात् 'अपमित्ययाचिताभ्यां कक्कनौ' (4-4-21) इति निर्वृत्तार्थे तृतीयान्तात् यथासम्भवं कन्प्रत्यये याचितकम्=याचितेन निर्वृत्तम् इति।
7. 'इमांस्तु सेटः प्रवदन्ति तद्विदः।........ तथोर्णोतिमथो युणुक्ष्णवः।' (भाष्ये-7-2-10) इति व्याघ्रभूतिकारिकायामुपात्तत्वादस्य सेट्त्वम्। सन्नन्ते तु, 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभर—' (7-2-49) इति इड्विकल्पः। इट्पक्षे, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासस्येकारः। इडभावपक्षे झलादित्वात् सनः कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घः। एवं सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्।
8. यङन्ते सर्वत्रोत्तरखण्डे, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः। पूर्वखण्डे गुणः।

A. 'सोऽपृच्छत् लक्ष्मणं सीतां याचमानः शिवं सुरान्।' भ. का. 6-8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



यविता-त्री, यावयिता-त्री, यियविषिता-युयूषिता-त्री, योयूयिता-त्री;
[A]युवन्-ती, यावयन्-न्ती, यियविषन्-युयूषन्-न्ती; —
यविष्यन्-न्ती-ती, यावयिष्यन्-न्ती-ती, यियविषिष्यन्-युयूषिष्यन्-न्ती-ती; —
— यावयमानः, — योयूयमानः;
— यावयिष्यमाणः, — योयूयिष्यमाणः;
नियुत्-नियुतौ-नियुतः; — — —
[1]युतम्-युतः-युतवान्, यावितः, यियविषितः-युयूषितः, योयूयितः-तवान्;
[2]यवः-यवानी, [3]यवनः-यवनानी, यवनी, [4]यवकः, यावः, यावकः, [5]यावकम्,
यावः, यियविषुः[B]-युयूषुः-[6]यियावयिषुः, योयुवः;
यवितव्यम्, यावयितव्यम्, यियविषितव्यम्-युयूषितव्यम्, योयूयितव्यम्;
[7]प्रयवणीयम्, प्रणियवनीयम्-प्रनियवनीयम्, [8]प्रयावनीयम्-प्रयावणीयम्,
यियविषणीयम्-युयूषणीयम्, योयूयनीयम्;

---

1. 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधः। क्त्वा-क्तिन्प्रभृतिषु तु 'श्र्युकः क्किति' (7-2-11) इतीण्निषेध इति विशेषः।
2. पचादित्वात् (3-1-134) अच्प्रत्ययः। स्त्रियाम्, 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययव—' (4-1-49) इत्यादिना आनुगागमे ङीषि च **यवानी** इति सम्पद्यते। एतच्च, '**यवाद्** दोषे' (वा. 4-1-49) इति वचनाद् दुष्टे यवे स्त्रीत्वेन विवक्षित एवेति ज्ञेयम्। अन्यत्र तु टापि **यवा** इति।
3. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः। स्त्रियाम्, 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययव**यवन**—' (4-1-49) इत्यादिना '**यवना**ल्लिप्याम्' (वा. 4-1-49) इति वचनेन यवनलिप्यां विवक्षितायामानुगागमो ङीष् च भवतः। पुंयोगलक्षणे ङीषि तु **यवनी** इति सम्पद्यते।
4. यव एव **यवकः**, स्वार्थे कन्। प्रज्ञादित्वात् स्वार्थेऽण्प्रत्यये **यावः**।
5. 'संज्ञायाम्' (3-3-109) इति ण्वुलि रूपमेवम्। **यावकम्**=रञ्जनसाधनीभूतो रसविशेषः। अत्र ण्वुलः स्त्र्यधिकारविहितत्वेऽपि 'लिङ्गमविवक्षितं लोकाश्रितत्वाल्लिङ्गस्य' इति न्यायेन नपुंसकलिङ्गमिति ज्ञेयम्।
6. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासेकारः।
7. 'कृत्यचः' (8-4-29) इति णत्वम्। **प्रणियवनीयम्-प्रनियवनीयम्** इत्यत्र तु, 'शेषे विभाषा—' (8-4-18) इति णत्वविकल्पः।
8. 'णेर्विभाषा' (8-4-30) इति णत्वविकल्पः।

A. 'पृक्ताग्रजः पृञ्जितगोपसूनुर्दृष्टोऽब्धिशायी स जनैर्**युवद्भिः**॥' धा. का. 2-46.
B. '**संयुयूषुं** दिशो बाणैरक्षं **यियविषुर्द्रुमैः**।' भ. का. 9-35.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]याव्यम्, याव्यम्, यियविष्यम्-युयूष्यम्, योयूय्यम्;
ईषद्यवः-दुर्यवः-सुयवः; — — —
[2]यूयमानः, याव्यमानः, यियविष्यमाणः-युयूष्यमाणः, योयूय्यमानः;
[3]प्रयवः, [4]संयावः, [5]उद्यावः, [6]उद्यावः, [7]यवः, [8]योत्रम्, [9]यौत्रम्,
यावः, यियविषः, युयूषः, योयूयः;
यवितुम्, यावयितुम्, यियविषितुम्-युयूषितुम्, योयूयितुम्;
[10]यूतिः, यावना, यियविषा-युयूषा, योयूया;
यवनम्, यावनम्, यियविषणम्-युयूषणम्, योयूयनम्;
युत्वा, यावयित्वा, यियविषित्वा-युयूषित्वा, योयूयित्वा;
प्रयुत्य, [11]प्रयूय, प्रयाव्य, प्रयियविष्य-प्रयुयूष्य, प्रयोयूय्य;

---

1. 'आसुयुवपि—' (3-1-126) इति ण्यत्। अजन्तलक्षणयतोऽपवादः। 'धातोस्तन्निमित्तस्यैव' (6-1-80) इत्यावादेशः। आवश्यकार्थेऽपि, '**ओरावश्यके**' (3-1-125) इति ण्यति एवमेव रूपम्।
2. यकि, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
3. 'ऋदोरप्' (3-3-57) इत्यप्प्रत्ययः भावे।
4. '**समि युद्रुदुवः**' (3-3-23) इति सम्युपपदे करणे घञ्। **संयावः**= पिष्टविकारोऽपूपविशेषः।
5. '**उदि श्रयतियौतिपूद्रुवः**' (3-3-49) इति घञ्।
6. 'अध्यायन्यायोद्यावसंहाराश्च' (3-3-122) इति संज्ञायां करणाधिकरणयोर्घञि निपात्यते। **उद्यावः**=भक्ष्यविशेषः।
7. यौति अत्र रसादिकमिति **यवः**=धान्यविशेषः। 'पुंसि संज्ञायां घः—' (3-3-118) इति संज्ञायां घप्रत्ययः।
8. 'दाम्नीशसयुयुज—' (3-2-182) इति करणे ष्ट्रन्प्रत्ययः। यूयतेऽनेनेति **योत्रम्**= गोपालकानां करे स्थितो दण्डविशेषः।
9. 'उणादयो बहुलम्' (3-3-1) इति ष्ट्रन्प्रत्यये, 'अचो ञ्णिति' (7-2-115) इति वृद्धिरिति **काशिका** (7-2-115)।
10. स्त्रियां क्तिनि, 'श्र्युकः क्किति' (7-2-11) इति इण्निषेधे, '**ऊतियूतिजूति**-सातिहेतिकीर्तयश्च' (3-3-97) इति निपातनात् दीर्घः, अन्तोदात्तत्वं च। **यूतिः**=संघः, एकत्र समेषां समागमः। **गव्यूतिः**=कोशयुगम्।
11. छन्दसि विषये ल्यपि, 'युप्लुवोर्दीर्घः—' (6-4-58) इति दीर्घ इति ज्ञेयम्। लोके तु तुकि **प्रयुत्य** इति भवति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| यावम् २, युत्वा २, | यावम् २, यावयित्वा, | यियविषम् २, यियविषित्वा २, | योयूयम् २ ; योयूयित्वा २; |

[1]योनिः, [2]यूकः-यूका, [3]यूथः, [4]युवा-युवतिः, [5]यूपः, [6]यूषः, [7]योषा, [8]यवागूः ।

(1346) "**यु जुगुप्सायाम्**" (X-चुरादिः-1711. अक. सेट्. आत्म.)

**आकुस्मीयः ।**

'**यावयेत जुगुप्सायाम्**, मिश्रणे यौति, बन्धने ।
युनाति च युनीते च........॥' (श्लो. 24) इति **देवः** ।

"—'युजु कुत्सायाम्' इत्येके--योजयते" इति **क्षीरस्वामी** ।

यावकः-विका, युयावयिषकः-षिका, यावयिता-त्री, युयावयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कोटयति**वत् (205) ज्ञेयानि । ल्युटि--यावनम्[A] ।

(1347) "**युगि वर्जने**" (I-भ्वादिः-156. सक. सेट्. पर.)

युङ्गकः-ङ्गिका, युङ्गकः-ङ्गिका, युयुङ्गिषकः-षिका, योयुङ्गकः-ङ्गिका; युङ्गिता-त्री, युङ्गयिता-त्री, युयुङ्गिषिता-त्री, योयुङ्गिता-त्री; इत्याकाराणि रूपाणि यथासम्भवं भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि । [B]युङ्गितः ।

---

1. 'वहिश्रियु—' [द. उ. 1-21] इति निप्रत्ययः । युवन्त्यस्यामिति **योनिः** ।
2. 'अजियुयु—' [द. उ. 3-24] इति कन्प्रत्ययः, धातोः दीर्घश्च भवति । **यूकः** =क्षुद्रजन्तुः ।
3. 'तिथपृष्ठगूथयूथप्रोथाः' [द. उ. 6-37] इति थक्प्रत्यये निपात्यते । निपातनादेव धातोर्दीर्घश्च । **यूथः**=गजादिसंघातः ।
4. 'कनिन् युवृषि—' [द. उ. 6-51] इति कनिन्प्रत्ययः । यौति, यूयते वा इति **युवा** । स्त्रियाम्, 'यूनस्तिः' (4-1-77) इति तिप्रत्यये **युवतिः** ।
5. 'कुयुयुभ्यश्च' [द. उ. 7-5] इति पप्रत्ययः दीर्घश्च । **यूपः**=यज्ञपशुबन्धनकाष्ठः ।
6. 'मूङ्य्व्योर्लोपश्च' [द. उ. 9-17] इति ऊषन्प्रत्यये, धातूकारस्य लोपे च रूपम् । **यूषः** = व्यञ्जनम् । मण्डम् च इति **केचित्** ।
7. औणादिके [द. उ. 9-21] सप्रत्यये रूपम् । **योषा**=योषित् ।
8. 'सृयु—' [द. उ. 10-4] इत्यागूच्प्रत्यये रूपम् । **यवागूः**=पेया ।

A. '**निर्यावनः** कुयुधि कुस्मयमान आस्त ॥' धा. का. 3-37.

B. 'रिङ्गत्प्रियालिङ्गितभृङ्गसङ्गमत्वङ्गत्प्रसूनं रवितापयुङ्गितम् ॥' धा. का. 1-21.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



**(1348) "युच्छ प्रमादे"** (I-भ्वादिः-214. अक. सेट्. पर.)

[1]युच्छकः-च्छिका, युच्छकः-च्छिका, युयुच्छिषकः-षिका, योयुच्छकः-च्छिका; युच्छिता-त्री, युच्छयिता-त्री, युयुच्छिषिता-त्री, योयुच्छिता-त्री; [2]प्रयुट्-प्रयुड्-प्रयुशौ-[A]प्रयुशः; इतीमानि सर्वाण्यपि रूपाणि दैवादिकक्लिश्यतिवत् (287) ज्ञेयानि ।

**(1349) "युज समाधौ"** (IV-दिवादिः-1177. अक. अनि. आत्म.)

**समाधिः** = चित्तवृत्तिनिरोधः ।

'युनक्ति युङ्क्ते योगार्थे, **समाधौ युज्यते श्यनि ।**

युजेः संयमनार्थे वा णौ योजयति योजति ॥' (श्लो. 64) इति **देवः** ।

योजकः-जिका, योजकः-जिका, युयुक्षकः-क्षिका, योयुजकः-जिका; योक्ता-योक्त्री, योजयिता-त्री, युयुक्षिता-त्री, योयुजिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि रौधादिकभुनक्तिवत् (1162) ज्ञेयानि । [3]प्रयुक्-प्रयुजौ-प्रयुजः, [B]युक्, [4]युक्, [5]योगी, [6]युक्तः, युज्यमानः, योजयमानः,

---

1. उपदेशेऽयं धातुः **युछ** इत्येव पठितः । 'छे च' (6-1-73) इति तुकि, तस्य श्चुत्वेन चकारे च **युच्छ** इति सम्पद्यते । अत्र ण्वुल्निमित्तको गुणः कथं न ? इति न शङ्क्यम्, अन्तरङ्गत्वेन प्रथमं तुकि लघूपधत्वाभावात् गुणो न । न चात्र 'वार्णादाङ्गं बलीयः' (परि-56) इति वचनात् प्रथमं गुणस्यापत्तिः कार्या; भिन्नाश्रयत्वात्, इत्यन्यत्र विस्तरः ।
2. क्विपि, 'च्छ्वोः शूठ्—' (6-4-19) इति सतुक्कस्य छकारस्य शकारे, तस्य 'व्रश्च—' (8-2-36) इत्यादिना षकारे, जश्त्वचर्त्वयोश्च रूपमेवम् ।
3. 'सत्सूद्विषद्रुहदुहयुज—' (3-2-61) इत्यादिना सोपसर्गात् क्विपि रूपमेवम् । अत्र निरुपसर्गादपि क्विप्, सूत्रे 'अपि' शब्दस्वारस्यात् । **युक्-युजौ-युजः,** इत्यपि साधुः ।
4. स्त्रियां भावादौ सम्पदादित्वेन (वा. 3-3-108) क्विपि रूपम् । **'युजमापन्ना महर्षयः'** इति **धातुवृत्तावुदाहृतम्** । अत्र **युजम्** = योगमित्यर्थः । **काशिका** (7-1-71) द्रष्टव्याऽत्र ।
5. 'सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुज—' (3-2-142) इत्यादिना यथासम्भवं तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु घिनुण्प्रत्यये, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम् ।
6. धातोरस्याकर्मकत्वात् 'क्तोऽधिकरणे च ध्रौव्य—' (3-4-76) इति क्तप्रत्ययः ।

A. 'अदूर्गचित्ताः परिमूर्च्छितव्रताः स्फूर्णमिया **अप्रयुशः** कृतोञ्छनाः ।' धा.का. 1.29.

B. 'कंसानुरोध्यणनद्धन्मतिमद्युगर्च्यः......॥' धा. का. 2. 62.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]योगः-परियोगः-पलियोगः, [2]युगम्, [3]संयुगः, [A]युयुक्षमाणः, इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः ।

## (1350) "युज संयमने" (X-चुरादिः-1807. सक. सेट्. उभ.)

### आधृषीयः ।

'योगे च इति द्रुमे ।' इति धा. का. व्याख्या (3-48)।

'युजेः संयमनार्थे वा णौ योजयति योजति ॥' (श्लो. 64) इति देवः ।

योजकः-जिका, युयोजयिषकः-षिका, योजकः-जिका, [4]युयुक्षकः-क्षिका, योयुजकः-जिका ; योजयिता-त्री, युयोजयिषिता-त्री, युयुक्षिता-त्री ; योयुजिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि चौरादिकजोषयतिवत् (613) ज्ञेयानि । [B]योजयन् । योजना मानविशेषः ।

## (1351) "युजिर् योगे" (VII-रुधादिः-1444. सक. अनि. उभ.)

'युनक्ति युङ्क्ते योगार्थे, समाधौ युज्यते श्यनि ।' (श्लो. 64) इति देवः ।

योजकः-जिका, योजकः-जिका, युयुक्षकः-क्षिका, योयुजकः-जिका ; योक्ता-योक्त्री, योजयिता-त्री, युयुक्षिता-त्री, योयुजिता-त्री ; इत्यादीनि समस्तान्यपि रूपाणि रौधादिकभुनक्तिवत् (1162) ज्ञेयानि ।

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञि, कुत्वम् । योगः=चित्तवृत्तिनिरोधः । 'योगे च' (वा. 8-2-22) इति वचनात् 'परि' इत्युपसर्गस्थस्य रेफस्य पाक्षिकं लत्वम् ।

2. संज्ञायां घञि, कुत्वे, उञ्छादि (6-1-160) पाठाद् गुणो न । युगम्=चेतनाचेतनानां समाधिः ।

3. संज्ञायां घञि, कुत्वे, प्रतिजनादिषु (4-4-99) पाठात् गुणो न । संयुगः=समरः ।

4. आधृषीयत्वेन णिज्विकल्पः । णिजभावपक्षे, 'त्यजि यजि युजिरुचिसज्जिमज्जतीन्—' (भाष्ये 7-2-10) इति व्याघ्रभूतिकारिकायामुपादानात् तत्र च सामान्येन दैवादिक-रौधादिकयोः, णिजभावपक्षे औत्सर्गिकशब्विकरणस्यास्य च ग्रहणस्य व्याख्यातृभिरुपादानादस्यानिट्त्वमिति ज्ञेयम् । तेन सन्नन्ते रूपमेवम् ।

A. 'वाचंयमान् स्थण्डिलशायिनश्च युयुक्षमाणाननिशं मुमुक्षून् ।' भ. का. 3. 41.

B. 'कृष्णोऽथ वाहुयुगलैर्बहु योजयन्तम्........।' धा. का. 3. 48.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]युञ्जन्-न्ती, [2]युञ्जानः, [3]प्रयुञ्जानः-उपयुञ्जानः, [4]नियुञ्जानः-वियुञ्जानः-उद्युञ्जानः, [5]योगी, [6]युङ्[A]-युञ्जौ-युञ्जः, [7]अश्वयुक्-अश्वयुग्-[B]मौञ्जीयुक्-युजौ-युजः, [8]युग्यम्-[C]-योग्यम्, [9]प्रयोज्यः-नियोज्यः, [10]योक्त्रम्,

---

1. शतरि, 'रुधादिभ्यः—' (3-1-78) इति विकरणप्रत्यये श्नमि, तस्य च मित्त्वेनान्त्यादचः परत्वेन प्राप्तौ, 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपे नकारस्यानुस्वारपरसवर्णयोरेवं रूपम्। एवमेव शानजन्तेऽपि प्रक्रियोह्या।

2. शानजन्ते, 'ताच्छील्यवयोवचनशक्तिषु—' (3-2-129) इति चानशन्तेऽपि तुल्यं रूपम्।

3. 'प्रोपाभ्यां, युजेरयज्ञपात्रेषु' (1-3-64) इति अकर्त्रभिप्रायेऽपि क्रियाफले आत्मनेपदम्—शानच्। 'द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति' इत्यादिकल्पसूत्र-प्रयोगेषु यज्ञविषयकत्वात् परस्मैपदमेव।

4. 'स्वराद्यन्तोपसृष्टादिति वक्तव्यम्' (वा. 1-3-64) इति वचनात् अत्रापि शानच्। स्वरः=अच्, आदौ अन्ते यस्योपसर्गस्य तदुपसृष्टादपि युजेस्तङानौ—इति वार्तिकार्थः।

5. 'सम्पृच—' (3-2-142) इत्यादिना घिनुणि, कुत्वे च रूपमेवम्।

6. 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (3-2-59) इति क्विन्प्रत्ययः। 'युजेरसमासे' (7-1-71) इति नुमि, 'क्विन्प्रत्ययस्य कुः' (8-2-62) इति कुत्वे संयोगान्तलोपे च युङ् इति सम्पद्यते।

7. 'सत्सूद्विष—' (3-2-61) इत्यादिना सोपपदात् क्विपि, रूपमेवम्। 'युजेरसमासे' (7-1-71) इत्यत्र 'असमासे' इत्युक्तत्वात् न नुम्। अश्वयुक्=नक्षत्रविशेषः। अश्वेन युनक्ति इति वृत्तिः। नात्रावयवार्थेऽभिनिवेशः कार्यः, 'रथेन तरतीति रथन्तरम्=साम' इत्यादिष्विव व्युत्पत्तिप्रदर्शनमेतत्।

8. 'युग्यं च पत्त्रे' (3-1-121) इति पत्त्रे=वाहनेऽभिधेये क्यप्, कुत्वं च निपात्यते। नात्र नपुंसकलिङ्गस्य निपातने विवक्षितत्वम्; तेन 'युग्या—गौः' इत्यादयोऽपि साधवः। अन्यत्र, ण्यति, कुत्वे योग्यम् इति सिद्ध्यति।

9. 'प्रयोज्यनियोज्यौ शक्यार्थे' (7-3-68) इति शक्यार्थे प्रपूर्वकस्य निपूर्वकस्य चास्य ण्यति कुत्वाभावो निपात्यते। अन्यत्र नियोग्यः, प्रयोग्यः इति साधुः।

10. 'दाम्नीशसयुयुज—' (3-2-182) इत्यादिना करणे ष्ट्रप्रत्ययः। गुणे कुत्वे च योक्त्रम् इति सिद्ध्यति।

A. 'भ्रातरं युङ् भियः संख्ये घोषेणापूरयन् दिशः॥' भ. का. 6. 119.

B. 'पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।' शि. व. 1. 6.

C. 'दृष्ट्वा तामसुचद् रामो युग्यायात इव श्रमम्॥' भ. का. 6. 63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]अनुयोगी-प्रतियोगी, [2]योगः-परियोगः-पलियोगः-प्रयोगः-वियोगः-अनुयोगः, युक्तिः- [3]वाचोयुक्तिः, [4]युगम्-संयुगम्, [5]गोयुगः, [6]युग्मम् इतीमानि रूपाण्यस्य विशेषेण भवन्ति।

(1352) "**युज् बन्धने**" (IX-क्र्यादिः-1479. सक. अनि. उभ.)

'यावयेत जुगुप्सायाम्, मिश्रणे यौति, **बन्धने**।
**युनाति च युनीते च** ........॥' (श्लो. 24) इति **देवः**।

यावकः-विका, यावकः-विका, [7]युयूषकः-षिका, [8]यियावयिषकः-षिका, योयूयकः-यिका; योता-योत्री, यावयिता-त्री, युयूषिता-यियावयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककवतिवत् (198) ज्ञेयानि।

---

1. 'भविष्यति गम्यादयः' (3-3-3) इत्यत्र पाठात् भविष्यदर्थे औणादिके णिनिः, तत्रैव पाठात् कुत्वं चेति ज्ञेयम्।

2. संज्ञायाम् घञि कुत्वे **योगः** इति भवति। '**योगे** च' (वा. 8-2-22) इति 'परि' इत्यत्र रेफस्य लत्वं विकल्पेनेति ज्ञेयम्।

3. क्तिनि-**युक्तिः** इति सिध्यति। आक्रोशे गम्यमाने वाचः परस्मात् युक्तिशब्दे सति वाच इत्यत्र षष्ठ्याः, '...**वा**ग्दिक्पश्यद्भ्यो **युक्ति**दण्डहरेषु' (वा. 6-3-21) इत्यलुक्। **वाचोयुक्तिः**=वाग्जालः, वृथा जृम्भणमिति यावत्।

4. घञि, प्रतिजनादिषु (4-4-99), उञ्छादिषु (6-1-160) च पाठात् गुणो नेति ज्ञेयम्।

5. "गां युनक्तीति **गोयुगः** 'कर्मण्यण्' (3-2-1), न्यङ्क्वादिः (7-3-53)।" इति **क्षीरस्वामी**। 'अणि गुणाभावो न्यङ्क्वादित्वादेव।' इति **क्षीरतरङ्गिणी-टीका**। वस्तुतः इदं चिन्त्यम्। यतः, 'द्वित्वे **गोयुगच्**' (वा. 5-2-29) इति **गोयुगच्** इत्यस्य प्रत्ययत्वेन **भाष्यवार्तिकादिषु** स्मरणात्।

6. '**युजि**रुचितिजां कुश्च' [द. उ. 7-33] इति मक्प्रत्यये, कुत्वे च रूपम्। युनक्तीति **युग्मम्**=मिथुनम्।

7. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयू**र्णु**भरज्ञपिसनाम्' (7-2-49) इत्यत्र ऊर्णुसाहचर्यात्, 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' (परि-83) इति वचनबलाच्च नास्य धातो-र्ग्रहणमिति अनिट्त्वमेवास्येति बोध्यम्। तेन सन्नन्ते सर्वत्र सनः कित्वे दीर्घे च एवं रूपम्।

8. णिजन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासस्येकारोऽत्रापि धातौ भवतीति प्रदर्शनार्थं तत्र रूपमुपात्तम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]युनन्[A]-ती, युनानः, इति सार्वधातुके रूपमिति विशेषः ।

(1353) "युत् भासने" (I-भ्वादिः-31. अक. सेट्. आत्म.)

योतकः-तिका, योतकः-तिका, युयोतिषकः-युयुतिषकः-षिका, योयुतकः-तिका; योतिता-त्री, योतयिता-त्री, युयोतिषिता-युयुतिषिता-त्री, योयुतिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्नोकतिवत् (197) ज्ञेयानि । [2]वियोयुतत्[B]-ती ।

(1354) "युध सम्प्रहारे" (IV-दिवादिः-1173. अक. अनि. आत्म.)

'सम्प्रहारः=हननम् ।' इति क्षीरस्वामी ।

योधकः-धिका, योधकः-धिका, युयुत्सकः-त्सिका, योयुधकः-धिका; योद्धा-योद्ध्री, योधयिता-त्री, युयुत्सिता-त्री, योयुधिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्षुध्यतिवत् (315) ज्ञेयानि । [3]राजयुध्वा, [4]सहयुध्वा,[C] [5]चापयोधी, [6]प्रतियोधी, [7]युध्यमानः,

---

1. शतरि, 'क्र्यादिभ्यः—' (3-1-81) इति श्नाप्रत्यये, 'श्नाभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे, प्रत्ययस्य ङित्त्वेनाङ्गस्य गुणनिषेधे चैवं रूपम् । शानजन्तेऽपि प्रक्रियैवमूह्या ।
2. यङ्लुगन्ताच्छतरि रूपमेवम् । यङ्लुक्यपि द्विर्वचने कृते अभ्यासे गुणः । 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः ।
3. 'राजनि युधिकृञः' (3-2-95) इति कर्मण्युपपदे क्वनिप्प्रत्ययः । राजानं योधितवान् **राजयुध्वा** । अत्रान्तर्भावितण्यर्थाद् धातोः सकर्मकत्वमिति बोध्यम् । 'भूते' (3-2-84) इत्यधिकारे प्रत्ययस्यास्य विधानात् भूतकालिकत्वम् । स्त्रियाम्, 'वनो न हशः—' (वा. 4-1-7) इति निषेधाद् ङीब्रेफौ न ।
4. 'सहे च' (3-2-96) इत्यनेन सहशब्द उपपदे धातोः क्वनिप् । सह योधितवान् **सहयुध्वा** ।
[जातिविशेषः ।
5. 'बहुलमाभीक्ष्ण्ये' (3-2-81) इति णिनिः । **चापयोधी** = किरातादि-
6. गम्यादिषु (3-3-3) पाठात् भविष्यत्काल औणादिको णिनिः । **प्रतियोधी** = यः प्रतिद्वन्द्वितया युद्धं करिष्यति स उच्यते ।
7. शानचि दिवादित्वाच्छ्यनि रूपमेवम् । **युध्यति** इत्यादिप्रयोगाणामुपपत्तिस्तु— 'सुप आत्मनः क्यच्' (3-1-8) इति क्यजन्तत्वेन, दिवादेरत्रत्कृतत्वेनाकृतिगणत्वाद्वा साधुत्वमिति बोध्यम् ।

A. 'मोदस्कुतोऽथ कबरीं **प्रयुनन्** स रामः....॥' धा. का. 3.5.
B. 'पृदाकुजित् वेगमयत्नतो ययौ **वियोयुत**त्काननजोतिनाऽध्वना ॥' धा. का. 1.5.
C. 'संवित्तः **सहयुध्वानौ** तच्छक्तिं खरदूषणौ ।' भ. का. 5.37.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]योधः-यौधः, [2]आयुधम्, [3]युद्धम्, [4]ईषद्योधनः-दुर्योधनः-सुयोधनः, [5]ईषद्योधः-दुर्योधः-सुयोधः, [6]युयुधानः, [7]योधयन्-न्ती, [8]युधानः, [9]युध्मः, [A]युयुत्सा, आयोधनम्, इत्यादीनि रूपाण्यस्माद् भवन्तीति विशेषः।

**(1355) "युप विमोहने"** (IV-दिवादिः-1235. सक. सेट्. पर.)

'युपु—' इति[10]**धातुकाव्ये** (2-67) पाठः।

---

1. प्रज्ञादिषु (5-4-38) **योध**शब्दस्य पाठात् इगुपधलक्षणं कप्रत्ययं बाधित्वा, पचादिपाठपरिकल्पनेनाच्। स्वार्थे तद्धितेऽणि विकल्पेन प्रवृत्ते तु **योधः—यौधः** इति रूपद्वयस्योपपन्नत्वं ज्ञेयम्।
2. आदाय युध्यन्तेऽनेनेति **आयुधम्**। 'घञर्थे कविधानं स्थास्नापाव्यधिहनि**युध्य**-र्थम्' (वा. 3-3-58) इति वचनात् घञर्थे करणे कप्रत्यये, कित्त्वेन गुणनिषेधे च रूपमेवम्।
3. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तप्रत्यये धत्व-जश्त्वयोश्च रूपम्।
4. ईषदाद्युपपदेषु, 'भाषायां शासि**युधि**—' (वा. 3-3-130) इति खलपवादो युच्प्रत्ययः। अत्रापि अन्तर्भावितण्यर्थाद्धातोः, विवक्षया वा सकर्मकत्वं बोध्यम्। कर्मणि प्रत्ययोऽयम्।
5. 'भाषायां शासि**युधि**—' (वा. 3-3-130) इति युच् वा—इति **प्रक्रियाकौमुदी**। तन्मते युजभावपक्षे खल्प्रत्यये रूपाणामेषां सिद्धिर्बोध्या।
6. 'बाहुलकादानचि द्वित्वम्।' इति **मा. धा. वृत्तिः**। बाहुलकादेव प्रत्ययस्य कित्त्वमपि बोध्यम्। तेन न गुणः।
7. 'बुध**युध**—' (1-3-86) इति कर्तृगामिन्यपि क्रियाफले ण्यन्तात् परस्मैपदमेव। "ये चात्राकर्मकाः, तेषाम्, 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इत्येव परस्मैपदे सिद्धे वचनमिदम्—अचित्तवत्कर्तृकार्थम्॥" इति **काशिका** (1-3-86) अत्रानुसन्धेया।
8. '**युधि**बुधिदृशिभ्यः किच्च' [द. उ. 5-33] इत्यानच्प्रत्यये, तस्य कित्त्वेन गुणनिषेधे च **युधानः** इति सिद्ध्यति। **युधानः**=रिपुः।
9. 'इषि**युधि**—' [द. उ. 7-31] इति मक्प्रत्ययः। युध्यतेऽस्मिन् राजेति **युध्मः** = शरत्कालः।
10. एतत्पक्षे क्त्वायाम्, '**उदितो** वा' (7-2-56) इति इड्विकल्पः। इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इत्यमुं योगं परत्वात्, प्रतिपदविधित्वाच्च बाधित्वा, 'रलो व्युपधात्—' (6-4-16) इति कित्त्वविकल्पे **युपित्वा—योपित्वा,** इति रूपद्वयम्। इडभावपक्षे तु **युप्त्वा,** इत्यपि रूपम्। वस्तुतस्तु उदित्त्वमस्य न प्रामाणिकम्—प्रसिद्धेषु धातुपाठकोशेषु **युप** इत्येव पाठात्।

A. '**युयुत्सा**रहितो रामं ममारापहरन् वने॥' भ. का. 9.125.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



योपकः-पिका, योपकः-पिका, युयुपिषकः-युयोपिषकः-षिका, योयुपकः-पिका, योपिता-त्री, योपयिता-त्री, युयुपिषिता-युयोपिषिता-त्री, योयुपिता-त्री; इत्यादिकानि सर्वाण्यपि रूपाणि दैवादिककुप्यतिवत् (224) ज्ञेयानि। [A]योप्यम्।

(1356) "यूष हिंसायाम्" (I-भ्वादिः-680. सक. सेट्. पर.)

यूषकः-षिका, यूषकः-षिका, युयूषिषकः-षिका, योयूषकः-षिका; यूषिता-त्री, यूषयिता-त्री, युयूषिषिता-त्री, योयूषिता-त्री; इत्याकाराणि सर्वाण्यपि रूपाणि भौवादिकचूषतिवत् (552) ज्ञेयानि। घञि—यूषः= मांसरसविशेषः।

(1357) "यौटृ बन्धे" (I-भ्वादिः-291. सक. सेट्. पर.) [अ]

'—सम्बन्धे। सम्बन्धः=श्लेषः।' इति क्षीरस्वामि-मैत्रेयादयः। 'यौडृ—' इति शाकटायन-हेमचन्द्रप्रभृतयः पठन्ति। एतत्सर्वं 'पाणिनिधातुपाठसमीक्षा' नामकग्रन्थदर्शनेनास्माभिर्विवेचितमिति ज्ञेयम्। यौटकः-टिका, यौटकः-टिका, युयौटिषकः-षिका, योयौटकः-टिका; यौटिता-त्री, यौटयिता-त्री, युयौटिषिता-त्री, योयौटिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [B]यौटितः।

---

A. 'क्ष्वायोप्यविरोपिलोपक न वा लोभादिसंक्षोभिता।' धा. का. 2-67.

B. 'प्रशौटदुस्सागणयौटितान्तिकान् मेटद्व्रषाम्रेडितघोषमेदुरान्।' धा. का. 1-39.

[अ] अत्र क्षीरतरङ्गिण्यामितः पूर्वम्—'येषृ प्रयत्ने' इति कश्चन धातुः भ्वादिषु पठितः। प्रसिद्धेषु धातुपाठकोशेषु 'एषृ—' इत्येव पाठस्योपलम्भात्, तुल्यश्रवणनिमित्तकोऽयं सम्पातायातः पाठ इति कृत्वाऽस्माभिरयं परित्यक्त इति बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1358) "रक आस्वादने" (X-चुरादिः-1737. सक. सेट्. उभ.)

'—आसादने' इति दुर्गसम्मतपाठ इति क्षीरतरङ्गिणीतो ज्ञायते। [1]क्षीरस्वामी 'रग—' इति पठति। 'रघ—' इति केचित् पठन्ति। राककः-किका, रिराकयिषकः-षिका; राकयिता-त्री, रिराकयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककाणयतिवत (159) ज्ञेयानि। [A]राकितः।

(1359) "रक्ष पालने" (I-भ्वादिः-658. सक. सेट्. पर.)

रक्षकः-क्षिका, रक्षकः-क्षिका, रिरक्षिषकः-षिका, रारक्षकः-क्षिका; रक्षिता-त्री, रक्षयिता-त्री, रिरक्षिषिता-त्री, रारक्षिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि भौवादिकतक्षतिवत् (691) ज्ञेयानि। [2]निरक्षी, [3]प्रतिहाररक्षी,[B] [4]रक्षणः,[C] रक्षणः, [5]रक्षः-राक्षसः, [6]रक्षिता,

---

1. क्षीरस्वामी 'रग—' इति पठित्वा "अन्यत्रार्थे घटादिः—रगे शङ्कायाम्... रगयति।" इत्याह। तेन घटादिषु (भ्वादौ) 'रगे शङ्कायाम्' इति यत्सर्वैः पठ्यते, तस्यार्थविशेषप्रयुक्तं घटादिपाठं मन्वानः, चौरादिकत्वमप्यङ्गीकरोतीति ज्ञायते।
2. 'रक्षश्रुवसवपशां नौ' (ग. सू. 3-1-134) इति ग्रह्यादिषु वचनात् कर्तरि निपूर्वकादस्माण्णिनिः।
3. प्रतिहारं=गृहाङ्गणदेशविशेषं रक्षतीति प्रतिहाररक्षी। 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्यये स्त्रियाम् अणन्तलक्षणे ङीपि रूपमेवम्।
4. 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (3-3-90) इति भावे नङ्प्रत्ययः। 'नेड् वशि कृति' (7-2-8) इतीण्निषेधः।
5. 'असुन्' [द. उ. 9-49] इत्यसुन्प्रत्यये रूपम्। रक्ष एव राक्षसः। प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः। अत्रेदमवधेयम्। 'पाणिनीयधातुपाठसमीक्षा' नामके नव्यग्रन्थे ऋग्वेदे (10-68-1) प्रयुक्तं 'रक्षमाणाः' इति पदमुपादाय 'वेगवदुत्पतने (धातोः) वृत्तिः।' इत्युक्तम्। तदनुसारेणात्र रक्षोराक्षसशब्दयोरपि पालनार्थे वृत्तिर्न, अपि तु वेगवदुत्पतने वृत्तिरिति भाति। शांखायनारण्यके (7-20) 'रक्षते' इति प्रयुक्तत्वात्, प्रकृतऋङ्मन्त्रेऽपि रक्षमाणाः इति शानजन्तत्वेन प्रयोगाच्च धातोरस्य क्वचित् वेदे उभयपदित्वमपि भवतीति ज्ञायते।
6. ताच्छील्ये 'तृन्' (3-2-135) इति तृन्।

A. 'कृष्णोऽपि नाकिजनराक्षितलाग्यवीर्यः॥' धा. का. 3-41.

B. 'ततो नृपाणां श्रुतवंशवृत्ता पुंवत्प्रगल्भा प्रतिहाररक्षी।' रघु. 6.20.

C. 'रक्षणं करोषि कस्मात् त्वं यत्नेनाख्यायतां शुभे।' भ. का. 7.66.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रट्-रक्षौ-रक्षः, गोरक्-गोरग्-गोरक्षौ-गौरक्षः ; इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः ।

(1360) "रख गत्यर्थः" (I-भ्वादिः-136. सक. सेट्. पर.)

'सर्पणे' इति वोपदेवः ।

राखकः-खिका, राखकः-खिका, रिरखिषकः-षिका, रारखकः-खिका ; रखिता-त्री, राखयिता-त्री, रिरखिषिता-त्री, रारखिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककखतिवत् (141) ज्ञेयानि । शतरि रखन्[A] इति ।

(1361) "रखि गत्यर्थः" (I-भ्वादिः-137. सक. सेट्. पर.)

"द्रमिडानाम् रिखिरपि—रिङ्खति" इति क्षीरस्वामी ।

मा. धा. वृत्तावपि एवमेव ।

रङ्खकः-ङ्खिका, रङ्खकः-ङ्खिका, रिरङ्खिषकः-षिका, रारङ्खकः-ङ्खिका; रङ्खिता-त्री, रङ्खयिता-त्री, रिरङ्खिषिता-त्री, रारङ्खिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्खतिवत् (140) ज्ञेयानि । [2]प्ररङ्खणम् ।

(1362) "रगि गत्यर्थः" (I-भ्वादिः-144. सक. सेट्. पर.)

रङ्गकः-ङ्गिका, रङ्गकः-ङ्गिका, रिरङ्गिषकः-षिका, रारङ्गकः-ङ्गिका ; रङ्गिता-त्री, रङ्गयिता-त्री, रिरङ्गिषिता-त्री, रारङ्गिता-त्री ; इत्यादीनि सर्वाणि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि । [3]रङ्गः[B] इति विशेषः ।

---

1. शुद्धाद्धातोः क्विपि संयोगादिलोपे रूपमेवम् । ण्यन्तात् क्विपि तु संयोगान्तलोपे गोरक् इति रूपमिति विशेषः ।
2. 'रषाभ्याम्—' (8-4-1) इति णत्वम् । 'इजादेः—' (8-4-32) इति नियमस्तु 'कृत्यचः' (8-4-29) इति प्राप्तस्यैव । तेनात्र न नियमः ।
3. रज्यन्त्यस्मिन् प्रेक्षकाणां मनांसीति=रङ्गः । 'हलश्च' (3-3-121) इति संज्ञायामधिकरणे घञि रूपमेवम् ।

A. 'रखञ्छशं रङ्खितरङ्खु रिङ्खितद्विपं लखत्केसरिलङ्खदारवम् ॥' धा. का. 1-19.

B. 'एखचक्रोरोत्करमिङ्खितं शुकैः प्रेङ्खलतावल्गनरङ्गमण्डपम् ।' धा. का. 1-20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1363) "रगे शङ्कायाम्" (I-भ्वादिः-785. अक. सेट्. पर.)

घटादिः।

रागकः-गिका, रागकः-गिका, रिरगिषकः-षिका, rारगकः-गिका;
रगिता-त्री, रगयिता-त्री, रिरगिषिता-त्री, रारगिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककखतिवत् (141) बोध्यानि।
अस्य धातोः घटादित्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ परतः उपधाया ह्रस्वः। अतः ण्यन्ते रूपाणि सर्वाणि कखतिवत् (142) बोध्यानि।

(1364) "रघि गत्यर्थः" (I-भ्वादिः-107. सक. सेट्. आत्म.)

रङ्घकः-ङ्घिका, रङ्घकः-ङ्घिका, रिरङ्घिषकः-षिका, रारङ्घकः-ङ्घिका;
रङ्घिता-त्री, रङ्घयिता-त्री, रिरङ्घिषिता-त्री, रारङ्घिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) बोध्यानि।

(1365) "रघि भाषार्थः" (X-चुरादिः-1796. सक. सेट्. उभ.)

आस्वदीयः। '—भासार्थः' इति क्षीरस्वामी।

रङ्घकः-ङ्घिका, रिरङ्घयिषकः-षिका; रङ्घयिता-त्री, रिरङ्घयिषिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककण्ठयतिवत् (150) ज्ञेयानि।

(1366) "रच प्रतियत्ने" (X-चुरादिः-1865. अक. सेट्. उभ.)

कथादिः, अदन्तश्च।

'—कृत्याम्' इति वोपदेवः इति पा. धा. स.। '–कृञर्थे च इति द्रुमे' इति धा. का. (3-54)।

[1]रचकः-चिका, रिरचयिषकः-षिका; रचयिता-त्री, रिरचयिषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककथयतिवत् (162) ज्ञेयानि।
ल्यपि-[2]आरचय्य इति। क्तप्रत्यये–विरचितः। युचि-[3]रचना।

---

1. धातोरस्यादन्तत्वेन अल्लोपस्य स्थानिवद्भावात् उपधावृद्धिः न भवति।
2. ल्यपि, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशे रूपमेवम्।
3. 'ण्यासश्रन्थो युच्' (3-3-107) इति स्त्रियां युचि रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1367) "रट परिभाषणे" (I-भ्वादिः-297. अक. सेट्. पर.)

राटकः-टिका, राटकः-टिका, रिरटिषकः-षिका, रारटकः-टिका ;
रटिता-त्री, राटयिता-त्री, रिरटिषिता-त्री, रारटिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककठतिवत् (148) बोध्यानि । [1]परिराटी, [2]परिराटकः, [3]संरटितम्-[A]तः-तवान्, इमानि रूपाणि अस्य धातोः विशेषः ।

(1368) "रठ परिभाषणे" (I-भ्वादिः-334. अक. सेट्. पर.)

बालमनोरमायां तु 'रट—' 'रठ इत्येके' इति दृश्यते ।

राठकः-ठिका, राठकः-ठिका, रिरठिषकः-षिका, रारठकः-ठिका ;
रठिता-त्री, राठयिता-त्री, रिरठिषिता-त्री, रारठिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककठतिवत् (148) ज्ञेयानि । शतरि-[B]रठन्-न्ती ।

(1369) "रण शब्दार्थः" (I-भ्वादिः-445. 795. अक. सेट्. पर.)[अ]

घटादिः ।

राणकः-णिका, राणकः-णिका-[4]रणकः-णिका, रिरणिषकः-षिका, रंरणकः-णिका ;

---

1. 'संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरट—' (3-2-142) इत्यादिना तच्छीलादिषु कर्तृषु घिनुण्प्रत्यये रूपम् ।
2. 'निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरट—' (3-2-146) इत्यादिना तच्छीलादिषु कर्तृषु वुञ्प्रत्यये रूपमेवम् ।
3. 'नपुंसके भावे क्तः' (3-3-114) इति भावे क्तप्रत्ययः ।
4. अथ गतावर्थे 'घटादयो मितः' (ग. सू. भ्वादिः) इति मित्संज्ञकः । मित्संज्ञकत्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ परतः उपधायाः ह्रस्वो भवति । एवं घटादित्वपक्षे ण्यन्ते सर्वत्र प्रक्रियोह्या । अन्यत्रार्थे राणयिता-त्री, इत्यादीनि रूपाणि यथायथमूह्यानि ।

A. 'अम्लेटकैश्चाकटुचाट्वभाषितैरटैः पटत्संरटितान् जनोत्करैः ॥' धा. का. 1. 39.

B. 'वनाश्रयत्वेऽपि सकाठपर्यठद्रठन्मृगालीहठकर्मवर्जितान् ।' धा. का. 1.44.

[अ] अस्य धातोर्घटादित्वं गत्यर्थकत्वे भोजादिसम्मतम् । क्षीरस्वामिप्रभृतयोऽनुवदन्ति च । पाणिनिसम्मतिरत्र नेत्यपि ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रणिता-त्री, राणयिता-रणयिता-त्री, रिरणिषिता-त्री, रंरणिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्कणतिवत् (157) ज्ञेयानि। [1]रणः, रणरणकः[2] इमानि रूपाण्यधिकान्यत्रेति विशेषः। [A]रणयन्-न्ती।

(1370) "**रद विलेखने**" (I-भ्वादिः-53. सक. सेट्. पर.)

'**विलेखनम्**=उत्पाटनम्' इति क्षीरस्वामी। '**विलेखने**, तच्च विदारणम्, क्षोभणं वा' इति **धा. का.** (1.8)। **भेदनम्** इति **मा. धा. वृत्तिः**। रादकः-दिका, रादकः-दिका, रिरदिषकः-षिका, रारदकः-दिका; रदिता-त्री, रादयिता-त्री, रिरदिषिता-त्री, रारदिता-त्री; इत्यादिकानि समस्तान्यपि रूपाणि भौवादिकक्कचतिवत् (144) ज्ञेयानि। [3]रदनः, [4]रदः, [B]रदन्-न्ती, इतीमानि रूपाण्यस्माद् भवन्ति।

(1371) "**रध हिंसासंराद्ध्योः**" (IV-दिवादिः-1193. सक.सेट्.पर.)

'रध हिंसायाम्' इत्येव **प्रौढमनोरमादिषु** पाठः। '—हिंसासंसिद्ध्योः' इति **काशिकायां** (7-2-45) दृष्टः पाठः।

---

1. रणन्त्यस्मिन्निति विग्रहे 'वशिरण्योरुपसंख्यानम्' (वा. 3-3-58) इति अकर्तरि च कारके अप्प्रत्यये रूपमेवम्। घञोऽपवादः। **रणः**=यज्ञः, संग्रामश्च।
2. 'घञर्थे कविधानम्' (वा. 3-3-58) इति कप्रत्यये 'क्रुञादीनां के द्वे भवतः' (वा. 6-1-12) इति द्विर्वचने संज्ञायां कनि च रूपमेवम्। पृषोदरादित्वात् हलादिशेषाभावोऽभ्यासस्याकारश्च। **रणरणकः**=हृल्लेखः।
3. नन्द्यादेराकृतिगणत्वेन तत्र (3-1-134) पाठात् कर्तरि ल्युः। **रदनः**=दन्तः। 'करणाधिकरणयोश्च' (3-3-117) इति ल्युटि रूपस्यास्य निष्पत्ति**र्माधवधातुवृत्तौ** यद्यपि प्रदर्शिता, तथापि तत्र नपुंसकाधिकारत्वात् **क्षीरस्वामि**प्रदर्शिता (कर्तरि) व्युत्पत्तिरेव ज्यायसीति ज्ञेयम्।
4. पचादि (3-1-134) पाठात् कर्तर्यच्प्रत्यये रूपमेवम्।

A. 'अगन्मनीषः क्कणयन्मुकुन्दमस्मान्वियोगं **रणयन्** स दूतः।' धा. का. 2. 9.

B. 'पलान्यखाद्यानि खदन् बदद्वपुः गदन् अवाच्यानि **रदन्** सतां मनः।' धा. का. 1. 8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रन्धकः-न्धिका, रन्धकः-न्धिका, [2]रिरधिषकः-रिरत्सकः-त्सिका, रारधकः-धिका ;

रधिता-[3]रद्धा-रद्ध्री, रन्धयिता-त्री, रिरधिषिता-रिरत्सिता-त्री, रारधिता-त्री ;

[4]रध्यन्-न्ती, रन्धयन्-न्ती, रिरधिषन्-रिरत्सन्-न्ती ; —

रधिष्यन्-[5]रत्स्यन्-न्ती-ती, रन्धयिष्यन्-न्ती-ती, रिरधिषिष्यन्-रिरत्सिष्यन्-न्ती-ती ;

व्यतिरध्यमानः, रन्धयमानः, व्यतिरिरधिषमाणः-व्यतिरिरत्समानः, रारध्यमानः ;

व्यतिरधिष्यमाणः-व्यतिरत्स्यमानः, रन्धयिष्यमाणः, व्यतिरिरधिषिष्यमाणः-व्यतिरिरत्सिष्यमाणः, रारधिष्यमाणः ;

सुरत्-सुरधौ-सुरधः ; — —

[6]रद्धम्-रद्धः-रद्धवान्, रन्धितम्-तः, रिरधिषितः-रिरत्सितः, रारधितः-तवान् ;

रन्धः, [7]रन्धनः, [8]साधुरन्धी,

---

1. 'रधिजभोरचि' (7-1-61) इति अजादिप्रत्ययेषु सर्वत्र नुमागमः। ण्यन्तेषु च णिज्निमित्तको नुमागमः सर्वत्र बोध्यः।

2. 'रधादिभ्यश्च' (7-2-45) इति इड्विकल्पः। इट्पक्षे, 'नेट्यलिटि रधेः' (7-1-62) इति नुम्निषेधः। इडभावपक्षे 'खरि च' (8-4-55) इति चर्त्वे **रिरत्सकः** इत्यादीनि रूपाणीति सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्।

3. तृचि, इडभावपक्षे, 'झषस्तथोर्धोऽधः' (8-2-40) इति धत्वे जश्त्वे च रूपमेवम्।

4. शतरि दिवादित्वाच्छ्यनि रूपमेवम्। स्त्रियां नुम्विकल्पः।

5. स्यप्रत्ययेऽपि इडभावपक्षे धातुधकारस्य चर्त्वेन तकार इति ज्ञेयम्।

6. **रधाद्यष्टकान्तर्गतत्वेन** धातोर्वैकल्पिकेट्कत्वात्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। नच **रधादिव्यतिरिक्तेषु** धातुषु 'यस्य विभाषा' (7-2-15) इत्यस्य चरितार्थत्वात्, '**रधादिभ्यश्च**' (7-2-45) इत्यस्य परत्वाच्च निष्ठायामपि इण्निषेधं बाधित्वा इड्विकल्प एव तृजादिष्विव न्याय्य इति वाच्यम् ; 'निषेधाश्च बलीयांसः' (परि. 122) इति न्यायेन, पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्याच्च 'पर्जन्यवल्लक्षणं प्रवर्तते' (परि. 121) इति न्यायेन **रधादिषु** विषयेऽपि निष्ठायाम् इण्निषेधस्यैव प्रामाणिकत्वात्। विस्तरस्त्वन्यत्र।

7. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्यये नुमागमः।

8. 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः। **काशिकायाम्** (7-1-61) प्रयुक्तोऽयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रेधिवान् , रन्धः, रिरधिषुः-रिरत्सुः, [2]रारन्धः ;

रधितव्यम्-रद्धव्यम्, रन्धयितव्यम्, रिरधिषितव्यम्-रिरत्सितव्यम्, रारधितव्यम् ;

रन्धनीयम् , रन्धनीयम् , रिरधिषणीयम्-रिरत्सनीयम् , रारधनीयम् ;

राध्यम् , रन्ध्यम् , रिरधिष्यम्-रिरत्स्यम् , रारध्यम् ;

ईषद्रन्धः- [3]दूरन्धः-सुरन्धः ; — —

रध्यमानः, रन्ध्यमानः, रिरधिष्यमाणः-रिरत्स्यमानः, रारध्यमानः ;

रन्धः, रन्धः, रिरधिषः-रिरत्सः, रारधः ;

[A]रधितुम्-रद्धुम् , रन्धयितुम् , रिरधिषितुम्-रिरत्सितुम् , रारधितुम् ;

रद्धिः, रन्धना, रिरधिषा-रिरत्सा, रारधा ;

रन्धनम् , रन्धनम् , रिरधिषणम्-रिरत्सनम् , रारधनम् ;

रधित्वा-रद्ध्वा, रन्धयित्वा, रिरधिषित्वा-रिरत्सित्वा, रारधित्वा ;

अनुरध्य, अनुरन्ध्य, प्ररिरधिष्य-प्ररिरत्स्य, प्रारारध्य ;

रन्धम् २, रधित्वा-रद्ध्वा २, } रन्धम् २, रन्धयित्वा २, } रिरधिषम् २-रिरत्सम् २, रिरधिषित्वा २-रिरत्सित्वा २, }

रारधम् २ ; रारधित्वा २. }

---

1. लिटः क्वसौ, 'अत एकहल्मध्ये—' (6-4-120) इत्येत्वाभ्यासलोपयोः कृतयोः, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे, नुमागमे, संयोगान्तत्वेन 'असंयोगाल्लिट् कित्' (1-2-5) इति कित्वाप्राप्तावपि औपदेशिकं क्वसुप्रत्ययगतं कित्त्वमाश्रित्योपधानकारलोपे **रेधिवान्** इति सम्पद्यते। अत्रैवंरूपनिष्पत्तिविषये आक्षेपसमाधानप्रकारौ **न्यासे** (7-1-62) द्रष्टव्यौ। क्वसोश्छान्दसैकान्त्याभावप्रतिपादनं तु 'नेटयलिटि रधेः' (7-1-62) इत्यत्र **भाष्यप्रदीपोद्योते** द्रष्टव्यम्।

2. यङन्तात् पचाद्यचि (3-1-134), यङो लुकि, 'रधिजभोरचि' (7-1-61) इति नुम्।

3. दुरुपपदाद्रधेः कृच्छ्रार्थे खल्। 'रो रि' (8-3-14) इति रेफलोपे, 'ढ्रलोपे पूर्वस्य—'(6-3-111) इति दीर्घः।

A. 'अक्षं रधितुमारेभे रद्धा लङ्कानिवासिनाम्॥' भ. का. 9-29.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1372) "**रन्ज रागे**" (I-भ्वादिः-999. अक. अनि. उभ.)

'रजते रजतीत्येव रज्यते रज्यतीत्यपि ॥

रागार्थे शप्श्यनोर्द्वे द्वे —' (श्लो. 57-58) इति देवः।

[1]रञ्जकः-ञ्जिका, [2]रञ्जकः-ञ्जिका, रजकः-जिका, [3]रिरङ्क्षकः-क्षिका, [4]रारजकः-जिका ;

रङ्क्ता-रङ्क्त्री, रञ्जयिता-रजयिता-त्री, रिरङ्क्षिता-त्री, रारजिता-त्री ;

[5]रजन्-न्ती, रञ्जयन्-न्ती [पक्षिणः], रजयन्-न्ती [मृगान्], रिरङ्क्षन्-न्ती ;—

रङ्क्ष्यन्-न्ती-ती, रञ्जयिष्यन्-रजयिष्यन्-न्ती-ती, रिरङ्क्षिष्यन्-न्ती-ती ;—

रजमानः, रन्जयमानः-रजयमानः, रिरङ्क्षमाणः, रारज्यमानः ;

रङ्क्ष्यमाणः, रन्जयिष्यमाणः-रजयिष्यमाणः, रिरङ्क्षिष्यमाणः, रारजिष्यमाणः ;

[6]अनुरक्-अनुरग्-अनुरजौ-अनुरजः ; — — —

---

1. 'नकारजावनुस्वारपञ्चमौ झलि धातुषु।' इत्यभियुक्तोक्तेरयं धातुरुपदेशे नकारोपधः। सन्धिवशाञ्ञकार इति बोध्यम्।

2. ण्यन्ते सर्वत्र मृगरमणभिन्नार्थे नलोपाभावादेवमेव रूपम्। '**रजको** मृगाणाम्' इत्यत्र तु '**रञ्जेर्णौ** मृगरमणे' (वा. 6-4-24) इति नलोपे, 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिः) इति मित्संज्ञायां 'मितां ह्रस्वः' (6-4-92) इत्युपधाह्रस्वः। एवमेवार्थभेदाद्रूपद्वयस्योपपत्तिः सर्वत्र बोध्या। **मृगरमणम्**=आखेटकः इत्येके। "**परे** तु '**रजयाञ्चकार विरजाः** स मृगान्—' (किरातार्जुनीये 6-24) इति **भारवि**प्रयोगात् **मृगरमणं** यथाश्रुतमेव। अत एव **भगवता** '**रञ्जयति** वस्त्राणि' (**भाष्ये** 6-4-24) इति प्रत्युदाहृतम् इत्याहुः।" इति **भाष्यप्रदीपोद्द्योते** निरूपितमिहावधेयम्। एतेन 'राजर्षिकल्पो **रजयन्**' इति **क्षीरतरङ्गिण्यु**पात्तवचनस्याप्युपपत्तिर्ज्ञेया। मृगरमणम्=मृगाणाम् रमणमिति बोध्यम्। 'जनीजॄष्क्नसुरञ्जः—' (ग. सू. भ्वादिषु) इत्यत्रार्थविशेषोपादानाभावात् यथाश्रुतार्थे रागेऽपि मित्त्वमिति ज्ञेयम्। '**मृगरमणम्**=मृगक्रीडा।' इति **न्यासः**।

3. सन्नन्ते सर्वत्र धातुजकारस्य कुत्वेन गकारे, उपधानकारस्यानुस्वारपरसवर्णयोः, सनः सकारस्य षकारे, चर्त्वे च रूपमेवम्।

4. यङ्निमित्तक उपधानकारलोपे, अभ्यासे दीर्घे च रूपमेवम्।

5. शतरि शपि, '**रञ्जेश्च**' (6-4-26) इत्युपधानकारलोपः।

6. क्विपि, उपधानकारलोपे कुत्वे चर्त्वविकल्पे च रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रक्तम्-रक्तः-रक्तवान्, [1]विरक्तः-रक्तम्, रञ्जितः-रजितः[A], रिरङ्क्षितः, रारजितः-तवान्;

रञ्जः, [2]रागी, [3]रञ्जनः, [4]मनोऽनुरञ्जनः, [5]रजकः-रजकी, [6]रज्यन्-न्ती-ती,

1. **विरक्तः, रक्तम्** इत्यत्र 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तः।

2. तच्छीलादिषु कर्तृषु 'सम्पृचानुरुध.......त्यजरजभजातिचरापचरामुषाभ्याहनश्च' (3-2-142) इति घिनुण्। प्रकृतसूत्रे '**रज**' इति निपातनात् घिनुण्यपि उपधानकारलोपः। तदुक्तं **भाष्ये**–' 'घिनुणि निपातनात् सिद्धम्' (**भाष्यम्** 6-4-24) इति। णित्त्वादुपधावृद्धौ, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे च रूपमेवम्। **अनुरागी** इत्यादयस्तु घञन्तात् मत्वर्थीय इनिप्रत्यये साधव इति बोध्यम्।

3. रजति, रजते वा इति **रञ्जनः**। बाहुलकात् 'कृत्यल्युटो बहुलम्' (3-3-113) इति कर्तरि ल्युट्। यद्वा, 'शिल्पिनि ष्वुन्' (3-1-145) इति **सूत्रभाष्ये** 'नृतिखनिरञ्जिभ्यः—' इति वचनात् कर्तरि ष्वुन्। न चात्र नलोपः शङ्क्यः, 'कित एवैते औणादिकाः' इति षाष्ठभाष्यात् (6-4-24) औणादिकक्युन्प्रत्ययान्त एव नलोप इत्येतदुत्तरत्र स्पष्टीकरिष्यमाणत्वात् इत्यलमत्र।

4. मनांस्यनुरञ्जयतीति **मनोऽनुरञ्जनः**। नन्द्यादित्वात् (3-1-134) कर्मण्युपपदे कर्तरि ल्युः। गौरादि (4-1-41) पाठात् स्त्रियां ङीष्। एवमेव **रसिकरञ्जनी**-प्रभृतयः शब्दाः साधवः। **रसिकरञ्जिनी** इति प्रयोगसत्त्वे तु 'सुप्यजातौ—' (3-2-78) इति णिनिप्रत्यये, 'ऋन्नेभ्यो ङीप्' (4-1-5) इति ङीपि तस्य साधुत्वं बोध्यम्।

5. 'शिल्पिनि ष्वुन्' (3-1-145) इत्यत्र, 'नृतिखनिरञ्जिभ्य इति वक्तव्यम्' इति **भाष्यात्** कर्तरि ष्वुन्। वस्तुतस्तु षष्ठे (6-4-24) "कित एवैते औणादिकाः।" इति **भाष्येण 'रजकरजनरजःसूप**संख्यानं कर्तव्यम्' (वा. 6-4-24) इति **वार्तिक**प्रत्याख्यानपरेण, "**रजकः** इत्यत्र 'क्वुन् शिल्पिसंज्ञयोः—' [द. उ. 3-5] इति क्वुन्प्रत्ययः। **रजकी** इति 'पुंयोगादाख्यायाम्' (4-1-48) इति ङीष्। अपुंयोगे तु ङीषा न भाव्यम् इति **भाष्यकारा**भिप्रायः।" इति **कैयटेन** च निर्णीतत्वात् अत्र प्रयोगे ष्वुन् न, क्वुनेवेत्यतः **न्यास-पदमञ्जर्यादय** उपेक्ष्याः। तदुक्तम् **शब्दकौस्तुभे**–"एवञ्च, **भाष्यमते** नृतिखनिभ्यामेव ष्वुन्। न तु **रञ्जेः** इति स्थितम्।" (3-1-145) इति। विस्तरस्त्व**न्यत्र**।

6. '**कुषिरजोः प्राचां** श्यन् परस्मैपदं च' (3-1-90) इति कर्मकर्तरि विकल्पेन श्यन्प्रत्ययः परस्मैपदं च। यगात्मनेपदयोरपवादौ। एतच्च व्यवस्थितविभाषेति **काशिकादिषु** स्पष्टम्। श्यनः अपित्सार्वधातुकत्वेन ङिद्वद्भावः। तेन, 'अनिदिताम्—' (6-4-24) इति उपधानकारलोपः। स्त्रियाम्, 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः।

A. 'कलतया वचसः परिवादिनीस्वरजिता **रजिता** वशमाययुः॥' शि. व. 6. 9.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रज्यमानः [वस्त्रः स्वयमेव], रन्जः-रजः, रिरङ्क्षुः, रिरञ्जयिषुः-रिरजयिषुः, रारञ्जः ;

रङ्क्तव्यम्, रन्जयितव्यम्-रजयितव्यम्, रिरङ्क्षितव्यम्, रारजितव्यम् ;

रन्जनीयम्, रन्जनीयम्-रजनीयम्, रिरङ्क्षणीयम्, रारजनीयम् ;

[1]रङ्ग्यम्, रन्ज्यम्-रज्यम्, रिरङ्क्ष्यम्, रारज्यम् ;

ईषद्रञ्जः-दूरन्जः-सुरञ्जः ; — — —

[2]रज्यमानः, रन्ज्यमानः-रज्यमानः, रिरङ्क्ष्यमाणः, रारज्यमानः ;

विरागः-[3] वैरङ्गिकः-आश्चर्यो [4]रागः, अन्यद्रागः, [5]रङ्गः, [6]रङ्गः, रन्जः-रजः, रिरङ्क्षः, रारजः ;

रङ्क्तुम्, रन्जयितुम्-रजयितुम्, रिरङ्क्षितुम्, रारजितुम् ;

विरक्तिः, रन्जना-रजना, रिरङ्क्षा, रिरन्जयिषा-रिरजयिषा, रारजा ;

रन्जनम्, रञ्जनम्-रञ्जनी, रजनम्-रजनी, रिरङ्क्षणम्, रारजनम् ;

रक्त्वा, रन्जयित्वा-रजयित्वा, रिरङ्क्षित्वा, रारजित्वा ;

---

1. निष्ठायामनिट्त्वात् ण्यति, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे रूपमेवम्।
2. यगात्मनेपदयोरपवादत्वेन श्यन्परस्मैपदयोर्विहितयोरपि, 'कुषिरजोः प्राचाम् —' (3-1-90) इत्यत्र 'प्राचां' ग्रहणात् पक्षे यगात्मनेपदे भवत इति रूपस्यास्यापि साधुत्वं बोध्यम्।
3. विपूर्वकादस्माद् भावे घञि, 'घञि च भावकरणयोः' (6-4-27) इति उपधानकारलोपे, 'अत उपधायाः' (7-2-116) इत्युपधाभूताकारस्य वृद्धौ, 'चजोः—' (7-3-52) इति कुत्वे च **विरागः** इति सम्पद्यते। तस्मात् 'विरागमर्हति' इत्यर्थे, 'छेदादिभ्यो नित्यम्' (5-1-64) इति ठक्प्रत्यये, **'विरागो विरङ्गं च'** (ग. सू. 5-1-64) इति गणपाठात् प्रकृतेर्विरङ्गादेशे, आदिवृद्धौ च **वैरङ्गिकः** इति रूपमिति बोध्यम्।
4. रज्यतेऽनेनेति **रागः**। करणे घञि, 'घञि च भावकरणयोः' (6-4-27) इत्युपाधानकारलोपे, उपधाभूताकारस्य वृद्धौ कुत्वे च रूपमेवम्। **अन्यद्रागः** इत्यत्र, 'अषष्ठ्यतृतीयास्थस्य **अन्यस्य** दुग् आशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु' (6-3-99) इति **राग**शब्दे परत अन्यशब्दस्य दुगागमः।
5. रञ्जयति प्रेक्षकाणां मनांस्यत्रेत्यर्थेऽन्तर्भावितण्यर्थाद्धातोरधिकरणे घञि कुत्वे रूपमेवम्। **रङ्गः**=नाटकादीनां प्रेक्षणस्थानम्।
6. 'हलश्च' (3-3-121) इत्यनेन संज्ञायां घञि, 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति घप्रत्यये वा सति कुत्वे रूपमेवम्। **रङ्गः**=देशविशेषः, देवश्च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



विरज्य, विरञ्ज्य- [1]विरजय्य, विरिरङ्क्ष्य, विरारज्य ;
रञ्जम् २, } [2]रञ्जम् २-राञ्जम् २-रजम् २-राजम् २, } रिरङ्क्षम् २, }
रक्त्वा २, } रञ्जयित्वा २-रजयित्वा २, } रिरङ्क्षित्वा २, }
रारजम् २ ; } [3]रजकः-रजकी, [4]रजनः-रजनी, [5]रजतम्, [6]रजः।
रारजित्वा २ ; }

## (1373) "रन्ज रागे" (IV-दिवादिः-1167. अक. अनि. उभ.) [अ]

'रजते रजतीत्येव रज्यते रज्यतीत्यपि ॥
रागार्थे शप्श्यनोर्द्वे द्वे........ ।' (श्लो. 57-58) इति **देवः** ।

---

1. ण्यन्तात् क्त्वो ल्यपि मृगरमणार्थे नकारलोपे, मित्संज्ञकत्वात् उपधाह्रस्वे च 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशे रूपमेवम् ।
2. 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिषु) इत्यत्रार्थविशेषानिर्देशपुरस्सरं मित्त्वानुशासनात्, अनुपधात्वेऽपि **रञ्जम् 2- राञ्जम्** 2 इति दीर्घविकल्पः, 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति सूत्रेण भवतीति **माधवः** । मृगरमणार्थे नलोपपक्षे तु **रजम् 2-राजम्** 2 इति द्विरूपविषये न विप्रतिपत्तिरिति ज्ञेयम् ।
3. 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' [द. उ. 3-5] इति क्वुन्प्रत्ययः । प्रत्ययस्य कित्त्वादुपधानकारलोपः ।
4. '**रजः** क्युन्' [द. उ. 5-24] इति क्युन्प्रत्ययः । रजति रज्यते वाऽनेनेति **रजनः**=रजकः, रागश्च । 'स च बाहुलकात् टिद्द्रष्टव्यः ।' इति **कैयटोक्तेः** (6-4-24) स्त्रियां ङीपि **रजनी** रात्रिः, हरिद्रा च ।
5. '**पृषिरञ्जिभ्यां** कित्' [द. उ. 6-15] इति अतच्प्रत्यये, कित्त्वेनानुनासिलोपे च रूपम् । रजन्तेऽस्मिन् जना इति **रजतम्**=लोहविशेषः । "**रजतस्य** विकारो **राजतम्** —'प्राणिरजतादिभ्योऽञ्' (4-3-154) इति षष्ठ्यन्तात् विकारेऽञ्-प्रत्ययः । अत्र, 'अनुदात्तादेः—' (4-2-44) इत्येवाञि सिद्धे पुनरञ्विधानम्, 'मयड्वैतयोः—' (4-3-143) इति विकारमयटो बाधनार्थम् ।" इति **मा. धा. वृत्तिः** । एतेन '**रजतमयम्** पात्रम्' इति च्छान्दसानां प्रयोगोऽ**पाणिनीय** इति ज्ञेयम् ।
6. '**भूरञ्जिभ्यां** कित्' [द. उ. 9.76] इत्यसुन्प्रत्ययः, स च किच्च भवति । **रजः**= अशुभम्, रेणुश्च ।

[अ] धातोरस्यापि 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिषु) इत्यत्र ग्रहणं ज्ञेयम् । **क्षीरस्वामिना** "स्वरितेत्त्वार्थं विकरणार्थं च इह (दिवादिषु) पाठः ।" इत्युक्तम् । भ्वादिष्वपि उभयपदित्वस्याविशिष्टत्वात् तत्रापि स्वरितेत्त्वस्यैवाङ्गीकाराच्च चिन्त्यमिदमिति ज्ञेयम् । विकरणार्थं स्वरार्थमिति स्यादिति भाति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रञ्जकः-ञ्जिका, रञ्जकः-रजकः-ञ्जिका-जिका, रिरङ्क्षकः-क्षिका, रारजकः-जिका ; रङ्क्ता-रङ्क्त्री, रञ्जयिता-रजयिता-त्री, रिङ्क्षिता-त्री, रारजिता-त्री ; इत्यादिकानि सर्वाणि रूपाणि भौवादिकरजतिवत् (1372) ज्ञेयानि । शतरि [1]रज्यन्-न्ती, इति, शानचि, रज्यमानः इति च भवति । भौवादिकधातुवत् सर्वाण्यपि विशेषरूपाण्यस्मादपि भवन्तीति च बोध्यम् । घिनुणि-[A]रागी ।

## (1374) "रप व्यक्तायां वाचि"

### (I-भ्वादिः-401. अक. सेट्. पर.)

'— वचसि क्लैब्ये' इति दशपाद्युणादिवृत्ति (I-111) पाठः । रापकः-पिका, रापकः-पिका, रिरपिषकः-षिका, रारपकः-पिका ; रपिता-त्री, रापयिता-त्री, रिरपिषिता-त्री, रारपिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचपतिवत् (497) ज्ञेयानि । [2]राप्यम्, [3]रिपुः इमौ रूपौ विशेषेण भवतः इति ज्ञेयम् ।

## (1375) "रफ गतौ" (I-भ्वादिः-413. सक. सेट्. पर.)

धातुममुं हिंसार्थं पठति कण्ठः इति क्षीरस्वामी ।

राफकः-फिका, राफकः-फिका, रिरफिषकः-षिका, रारफकः-फिका ; रफिता-त्री, राफयिता-त्री, रिरफिषिता-त्री, रारफिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचपतिवत् (497) बोध्यानि ।

---

1. शतरि शपो दिवादित्वाच्छ्यनि, तस्यापित्सार्वधातुकत्वेन ङिद्वद्भावात्, 'अनिदितां हल उपधायाः क्ङिति' (6-4-24) इत्युपधानकारलोपः ।
2. 'आसुयुवपिरपि—' (3-1-126) इति ण्यत् । यतोऽपवादः ।
3. 'रपेरिच्चोपधायाः' (द. उ. 1-111) इति कुप्रत्ययः, उपधायाः इत्त्व भवति । रिपुः=वैरी । अत्र द. उ. टिप्पण्याम् "श्वेतवनवासिना रपेर्हिंसार्थत्वमाश्रित्य रिपुशब्दो निरुक्तः । तथाहि—"रपति हिनस्ति इति रिपुः=शत्रुः । संज्ञाशब्देषु धातोरर्थान्तरवृत्तित्वमस्ति । तथाह्युक्तम्—'धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।' इति" [पृष्ठम् 14. 15.) इत्युक्तम् ।

A. 'एता देवानुरोधिन्यो द्वेषिण्य इव रागिणम् ।' भ. का. 7. 9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1376) "रफि गतौ" (I-भ्वादिः-414. सक. सेट्. पर.)

केचित् हिंसार्थकत्वमस्याङ्गीकुर्वन्तीति क्षीरतरङ्गिणीतो ज्ञायते ।

रम्फकः-म्फिका, रम्फकः-म्फिका, रिरम्फिषकः-षिका ; रारम्फकः-म्फिका ; रम्फिता-त्री, रम्फयिता-त्री, रिरम्फिषिता-त्री, रारम्फिता-त्री ; इत्यादिकानि समस्तान्यपि रूपाणि भौवादिककम्पतिवत् (166) बोध्यानि । अस्य धातोः गत्यर्थकत्वात् ण्यन्तात् शानचि-रम्फयमाणः, रम्फयिष्यमाणः इति विशेषः । घञि-[A]सुरम्फः ।

## (1377) "रबि शब्दे" (I-भ्वादिः-376. अक. सेट्. आत्म.)

रम्बकः-म्बिका, रम्बकः-म्बिका, रिरम्बिषकः-षिका, रारम्बकः-म्बिका ; रम्बिता-त्री, रम्बयिता-त्री, रिरम्बिषिता-त्री, रारम्बिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिककम्पतिवत् (166) ज्ञेयानि । [1]रम्बणः, [2]सुरम्बी, [3]हेरम्बः,[B] अस्य धातोः इमानि रूपाण्यधिकानीति विशेषः ।

## (1378) "रभ राभस्ये" (I-भ्वादिः-974. अक. अनि. आत्म.)

राभस्यम्=कार्योपक्रमः । अयं प्रायेण आङ्पूर्वक एव प्रयुज्यते ।

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति, 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति वा युच् ताच्छीलिकः ।
2. 'सुप्यजातौ—' (3-2-78) इति णिनिप्रत्यये रूपमेवम् ।
3. हे इत्येवं रम्बते इति हेरम्बः=विनायकः । पचाद्यचि रूपमेवम् । 'के रम्बते—करम्बः । स्वर्णं रत्नकरम्बितम्, क्तनश्च चित् ('क्तनश्च' द. उ. 7-17) इत्यम्बज् वा' इति क्षीरतरङ्गिण्यामुक्तम् । "'हः शङ्करे हरौ हंसे रणरोमाश्ववाजिषु' इति नानार्थरत्नमाला । 'हे उषसि रम्बते' इति स्वामी ।" इति अमरसुधा (1-38) ।

A. 'हयैः सुरम्फैर्द्रुतमर्वतो रवेः पर्वद्भिरालम्ब्यंत रक्तिमा करैः ।' धा. का. 1-54.

B. 'सकम्पहेरम्बसमानलम्बनाः.... ...।' धा. का. 1-49.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]आरम्भकः-म्भिका, [2]रम्भकः-म्भिका, [3]रिप्सकः-प्सिका, रारभकः-भिका ;
[4]आरब्धा-ब्धी, रम्भयिता-त्री, रिप्सिता-त्री, रारभिता-त्री ;
-- रम्भयन्-न्ती, रम्भयिष्यन्-न्ती-ती ; --
[5]आरभमाणः, [भोक्तुम्] आरभमाणः, रम्भयमाणः, रिप्समानः, रारभ्यमाणः,
रप्स्यमानः, रम्भयिष्यमाणः, रिप्सिष्यमाणः, रारभिष्यमाणः ;
सुरप्-सुरब्-सुरभौ-सुरभः ; -- --
आरब्धम्-ब्धः, रम्भितम्-तः, रिप्सितम्, रारभितम्-तः-तवान् ;

---

1. 'रभेरशब्लिटोः' (7-1-63) इति, अजादिषु प्रत्ययेषु शब्लिड्वर्जं नुमागमः। एवमेव घञादिष्वपि ज्ञेयम्। "**काशकृत्स्नधातुपाठीयकन्नडटीकायां रभकः रभः, रभमाणः, रभणीयम्** इत्यादिप्रयोगेषु नुमोऽदर्शनात् वस्तुतः सानुषङ्गाः **आरम्भः, आरम्भणम्** .......इत्येवमादयः प्रयोगाः न **रभ**धातोः, किं तर्हि ? सानुषङ्गस्य **रम्भ**धातोः...." इत्यादिकं **क्षीरतरङ्गिणीटिप्पणे** (पुटे 151) सुदूरं विचारितम्। तत्र **पाणिनीयधातुपाठकोशेषु** कुत्रापि सानुषङ्गस्य **रम्भ**धातोरुल्लेखाभावात् प्रमाणं मृग्यमिति बोध्यम्। 'रेभृ शब्दे' इति भौवादिकस्य धातोः **दुर्ग**सम्मतं '**रभि शब्दे**' इति पाठमाश्रित्य निर्वाहं **केचित्** कुर्वन्ति। तदपि **दुर्गा**न्यैस्तत्पाठानादरात् न प्रमाणमिति बोध्यम्।

2. ण्यन्ते ण्वुलि, 'अत उपधायाः' (7-2-116) इति प्राप्तां परामपि वृद्धिं बाधित्वा, 'रभेरशब्लिटोः' (7-1-63) इति नुम् नित्यत्वाद्भवति।

3. सन्नन्ते, 'सनि मीमाघुरभ—' (7-4-54) इत्यादिना इस्। 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः। 'स्कोः—' (8-2-29) इति सलोपः। भकारस्य चर्त्वेन पकारः।

4. तृजादिषु 'झषस्तथोः—' (8-2-40) इति धत्वे, जश्त्वे च रूपमिति ज्ञेयम्।

5. शानचि, '**रभेरशब्लिटोः**' (7-1-63) इत्युक्तत्वात् नुमागमो न। यत्तु **परिभाषेन्दुशेखरे** 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' (परिभाषा 16) इत्यत्र, "..... संज्ञाभूतानां प्रतिषेधम् **आरभता वार्तिककृता**......" इति वाक्ये, आत्मनेपदस्यास्य धातोः शत्रन्तप्रयोगः प्रयुक्तः, स तु सम्पातायात इति न तावता धातोरस्योभयपदित्वं कल्प्यम्। न च 'अनुदात्तेत्त्वलक्षणमात्मनेपदम् अनित्यम्' (परि. 97) इति वचनात् आत्मनेपदस्यानित्यत्वात् '**आरभता**' इति प्रयोगः सूपपन्न इति वाच्यम्। तस्याः परिभाषायाः **भाष्या**ग्रनादृतत्वेनाप्रामाण्यस्य **नागेशभट्ट**रेव समर्थितत्वादित्यन्यत्र विस्तरः। 'भोक्तुम् **आरभमाणः**' इत्यत्र, 'शकधृषज्ञाग्लाघटरभ—' (3-4-65) इत्यादिना धातुमात्रात् तुमुन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



| | | | |
|---|---|---|---|
| [1]रम्भः-रम्भा, | [2]साध्वारम्भी, रम्भः, | रिप्सुः, | [3]रारम्भः ; |
| आरब्धव्यम् , | आरम्भयितव्यम् , | रिप्सितव्यम् , | रारभितव्यम् ; |
| आरम्भणीयम् , | आरम्भणीयम् , | रिप्सनीयम् , | रारभणीयम् ; |
| [4]आरभ्यम् , | आरम्भ्यम् , | रिप्स्यम् , | रारभ्यम् ; |
| ईषद्रम्भः-दूरम्भः-सुरम्भः ; | —— | —— | —— |
| आरभ्यमाणः, | आरम्भ्यमाणः, | रिप्स्यमानः, | रारभ्यमाणः ; |
| आरम्भः, | आरम्भः, | रिप्सः, | रारभः ; |
| आरब्धुम् , | आरम्भयितुम् , | रिप्सितुम् , | रारभितुम् ; |
| रब्धिः, | आरम्भणा, | रिप्सा, | रारभा ; |
| आरम्भणम् , | आरम्भणम् , | रिप्सनम् , | रारभणम् ; |
| रब्ध्वा, | रम्भयित्वा, | रिप्सित्वा, | रारभित्वा ; |
| आरभ्य, | आरम्भ्य, | आरिप्स्य, | आरारभ्य ; |
| रम्भम् २, } रब्ध्वा २, } | रम्भम् २, } रम्भयित्वा २, } | रिप्सम् २, } रिप्सित्वा २, } | रारभम् २ ; } रारभित्वा २ ; } |

[5]रभसः ।

(1379) " रभि शब्दे " (I-भ्वादिः-385. अक. सेट्. आत्म.)

'रेभृ शब्दे' इत्यस्य दुर्गसम्मतः पाठ एवमिति क्षीरतरङ्गिणीतो ज्ञायते ।
रम्भकः-म्भिका, रम्भकः-म्भिका, रिरम्भिषकः-षिका, रारम्भकः-म्भिका ;
रम्भिता-त्री, रम्भयिता-त्री, रिरम्भिषिता-त्री, रारम्भिता-त्री ;
इतीमानि रूपाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि । [6]करम्भः ।
[A]प्ररम्भणम् ।

---

1. पचाद्यचि नुमि **रम्भः** । स्त्रियां टापि **रम्भा**=अप्सरोविशेषः, कदली च ।
2. 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः ।
3. यङन्तात् पचाद्यचि, यङो लुकि नुमागमे च रूपमेवम् ।
4. 'पोरदुपधात्' (3-1-98) इति यत्प्रत्ययः । हलन्तलक्षणण्यतोऽपवादः ।
5. 'अत्यविचमितमिरभि—' [द. उ. 9-44] इत्यसच्प्रत्यये रूपम् । बाहुलकात्, '**राभस्ये**' इति निर्देशाद्वा नुम् न ।
6. केन जलेन रम्भ्यते=मिश्रीक्रियते इति **करम्भः**=दधिसक्तवः । 'अकर्तरि च कारके—' (3-3-19) इति घञ् । धातूनामनेकार्थत्वात् मिश्रीकरणार्थेऽत्र वृत्तिः । 'ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः ॥' इति **मुरारिः** (अनर्घराघवे 2-83) ।

A. 'प्रचीभ्यरेफैः पशवोऽम्भसां निधिप्ररम्भणस्तम्भिभिरागता व्रजम् ।'
धा. का. 1-50.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1380) "रम क्रीडायाम्" (I-भ्वादिः-853. अक. अनि. आत्म.)

ज्वलादिः ।

'रमु--' इत्युदितं केचित् पठन्ति ।

[1]रामकः-मिका, [2]रमकः-मिका, [3]रिरंसकः-सिका, [4]रंरमकः-मिका ;
[5]रन्ता-रन्त्री, रमयिता-त्री, रिरंसिता-त्री, रंरमिता-त्री ;
[6]विरमन्-आरमन्-परिरमन्-न्ती, [[7]देवदत्तम्] उपरमन्, [[8]यावद्भुक्तम्] उपरमन्, रमयन्-न्ती, [9]विरिरंसन्-आरिरंसन्-परिरिरंसन्-देवदत्तम्-उपरिरंसन्, [यावद्भुक्तम्] उपरिरंसन्-न्ती ; ——
विरंस्यन्-न्ती-ती, आरंस्यन्, परिरंस्यन्, [देवदत्तम्] उपरंस्यन्, रमयिष्यन्-न्ती-ती, विरिरंसिष्यन्-आरिरंसिष्यन्-परिरिरंसिष्यन्-देवदत्तमुपरिरंसिष्यन्-[यावद्भुक्तम्]उपरिरंसिष्यन्-न्ती-ती ; ——
रममाणः, यावद्भुक्तमुपरममाणः, रमयमाणः, रिरंसमानः, रंरम्यमाणः ; रंस्यमानः, [यावद्भुक्तम्] उपरंस्यमानः, रमयिष्यमाणः, रिरंसिष्यमाणः, रंरमिष्यमाणः ;

---

1. उदात्तोपदेशाभावात् वृद्धिनिषेधो नात्र प्रवर्तते । एवमेव वृद्धियोग्येषु घञादिषु सर्वत्र बोध्यम् ।
2. अमन्तत्वेन, 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिषु) इति मित्संज्ञायाम्, 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाया ह्रस्वः । एवं ण्यन्ते सर्वत्र बोध्यम् ।
3. 'यमिर्नमन्तेष्वनिडेक इष्यते रमिश्च' (व्याघ्रभूतिकारिका 7-2-10) इति वचनात् अनिट्त्वम् । सनि परतो मकारस्यानुस्वारे रूपमेवं सर्वत्रेति बोध्यम् ।
4. यङन्ते सर्वत्र, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) नुगागमः ।
5. धातोरनिट्त्वात्, धातुमकारस्यानुस्वारे परसवर्णे च रूपमेवम् ।
6. 'व्याङ्परिभ्यो रमः' (1-3-83) इति वचनात् वि, आ(ङ्), परिपूर्वकादस्माच्छता ।
7. 'उपाच्च' (1-3-84) इति परस्मैपदं शता । ननु उपपूर्वकस्य रमेरकर्मकत्वात् कथं 'देवदत्तमुपरमन्' इति सकर्मकप्रयोगोपपत्तिरिति वाच्यम् । 'अन्तर्भावितण्यर्थोऽत्र सकर्मकः ।' इति क्षीरतरङ्गिण्यायुक्तेः 'देवदत्तमुपरमयन्' इत्यर्थकत्वादिति ज्ञेयम् । "अन्तर्भावितः=बुध्याऽनुप्रवेशितो ण्यर्थः=प्रयोज्यप्रयोजकभावो यस्य स तथोक्तः । एवंविधस्य तस्य प्रयोज्येन कर्मणा सकर्मकत्वमुपपद्यत एव ।" इति न्यासोक्तिरिहावधार्या ।
8. 'विभाषाऽकर्मकात्' (1-3-85) इति परस्मैपदं, शता । भोजनाद् भोजनान्निवर्तते इत्यर्थः । पक्षे यथाप्राप्तमात्मनेपदमपि साधु ।
9. 'पूर्ववत् सनः' (1-3-62) इति सन्नन्ताच्छतृरुपपत्तिर्ज्ञेया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]सुरत्-सुरतौ-सुरतः ; — — —

रतम्-रतः-रतवान्, रमितः, रिरंसितः, रंरमितः-तवान्;

[3]रमः-रमा, रामः-रामा, [4]रामः, [5]रम्यः, रमणीयः, [6]रेमिः, [7]रन्तिः, रतिः, [8]रमणः[A], [9]स्तम्बेरमः,[B]

---

1. 'गमादीनामिति वक्तव्यम्' (वा. 6-4-40) इति वचनात् क्विपि अनुनासिकलोपः। तुक् च भवति।
2. निष्ठायाम्, 'अनुदात्तोपदेशवनतितनोत्यादीनाम् अनुनासिकलोपो झलि क्ङिति' (6-4-37) इत्यनुनासिकलोपः। एवमेव क्त्वा-क्तिन्प्रभृतिष्वपीति ज्ञेयम्।
3. 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि णप्रत्ययो विकल्पेन। णप्रत्ययपक्षे **रामः** इति भवति। पक्षे पचादित्वादौत्सर्गिकेऽच्प्रत्यये **रमः** इति भवति। स्त्रियां टापि **रमा, रामा** इति भवतः।
4. 'हलश्च' (3-3-121) इति संज्ञायां घञि रूपमिति **केचित्**। **अन्ये** तु 'रमन्ते योगिनो यस्मिन् चिदानन्दे परात्मनि।' इत्यादिनिर्वचनानुसारेणाधिकरणे, 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति घञ् इति साधयन्ति।
5. 'पोरदुपधात्' (3-1-98) इति ण्यदपवादो यत्प्रत्ययः। अयं च बाहुलकात् कर्तरि भवति। एवमेव **रमणीयः** इत्यत्रापि बाहुलकादेवानीयरिति **प्रक्रियासर्वस्वम्**।
6. 'उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' (वा. 3-2-171) इति वचनात क्विप्रत्ययोऽथवा किन्प्रत्ययः। छन्दसि विषये 'सेदिः, मेनिः, **रेमिः**—' इत्यादीनां किकिन्नन्तानां बहूनां शब्दानां दर्शनात् 'आदृगमहनजनः किकिनौ लिट् च' (3-2-171) इत्यत्र परिगणनं मास्तु। किं तु औत्सर्गिकत्वं किकिनोः—इति प्रकृत**वार्तिका**र्थः। किकिनोः प्रत्यययोर्लिड्वद्भावातिदेशात् द्विर्वचनम्। एत्वाभ्यासलोपौ च भवतः।
7. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिच्। 'न क्तिचि दीर्घश्च' (6-4-39) इति दीर्घानुनासिकलोपनिषेधः।
8. **रति**रिति मन्मथपत्न्युच्यते। अत्र बाहुलकात्, 'स्त्रियां क्तिन्' (3-3-94) इति संज्ञायां क्तिन्। अनुनासिकलोपः। 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इत्यतोऽत्र (3-3-94) 'संज्ञायाम्' इत्यनुवर्तते। 'संज्ञायाम्' (3-3-109) इति प्राप्तस्य ण्वुलोऽपवादः।
9. नन्द्यादित्वात् (3-1-134) ण्यन्तात् कर्तरि ल्युः। **रमणी** इति तु गौरादि- (4-1-41) पाठात् ङीषि साधुः।
10. '**स्तम्ब**कर्णयो **रमि**जपोः' (3-2-13) इति स्तम्बरूपे सुबन्ते उपपदे **रमेर**च्प्रत्ययः। स च 'हस्तिसूचकयोरिति वक्तव्यम्' (वा. 3-2-13) इति नियमात् गजविषय एव। स्तम्बे रमत इति **स्तम्बेरमः**=हस्ती। 'हलदन्तात् सप्तम्याः संज्ञायाम्' (6-3-9) इति, 'तत्पुरुषे कृति बहुलम्' (6-3-14) इति वा सप्तम्या अलुक्।

A. 'नन्दनानि मुनीन्द्राणां **रमणानि** वनौकसाम्।' भ. का. 6-73.

B. 'बलिनावमुमद्रीन्द्रं युवां **स्तम्बेरमा**विव।' भ. का. 6-93.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

[1]मनोरमा, रामः, रिरंसुः[A]-रिरमयिषुः, रंरमः ;

| | | | |
|---|---|---|---|
| रन्तव्यम्, | रमयितव्यम्, | रिरंसितव्यम्, | रंरमितव्यम् ; |
| रमणीयम्, | रमणीयम्, | रिरंसनीयम्, | रंरमणीयम् ; |
| रम्यम्, | रम्यम्, | रिरंस्यम्, | रंरम्यम् ; |
| ईषद्रमः-दूरमः-सुरमः- ; | — | — | — |
| रम्यमाणः, | रम्यमाणः, | रिरंस्यमानः, | रंरम्यमाणः ; |
| रामः, [2]उपरमः, [3]आरामः, | रामः, | रिरंसः, | रंरमः ; |
| रन्तुम्, | रमयितुम्, | रिरंसितुम्, | रंरमितुम् ; |
| रतिः, | रमणा, | रिरंसा-रिरमयिषा, | रंरमा ; |
| रमणम्, | रमणम्, | रिरंसनम्, | रंरमणम् ; |
| [4]रत्वा, | रमयित्वा, | रिरंसित्वा, | रंरमित्वा ; |
| [5]विरम्य-विरत्य, | विरमय्य, | विरिरंस्य, | विरंरम्य ; |
| रामम् २, रत्वा २, | रमम् २-रामम् २, रमयित्वा २, | रिरंसम् २, रिरंसित्वा २, | रंरमम् २ ; रंरमित्वा ; |

1. मनांसि रमयतीति **मनोरमा**। ण्यन्तात् कर्मण्यणि, बाहुलकत्वेन अजादिषु (4-1-4) पाठात् ङीपं बाधित्वा टाप्। **प्रौढमनोरमा, बालमनोरमा** इत्याद्यभिधानमेव टाबन्तत्वे, तत्रापि बाहुलकाश्रयणे बीजमिति ज्ञेयम्। 'अभिधानलक्षणाः कृत्तद्धितसमासान्ताः' इति **भा**।**ष्ये**ऽसकृदुक्तमिहावधेयम्।
2. 'यम **उपरमे**' इति धातुकोशेषु निर्देशात् बाहुलकात् भावेऽप्प्रत्ययोऽत्र घञपवाद इति ज्ञेयम्।
3. आरमन्त्यस्मिन् इत्या**रामः**=उपवनम्। 'अकर्तरि च कारके—' (3-3-19) इति संज्ञायां घञ्।
4. ये तु '**रमु**—' इति धातुममुं पठन्ति, तेषाम् 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पे **रमित्वा-रत्वा** इति रूपद्वयं प्राप्नोति। परं तु, 'तत् (=उदित्त्वम्) **महान्तो** न सहन्ते।' इति **मा**।**धवा**द्युक्तेः उदित्त्वमस्या**पाणि-नीय**मिति ज्ञेयम्।
5. 'वा ल्यपि (6-4-38) इति अनुनासिकलोपविकल्पः। तत्र '**वाऽमः**' (वा.6-4-37) इति वचनात् अमन्तानामनुदात्तोपदेशानां धातूनां विकल्पेनानुनासिकलोप इति विज्ञायते। एतदेव व्यवस्थितविभाषात्वेन तत्र तत्रोच्यते।

A. 'अथ **रिरंसुममुं** युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया।' शि. व. 6-1.

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रमतिः, [2]रण्डा, [3]रत्नम्, [4]सुरतः-सूरतः, [5]रथः, [6]रमण्यम्, [7]रहः।

**(1381) "रथ गतौ"** (I-भ्वादिः-482. सक. सेट्. आत्म.)

रायकः-यिका, रायकः-यिका, रिरयिषकः-षिका, रारयकः-यिका; रयिता-त्री, राययिता-त्री, रिरयिषिता-त्री, रारयिता-त्री; इत्यादिकानि समस्तान्यपि रूपाणि भौवादिक**चयति**वत् (502) ज्ञेयानि। निरयः; घञि-रायः, क्विपि-प्ररत्-प्ररतौ-प्ररतः इति, अचि-रयः-इति च विशेषः।

**(1382) "रवि गत्यर्थः"** (I-भ्वादिः-596. सक. सेट्. पर.)

रण्वकः-रण्विका, रण्वकः-ण्विका, रिरण्विषकः-षिका, रारण्वकः-ण्विका; रण्विता-त्री, रण्वयिता-त्री, रिरण्विषिता-त्री, रारण्विता-त्री; इत्यादिकानि रूपाणि सर्वाणि भौवादिक**कन्दति**वत् (163) ज्ञेयानि। शतरि-[A]रण्वन्-न्ती, इति भवति।

**(1383) "रश (समूहकिरणशब्देषु ?)"** (I-भ्वादिः. अक. सेट्. पर.)

"**रशि**रस्मा अविशेषेणोपदिष्टः, सः **राशिः**, **रश्मिः**, **रशना** इत्येवं-

---

1. '**रमे**र्नित्' (द. उ. 1-32) इत्यतिप्रत्यये रूपम्। रमन्त्यस्याम् इति **रमतिः**= क्रीडा। यद्यपि 'इक्श्तिपौ धातुनिर्देशे' (वा. 3-3-108) इति श्तिपि, श्तिप्त्वा-च्छपि **रमतिः** इति सिद्ध्यति; तथापि तत्र भावार्थकत्वात्, अधिकरणार्थत्वला-भाय **दशपाद्युणादिषु** पाठ इति बोध्यम्।
2. '**ञमन्ताड्डः**' [द. उ. 5-7] इति डप्रत्ययः। बाहुलकात् 'चुटू' (1-3-7) इति डकारस्येत्संज्ञा न। 'ञम्' इति 'ञमङणनम्' इत्यस्य प्रत्याहारः उणादिषु दृश्यते।
3. '**रमे**स्त च' [द. उ. 5-46] इति नप्रत्ययः, तकारश्चान्तादेशः। रमन्तेऽस्मिन् इति **रत्नम्**=वैडूर्यादिः।
4. '**सौ रमे क्तो** दमे **पूर्वपदस्य च दीर्घः**' [द. उ. 6-23] इति क्तप्रत्यये पाक्षिके पूर्वपददीर्घे च **सुरतः-सूरतः** इति सिध्यतः। **सूरतः**=बुधः।
5. 'हनिकुषिनी**रमि**—' [द.उ.6-27] इत्यादिना क्थन्प्रत्ययः। उपधानकारलोपश्च।
6. 'श्रृ**रम्यो**श्च' [द. उ. 8-8] इति अन्यप्रत्ययः। **रमण्यम्**=शोभनम्।
7. '**रमे**र्देशे हश्च' [द. उ. 9-74] इति असुन्प्रत्ययो देशे गम्यमाने हकारश्चान्ता-देशः। रमन्तेऽस्मिन् इति **रहः**=विविक्तदेशः।

A. 'जिन्वन्तमुर्वीं निजरण्विनैः सतां **रण्वन्त**मन्तर्भवधन्वपादपम्।' धा. का. 1-76.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



विषयः।........" इति 'तृज्वत् क्रोष्टुः' (7-1 95) इत्यत्र भाष्यात् "रशिलुशी अपठितावपि भाष्यकारवचनाद् धातू बोद्धव्यौ।" इति प्रदीपवाक्यात्, "धातुपाठे पठितावाचार्येणेति बोद्धव्यावित्यर्थः।" इति उद्द्योतवाक्याच्च रशधातुः धातुपाठे पूर्वमासीदधुना तु भ्रष्ट इति ज्ञायते। तत्र च निरुक्तरूपत्रयविषय एवास्य प्रयोग इत्यपि भाष्यादस्माज्ज्ञायते। प्रयुक्तानां शब्दानां राशि-रश्मि-रशनात्मकानां लोकप्रयोगानुसारेणास्माभिरर्थनिर्देश ऊहितः। औत्सर्गिकः शब्विकरण इति ज्ञेयम्। यद्यपि निरुक्तरूपत्रयेऽप्यपि इडागमप्रसक्त्यभावात् अनिट्त्वेऽपि न क्षतिः; तथापि अनिट्कारिकासु परिगणनाभावादस्य सेट्त्वमिति ज्ञेयम्। 'शेषात् कर्तरि—'(1·3-78) इति परस्मैपदम्। राशिरित्यत्र 'इण् अजादिभ्यः' (वा. 3-3-108) इति इण्प्रत्ययः। उपधावृद्धिः। रश्मिरित्यत्र तु बाहुलकादौणादिको मिप्रत्यय इति बोध्यम्। रशना इति तु ल्युडन्तम्। बाहुलकात् अजादिषु (4-1-4) पाठात् टाबिति बोध्यम्। उणादिषु 'अशे रश च' (द. उ. 1 15) इत्यनेन अशधातोः रश्मिशब्दनिर्वचनं कृतम्। एतन्निरुक्तभाष्यविरुद्धम्।

(1384) **"रस शब्दे"** (I-भ्वादिः-713. अक. सेट्. पर.)

**'शब्दे शपि रसेत्**, स्नेहास्वादयो रसयेद्रसेः।' (श्लो: 193) इति **देवः**।
रासकः-सिका, रासकः-सिका, रिरसिषकः-षिका, रारसकः-सिका;
रसिता-त्री, रासयिता-त्री, रिरसिषिता-त्री, रारसिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककशतिवत् (178) बोध्यानि।
क्विपि सुरः-सुरसौ-सुरसः; [1]रसमानः-[A] [2]रसः, वेदरासी, [B]रारस्यमानः; [3]रस्नम्, अस्य धातोः इमानि रूपाण्यधिकानीति विशेषः।

---

1. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति ताच्छील्ये चानश्प्रत्यये रूपमेवम्।
2. पचाद्यचि (3-1-134) रूपमेवम्।
3. 'तृषिशुषिरसिभ्यः किन्' (द. उ. 5-44) इति नप्रत्यये रूपम्। कित्वाद् न वृद्धिः। रसतीति **रस्नम्**=द्रव्यजातिः।

A. 'परिरम्भरुचिं ततिर्जलानामभिनद्धा **रसमा**नसारसेन॥' शि. व. 6-75.
B. 'उच्चै **रारस्यमानां** तां कृपणां रामलक्ष्मणौ।' भ. का. 5-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



## (1385) "रस आस्वादनस्नेहनयोः"

(X-चुरादिः-1931. सक. सेट्. उभ.) अदन्तः ।

'शब्दे शपि रसेत्, स्नेहास्वादयो रसयेद्रसेः ।' (श्लो. 193) इति देवः । रसकः-सिका, रिरसयिषकः-षिका; रसयिता-त्री, रिरसयिषिता-त्री; [A]रसयन्-न्ती, रिरसयिषन्-न्ती; रसयिष्यन्-न्ती-ती, रिरसयिषिष्यन्-न्ती-ती; रसयमानः, रिरसयिषमाणः, रसयिष्यमाणः, रिरसयिषिष्यमाणः, सुरः-सुरसौ-सुरसः; रिरसयिट्-यिषौ-यिषः; रसितम्-तः, रिरसयिषितम्-तः-तवान्; [1]रसः, विरसः, सुरसः, सुरसी, रिरसयिषुः; रसयितव्यम्, रिरसयिषितव्यम्; रसनीयम्, रिरसयिषणीयम्; रस्यम्, रिरसयिष्यम्, ईषद्रसः-दूरसः-सुरसः; रस्यमानः, रिरसयिष्यमाणः, रसः, रिरसयिषः, रसयितुम्, रिरसयिषितुम्; रसना, रिरसयिषा, रसनम्, रिरसयिषणम्, रसयित्वा, रिरसयिषित्वा; [2]प्ररसय्य, प्ररिरसयिष्य, रसम् २, रसयित्वा २, रिरसयिषम् २, रिरसयिषित्वा २; इति विशेषः ।

## (1386) "रह त्यागे" (I-भ्वादिः-731. सक. सेट्. पर.)

'रहयेत् रहति त्यागे, गतौ रंहेस्तु रंहति ।' (श्लो. 195) इति देवः । राहकः-हिका, राहकः-हिका, रिरहिषकः-षिका, रारहकः-हिका; रहिता-त्री. रहयिता-त्री, रिरहिषिता-त्री, रारहिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचहतिवत् (514) बोध्यानि, [3]रहः विरहः-[4]विराही, [5]रहस्यम्, अनुरहसम्-अवरहसम्, तप्तरहसम्, [6]राहुः, इमानि रूपाणि

---

1. रस्यन्ते आस्वाद्यन्तेऽनेन इति 'एरच्' (3-3-56) इति अचि रूपम् । घञ् वा इति केचित् ।
2. 'ल्यपि लघुपूर्वात्' (6-4-16) इति णेरयादेशः ।
3. पचाद्यचि रूपमेवम् ।
4. 'सुप्यजातौ —' (3 2-78) इनि णिनिप्रत्यये रूपमेवम् । विरही इति तु विरहोऽस्यास्तीति मत्वर्थीय इनिप्रत्यये रूपम् ।
5. औणादिके (9-49) असुन्प्रत्यये रहः इति भवति । रहसि भवम्=रहस्यम् इत्यत्र दिगादित्वात् (4-3-54) यत्प्रत्यये रूपमेवम् ।
6. 'दृसनिजनिचरिचटिरहिभ्यो ञुण्' [1-88] इति ञुण्प्रत्यये रूपमेवम् ।

A. 'देवौघे हृतदुःखने रसयति व्याकर्षदेनं क्षितौ ॥' धा. का. 3. 62.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



अस्य धातोः विशेषेण भवन्ति ।

(1387) "रह त्यागे" (X-चुरादिः-1626. सक. सेट्. उभ.)

[1]ज्ञपादिः । धातुममुं क्षीरस्वामि-मैत्रेयौ न पठतः । [2]रहकः-हिका, रिरहयिषकः-षिका ; रहयिता-त्री, रिरहयिषिता-त्री ; इत्यादीनि रूपणि समस्तान्यपि चौरादिकचहयतिवत (515) बोध्यानि । क्विपि-[3]प्ररट्-प्ररड्-प्ररहौ-प्ररहः ; ल्यपि-[4]प्ररहय्य[A], णमुलि-रहम् २ राहम् २ इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1388) "रह त्यागे" (X-चुरादिः-1859. सक. सेट्. उभ.)

कथादिः, अदन्तः, ।

'रहयेत् रहति त्यागे गतौ रंहेस्तु रंहति ।' (श्लो. 195) इति देवः । रहकः-हिका, रिरहयिषकः-षिका ; रहयिता-त्री, रिरहयिषिता-त्री ; इत्यादिकानि समस्तान्यपि रूपाणि चौरादिकचहयतिवत् (515) बोध्यानि । णमुलि रहम् २, इत्येकमेव रूपमिति विशेषः । यत्प्रत्यये-विरह्यः[B] इति ज्ञेयम् ।

(1389) "रहि गतौ" (I-भ्वादिः-732. सक. सेट्. पर.)

'रहयेत रहति त्यागे गतौ रंहेस्तु रंहति ।' (श्लो. 195) इति देवः । रंहकः-हिका, रंहकः-हिका, रिरंहिषकः-षिका, रारंहकः-हिका ; रंहिता-त्री, रंहयिता-त्री, रिरंहिषिता-त्री, रारंहिता-त्री ; इत्यादीनि

---

1. कथादिषु (अदन्तेषु) उत्तरत्र पठिष्यमाणेन रहधातुनैव रूपाणां सिद्धेः ज्ञपादिपञ्चकेषु रहधातोः चुरादिष्वेव पूर्वत्र पाठो मा भूदिति क्षीरस्वाम्यादयः । 'रहयेत्—' इति श्लोकं (195) विवृण्वता पुरुषकारेणापि "—'रह त्यागे' कथादिर्भूवादिश्च" इत्युक्तम् । तेन देवस्याप्ययमेव पक्ष इति ज्ञायते । युक्तं चैतत् । यतः ज्ञपादिषु पाठमस्याभ्युपगच्छन्तोऽपि केषाञ्चिन्मतत्वेनैवाभ्यधुः । न स्वतन्त्रत्वेन । ज्ञपादिपञ्चकान्तर्भावेन पठितॄणां णमुलि दीर्घविकल्प एक एव कृदन्ते फलमस्येति बोध्यम् ।

2. ज्ञपादिषु अस्य धातोः पाठात् मित्त्वेन 'मितां ह्रस्वः' (6-4-92) इति णौ उपधायाः ह्रस्वः । एवमेव ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्तादपि उपधाह्रस्वो बोध्यः ।

3. 'हो ढः' (8-2-31) इति ढत्वे, अवसाने चर्त्वविकल्पे च रूपमेवम् ।

4. ल्यपि, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशे रूपमेवम् ।

A. 'आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥' कि. अ. 9. 4.

B. 'मन्त्री तौ प्ररटय्य पाशवटनैः पापौ विरह्यौ पुरात् ।' धा. का. 3-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रूपाणि सर्वाणि प्रातिस्विकरूपाणि विना भौवादिककम्पतिवत् (166) ज्ञेयानि। शतरि रंहन्-न्ती, शानचि ण्यन्ते-रंहयमाणः, क्विपि-रन्-रंहौ-रंहः, इमानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1390) "रहि भाषार्थः" (X-चुरादिः-1799. सक. सेट्. उभ.)

आस्वदीयः।

रंहकः-हिका, रिरंहयिषकः-षिका; [1]रंहकः-हिका; रिरंहिषकः-षिका, [2]रारंहकः-हिका; रंहयिता-त्री, रिरंहयिषिता-त्री, रंहिता-त्री, रिरंहिषिता, रारंहिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचम्पयतिवत् (499) बोध्यानि।

(1391) "रा दाने (II-अदादिः-1057. सक. अनि. पर.)

'—आदाने' इति केचित्।

'रैशब्दे रायतीतीष्टं, राऽऽदाने राति शब्लुकि॥' (श्लो. 11 इति देवः।

रायकः-यिका, रापकः-पिका, रिरासकः-सिका, रारायकः-यिका;
राता-त्री, रापयिता-त्री, रिरासिता-त्री, रारायिता-त्री;
रान्-न्ती-ती, रापयन्-न्ती, रिरासन्-न्ती; —
रास्यन्-न्ती-ती, रापयिष्यन्-न्ती-ती, रिरासिष्यन्-न्ती-ती; —
व्यतिराणः, रापयमाणः, व्यति रिरासमानः, रारायमाण;
व्यतिरास्यमानः, रापयिष्यमाणः, रिरासिष्यमाणः, रारायिष्यमाणः;
राः-रौ-राः, राप्-रापौ-रापा; — —
रातम्-तः, रापितः, रिरासितः, रारायितः-तवान्;
[3]सुरः-सुरा, [4]धीरः, द्रव्यरः, गोर, मुद्रः, शुभंर, राप, रिरासुः-रिरासयिषुः, राराः;

---

1. अस्य धातोः इदित्त्वेन णिचो वैकल्पिकत्वात् णिजभावपक्षे रूपाणि लिखितानि।
2. अस्य धातोः इदित्त्वेन 'अनिदिताम्—' (6-4-24) इति यङ्निमित्तकः नकारलोपो न भवति।
3. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः। 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः। स्त्रियामदन्तलक्षणे टापि सुरा=मद्यविशेषः।
4. धियं राति=आदत्ते इति धीरः। कर्मण्युपपदे, 'आतोऽनुपसर्गे कः' (3-2-3) इति कर्तरि कप्रत्ययः। एवमेव मुद्रः इत्यादिष्वपि ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रातव्यम्, रापयितव्यम्, रिरासितव्यम्, रारायितव्यम्;
राणीयम्, रापणीयम्, रिरासनीयम्, रारायणीयम्;
रेयम्, राप्यम्, रिरास्यम्, राराय्यम्;
[1]ईषद्राणः-दूराणः-सुराणः; — —
रायमाणः, रापयमाणः, रिरास्यमानः, राराय्यमानणः,
रायः, रापः, रिरासः, रारायः;
रातुम्, रापयितुम्, रिरासितुम्, रारायितुम्;
रतिः, प्ररा, रापणा, रिरासा, राराया;
राणम्, रापणम्, रिरासनम्, रारायणम्;
रात्वा, रापयित्वा, रिरासित्वा, रारायित्वा;
प्रराय, प्रराप्य, प्ररिरासिष्य, प्रराराय्य;
रायम् २, रात्वा २, } रापम् २, रापयित्वा २, } रिरासम् २, रिरासित्वा २, } रारायम् २; रारायित्वा २, }
[2]राका, [3]रात्रिः, [4]राः-रायौ-रायः।

## (1392) "राखृ शोषणालमर्थयोः"

(I-भ्वादिः-122सक. सेट्. आत्म.)

राखकः-खिका, राखकः-खिका, रिराखिषकः-षिका, रराखः-खिका;
राखिता-त्री, राखयिता-त्री, रिराखिताषिता-त्री, राराखिता-त्री;
इत्यादीनि समस्तान्यपि रूवाणि भौवादिकद्राखतिवत् (879) ज्ञेयानि।
[A]राखितः।

---

1. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदेषु खलपवादो युच्। णत्वम्।
2. 'कृदाधारा—' [द. उ. 3-18] इति कन्प्रत्ययः। राका=पूर्णिमारूपकालविशेषः।
3. 'राशदिभ्यां त्रिप्, [द. उ. 1-36] इति त्रिप्प्रत्ययः। रात्री इति तु, 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीषि बोध्यम्।
4. 'रातेर्डैः' [द. उ 2-10] इति डैप्रत्ययः। एजन्तेऽपि, 'कृन्मेजन्तः' (1-1-39) इति नास्याव्ययत्वम्। 'च्विरव्ययम्' [द. उ. 2-13] इत्यनेन सूत्रेण च्विप्रत्ययान्तस्यैवाव्ययत्वमुणादिषु, नान्यस्येति नियमनेन ज्ञापनात्।

A. 'अराखितत्वग्भिरलाखितच्छदैः प्रद्राखिताध्राखिफलैश्च शाखिभिः।' धा. का. 1.18

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1393) "राघृ सामर्थ्ये" (I-भ्वादिः-112. अक. सेट्. आत्म.)
राघकः-घिका, राघकः-घिका, रिराघिषकः-षिका, राराघकः-घिका; राघिता-त्री, राघयिता-त्री, रिराघिषिता-त्री, राराघिता-त्री; इत्यादिकानि समस्तान्यपि रूपाणि भौवादिकद्राखतिवत् (879) ज्ञेयानि। अस्यात्मनेपदत्वात् राघमानः, राघिष्यमाणः, रिराघिषमाणः, रिराघिषिष्यमाणः इति शानचि रूपाणि बोध्यानि। [A]राघितः।

(1394) "राजृ दीप्तौ" (I-भ्वादिः-822. अक. सेट्. उभ.) फणादिः।
राजकः-जिका, राजकः-जिका, रिराजिषकः-षिका, राराजकः-जिका, राजिता-त्री, राजयिता-त्री, रिराजिषिता-त्री, राराजिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककाशतिवत् (186) ज्ञेयानि।
[1]रराजिवान्-रेजिवान्, [2]सम्राट्, [3]विश्वाराट्-राट्, चेदिराट्, [4]राष्टिः, [5]राजिः, [6]राजानकः, [7]राजा, [8]राष्ट्रम्-राष्ट्री, इतीमान्यस्माद् भवन्तीति बोध्यम्।

---

1. कर्तरि लिटः क्वसौ, 'फणां च सप्तानाम्' (6-4-125) इत्येत्वाभ्यासलोपविकल्पः। 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमः।
2. 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (3-2-61) इति 'सम्' इत्युपसर्गपूर्वकादस्मात् क्विप्। 'मोऽनुस्वारः' (8-3-23) इत्यस्यापवादतया,, 'मो राजि समः क्वौ' (8-2-25) इति प्रतिपदविहितो मकारः।
3. 'विश्वाराट्' इत्यत्र 'अन्येभ्योऽपि दृश्यते' (3-2-178) इति क्विप्। 'विश्वस्य वसुराटोः' (6-3-128) इति दीर्घः।
4. 'क्तिन् आबादिभ्यः—' (वा. 3-3-94) इति बाहुलकात् क्तिन्। हलन्तलक्षणाकारप्रत्ययस्यापवादः। 'तितुत्र—' (7-2-9) इतीण्निषेधे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (8-2-36) इति झलि परतो. जकारस्य षकारः।
5. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इतीक्प्रत्यये रूपम्। राजते इति राजिः।
6. बाहुलकात् 'आनकः शीङ्भियः' (द. उ. 3-26) इत्यानकप्रत्यये रूपम्। अत्यर्थं राजते इति राजानकः। अत्र सूत्रे राजधातोरसंग्रहेऽपि, "प्राक् प्रत्ययनिर्देशः" (दशपादुणादिवृत्तिः 10-2) इत्यसकृदुक्तत्वादत्रापि राजतेरानकप्रत्यय इति बोध्यम्।
7. 'कनिन् युवृषितक्षिराजि—' (द. उ. 6-51) इति कनिन्प्रत्ययः। 'सर्वनामस्थाने चासम्बुद्धौ, (6-4-8) इति दीर्घे, 'न लोपः प्रातिपदिकान्तस्य' (8-2-7) इति नकारलोपः।
8. ष्ट्रन्प्रत्यये रूपम्। 'तितुत्र—' (7-2-9) इतीण्निषेधे षत्वम्। स्त्रियाम् षित्वात् ङीष्।
A. 'प्रवर्द्धमानस्य च तस्य सत्वरं विमर्द्धनस्याधिकराघितात्मनः।' धा.का. 1-16.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



**(1395) "राध संसिद्धौ"** (IV-दिवादि:-1180. अक. अनि. पर.) [अ]

'राध्नोति संसिद्ध्यर्थे श्नौ, राध्येद् वृद्धावकर्मकात् ।' (श्लो. 122) इति **देवः** ।

"अस्य तु सिद्धिद्रोहदैवपर्यालोचनादयोऽर्थाः ।" इति **धा. का. व्याख्या** (2-63) ।

राधकः-धिका, राधकः-धिका, रिरात्सकः-त्सिका, राराधकः-धिका ;
राद्धा-राद्ध्री, राधयिता-त्री, रिरात्सिता-त्री, राराधिता-त्री ;
इतीमानि सर्वाण्यपि रूपाणि दैवादिकक्षुध्यतिवत् (315) बोध्यानि ।
देवदत्ताय [1]राध्यन्-न्ती-ती, [2]राध्यन् ओदनः स्वयमेव, [3]राद्धिः, इतीमान्यस्माद् भवन्ति ।

---

1. **'राधोऽकर्मकाद् वृद्धावेव'** (ग. सू. दिवादिषु) इति श्यन् । स्त्रियाम्, 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः । **'राधीक्ष्योर्यस्य विप्रश्नः'** (1-4-39) इति चतुर्थी । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयन् इत्यर्थः ।
2. कर्मकर्तरि प्रयोगः । अत्र **'राध्यतेर्विक्लित्तिवचनत्वात्....'** इति **भाष्यप्रदीपः** । तेनात्र सामान्यतः सिद्ध्यर्थकत्वेऽपि सिद्धिविशेषरूपपाकोऽपि धातूनामनेकार्थकत्वाद् बोध्यः ।
3. हलन्तलक्षणाकारप्रत्ययापवादः 'क्तिन् आबादिभ्यः....' (वा. 3-3-94) इति क्तिन् ।

[अ] **'राधोऽकर्मकाद् वृद्धावेव'** (ग. सू.) इति दिवादिषु पठ्यते । अस्यायमर्थः- एवकारो भिन्नक्रमः । अस्मादकर्मकादेव श्यन् । वृद्धिग्रहणं तु उदाहरणप्रदर्शनार्थम् यथा वृद्धावकर्मकः, एवमकर्मकेषु सर्वत्राप्यर्थेषु श्यनं लभतेऽयमिति । ततश्च,
'वृद्धिक्षय-भय-जीवित-मरणं लज्जा-सत्ता-स्थिति-जागरणम् ।
शयन-क्रीडा-रुचि-दीप्त्यर्थं धातुगणं तमकर्मकमाहुः॥' इत्युपात्तानामर्थानाम् वृद्धिशब्द उपलक्षक इति भावः । एवञ्च, **'राध्येद्** वृद्धावकर्मकात् ।' इति **देववचने** (श्लो 1.22) वृद्धिग्रहणं तु अकर्मकक्रियोदाहरणमात्रमिति **पुरुषकारे** व्यक्तम् । **धातुकाव्यव्याख्यायां** तु (2-63) **एवकारस्य इवार्थकत्वमाश्रित्य**, 'वृद्धावेव= वृद्ध्यर्थ इव ।' इति विवृतम् । **काश्यपस्तु एवकारस्य** यथाश्रुतान्वयमिच्छन् वृद्ध्यर्थ एव श्यन् इत्यभ्युपगतवानिति **माधवधातुवृत्तितो** ज्ञायते । सिद्ध्यर्थे **'राध्यत्योदनः** स्वयमेव' इति **भाष्य** (3-1-87) प्रयोगात्, 'देवदत्ताय **राध्यति'** इति दैवपर्यालोचनार्थे **काशिकायां** (1-4-37) प्रयुक्तत्वात्, '—यन्मह्य**मपराध्यति** ।' (शिशुपालवधे 2-11) इति द्रोहार्थे **माघ**प्रयोगाच्च **काश्यपोक्ति**र्न समीचीना ; उपात्तस्थलेषु सर्वत्राकर्मकत्वे पति वृद्ध्यर्थत्वाभावात् । **विस्तरस्तु अन्यत्र** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1396) "राध संसिद्धौ" (V-स्वादिः-1262. सक. अनि. पर.)

'राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात्।' (श्लो. 122) इति देवः।

राधकः-धिका, राधकः-धिका, [1]आरिरात्सकः-प्रतिरित्सकः-त्सिका, राराधकः-धिका ; राद्धा-राद्ध्री, राधयिता-त्री, आरिरात्सिता-त्री, राराधिता-त्री ; [2]राध्नुवन्-ती, राधयन्-न्ती, आरिरात्सन्-प्रतिरित्सन्-न्ती ; — इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्षुध्यतिवत् (315) ज्ञेयानि। [3]अपरेधिवान्।

(1397) "रास्ट शब्दे" (I-भ्वादिः-626. अक. सेट्. आत्म.)

रासकः-सिका, रासकः-सिका, रिरासिषकः-षिका, रारासकः-सिका ; रासिता-त्री, रासयिता-त्री, रिरासिषिता-त्री, रारासिता-त्री ; इत्यादिकानि समस्तान्यपि रूपाणि भौवादिककाशतिवत् (188) बोध्यानि। घञि-[4]रासः, [5]रासभः इमे रूपे विशेषेण भवतः।

(1398) "रि हिंसायाम्" (V-स्वादिः-1275. सक. अनि. पर.)

अयं धातुः क्षीरतरङ्गिण्यां न दृश्यते।

रायकः-यिका, रायकः-यिका, रिरीषकः-षिका, रेरीयकः-यिका ; रेता-त्री, राययिता-त्री, रिरीषिता-त्री, रेरीयिता-त्री ;

---

1. संसिद्ध्यर्थे रूपमेवम्। धातूनामनेकार्थत्वात् हिंसार्थे तु 'राधो हिंसायां सनीस् वाच्यः' (वा. 7-4-54) इति सनि इस्। 'अत्र लोपोऽभ्यासस्य' (7-4-53) इत्यभ्यासलोपः। 'स्कोः—' (8-2-29) इति सकारस्य लोपः। इदमेव वार्तिकं (वा. 7-4-54) धातोरस्य हिंसार्थत्वे ज्ञापकम्। हिंसार्थे सकर्मकोऽयं धातुः।

2. धातोः सकर्मकत्वे 'स्वादिभ्यः—' (3-1-73) इति श्नुः। अकर्मकत्वे तु 'राधोऽकर्मकाद् वृद्धावेव' (ग. सू. दिवादौ) इति श्यनेव।

3. कर्तरि लिटः क्वसौ, 'राधो हिंसायाम्' (6-4-123) इति एत्वाभ्यासलोपौ। अत्रापि धातोर्हिंसार्थकत्वस्यानूद्यमानत्वात् धातोरनेकार्थत्वमिति ज्ञेयम्। हिंसाभिन्नार्थेषु तु रराधिवान् इति क्वसुप्रत्यये रूपमिति ज्ञेयम्।

4. 'हलश्च' (3-3-121) इति संज्ञायां घञि रूपमेवम्। रासः=क्रीडाविशेषः।

5. 'रासिवल्लिभ्यां च' (द. उ. 7. 21) इति अभच्प्रत्यये रूपमेवम्। अत्र 'रासृ दीप्तौ' इति दशपाद्युणादिवृत्तिपाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादिकानि सर्वाण्यपि रूपाणि तौदादिकपियतिवत् (991) ज्ञेयानि। शतरि-[1]रिण्वन्-ती, [2]व्यतिरिण्वन्-ती, इति विशेषः।

(1399) " रि गतौ " (VI-तुदादिः-1404. सक. अनि. पर.)

रायकः-यिका, रायकः-यिका, रिरीषकः-षिका, रेरीयकः-यिका ;
रेता-त्री, राययिता-त्री, रिरीषिता-त्री, रेरीयिता-त्री ;
इत्यादिकानि सर्वाण्यपि रूपाणि तौदादिकपियतिवत् (991) ज्ञेयानि। शतरि-रियन्[A]-न्ती-ती, इति विशेषः।

(1400) " रिख गत्यर्थः " (I-भ्वादिः-155. सक. सेट्. पर.)

'द्रमिडास्तु रिख (खि) मपि पठन्ति।' इति मा. धा. वृत्त्यादिषु दर्शनादयं लिख्यते।

रेखकः-खिका, रेखकः-खिका, रिरिखिषकः-रिरेखिषकः-षिका, रेरिखकः-खिका;
रेखिता-त्री, रेखयिता-त्री, रिरिखिषिता-रिरेखिषिता-त्री, रेरिखिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिककिटतिवत् (190) बोध्यानि। रेखा[3]।

(1401) " रिखि गत्यर्थः " (I-भ्वादिः-155. सक. सेट्. पर.)

'द्रमिडानां रिखिरपि। रिङ्खति, रिङ्खणम्=स्खलनम्।' इति क्षीरतरङ्गिण्यां दर्शनात्, धातुकाव्ये (1-19) उदाहरणाच्चायं लिख्यते।
रिङ्खकः-ङ्खिका, रिङ्खकः-खिका, रिरिङ्खिषकः-षिका, रेरिङ्खकः-ङ्खिका ;
रिङ्खिता-त्री, रिङ्खयिता-त्री, रिरिङ्खिषिता-त्री, रेरिङ्खिता-त्री ;
इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि। क्तप्रत्यये-रिङ्खितः[B] इति।

---

1. अस्य धातोः स्वादित्वात्, श्नुप्रत्यये, णत्वे च रूपमेवम्।
2. 'न गतिहिंसार्थेभ्यः' (1-3-87) इति शानचो निषेधात् कर्मव्यतीहारेऽपि परस्मैपदमेव।
3. स्त्रियाम्, भिदादि (3-3-104) पाठात् अङि रूपमेवम्।
A. 'व्यापारेऽत्र तदामरानपि रियन्नाशाः पियन्नाधित....।' धा. का. 2-83.
B. 'रखच्छशं रङ्खितरङ्कु रिङ्खितद्विपं लखत्केसरिलङ्खदारवम्॥' ध. का. 1.19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1402) " रिगि गत्यर्थः " (I-भ्वादिः-154. सक. सेट्. पर.)
रिङ्गकः-ङ्गिका, रिङ्गकः-ङ्गिका, रिरिङ्गिषकः-षिका, रेरिङ्गकः-ङ्गिका; रिङ्गिता-त्री, रिङ्गयिता-त्री, रिरिङ्गिषिता-त्री, रेरिङ्गिता-त्री; इत्यादीनि रूपाणि सर्वाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि। खलि ईषद्रिङ्गः-दूरिङ्गः-सुरिङ्गः; शतरि-रिङ्गन्-न्ती इति विशेषः।

(1403) " रिच वियोजनसंपर्चनयोः "
(X-चुरादिः-1817. सक. सेट्. उभ.) आधृषीयः।

'–वियोजनसंयमनयोः इति मुकुटः' इति अमरसुधा (1-17।)। सम्पर्चनम्= मिश्रीकरणम्। अभिधानवैचित्र्यात् धातोरस्य परस्परविरुद्धार्थकत्वम्।
'रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने, वियोजने।
सम्पर्चने च यौ वा णौ रेचयत्यपि रेचति ॥' (श्लो. 52) इति देवः।
रेचकः-चिका, रिरेचयिषकः-षिका, रेचकः-चिका, रिरिक्षकः-क्षिका, रेरिचकः-चिका; रेचयिता-त्री, रिरेचयिषिता-त्री, रेचिता-त्री, रिरिक्षिता-त्री, रेरिचिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्पयतिवत् (554) बोध्यानि। आधृषीयत्वादस्य णिज्विकल्पः। णिजभावपक्षे 'पचिं वचिं विचिरिचि-रञ्जिपृच्छतीन्—' (व्याघ्रभूतिकारिका 7-2-10) इत्यनिट्कारिकासु पाठादनिट्त्वं बोध्यम्। अत्र 'रिचि—' इति रौधादिकस्य, चुरादिषु पठितस्य णिजभावपक्षे औत्सर्गिकशब्विकरणकस्य च सामान्येन ग्रहणम्। णिजभावपक्षे निष्ठायाम्—[A]विरिक्तः।

(1404) " रिचिर् विरेचने " (VII-रुधादिः-1441. अक. अनि. उभ.)
'विरेचनम्=निःसारणम्।' इति क्षीरस्वामी।
'रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने, वियोजने।
सम्पर्चने च यौ वा णौ रेचयत्यपि रेचति ॥' (श्लो. 52) इति देवः।
रेचकः-चिका, रेचकः-चिका, [1]रिरिक्षकः-क्षिका, रेरिचकः-चिका; रेक्ता-रेक्त्री, रेचयिता-त्री, रिरिक्षिता-त्री, रेरिचिता-त्री;

---

1. अनिट्कारिकासु (काशिका 7-2-10) पाठादस्यानिट्त्वम्। 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'चोः कुः' (8-2-30) इति कुत्वे षत्वे च रूपम्।

A. 'अजरद्व्रषवद् विरिक्तपीडः पुनरभ्येत्य विशिष्टचित्ततांऽपि।' धा. का. 3-49.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रिञ्चन्[A]-ती, रेचयन्-न्ती, रिरिक्षन्-न्ती ; —
रेक्ष्यन्-न्ती-ती, रेचयिष्यन्-न्ती-ती, रिरिक्षिष्यन्-न्ती-ती ; —
रिञ्चानः, रेचयमानः, रिरिक्षमाणः, रेरिच्यमानः ;
रेक्ष्यमाणः, रेचयिष्यमाणः, रिरिक्षिष्यमाणः, रेरिचिष्यमाणः ;
[2]रेक्यम्, रेकः-अतिरेकः-व्यतिरेकः-उद्रेकः, [3]विरेचनम्, [4]रिक्तः,
[5]विरिञ्चः-विरिञ्चिः-विरिचिनः, [6]रिक्थम्, [7]रेक्णः, इत्यादीनि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना रौधादिकभुनक्तिवत् (1162) बोध्यानि ।

## (1405) " रिफ कत्थनयुद्धनिन्दाहिंसादानेषु "

### (VI-तुदादिः-1306. सक. सेट्. पर.)

'ऋफ—' इति क्षीरस्वामी । " ....' रिह इति द्रमिडाः—इति स्वामी । अनिट्कारिकासु (काशिका 7-2-10) वामनश्च—'रिहिलुही धातुषु न पठ्येते । कैश्चिदभ्युपगम्येते' इति । अत्र न्यासे—'कैश्चिदिति । आपिशलिप्रभृतिभिः ।' इति । तस्मात् तावपि स्त एव । प्रयुज्यते च—'शिशुं न विप्रा मतिभी रिहन्ति ।' इति ।" इति माधवधातुवृत्तिः । अत्रोपात्तः स्वामी न क्षीरस्वामी, अपितु अन्य इति ज्ञेयम् ।

---

1. शतरि, विकरणप्रत्यये श्नमि, 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपे, नकारस्य अनुस्वारे परसवर्णे च रूपमेवम् ।
2. निष्ठायामनिट्त्वात्, ण्यति घञि च 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम् ।
3. **विरेचनम्** = रक्तस्रावरूपो व्याधिविशेषः । 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108) इत्यत्र बहुलग्रहणात् व्याधिवाचकत्वेऽपि ल्युडेवात्र ।
4. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां कर्तरि क्तप्रत्ययः । **रिक्तः** = निर्धनः ।
5. "**विरिञ्चः—विरिञ्चिः—विरिचिनः**, एते पृषोदरादयः (6-3-109) ।" इति मा. धा. वृत्तिः ।
6. 'पातृतुदिवचिरिचि—' (द. उ. 6-32) इति थक्प्रत्ययः । कित्वान्न गुणः । रिच्यते तदिति **रिक्थम्** = गृहमूलधनम् । गोत्रजद्रव्यमिति केचित् ।
7. 'रिचेर्धने घिच्च' (द. उ. 9.59) इति असुन्प्रत्ययः । घित्वात् कुत्वम् । **रेक्णः** = धनम् । '**रेकः**—' इति दशपादयुणादिवृत्तौ पूर्वसूत्रान्नुममनुवर्त्योदाहृतं दृश्यते । तत्तु नरवबोधिन्यादिषु खण्डितम् ।

A. '.....प्रच्छिन्नसंशयमतिर्मुदमाशु रिञ्चन् ।' धा. का. 3-1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रेफकः-फिका, रेफकः-फिका, रिरेफिषकः-रिरिफिषकः-षिका, रेरिफकः-फिका; रेफिता-त्री, रेफयिता-त्री, रिरेफिषिता-रिरिफिषिता-त्री, रेरिफिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिक**किलति**वत् (193) बोद्धयानि। [1]रेफित्वा। [2]रेफः।

(1406) "**रिवि गत्यर्थः**" (I-भ्वादिः-595. सक. सेट्. पर.)

रिण्वकः-रिण्विका, रिण्वकः-ण्विका, रिरिण्विषकः-षिका, रेरिण्वकः-ण्विका; रिण्विता-त्री, रिण्वयिता-त्री, रिरिण्विषिता-त्री, रेरिण्विता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**जिन्वति**वत् (604) बोध्यानि। ल्युटि [A]रिण्वनम्।

(1407) "**रिश हिंसायाम्**" (VI-तुदादिः-1420. सक. अनि. पर.)

'—**रिंशि** रुशिं क्रोशतिमष्टमं विशिम्।' (व्याघ्रभूतिकारिका 7-2-10) इति वचनाद् धातुरयमनिट्।

[B]रेशकः-शिका, रेशकः-शिका, रिरिक्षकः-क्षिका, रेरिशकः-शिका; रेष्टा-रेष्ट्री, रेशयिता-त्री, रिरिक्षिता-त्री, रेरिशिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिक**खिद्यति**वत् (349) ज्ञेयानि।

(1408) "**रिष हिंसार्थः**" (I-भ्वादिः-694. सक. सेट्. पर.)

रेषकः-षिका, रेषकः-षिका, [3]रिरिषिषकः-रिरेषिषकः-षिका, रेरिषकः-षिका;

---

1. अत्र, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् रूपमेकमेवेति **माधवधातुवृत्तिः**। 'रलो व्युपधात् हलादेः संश्च' (1-2-26) इति कित्त्वविकल्पे तु **रिफित्वा रेफित्वा** इति रूपद्वयं भवेत्, तत्तु 'नोपधात् थफान्ताद् वा' (1-2-23) इत्यत्र नोपधादेवेति नियमाश्रयणात् नेति **माधवाशयः**। वस्तुतस्तु 'प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते' (परि.64) इति न्यायेन इकारोकारोपधधातुषु विषये परत्वात् अपवादत्वाच्च 'रलो व्युपधात्—' (1-2-26) इत्यस्य प्रवृत्तेरनिवार्यतया, **रिफित्वा** इति पाक्षिकरूपस्य सिद्ध्यर्थं च यन्नन्ते इव कित्त्वविकल्प एव न्याय्यः। नियमाश्रयणे च न किञ्चिद् बीजं दृश्यते। विस्तरस्त्वन्यत्रेत्यत्रालम्।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञ्। **रेफः**= अधमः। धात्वर्थोऽत्र निन्दा।
3. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सनः कित्त्वविकल्पः। तेन रूपद्वयम्।

A. 'जिन्वन्तमुर्वीं निज**रिण्वनैः** सतां रण्वन्तमन्तर्भवधन्वपादपम्।' धा. का. 1.76.

B. 'रोषच्छुप्तधियाऽथ रोष्टुमभितो योधान् द्विषद्रे**शकान्**—' धा. का. 3-83.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रेषिता-त्री-[A]रेष्टा-रेष्ट्री, रेषयिता-त्री, रिरिषिषिता-रिरेषिषिता-त्री, रेरिषिता-त्री ;
रेषन्-न्ती, रेषयन्-न्ती, रिरिषिषन्-रिरेषिषन्-न्ती ;—
रेषिष्यन्-न्ती-ती, रेषयिष्यन्-न्ती-ती, रिरिषिषिष्यन्-रिरेषिषिष्यन्-न्ती-ती ;—
—रेषयमाणः, रेषयिष्यमाणः, रेरिष्यमाणः, रेरिषिष्यमाणः ;
रिट्-रिड्-रिषौ-रिषः ; — — —
[2]रिष्टम्-ष्टः, रेषितः, रिरिषिषितः-रिरेषिषितः, रेरिषितः-तवान् ;
रेषः, [3]रेषणः, [4]अरिष्टः, [5]रेट्-रेषौ-रेषः, रेषः, रिषिषिषुः-रिरेषिषुः, रेरेषः ;
रेषितव्यम्-रेष्टव्यम्, रेषयितव्यम्, रिरिषिषितव्यम्-रिरेषिषितव्यम्, रेरिषितव्यम् ;
रेषणीयम्, रेषणीयम्, रिरिषिषणीयम्-रिरेषिषणीयम्, रेरिषणीयम् ;
रेष्यम्, रेष्यम्, रिरिषिष्यम्-रिरेषिष्यम्, रेरिष्यम् ;
ईषद्रेषः-दूरेषः-सुरेषः ; — — —
रिष्यमाणः, रेष्यमाणः, रिरिषिष्यमाणः-रिरेषिष्यमाणः, रेरिष्यमाणः ;
रेषः, रेषः, रिरिषिषः-रिरेषिषः, रेरिषः ;
रेषितुम्-रेष्टुम्, रेषयितुम्, रिरिषिषितुम्-रिरेषिषितुम्, रेरिषितुम् ;
रिष्टिः, रेषणा, रिरिषिषा-रिरेषिषा, रेरिषा ;
रेषणम्, रेषणम्, रिरिषिषणम्-रिरेषिषणम्, रेरिषणम् ;
[6]रिषित्वा-रेषित्वा-रिष्ट्वा, रेषयित्वा, रिरिषिषित्वा-रिरेषिषित्वा, रेरिषित्वा ;
प्ररिष्य, प्ररेष्य, प्ररिरिषिष्य-प्ररिरेषिष्य, प्ररेरिष्य ;

---

1. 'तीषसहलुभरुषरिषः' (7-2-48) इति तकारादावार्धधातुके इड्विकल्पः । इडभावपक्षे 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन टकारः ।
2. 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधः ।
3. बाहुलकेन नन्द्यादित्वकल्पनात् कर्तरि ल्युप्रत्ययः ।
4. 'क्तिच्क्तौ च—' (3-3-174) इति संज्ञायां क्तः । अरिष्टः=अनिष्टादिकम् ।
5. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति विच् । गुणः ।
6. 'रलो व्युपधात्—' (1-2-26) इति कित्वविकल्पः । 'तीषसहलुभरुषरिषः' (7-2-48) इति इड्विकल्पश्च । तेनात्र रूपत्रयम् ।

A. 'रेष्टारं रेषितुं व्यास्यत् रोष्टाऽक्षः शत्रुसंहतीः ॥' भ. का. 9.31.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रेषम् २,<br>
रिषित्वा २, } रेषम् २ } रिरिषिषम् २-रिरेषिषम् २, } रेरिषम् २ ; }<br>
रेषित्वा २. } रेषयित्वा २ } रिरिषिषित्वा २-रिरेषिषित्वा २, } रेरिषित्वा २. }<br>
रिष्ट्वा २,

(1409) **" रिष हिंसायाम् "** (IV-दिवादिः-1231. सक. सेट्. पर.) [अ]

रेषकः-षिका, रेषकः-षिका, रिरिषिषकः-रिरेषिषकः-षिका, रेरिषकः-षिका ; [1]रेषिता-रेष्टा-ष्ट्री, रेषयिता-त्री, रिरिषिषिता-रिरेषिषिता-त्री, रेरिषिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिकरेषतिवत् (1408) बोध्यानि। शतरि-रिष्यन्-न्ती-ती, इति विशेषः ।

(1410) **" री गतिरेषणयोः "** (IX-क्र्यादिः-1500. सक. अनि. पर.)

प्वादिः, ल्वादिश्च ।

'स्रवणे रीयते रीङो, रिणाति गतिरेषयोः ॥' (श्लो. 18) इति **देवः** । '**रेषणम्**=[2]हिंसा' इति **क्षीरस्वामी** । "**रेषणम्**=वृकशब्दः । यदाह **यादवप्रकाशः**—'वृकस्य रेषणं रेषा, हेषा हेषा च वाजिनाम् । बृंहितं करिणां शब्दः—॥' इति ।" इति **पुरुषकारः**। गतिहिंसार्थयोः सकर्मकः, वृकरवार्थकत्वे तु अकर्मक इति बोध्यम् । 'श्रवणे' इत्यपि **केचित्** । '—**गतिशोषणयोः**' इति **न्यासे** (7-3-36) पाठः ।

---

1. '**तीषसहलुभरुषरिषः**' (7-2-48) इत्यत्र विशेषाभावात् दैवादिकस्यास्यापि ग्रहणम् । तेनेड्विकल्पः । 'यथालक्षणमप्रयुक्ते' इति **भाष्य**न्यायमाश्रित्यैवमुक्तम् । 'यथाऽलक्षणमप्रयुक्ते' इति **भाष्य**पाठाश्रयणे तु (अप्रयुक्तस्थले लक्षणस्याभाव एवेत्यधुनाऽर्थः ।) इड्विकल्पाभाव एवेति बोध्यम् ।

2. यदा तु **रेषण**शब्दस्य हिंसा अर्थः, तदानीं '**रिष हिंसायाम्**' इति भौवादिकधातोर्निष्पन्नं पदमेतदिति बोध्यम् । यदि वृकशब्दोऽर्थः—तर्हि '**रेषृ अव्यक्ते शब्दे**' इति भौवादिकधातोर्निष्पन्नं तदिति भेदोऽत्रानुसन्धेयः ।

[अ] "इह **केचित्** '**रिष हिंसायां च**' इति पठन्ति । 'न **रिष्यति** न व्यथते' इत्यादयश्च प्रयोगा दृश्यन्ते । **आत्रेयमैत्रेयादयस्तु** न पेठुः" इति **मा. धा. वृत्तिः** । **क्षीरतरङ्गिण्याम्** अयं धातुः दिवादिषु न दृश्यते । परंतु भ्वादौ 'दिवादौ **रिष्यति** ।' इति **क्षीरस्वामिनैवोक्तम्** । तेन दिवादिषु पठितोऽप्यधुना भ्रष्टः स्यादिति भाति । **सि. कौमुद्यादिषु** तु स्वतन्त्रेण पठ्यते ।

141

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रायकः-यिका, [1]रेपकः-पिका, रिरीषकः-षिका, रेरीयकः-यिका ; रेता-रेत्री, रेपयिता-त्री, रिरीषिता-त्री, रेरीयिता-त्री ; इत्यादिकानि समस्तान्यपि रूपाणि क्रैयादिकप्लिनातिवत् (1081) बोध्यानि । [2]व्यतिरिणानः, व्यतिरिणन्-ती, [3]रयः, [4]रीतिः, रीणिः, इतीमान्यस्माद्भवन्तीति विशेषः ।

(1411) "रीङ् स्रवणे" (IV-दिवादिः-1138. अक. अनि. आत्म.)

स्वादिः ।

'स्रवणे रीयते रीङो रिणाति गतिरेषयोः ॥' (श्लो. 18) इति देवः ।

'—श्रवणेऽपि' इति क्वचित् पाठः ।

रायकः-यिका, [5]रेपकः-पिका, रिरीषकः-षिका, रेरीयकः-यिका ; रेता-रेत्री, रेपयिता-त्री, रिरीषिता-त्री, रेरीयिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि क्रैयादिकप्लिनातिवत् (1081) ज्ञेयानि । शानचि [6]रीयमाणः, [7]रीणः-रीणवान्, क्तिनि—रीतिः,

---

1. ण्यन्ते सर्वत्र, 'अर्तिह्रीव्लीरीक्नूयी—' (7-3-36) इत्यादिना पुगागमः । 'पुगन्तलघूपधस्य च' (7-3-86) इति गुणः ।
2. हिंसागत्यर्थयोः 'न गतिहिंसार्थेभ्यः' (1-3-15) इति आत्मनेपदनिषेधात् कर्मव्यतीहारेऽपि व्यतिरिणन् इति शतैव । शब्दार्थकत्वे तु 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानचि व्यतिरिणानः इति रूपमिति बोध्यम् ।
3. भावे 'एरच्' (3-3-56) इत्यचि रूपमेवम् । अभिधानस्वाभाव्याद् गत्यर्थकस्यास्य वेगे वृत्तिरत्रेति बोध्यम् । 'कथं पुनरन्यो नामान्यस्यार्थे वर्तते ? कथम् ऊहिर्विद्यर्थे वर्तते! बह्वर्था अपि धातवो भवन्ति...' इति भाष्य (3-1-131)-वाक्यमिहावधेयम् ।
4. क्तिचि रूपमेवम् । क्तिनि तु 'ॠकारल्वादिभ्यः क्तिन् निष्ठावद् वाच्यः' (वा. 8-2-44) इति वचनात् रीणिः इति नत्वे णत्वे च भवति ।
5. निरनुबन्धकपरिभाषानाश्रयणेनात्रापि, 'अर्तिह्रीव्लीरी—' (7-3-36) इति पुगागमः । 'पुगन्त—' (7-3-86) इति गुणः । तदुक्तम् न्यासे, 'तेन निरनुबन्धकपरिभाषा नापेक्ष्यत इति रीङोऽपि ग्रहणं भवति ।' (7-3-36) इति ।
6. शानचि दिवादित्वात् श्यन् । तस्य ङिद्वद्भावेन गुणो न ।
7. 'स्वादय ओदितः' (ग. सू. दिवादौ) इति धातोरस्य ओदित्त्वमातिदेशिकम् । तेन, 'ओदितश्च' (8-2-45) इति निष्ठानत्वम् । णत्वम् । "अत्रात्रेयः । 'अर्थनिर्देशे श्रृणोतेरयं प्रयोग इति केचित् ।' तथा च रीणशब्दः कर्णपर्यायः कथितः ।" इति माधवधातुवृत्तौ दृश्यते । श्रवणार्थकत्वमस्य धातोः, तत्रापि कर्णपर्यायस्य रीणशब्दस्य प्रयोगश्चास्यान्वेष्टव्यः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रेवती, [2]रेणुः, [3]रेतः इतीमानि रूपाण्यस्मात् भवन्तीति विशेषः ।

(1412) "रु शब्दे" (II-अदादिः-1034. अक. सेट्. पर.)

'—रवते रौति शब्दने ॥' (श्लो. 23) इति देवः ।

रावकः-विका, रावकः-विका, [4]रुरूषकः-[5]रिरावयिषकः-षिका, रोरूयकः-यिका ; रविता-त्री, रावयिता-त्री, रुरूषिता-रिरावयिषिता-त्री, रोरूयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकक्ष्णौतिवत् (323) बोद्धव्यानि । [6]रवणः, [7]संरावः,[A] [8]रवः, [9]रावः, [B]अल्परावः, मञ्जुरावः, [10]आरावः-आरवः, [11]मयूरः,

---

1. कर्तरि विच्प्रत्यये, तदन्तात् मतुपि, उगित्त्वेन स्त्रियां ङीपि च **रेवती** इति सिद्ध्यति ।
2. 'अजिवृरीभ्यो निच्च' [द. उ. 1-148] इति णुप्रत्ययः ।
3. 'स्रुरीभ्यां तुट् च' [द. उ. 9-62] इति असुन्प्रत्यये तुगागमे च रूपम् ।
4. धातोरस्य सेट्त्वेऽपि, 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः । 'इको झल्' (1-2-9) इति झलादिसनः कित्त्वम् । 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । षत्वम् । एवं सन्नन्ते सर्वत्र प्रक्रियोह्या ।
5. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासस्येकारः ।
6. तच्छीलादिषु कर्तृषु, 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति युच् । णत्वम् । **क्षीरस्वामी** तु औणादिके 'सुयुरुवृञो युच्' [द. उ. 5-20] इति युच्प्रत्यये निष्पादितवान् ।
7. 'उपसर्गे रुवः' (3-3-22) इति घञ् । उवर्णान्तत्वप्रयुक्तापोऽपवादः ।
8. अनुपसृष्टात् (शुद्धात्) 'ऋदोरप्' (3-3-57) इति अप्प्रत्ययः ।
9. 'बाहुलकाद् घञपि, इत्यात्रेयः । रावः ।' इति **माधवधातुवृत्तिः** । "— 'कृत्यल्युटो बहुलम्' (3-3-113) इत्यनेन घञादयः । बहुलं व्यतिकीर्यन्ते मञ्जुरावादयस्तथा ॥" इति **प्रक्रियासर्वस्व**श्लोक इहावधेयः ।
10. 'विभाषाऽऽङि रुप्लुवोः' (3-3-50) इति घञ्विकल्पः । तेन पक्षेऽप्प्रत्ययः ।
11. मह्यां रौतीति **मयूरः** । 'अन्येष्वपि दृश्यते' (3-2-101) इति डप्रत्यये पृषोदरादिषु (6-3-109) पाठात् महीशब्दस्य 'मयू' इत्यादेशे च रूपमेवम् ।

A. 'सजलाम्भोदसंरावं हनुमन्तं सहाङ्गदम् ।' भ. का. 7.35.

B. 'केऽप्यल्परावं शुशुवुः खलेषु क्षुरक्ष्णुतात्मानममुं स्नुताम्नाः ।' धा. का. 2.47.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[A]रुरूषुः, [1]ध्वाङ्क्षरावी, [B]मण्डूकरावी, [2]सांराविणम्[C], [3]रोरूयः [4]लोकरावणः, [5]रविः, [6]रुरुः, [7]पुरूरवाः इतीमान्यस्माद् भवन्ति ।

(1413) "रुङ् गतिरेषणयोः" (I-भ्वादिः-959.सक.अनि.आत्म.)[अ]
'—रवते रौति [8]शब्दने ॥' (श्लो. 23) इति देवः ।
रावकः-विका, रावकः-विका, रुरूषकः-रिरावयिषकः-षिका, रोरूयकः-यिका ;

---

1. ध्वाङ्क्ष इव रौतीति ध्वाङ्क्षरावी । 'कर्तर्युपमाने' (3-2-79) इति णिनिः ।
2. सम्पूर्वकादस्मात्, 'अभिविधौ भाव इनुण्' (3-3-44) इति इनुण्प्रत्यये, 'अण् इनुणः' (5-4-15) इति स्वार्थेऽण्प्रत्यये, 'इन् अण्यनपत्ये' (6-4-164) इति प्रकृतिभावे च सांराविणम् इति भवति ।
3. 'उदन्तात् यङो लुङ् नेति केचित् ।' इति प्रक्रियाकौमुदी । तेनात्र यङन्तात् पचाद्यचि रूपमेवं तेषां मते । वस्तुतस्तु एवमङ्गीकरणे नियामकाभावात्, यङोऽनैमित्तिकलुक एव भाष्यादिषु 'यङोऽचि च' (2-4-74) इत्यत्राभ्युपगतत्वात् चिन्त्यमिदमिति रोरुवः इत्येव न्याय्यमिति च बोध्यम् ।
4. लोकान् रावयतीति लोकरावणः । नन्द्यादित्वात् (3-1-134) ण्यन्तात् कर्तरि ल्युः । 'रावणो लोकरावणः ।' इत्यादयः रामायणप्रयोगाः अत्रानुसन्धेयाः ।
5. 'इन्' (द. उ. 1.46) इतीन्प्रत्ययः । रौतीति, रूयते इति वा रविः=भानुः ।
6. 'रुशातिभ्यां क्रुन्' (द. उ. 1.159) इति क्रुन्प्रत्ययः । रुरुः=मृगः ।
7. 'पुरूरवाः' (द. उ. 9-92) इत्यसिप्रत्यये निरूढः । पुरु रूयते स्वयशः सर्वत्रेति पुरूरवाः= राजविशेषः । पुरुशब्दस्य दीर्घोऽपि निपातनात् ।
8. पाठेनानेन देवस्य शब्दार्थकत्वं भौवादिकस्यापि धातोः सम्मतमिति ज्ञायते । रेषणशब्दस्य वृकशब्दार्थत्वात् कथञ्चिदेवं नेयमिति पुरुषकारे विवेचितम् । '—गतिरोषणयोः' इति कुत्रचिद् दृष्टः पाठः ।

A. 'संजुघुक्षव आयूंषि ततः प्रतिरुरूषवः ।' भ. का. 9.14.
B. 'मण्डूकराविणं सर्पं गोमुखं च मृगादिनम् ।' (सुभाषितनीवी)
C. 'सांराविणं न कर्तव्यं यावन्नायाति दर्शनम् ।' भ. का. 7.43.

[अ] अनिट्कारिकाप्रकरणे, पर्युदस्तेषु 'गणस्थमूदन्तम्, उतां च रुस्नुवौ–' (व्याघ्रभूतिकारिका, काशिकायां 7-2-10) इत्यत्र 'रु' इत्यनेन निरनुबन्धकपरिभाषया (परि. 83) आदादिकरौतेरेव ग्रहणम्, नास्य ; तेनास्यानिट्त्वमिति न्यासकारादयः । तत्त्वबोधिन्यादिषु तु "–'रु शब्दे, रुङ् गतिरेषणयोः' इत्युभयोर्ग्रहणं निरनुबन्धकपरिभाषया, 'लुग्विकरणालुग्विकरणयोः—' (परि. 92) इति परिभाषया च । न च साहचर्यात् लुग्विकरणस्यैव ग्रहणम् इति शङ्क्यम् । तस्यानित्यत्वात् ।" इति प्रतिपादनात् आदादिकरौतिवत् भौवादिकरवतेरपि पर्युदासेषु ग्रहणात् अस्यापि सेट्त्वमिति ज्ञायते । 'संनत्स्याम्यथ योद्धुं किं न रोष्ये

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रोता-रोत्री, रावयिता-त्री, रुरूषिता-त्री, रोरूयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककवतिवत् (193) ज्ञेयानि । [1]रुतम्[A] ।

(1414) **"रुच दीप्तौ अभिप्रीतौ च"** (I-भ्वादिः-745. अक. सेट्. आत्म.)

न्यासपदमञ्जर्यादिषु 'अभिप्रीतौ' इति न पठ्यते ।
'अभिप्रीतिः=प्रीतिविषयीभवनम् ।' इति **बालमनोरमा** ।

रोचकः-चिका, रोचकः-चिका, रुरोचिषकः-रुरुचिषकः-षिका, [2]रोरुचकः-चिका ; रोचिता-त्री, रोचयिता-त्री, रुरोचिषिता-रुरुचिषिता-त्री, रोरुचिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोचतिवत् (200) ज्ञेयानि । देवदत्ताय [3]रोचमानो मोदकः, [4]रोचयन्-न्ती, रोचयमानः, [5]रोचनः[B]-रोचना, विरोचनः,

---

सत्त्वहीनवत् ।' (भ. का.,16-29) इत्यत्र **रोष्ये** इति अनिट्त्वेन प्रयोगात् अनिट्-कारिकायां पर्युदासे भौवादिकस्य न ग्रहणमिति **शब्दरत्नम्** । परं तु **जयमङ्ग-लादि**प्राचीनव्याख्यादृतः, साम्प्रतमुपलभ्यमानश्च सार्वत्रिकः पाठः—'संनत्स्याम्यथ वा योद्धुं न कोष्ये सत्त्वहीनवत् ।' इत्येवम् । अतो नैतदत्र गमकत्वेन प्रतीम इत्यलमत्र । उभयथाऽपि सन्नन्ते, 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः । **तत्त्वबोधिनीकारादीनां** मते तृजादिषु इडागमे **रविता-त्री, रवितव्यम्** इत्या-दीनि रूपाणि यथायथं बोध्यानि ।

1. इड्भाववादिनां मतेऽपि निष्ठादिषु कित्प्रत्ययेषु 'श्र्युकः किति' (7-2-11) इति निषेधात् इण्नेति बोध्यम् ।

2. "तच्च अवश्यम् अनभिधानमाश्रयितव्यम् । क्रियमाणेऽपि हि एकाज्झलादिग्रहणे यत्रैकाचो हलादेश्चोत्पद्यमानेन यङाऽर्थस्याभिधानं न भवति, न भवति तत्रोत्पत्तिः । तद् यथा भृशं शोभते, **भृशं रोचते** ।" इति **भाष्यात्** (3-1-22) अस्य धातोः भृशार्थे यङ् न । पौनःपुन्यार्थे तु यङ् भवति । एवञ्चात्र, 'पौनःपुन्यं भृशार्थो वा **क्रियासमभिहारः** ।' इति **शाब्दिक**मर्यादया भृशार्थरूपक्रियासमभिहारार्थे न यङ्, पौनःपुन्यरूपक्रियासमभिहारार्थे तु यङ् भवतीति बोध्यम् ।

3. '**रुच्यर्थानां** प्रीयमाणः' (1-4-33) इति प्रीयमाणस्य संप्रदानसंज्ञायाम्, 'चतुर्थी सम्प्रदाने' (2-3-13) इति चतुर्थी ।

4. धातोरस्याकर्मकत्वात् अभिप्रीतिरूपार्थे चित्तवत्कर्तृकत्वादपि, 'अणावकर्मकात्—' (1-3-88) इति कर्त्रभिप्राये प्राप्तस्य परस्मैपदस्य, 'न पादम्याङ्यमाङ्यसपरिमुह-रुचिनृतिवदवसः' (1-3-89) इति निषेधात्, 'णिचश्च' (1-3-74) इति यथा-संम्भवमुभयपदित्वमिति बोध्यम् । तेन शतृशानजन्तावुभावपि साधू इति बोध्यम् ।

5. नन्द्यादिषु (3-1-134) 'नन्दिवासिदमिदूषिसाधिवर्द्धिशोभि**रोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्**' (ग. सू.) इति वचनात् कर्तरि ल्युः । गुणः । **रोचनः**= कूटशाल्मलिः । स्त्रियामजादिषु (4-1-4) पाठात् टाप् ।

A. 'प्रवे भवाब्धिप्लवमारुतानां धृतामयं भक्तिनिमेयमङ्घ्रिम् ॥' धा. का. 2-36.

B. '**रोचनै**र्भूषितां पश्यामस्माकं हृदयाविधम् ॥' भ. का. 6.74.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रोचनी, [2]रुच्यः[A], [3]रोच्यम्, [4]रोचिष्णुः[B], [5]रुचिः-रुचिरम्, [6]नीरुक्--अभीरुक्, [7]रोकः[C], [8]अरोचकः, [9]रुचकः, [10]रुक्मम्, [11]रुचिष्यम्, [12]वसुरोचिः-रोचिः,

---

1. **रोचनी** इत्यत्र ल्युटि, टित्त्वेन स्त्रियां ङीपि रूपम्।
2. 'राजसूयसूर्यमृषोद्य**रुच्य**—' (3-1-114) इत्यादिना निपातनात् क्यप्। 'सूर्य**रुच्या**व्यथ्याः कर्तरि' (वा. 3-1-114) इति वचनात् कर्तरि निष्पन्नोऽयम्। रोचतेऽसौ **रुच्यः**।
3. भावे ण्यति, 'यजयाच**रुच**—' (7-3-66) इति निषेधात् कुत्वं न। 'क्वायजिव्रजियाचि**रुची**नामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात्' (वा. 7-3-59) इति **वार्तिक**पक्षे तु **रोक्यम्** इति कुत्वेनैव भाव्यम्, 'यथोत्तरं मुनीनां प्रामाण्यम्' इति शाब्दिकसंकेतात्। यदि तु **रोच्यम्** इति प्रयोगो दृश्यते, तदानीं पृषोदरादित्वात् (6-3-109) कुत्वाभाव इति बोध्यम्।
4. 'अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद**रुचि**—' (3-2-136) इत्यादिना तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययः।
5. स्त्रियाम्, 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावे इक्प्रत्ययः। **रुचि**शब्दात् मत्वर्थीयो रप्रत्ययो बाहुलकात् प्रयोगदर्शनाद् द्रष्टव्यः। **रुचिरः**=रुचिमान् इति यावत्।
6. क्विपि, 'चोः कुः' (8-2-30) इति कुत्वे, 'नहिवृतिवृषिव्यधि**रुचि**सहितनिषु क्वौ' (6-3-116) इति पूर्वपदस्य दीर्घः। '**निरोचनम्=नीरुक्**' इति **न्यासे** विवरणात् बाहुलकात् करणे भावार्थे वा क्विबत्रेति ज्ञायते।
7. घञि, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम्, इति **न्यासः** (5-4-144)। परंतु निष्ठायामनिटो धातोरेव 'चजोः—' (7-3-52) इति कुत्वमित्याश्रयितॄणां **वार्तिककारभाष्यकारादीनां** मते तु 'विभाषा श्यावा**रोकाभ्याम्**' (5-4-144) इत्यत्र **अरोक** इति निपातनादेवात्र कुत्वमिति ज्ञेयम्।
8. '**अरोचकः**' इत्यत्र, '**रोगाख्यायां** ण्वुल् बहुलम्' (3-3-108) इति ण्वुल्। **अरोचकः** = अरुचिव्याधिः। अत्र **बहुल**ग्रहणात् स्त्र्यधिकारविहितत्वेऽपि स्त्रीत्वं नेति **प्रक्रियासर्वस्वम्**। अयं भावः—'प्रत्ययस्थात्—' (7-3-44) इति इत्वं, टावादिकं चास्य नेत्यर्थः। [स्वर्णमयो भूषणविशेषः।
9. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति क्वुन्। कित्त्वान्न गुणः। **रुचकः**।
10. 'युजि**रुचि**तिजां कुश्च' (द. उ. 7-33) इति मक्प्रत्ययः, कवर्गश्चान्तादेशः। प्रत्ययस्य कित्वान्न गुणः। रोचतेऽतिशयेन तदिति **रुक्मम्**=सुवर्णम्। [भोज्यम्।
11. '**रुचि**भुजिभ्यां किष्यन्' (द. उ. 8.15) इति किष्यन्प्रत्ययः। **रुचिष्यम्**=
12. '**वसौ रुचेः संज्ञायाम्**' (द. उ. 9.33) इति इसिन्प्रत्ययः। वसुभ्यो रोचते, वसव अस्मिन् रोचन्ते इति वा **वसुरोचिः** = क्रतुः। बाहुलकात् 'वसु' इत्युपपदाभावेऽपि केवलाद्धातोः इसिन्प्रत्यये **रोचिः**=ज्वाला।

A. 'अमृषोद्यं वदन् **रुच्यो** जगाहे यां निशाचरः॥' भ. का. 6.58.
B. '**रोचिष्णु**काञ्चनचयांशुपिशङ्गिताशा......।' शि. व. 5.20. [शि. व. 5.54.
C. 'नासावि**रोक**पवनोल्लसितं तनीमो रोमाञ्चतामिव जगाम रजः पृथिव्याः॥'

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इतीमानि रूपाण्यस्माद् भवन्तीति विशेषः ।

(1415) "रुज हिंसायाम्" (X-चुरादिः-1805. सक. सेट्. उभ.)

आस्वदीयः ।

'भङ्गे रुजति, हिंसायां रोजयेदिति णौ रुजेः ॥' श्लो. 69) इति देवः ।
रोजकः-जिका, रुरोजयिषकः षिका ; रोजयिता-त्री, रुरोजयिषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककोटयतिवत् (205) बोध्यानि ।

(1416) "रुजो भङ्गे" (VI-तुदादिः-1416. सक. अनि. पर.)

'भङ्गे रुजति, हिंसायां रोजयेदिति णौ रुजेः ॥' (श्लो. 69) इति देवः ।
रोजकः-जिका, रोजकः-जिका, रुरुक्षकः-क्षिका, रोरुजकः-जिका ;
रोक्ता-रोक्त्री, रोजयिता-त्री, रुरुक्षिता-त्री, रोरुजिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि रौधादिकभुनक्तिवत् (1162) बोध्यानि ।
चोरस्य [1]रुजन् रोगः, नदी कूलानि रुजती गच्छति, चोरं रुजन्, नीरुजन् मिताशी स्यात्, [2]कूलमुद्रुजः[A], [3]रोगः, [4]हृद्रोगः-हृदयरोगः, [5]रुजा, [6]रुक्,

1. अत्र 'रुजार्थानां भाववचनानामज्वरेः' (2-3-54) इति धात्वर्थस्य भावकर्तृकत्वे कर्मणि शेषत्वेन विवक्षिते षष्ठी । तुदादित्वात् शतरि शप्रत्ययः । तस्य ङिद्वद्भावेनाङ्गस्य गुणो न । सूत्रे रुजाशब्देन व्याधिरुच्यते । तेन रुजेः व्याध्यर्थत्वे 'भाववचनानाम्' इत्यस्य 'श्लेष्मा पुरुषं रुजन्' इति प्रत्युदाहरणमिति केचित् । भाष्ये तु रुजधातोर्भङ्गार्थत्वमेवाश्रित्य, 'नदी कूलानि रुजति ।' इति प्रत्युदाहृतम् । कर्मणोऽशेषत्वविवक्षायां द्वितीयाऽपि । तेन 'चोरं रुजन्' इति सिद्ध्यति । निपूर्वकोऽयं धातुर्व्याधिप्रतीकारे वर्तते । तेन नीरुजन्=(व्याध्यनभिभूतः) इति, प्रतीकारोऽत्रार्थः ।

2. 'उदि कूले रुजिवहोः' (3-1-31) इति कूलशब्दे कर्मण्युपपदे उत्पूर्वकस्यास्य खश्प्रत्ययः । 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम् । शित्वात् सार्वधातुकत्वम् । तस्य च ङिद्वद्भावाद् गुणो न । कूलानि उद्रुजतीति कूलमुद्रुजः रथः । उक्षा इति केचित् ।

3. 'पदरुजविशस्पृशो घञ्' (3-3-16) इति कर्तरि घञ् । रुजतीति रोगः । 'चजोः—' (7-3-52) इति कुत्वम् ।

4. 'वा शोकष्यञ्रोगेषु' (6-3-51) इति हृदयशब्दस्य रोगशब्दे परे हृद्भावविकल्पः ।

5. भिदादेः (3-3-104) आकृतिगणत्वेन तत्र पाठादङ् । प्रत्ययस्य ङित्त्वान्न गुणः ।

6. 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108) इत्यत्र बहुलग्रहणात् रोगवाचकत्वेऽपि स्त्रियां सम्पदादि (वा. 3-3-108) पाठात् क्विप् ।

A. 'मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।' रघु. 4.22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रुग्णवान्, [2]लुग्नम्, [3]वीरुक्, इत्यादीनि रूपाण्यस्माद्भवन्तीति विशेषः।

## (1417) "रुट प्रती[ति]घाते"

(I-भ्वादिः-476. सक. सेट्. आत्म.) [अ]

'रोटते प्रतिघातेऽर्थे रोषे रोटयतीति णौ ॥' (श्लो. 74) इति देवः।

रोटकः-टिका, रोटकः-टिका, रुरुटिषकः-रुरोटिषकः-षिका, रोरुटकः-टिका; रोटिता-त्री, रोटयिता-त्री, रुरुटिषिता-रुरोटिषिता-त्री, रोरुटिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोकतिवत् (197) ज्ञेयानि। [4]रुटितम्-रोटितम्-तः, रुट्यमानः[A]इमानि रूपाण्यधिकान्यत्रेति विशेषः।

## (1418) "रुट भाषार्थः"

(X-चुरादिः-1784. सक. सेट्. उभ.) आस्वदीयः।

क्षीरस्वामी चुरादिष्वेव पूर्वम् 'रुट रोषे' इति मैत्रेयाद्यनुसारेण पठति

---

1. 'ओदितश्च' (8-2-44) इति निष्ठानत्वम्। निष्ठानत्वस्य परशास्त्रत्वात्, 'चोः कुः' (8-2-30) इति कुत्वस्य पूर्वशास्त्रत्वाच्च, 'विप्रायामपि पूर्वं प्रति परं शास्त्रमसिद्धम्' इति न्यायेन निष्ठानत्वासिद्धया कुत्वमत्रेति बोध्यम्। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (8-4-2) इति णत्वम्।
2. 'क्तिच्क्तौ च—' (3-3-174) इति संज्ञायां क्तः। 'कपिलकादीनां संज्ञाच्छन्दसोः' (वा. 8-2-18) इत्यत्र कपिलकादिगणे पाठादत्र धातुरेफस्य लत्वम्। लुग्नम्= जीर्णवस्त्रम्।
3. क्विबन्ते बाहुलकात् 'अन्येषामपि दृश्यते' (6-3-137) इति पूर्वपदस्य दीर्घः। अत्र क्षीरतरङ्गिण्याम्—"........'नहिवृति—' (6-3-116) इति दीर्घः। वीरुक्।" इत्युक्तम्। 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' (6-3-116) इत्यत्र रुचि इति रुचधातोरेव सर्वैः ग्रहणात् चिन्त्यमिदम्।
4. 'उदुपधात् भावादिकर्मणोः—' (1-2-21) इति वैकल्पिककित्वात् निष्ठायां रूपद्वयं बोध्यम्।

A. 'अखिन्नरुग्घोटक रुट्यमानमार्गा जवेनालुटिता निरीयुः ॥' धा. का. 2.1.

[अ] "....'रुट लुट लुठ प्रती(ति)घाते' आद्यौ प्रथमान्तौ। अन्त्यो द्वितीयान्तः। अयं पाठो देवमैत्रेयादीनाम्। हरियोगिनस्तु आद्यावेव। 'धातोः कर्मणः—' (3-1-7) इत्यत्र कैयटे द्वाविमौ द्वितीयान्तौ पठितौ। क्षीरस्वामी तु एवं पठित्वाऽऽह—"—'रुट लुट—' इत्येके। 'बाधृ रोटने' इति लिङ्गात्।" इति। तथा 'रुट दीप्तौ' इत्यप्यसावाह।" इति माधवोक्तिरिहानुसन्धेया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



अत्र तु भाषार्थकदण्डके पुनः पठति। परं तु दण्डकपठितानां सर्वेषामपि '**भासार्थः**' इति भासार्थकत्वमाह। '........**रोटयतीति णौ॥**' (श्लो. 74) इति देववाक्यं क्षीरस्वामिनोऽनूकूलमिति बोध्यम्।

रोटकः-टिका, रुरोटयिषकः-षिका ; रोटयिता-त्री, रुरोटयिषिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कोटयति**वत् (205) बोध्यानि।

## (1419) "रुटि स्तेये" (I-भ्वादिः-327. सक. सेट्. पर.)

'**रुठि—**' इति, '**रुडि—**' इति च केचिदमुं पठन्ति।

रुण्टकः-ण्टिका, रुण्टकः-ण्टिका, रुरुण्टिषकः-षिका, रोरुण्टकः-ण्टिका ; रुण्टिता-त्री, रुण्टयिता-त्री, रुरुण्टिषिता-त्री, रोरुण्टिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि।

## (1420) "रुठ उपघाते" (I-भ्वादिः-336. सक. सेट्. पर.)

'रुण्ठतीति गतौ, **रोठेदुपघाते**—।' (श्लो. 79) इति देवः।

'अश्मा लुलुठिषते ' इति **भाष्यं** व्याचक्षाणः **कैयट**स्तु (3-1-7) '**रुठ लुठ प्रतीघाते**' इति पाठमादृतवान्।

रोठकः-ठिका, रोठकः-ठिका, रुरोठिषकः-रुरुठिषकः-षिका, रोरुठकः-ठिका ; रोठिता-त्री, रोठयिता-त्री, रुरोठिषिता-रुरुठिषिता-त्री, रोरुठिता-त्री ; इतीमानि रूपाणि सर्वाण्यपि दैवादिक**कुप्यति**वत् (224) बोध्यानि।

## (1421) "रुठि गतौ" (I-भ्वादिः-345. सक. सेट्. पर.)

'**रुण्ठतीति गतौ**, रोठेदुपघाते—।' (श्लो. 79) इति देवः।

'**आलस्ये गतिप्रतिघाते च**' इति क्षीरस्वामी।

रुण्ठकः-ण्ठिका, रुण्ठकः-ण्ठिका, रुरुण्ठिषकः-षिका, रोरुण्ठकः-ण्ठिका ; रुण्ठिता-त्री, रुण्ठयिता-त्री, रुरुण्ठिषिता-त्री, रोरुण्ठिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि।

## (1422) "रुदिर् अश्रुविमोचने"

## (II-अदादिः-1067. अक. सेट्. पर.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रोदकः-दिका, रोदकः-दिका, [1]रुरुदिषकः-षिका, रोरुदकः-दिका ; रोदिता-त्री, रोदयिता-त्री, रुरुदिषिता-त्री, रोरुदिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतोहतिवत् (760) ज्ञेयानि । रुदित्वा, [2]रोदसी, [A]रोरुद्यमानः, रोरुदा[B], [3]रुद्रः-रुद्राणी, रुद्रा, [4]अलं रुदित्वा, अलं रोदनेन, [C]रुरुदिषा, इतीमान्यस्माद्धवन्तीति विशेषः ।

(1423) **"[अनो] रुध कामे"** (IV-दिवादिः-1174. सक.अनि. आत्म.)

'**अनुपूर्वो रुधिः** कामेऽर्थे तङ्श्यनौ **भजते** ।' इति **धा. का. व्याख्यायां** (2-62) विवृतम् ।

'रुन्धे रुणद्ध्यावरणे, **कामेऽनावनुरुध्यते** ॥' (श्लो. 121) इति **देवः** ।

अनुरोधकः-धिका, अनुरोधकः-धिका, अनुरुरुत्सकः-त्सिका, अनुरोरुधकः-धिका; अनुरोद्धा-द्ध्री, अनुरोधयिता-त्री, अनुरुरुत्सिता-त्री, अनुरोरुधिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्षुध्यतिवत् (315) बोध्यानि ।

---

1. 'रलो व्युपधात्—' (1-2-26) इति क्त्वासनोः कित्त्वविकल्पे प्राप्ते, '**रुदविद—**' (1-2-8) इत्यनेन नित्यकित्त्वम् । तेन सन्नन्तेषु क्त्वायामपि रूपमेकमेव ।

2. 'असुन्' (द. उ. 9-49) इत्यसुन्प्रत्यये रूपम् । पुष्पवन्तावित्यादिवत् अभिधानस्वाभाव्यात् नित्यं द्विवचनान्तोऽयम् । **रोदसी** = द्यावाभूमी ।

3. '**रोदेर्णिलुक् च**' (द. उ. 8-39.) इति रक्प्रत्ययो णिलुक् च भवति । रोदयति दानवयोषित इति **रुद्रः** । स्त्रियाम्, 'इन्द्रवरुणभवशर्वरुद्र—' (4-1-49) इत्यादिना पुंयोगे ङीषानुगागमौ भवतः । तेन **रुद्राणी** इति सिध्यति । एतच्च रुद्रपत्नीविषयकं बोध्यम् । यदा तु **रुद्रा** इति सुपर्णपत्नी बोध्यते-तदानीमजादिपाठपरिकल्पनेन (4-1-4) टापि रूपनिष्पत्तिरिति बोध्यम् ।

4. 'अलंखल्वोः प्रतिषेधयोः **प्राचां** क्त्वा' (3-4-18) इति प्रतिषेधार्थकस्यालमित्यव्ययस्य प्रयोगे क्त्वाप्रत्ययः । अत्र 'त्र्यधिकाराद्ध्र्वं वासरूपविधिर्नास्ति' इति **शाब्दिक**मर्यादया पक्षे ल्युडपि भवति । तेन '**अलं रोदनेन**' इति सिद्ध्यति । प्रकृत्यादित्वादत्र **रोदनेन** इति तृतीया—इत्यादिकं **बृहच्छब्देन्दुशेखरे** विस्तृतम् ।

A. '**रोरुद्यमानः** स तदाऽप्यपृच्छत् यथावदाख्यन् अथ वृत्तमस्मै ॥' भ. का. 3-29.

B. 'तां संहितोरूं युवतिं **सरोरुदां** शौरिर्व्यमाक्षीत् कुररीमिवेक्षिता ॥' वा. वि. 1.49

C. '**रुरुदिषा** वदनाम्बुरुहश्रियः सुतनु सत्यमलङ्करणायते ।' शि. व. 6-17.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]अनुरोधी[A] ।

(1424) "रुधिर् आवरणे" (VII-रुधादिः-1438. सक. अनि. उभ.)

'आवरणम्=व्याप्तिः ।' इति क्षीरस्वामी ।

'रुन्धे रुणध्यावरणे, कामेऽनावनुरुध्यते ॥' (श्लो. 121) इति देवः ।

रोधकः-धिका, रोधकः-धिका, रुरुत्सकः-त्सिका, रोरुधकः-धिका ;
रोद्धा-रोद्ध्री, रोधयिता-त्री, रुरुत्सिता-त्री, रोरुधिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि रौधादिकभिन्दतिवत् (1160) ज्ञेयानि ।
[2]अङ्गरोधी-उपरोधी, [3]प्रतिरोधी, [4]अनुरोधी, [5]व्रजे उपरुध्य-व्रजोपरोधं, [B]कारोपरोधम् वा गाः-पाययति, [6]रोधनः, [7]मार्गरुत्[C]-द्-रुधौ-रुधः, [8]विरोधी,

---

1. तच्छीलादिषु कर्तृषु, 'सम्पृचानुरुध....' (3-2-142) इति घिनुण्। अत्र, "...'अनो रुध कामे' इत्यस्य तु दैवादिकस्याग्रहणम्-पृचिना साहचर्यात्। अनुना सह पठितस्य दैवादिकस्य ग्रहणमित्यन्ये।" इति पदमञ्जरी। वस्तुतः—रौधादिकस्यैव धातोरनुपूर्वकत्वे कामनार्थकत्वे च दैवादिकपाठः इत्यस्य सैद्धान्तिकपक्षत्वेन प्रकृतसूत्रे (3-2-142) दैवादिकस्यैवास्य ग्रहणम्। साहचर्यपरिभाषाश्रयणे च अनन्यथासिद्धं बीजं न पश्यामः । अत एव क्वचिद् भट्टिकाव्यव्याख्याने (7-9) 'एता देवानुरोधिन्यो द्वेषिण्य इव रागिणम्।' इत्यत्र अनुरुध्यन्तीति श्यना विवरणं संगतम्। इत्यलमत्र।
2. अङ्गानि रुणद्धीति अङ्गरोधी। ग्रह्यादिषु (3-1-134) कर्मण्यणोऽपवादो णिनिप्रत्ययः। एवम् उपरुणद्धीति उपरोधी इत्यत्रापि ग्रह्यादित्वादेव णिनिः।
3. 'भविष्यति गम्यादयः' (3-3-3) इत्यत्र गणे पाठात् भविष्यत्काले औणादिको णिनिरत्र।
4. 'सम्पृचानुरुध—' (3-2-142) इत्यादिना ताच्छीलिको घिनुण्प्रत्ययः।
5. 'सप्तम्यां चोपपीडरुधकर्षः' (3-4-49) इति सप्तम्यन्ते तृतीयान्ते चोपपदे उपपूर्वकादस्मात् णमुल्। 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः।
6. नन्द्यादिषु पाठपरिकल्पनादत्र कर्तरि ल्युप्रत्ययः।
7. मार्गं रुणद्धीति मार्गरुध्, 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप्।
8. विशेषेण रुणद्धीति विरोधी, 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।

A. 'कंसानुरोध्यणनह्नमतिमद्युगर्च्यः—॥' धा. का. 2-62.
[अत्र धा. का. व्याख्यायां णिन्यन्तत्वेन प्रकृतशब्दस्य निष्पत्तिः कृतेति विभाव्यम् ।]

B. 'तं शूरसूनुं सह जाययोग्रः कारोपरोधं निगलैरसेष्ट ॥' वा. वि. 2.40.

C. 'निरुध्यमाना यदुभिः कथञ्चित् मुहुर्यदुच्चिक्षुपुरप्रवादान् ।
ध्रुवं गुरून् मार्गरुधः करीन्द्रानुल्लङ्घ्य गन्तुं तुरगास्तदीषुः ॥' शि. व. 3-29.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]गां व्रजमवरुन्धन्, [2]रुधिरम्, [3]रोधः, इतीमान्यस्माद् भवन्तीति विशेषः।

## (1425) "रुप विमोहने" (IV-दिवादिः-1236. सक. सेट्. पर.)

'रुपु[4]—' इति **धा. का. व्याख्यायाम्** (2-67)।

रोपकः-पिका, रोपकः-पिका, रुरोपिषकः-रुरुपिषकः-षिका, रोरुपकः-पिका; रोपिता-त्री, रोपयिता-त्री, रुरोपिषिता-रुरुपिषिता-त्री, रोरुपिता-त्री; इत्यादिकानि समस्तान्यपि रूपाणि दैवादिककुप्यतिवत् (224) ज्ञेयानि। [5]विरोपी,[A] रोपः[6] इमे रूपे विशेषेण भवतः इति ज्ञेयम्।

## (1426) "रुश हिंसायाम्" (VI-तुदादिः-1419. सक. अनि. पर.)

रोशकः-शिका, रोशकः-शिका, रुरुक्षकः-क्षिका, रोरुशकः-शिका; रुष्टा-ष्ट्री, रोशयिता-त्री, रुरुक्षिता-त्री, रोरुशिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिककुस्यतिवत् (234) ज्ञेयानि। तुमुनि-रोष्टुम्[B] इति।

## (1427) "रुशि भाषार्थः" (X-चुरादिः-1789. अक. सेट्. उभ.)

**आस्वदीयः।** '—भासार्थः।' इति **क्षीरस्वामी**।

रुंशकः-शिका, रुरुंशयिषकः-षिका, रुंशकः-शिका, रुरुंशिषकः-षिका, रोरुंशकः-शिका; रुंशयिता-त्री, रुरुंशयिषिता-त्री, रुंशिता-त्री, रुरुंशिषिता-त्री,

---

1. अयं द्विकर्मकः। तेन, अत्र 'अकथितं च' (1-4-51) इति कर्मसंज्ञायां द्वितीया॥
2. 'इषिमदिमुदि—' (द. उ. 8.26) इत्यादिना किरच्प्रत्यये रूपमेवम्। **रुधिरम्**= रक्तम्।
3. 'असुन्' (द. उ. 9-49) इत्यसुन्प्रत्यये रूपम्। **रोधः**=जलप्रवाहः। सकारान्तः।
4. एतत्पक्षे क्त्वायामिड्विकल्पेन **रुपित्वा-रोपित्वा** इति रूपद्वयं बोध्यम्।
5. 'सुप्यजातौ—' (3-2-78) इति णिनिप्रत्ययः।
6. 'हलश्च' (3-3-121) इति संज्ञायां घञ्प्रत्यये रूपम्। रुप्यन्ति अनेन इति **रोपः**= शरः।

A. '...किंचायोप्य**विरोपि**लोपक न वा लोभादिसंक्षोभिता।' धा. का. 2.67.

B. 'रोषच्छुप्तधियाथ **रोष्टुम**भितो योधान्द्विषद्देशकान्....।' धा. का. 2-84.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रोरुंशिता-त्री; इत्यादिकानि रूपाणि सर्वाणि चौरादिककुंशयतिवत् (232) ज्ञेयानि ।

(1428) "रुष हिंसार्थः" (I-भ्वादिः-693. सक. सेट्. पर.)

'शपि रोषति हिंसायाम्, रोषे रुष्यति रोषयेत् ॥' (श्लो. 179) इति देवः । रोषकः-षिका, रोषकः-षिका, रुरोषिषकः-रुरुषिषकः-षिका, रोरुषकः-षिका; [1]रोषिता-रोष्टा[A]-ष्ट्री, रोषयिता-त्री, रुरोषिषिता-रुरुषिषिता-त्री, रोरुषिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि भौवादिकरेषतिवत् (1408) बोध्यानि । [2]रुष्टः-[B]रुषितः, [3]रुषितमनेन, रोषितं वा, [4]रोषणः, [5]गृध्ररोषं रोषति इतीमान्यस्माद् भवन्तीति विशेषः ।

(1429) "रुष रोषे" (IV-दिवादिः-1230. अक. सेट्. पर.)

'—हिंसायाम्' इति सिद्धान्तकौमुदीपाठः । '—जिहासायाम्' इति केचित् ।

'शपि रोषति हिंसायाम्, रोषे रुष्यति रोषयेत् ॥' (श्लो. 179) इति देवः ।

---

1. 'तीषसहलुभरुषरिषः' (7-2-48) इति तकारादावार्धधातुके इड्विकल्पः । इडभावपक्षे 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन टकारः ।
2. 'रुष्यमत्वरसंघुषास्वनाम्' (7-2-28) इतीड्विकल्पः । धातोरस्य तकारादावार्धधातुके इड्विकल्पस्य विधानात् 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधे प्राप्ते इड्विकल्पविधानमिति बोध्यम् । अत्र 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-128) इत्यत्र चकारस्यानुक्तसमुच्चयार्थकत्वमाश्रित्य वर्तमाने कर्तरि क्तप्रत्ययः । न्यासे (7-2-28) 'रुष रोषे' इत्यस्माण्निष्ठायामिड्विकल्पस्य प्रतिपादनात्, तत्रोपयोगाभावात्, दैवादिकस्य रोषार्थकस्य अत्र सूत्रे (7-2-28) ग्रहणं न्यासकारसम्मतमिति प्रतिभाति ।
3. 'उदुपधाद् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति भावे आदिकर्मणि च कित्त्वविकल्पोऽत्र ।
4. नन्द्यादेः (3-1-134) आकृतिगणत्वेन कर्तरि ल्युप्रत्ययोऽत्रेति ज्ञेयम् ।
5. 'उपमाने कर्मणि च' (3-4-45) इति उपमानकर्तरि णमुल् । 'कषादिषु—' (3-4-46) इति यथाविध्यनुप्रयोगः । गृध्र इव हिनस्तीत्यर्थः ।

A. 'रेष्टारं रेषितं न्यास्यत् रोष्टाऽक्षः शस्त्रसंहतीः ॥' भ. का. 9. 31.

B. 'जघान रुषितो रुष्टान् त्वरितस्तूर्णमागतान् ॥' भ. का. 9. 20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रोषकः-षिका, रोषकः-षिका, रुरोषिषकः-रुरुषिषकः-षिका, रोरुषकः-षिका; रोषिता-रोष्टा-रोष्ट्री, रोषयिता-त्री, रुरोषिषिता-रुरुषिषिता-त्री, रोरुषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकरेषतिवत् (1408) ज्ञेयानि। शतरि [देवदत्ताय] [1]रुष्यन्-न्ती-ती, निष्ठायाम् [2]रुषितः-रुष्टः, रुषितमनेन, रुट्-रुड्-रुषौ-रुषः, [3]भीरुट्, इतीमान्यस्माद् भवन्तीति विशेषः।

(1430) "रुष रोषे" (X-चुरादिः-1671. अक. सेट्. उभ.)

'रुट—' इति क्षीरस्वामी। 'शपि रोषति हिंसायाम्, रोषे रुष्यति रोषयेत् ॥' (श्लो. 179) इति देवः।

रोषकः-षिका, रुरोषयिषकः-षिका; रोषयिता-त्री, रुरोषयिषिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि चौरादिकचोरयतिवत् (546) ज्ञेयानि।

(1431) "रुसि भाषार्थः" (X-चुरादिः-1791. अक. सेट्. उभ.)

आस्रदीयः। क्षीरस्वाम्यादयः अमुं न पठन्ति।

रुंसकः-सिका, रुरुंसयिषकः-षिका; रुंसयिता-त्री, रुरुंसयिषिता-त्री; इत्यादिकानि सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) बोध्यानि।

(1432) "रुह बीजजन्मनि प्रादुर्भावे च"

(I-भ्वादिः-859. अक. अनि. पर.) ज्वलादिः।

'—प्रादुर्भावे च' इति केचिन्न पठन्ति। 'रुह जन्मनि—' इति न्यासे पाठः।

---

1. दिवादित्वात् शतरि श्यन्। 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (1-4-37) इति कोपविषयस्य देवदत्तस्य सम्प्रदानसंज्ञायां 'चतुर्थी सम्प्रदाने' (2-3-13) इति चतुर्थी।

2. 'रुष्यमत्वर—' (7-2-28) इति निष्ठायामिड्विकल्पः। तकारादावार्धधातुके, 'तीषसहलुभरुषरिषः' (7-2-48) इति इड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इट्प्रतिषेधे प्राप्तेऽनेनेड्विकल्पोऽत्रेति बोध्यम्।

3. भियं रुष्यतीति भीरुट्छन्दोविशेषः। अत्र रथन्तरादिशब्देष्विवव्युत्पत्तिप्रदर्शनं कृतम्। नावयवार्थेऽभिनिवेशः कार्यः, संज्ञाशब्दत्वात्। 'मा नानुभूः स्वकान् दोषान् मा मुहो मा रुषोऽधुना ॥' (भट्टिकाव्ये 15-16) इत्यत्रास्य धातोः यद्यपि अकर्मकत्वं दृश्यते, तथापि अभिधानस्वाभाव्यादत्र सकर्मकत्वम्। यद्वा, भिया रुष्यतीति भीरुट् इत्यकर्मकव्युत्पत्तिरप्यत्रोपपन्नेत्यास्तां तावत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रोहकः-हिका, [1]रोपकः-पिका, रोहकः-हिका, [2]रुरुक्षकः-क्षिका, रोरुहकः-हिका ;

[3]रोढा-रोढ्री, रोपयिता-रोहयिता-त्री, रुरुक्षिता-त्री, रोरुहिता-त्री ;

रोहन्-न्ती, रोपयन्-रोहयन्-न्ती, रुरुक्षन्-न्ती ; —

रोक्ष्यन्-न्ती-ती, रोपयिष्यन्-रोहयिष्यन्-न्ती-ती, रुरुक्षिष्यन्-न्ती-ती ; —

— रोपयमाणः-रोहयमाणः, — रोरुह्यमाणः ;

— रोपयिष्यमाणः-रोहयिष्यमाणः, — रोरुहिष्यमाणः ;

[A]अम्बुरुट्-रुड्-रुहौ-रुहः ; — — —

रूढम्-रूढः-रूढवान्, [4]आरूढो वृक्षम्-आरूढो वृक्षः, [5]रूढः, रोपितः-रोहितः,

[6]रोहितः, लोहितः-लोहिताया, लोहितकः, लोहितकं [मुखम्], रुरुक्षितः, रोरुहितः-तवान् ;

---

1. ण्यन्ते सर्वत्र, '**रुहः पोऽन्यतरस्याम्**' (7-3-43) इति विकल्पेन हकारस्य पकारः। तेन रूपद्वयम्। यद्यपि दैवादिक**रुप्यते**र्ण्यन्ते **रोपक** इति, **रोहते**श्च **रोहक** इति सिद्ध्यति, धातूनामनेकार्थत्वात् बीजजन्मनि उभयत्र वृत्तिरपि सुलभा ; तथापि धातूनामनेकार्थत्वेऽपि, न सर्वेषां सर्वार्थकत्वमित्यतः सूत्रारम्भस्य चारितार्थ्यं बोध्यम्। विस्तरस्तु **न्यासादिषु** बोध्यः।

2. 'दिहिर्दुहिर्मेहति**रोहती** वहिः—' (व्याघ्रभूतिकारिका 7-2-10) इति वचनात् धातोरस्यानिट्त्वं बोध्यम्। 'हो ढः' (8-2-31) इति ढत्वे, 'षढोः कः सि' (8-2-41) इति ककारे षत्वे च रूपमेवम्।

3. तृजादिषु 'पुगन्त**लघूपधस्य** च' (7-3-86) इति प्रथमं गुणे, तदनन्तरं ढत्व-धत्वष्टुत्वढलोपाः। 'पर्जन्यवल्लक्षणं प्रवर्तते' (परि. 121) इति न्यायेन 'ढ्रलोपे—' (6-3-111) इति दीर्घः—ओकारः— अत्रापि भवतीति बोध्यम्।

4. 'गत्यर्थाकर्मक—' (3-4-72) इत्यादिना कर्तरि कर्मणि च क्तप्रत्ययः।

5. 'क्तिच्क्तौ च—' (3-3-174) इति संज्ञायां क्तप्रत्ययः। **रूढः** = रूढिं गतः।

6. ण्यन्तात् कर्तरि क्तप्रत्यये साधुरयम्। अस्यैव शब्दस्य कपिलकादिगणे (वा. 8-2-18) पाठात् विकल्पेन धात्वादेर्लकारः—**लोहितः**=वर्णविशेषः। अभिधानस्वाभाव्यात् वर्णवाचकत्वमधुना धातोरिति बोध्यम्। **लोहिताया** इति। अत्र अलोहितो लोहितो भवतीति च्व्यन्तात् **लोहित**शब्दात् '**लोहितादिडाज्भ्यः क्यष्**' (3-1-13) इति क्यष्। 'सनाद्यन्ता धातवः' (3-1-32) इति धातुसंज्ञा। 'अ प्रत्ययात्' (3-3-102) इति प्रत्ययान्तादकारप्रत्ययः। **लोहितकः** इति अत्र '**लोहितान्मणौ**' (5-4-30) इति स्वार्थे कन्प्रत्ययः। '**लोहितकं** मुखम्' इत्यत्र तु 'वर्णे चानित्ये' (5-4-31) इत्यनित्यवर्णवाचकात् **लोहित**शब्दात् स्वार्थे कन्प्रत्ययः।

A. 'बिसत्वरै**रम्बुरुहां** रजोभिः यमस्वसुश्चित इवोदभारः ॥' शि. व. 3. 11.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]रुहः-रोहः, प्ररुहः-प्ररोहः, [2]पाणिरुहः[A]-भूरुहः-उर्वीरुहः-शिरोरुहः-सरोरुहम्,
[3]न्यग्रोधः, [4]वीरुत्[B], [5]विरोही-रोहिणी, [6]रोहणः, रोपः-रोहः,
[7]धान्यरोपी, रुरुक्षुः-रोरोहः;

रोढव्यम्, रोपयितव्यम्-रोहयितव्यम्, रुरुक्षितव्यम्, रोरुहितव्यम्;
रोहणीयम्, रोपणीयम्-रोहणीयम्, रुरुक्षणीयम्, रोरुहणीयम्;
रोह्यम्, रोप्यम्-रोह्यम्, रुरुक्ष्यम्, रोरुह्यम्;
ईषद्रोहः-दूरोहः-सुरोहः; — — —
रुह्यमाणः, रोप्यमाणः-रोह्यमाणः, रुरुक्ष्यमाणः, रोरुह्यमाणः;
रोहः, आरोपः-रोहः, रुरुक्षः, रोरुहः;
रोढुम्, रोपयितुम्-रोहयितुम्, रुरुक्षितुम्, रोरुहितुम्;
रूढिः, [8]रूढिः,

---

1. 'ज्वलितिकसन्तेभ्यः—' (3-1-140) इति कर्तरि वैकल्पिको णप्रत्ययः। णप्रत्ययपक्षे **रोहः** इति सम्पद्यते। तदभावपक्षे '**इगुप**धज्ञा—' (3-1-135) इति कप्रत्यये **रुहः** इति भवति। **रुहः**=मृगविशेषः।
2. 'सुपि स्थः' (3-2-4) इत्यत्र, 'सुपि' इति योगविभागात् पाण्यादिषु सुबन्तेषूपपदेषु कर्तरि कप्रत्ययः। अत्र '**इगुपध**—' (3-1-135) इति कप्रत्यय इति **प्रक्रियाकौमुदी**। तत्र निरुपपदाधिकारात् चिन्त्यमिदम्।
3. न्यक् रोहतीति **न्यग्रोधः**=वटवृक्षः। बाहुलकात् कर्तरि घञ्। न्यङ्क्वादिषु (7-3-53) पाठात् धातुहकारस्य धकारः।
4. विविधं रोहतीति **वीरुत्**=लता। 'अन्येभ्योऽपि दृश्यते' (3-2-178) इति क्विपि, न्यङ्क्वादित्वात् (7-3-53) हकारस्य धकारः। 'अन्येषामपि दृश्यते' (6-3-137) इति दीर्घः।
5. विशेषेण रोहतीति **विरोही** तृणादयः। तद्धर्मिणि णिनिः। केवलाण्णिनिप्रत्ययेऽपि **रोही** इति भवति। तदन्तात् स्त्रियां नान्तत्वेन ङीपि **रोहिणी** इति।
6. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः। **रोहणः**=रत्नपर्वतः।
7. धान्यानि रोपयतीति **धान्यरोपी**। ण्यन्तात् णिनिः।
8. संज्ञायां क्तिच्। ढत्वष्टुत्वढलोपदीर्घाः यथालक्षणमिह बोध्याः।

A. 'पीने भटस्योरसि वीक्ष्य भुग्नान् तनुत्वचः **पाणिरुहान्** सुमध्या।' भ.का.11-8.
B. '......**वीरुत्तति**र्मृङ्गकुलैररंसीत्॥' वा. वि. 3. 17.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



[1]बीजरुहाकुर्वन्, प्राजरुहाकुर्वन्, रोपणा-रोहणा, आरुरुक्षा, रोरुहा;
रोहणम्, रोपणम्-रोहणम्, रुरुक्षणम्, रोरुहणम्;
रूढ्वा, रोपयित्वा-रोहयित्वा, रुरुक्षित्वा, रोरुहित्वा;
आरुह्य, आरोप्य-आरोह्य, आरुरुक्ष्य, आरोरुह्य;
रोहम् २, } रोपम् २-रोहम् २, } रुरुक्षम् २, } रोरुहम् २; }
रूढ्वा २, } रोपयित्वा २-रोहयित्वा २, } रुरुक्षित्वा २, } रोरुहित्वा २; }
[2]रोहिः, [3]रोहित्, [4]रोहितः-लोहितः, [5]रौहिषः।

## (1433) "रूक्ष पारुष्ये" (X-चुरादिः-1910. अक. सेट्. उभ)

## अदन्तः।

मा. धा. वृत्तौ 'रुक्षति इति शपि' इति दर्शनात् भ्वादौ 'रुक्ष' इति धातुः पूर्वं स्यात्, अधुना भ्रष्टः इति ज्ञायते।

रूक्षकः-क्षिका, रुरूक्षयिषकः-षिका, रूक्षयिता-त्री, रुरूक्षयिषिता-त्री; इत्यादीनि रूपाणि सर्वाणि चौरादिकचूर्णयतिवत् (550) बोध्यानि। युचि रूक्षणा[A] इति।

---

1. बीजं रोहयतीत्यर्थे अन्तर्भावितण्यर्थादस्मात् मूलविभुजादित्वात् (वा. 3-2-5) कर्तरि कप्रत्ययः। तदन्तात् स्त्रियां टापि **बीजरुहा** इति सम्पद्यते। साक्षात्-प्रभृतिषु (1-4-74) गणे **बीजरुहा** इति पाठादस्य कृञो योगे गतिसंज्ञा। 'ते प्राग् धातोः' (1-4-80) इति धातोः पूर्वमस्य प्रयोगः। 'कुगतिप्रादयः' (2-2-18) इति समासः। **बीजरुहाकुर्वन्**=केशाः छिन्नाः पुना रोहयन् इत्यर्थः। एवं **प्राजरुहाकुर्वन्** इत्यत्रापि बोध्यम्।
2. 'हृपिशिरुहि—' [द. उ. 1-47] इतीन्प्रत्ययः। रोहतीति **रोहिः**=जन्म।
3. 'हृसृरुहि—' [द. उ. 6-3] इतीतिप्रत्ययः। **रोहित्**=वीरुत्प्रकारः, सूर्योऽग्निश्च।
4. 'रुहे रश्च लो वा' [द. उ. 6-13] इतीतन्प्रत्ययः, रेफस्य लकारश्च वा भवति।
5. 'रुहेर्वृद्धिश्च' [द. उ. 9. 4] इति टिषच्प्रत्यये धातोर्वृद्धौ च **रौहिषः** इति भवति। **रौहिषः**=तृणजातिः, स्त्रियां षित्त्वात् ङीषि **रौहिषी**=दूर्वा।

A. '........मोमूत्रितारिरति**रूक्षणया** रणेषु।' धा. का. 3. 59.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



(1434) "**रूप रूपक्रियायाम्**" (X-चुरादिः-1933. अक. सेट्. उभ.)

**अदन्तः ।**

'**रूपक्रिया**=राजमुद्रादिरूपस्य करणम् ।

'—**रूपदर्शनम्** वा' इति **क्षीरस्वामी** ।

रूपकः-पिका, रुरूपयिषकः-षिका, रूपयिता-त्री, रुरूपयिषिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि चौरादिक**गूरयति**वत् (418) ज्ञेयानि। [1]रूप्यम्, [2]रूपकम् ।

(1435) "**रूष हिंसार्थः**" (I-भ्वादिः-678. सक. सेट्. पर.)

"—'रूष भूषायाम्' इति सुधाकरः ।" इति **सुधाकर**पाठत्वेन **मा. धा. वृत्तिः** । '—आलेपने इत्येके' इति **धा. का.** (1-86) । **सि. कौमुद्यां** तु स्वतन्त्रेण पठ्यते। **क्षीरतरङ्गिण्याम्** अयं धातुः न दृश्यते।

रूषकः-षिका, रूषकः-षिका, रुरूषिषकः-षिका, रोरूषकः-षिका; रूषिता-त्री, रूषयिता-त्री रुरूषिषिता-त्री, रोरूषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**चूषति**वत् (552) ज्ञेयानि। कर्मणि क्तप्रत्यये—[A]रूषितः इति ।

(1436) "**रेकृ शङ्कायाम्**" (I-भ्वादिः-80. अक. सेट्. आत्म.)

"आङ्पूर्वः संशये; 'आरेकं संशयं प्राहुः—' इति वचनात् ।" इति **मा. धा. वृत्तिः** ।

रेककः-किका, रेककः-किका, रिरेकिषकः-षिका, रेरेककः-किका;

---

1. 'अचो यत्' (3-1-97) इति यत्प्रत्ययः । **रूप्यम्**=राजकीया द्रव्यादिरूपा मुद्रा । स्वार्थे कनि **रूप्यकम्** इत्यपि साधुः ।
2. 'क्वुन् शिल्पिसंज्ञयोः—' [द. उ. 3.5] इति संज्ञायां क्वुन् । यद्वाऽत्र 'लिङ्गमशिष्यं लोकाश्रितत्वात् लिङ्गस्य' इति **शाब्दिक**मर्यादाश्रयणात् 'संज्ञायाम्' (3-3-109) इति ण्वुलि स्त्र्यधिकारविहितत्वेऽपि नपुंसकलिङ्गत्वं बोध्यम् । **रूपकम्**=अर्थालङ्कारभेदः, नाटकादि च । नाटकादौ तु बोध्ये दर्शनार्थकत्वम्, अन्यत्र मुद्रार्थकत्वमिति विशेषः ।

A. '...... खेदं च मूषसि कृपारस**रूषित**ात्मन् ।' धा. का. 1.86.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रेकिता-त्री, रेकयिता-त्री, रिरेकिषिता-त्री, रेरेकिता-त्री ;
इत्यादीनि समस्तान्यपि रूपाणि भौवादिककेपतिवत् (261) बोध्यानि ।

(1437) "रेजृ दीप्तौ" (I-भ्वादिः. अक. सेट्. आत्म.)

धातुरयं चन्द्रसम्मतपाठत्वेन क्षीरतरङ्गिण्यादिषु उपात्तः । "अत्र रेजिरपि क्वचित् पठ्यते, तदनार्षमिव । यदाह भट्टभास्करः "--'रेजते अग्ने पृथिवी मखेभ्यः--' इत्यत्र राजतेश्छान्दसत्वम् ।' इति ।" इति मा. धातुवृत्तिः ।

रेजकः-जिका, रेजकः-जिका, रिरेजिषकः-षिका, रेरेजकः-जिका ;
रेजिता-त्री, रेजयिता-त्री, रिरेजिषिता-त्री, रेरेजिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतेजतिवत् (779) ज्ञेयानि ।

(1438) "रेटृ परिभाषणे" (I-भ्वादिः-864. सक. सेट्. उभ.)

'—याचने च इति द्रुमे' इति धा. का. व्याख्यायाम् (2-25) ।
रेटकः-टिका, रेटकः-टिका, रिरेटिषकः-षिका, रेरेटकः-टिका ;
रेटिता-त्री, रेटयिता-त्री, रिरेटिषिता-त्री, रेरेटिता-त्री ;
इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि ।
शतरि-रेटन्[A] इति ।

(1439) "रेपृ गतौ" (I-भ्वादिः-372. सक. सेट्. आत्म.)

'—शब्दे च' इति क्षीरस्वामी ।

रेपकः-पिका, रेपकः-पिका, रिरेपिषकः-षिका, रेरेपकः-पिका ;
रेपिता-त्री, रेपयिता-त्री, रिरेपिषिता-त्री, रेरेपिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि ।

(1440) "रेभृ शब्दे" (I-भ्वादिः-385. अक. सेट्. आत्म.)

रेभकः-भिका, रेभकः-भिका, रिरेभिषकः-षिका, रेरेभकः-भिका ;
रेभिता-त्री, रेभयिता-त्री, रिरेभिषिता-त्री, रेरेभिता-त्री ;

---

A. 'रेटन्नटा या खलु चातकैश्च चाद्यं जलं प्रोथति दातुमुर्व्याम् ॥' धा. का. 2.25.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



इत्यादीनि सर्वाणि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [1]विरिब्धः = स्वरः, रेभितः, [2]रेभणः, [A]रेभः इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

## (1441) " रेवृ प्लवगतौ "

(I-भ्वादिः-507. सक. सेट्. आत्म.) [अ]

'प्लवगतिः=प्लुतिगतिः=' इति मा. धा. वृत्तौ। '—प्लुतिगतौ' इति क्षीरस्वामी ।

रेवकः-विका, रेवकः-विका, रिरेविषकः-षिका, रेरेवकः-विका ;

---

1. 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु' (7-2-18) इति स्वरेऽभिधेये निष्ठायामिडभावः, उपधाया ह्रस्वत्वं च निपात्यते। अन्यत्र विरेभितः। 'स्वरे वाच्ये विरिब्धं च शब्दार्थाद् रेभतेर्भवेत्।' इति प्रक्रियासर्वस्वम्। अत्रेदं बोध्यम्। काशिकायाम् (7-2-18) " .. ...अन्ये तु 'विरिभितम् अन्यत्' इति पठन्ति । (ये ?) रभिं (रिभिं ?) सौत्रं धातुं पठन्ति, ते विरिभितमिति प्रत्युदाहरन्ति ।" इति विरिब्धपदव्याख्यानावसरे प्रतिपादितम्। तेन रिभधातुः सौत्रः कश्चिदस्तीति प्रतीयते। सूत्रेषु तु कुत्रापि नोपात्तोऽयम् । किञ्च, 'ये रिभिं......' इत्यादिकेन वाक्येनेह भाव्यमिति, तच्च वाक्यं व्याख्यान्तर्गतं प्रमादेन मूल एव निक्षिप्तं स्यादिति च भाति ।

2. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्प्रत्ययः ।

A. 'प्रचीभ्यरेभैः पशवोऽम्भसांनिधिप्ररम्भणस्तम्भिभिरागता व्रजम् ।' धा. का. 1-50.

[अ] "अत्र मैत्रेयः 'प्लव' इति धात्वन्तरमाह, तच्चिन्त्यम्, यदि हि स्यात् आप्लावशब्दस्यास्मात् घञि सिद्धौ तदर्थं 'विभाषाऽऽङि रुप्लुवोः' (3-3-50) इति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात्। तथा प्लुङो णौ वृद्ध्यावादेशयोश्चङि णौ कृतस्य स्थानिवत्त्वात् प्लुशब्दस्य द्विरुक्तावपुप्लुवदिति नित्ये प्राप्ते पक्षे अपिप्लवदिति सिद्ध्यर्थं 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (7-4-81) इति उकारस्येत्त्वविधानमनर्थकं स्यादिति। सति ह्यस्मिन्ननेनैवापिप्लवत् इति भविष्यति। अत एव किलापरितुष्यन् मैत्रेयोऽपि "'प्लव इत्येके' इत्याह" इति माधवधातुवृत्तिवाक्यमिहानुसन्धेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



रेविता-त्री, रेवयिता-त्री, रिरेविषिता-त्री, रेरेविता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [1]रेवः-रेवा, [2]रेवणः॰ इमानि अधिकान्यत्रेति विशेषः ।

## (1442) "रेषृ अव्यक्ते शब्दे"

(I-भ्वादिः-620. अक. सेट्. आत्म.)

धातुममुं क्षीरस्वामी चन्द्रसम्मतत्वेन पठति। अयं स्वभावाद् वृकध्वनौ वर्तते।
रेषकः-षिका, रेषकः-षिका, रिरेषिषकः-षिका, रेरेषकः-षिका ;
रेषिता-त्री, रेषयिता-त्री, रिरेषिषिता-त्री, रेरेषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगेपतिवत् (429) बोध्यानि।
[3]रेषणः, [4]रेषा, [A]रेषः, क्विपि-रेट्-रेड्-रेषौ-रेषः इत्यस्य विशेषः ।

## (1443) "रै शब्दे" (I-भ्वादिः-909. अक. अनि. पर.)

'रै शब्दे रायतीतीष्टं राऽऽदाने राति शब्लुकि ॥' (श्लो. 11) इति देवः।
रायकः-यिका, रापकः-पिका, रिरासकः-सिका, रारायकः-यिका ;
राता-रात्री, रापयिता-त्री, रिरासिता-त्री, रारायिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककायतिवत् (263) बोध्यानि।

---

1. अचि प्रत्यये रेवः इति रूपम्। स्त्रियाम् अजादिपाठात् 'अजाद्यतष्टाप्' (4-1-4) इति टापि रेवा इति। रेवा = नर्मदा।
2. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति, 'अनुदात्तेतश्च हलादेः' (3-2-149) इति वा युचि रूपमेवम्।
3. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्प्रत्ययः।
4. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः। रेषा=वृकरवः। तदुक्तं केशवस्वामिना—"कौक्षे कर्दति, पर्दते गुदरवे, रेषेति वार्के भवेद्, बुक्केति श्वरवे भषेति, हयजे हेषेति हेषेति च।" इति मा. धा. वृत्तिः।

A. 'सुप्रेषितान् पथि सरेषवृके सहेषं हेषास्तकासरमदान् अतिभासुराज्ञान्।' धा. का. 1-79.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon



शतरि [A]रायन्-न्ती, [1]कीरः।

(1444) "रोडृ उन्मादे" (I-भ्वादिः-356. अक. सेट्. पर.)

केचिदमुं धातुं न पठन्ति।

रोडकः-डिका, [B]प्ररोडकः-डिका, [2]रुरोडिषकः-षिका, रोरोडकः-डिका ;
रोडिता-त्री, रोडयिता-त्री, रुरोडिषिता-त्री, रोरोडिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखोरतिवत् (363) बोध्यानि।

(1445) "रौडृ अनादरे" (I-भ्वादिः-355. सक. सेट्. पर.)

'रौटृ—' इति केचित्।

रौडकः-डिका, रौडकः-डिका, रुरौडिषकः-षिका, [3]रोरौडकः-डिका ;
रौडिता-त्री, रौडयिता-त्री, रुरौडिषिता-त्री, रोरौडिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखोरतिवत् (363) बोध्यानि। [C]रौड्यः।

---

1. 'की' इति रायति=शब्दायतेऽप्राविति कीरः=शुकः, शारिका वा। 'सुपि स्थः' (3-2-4) इत्यत्र, 'सुपि' इति योगविभागात् कर्तरि कप्रत्यये, 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे च रूपमेवम्।
2. सन्नन्ते द्वित्वादिकेषु कृतेषु 'ह्रस्वः' (7-4-59) इत्यभ्यासस्य ह्रस्वः। स च 'एच इग्घ्रस्वादेशे' (1-1-48) इति परिभाषितत्वात् अत्रोकाररूप इति ज्ञेयम्।
3. यङन्ते द्वित्वादिकेषु कृतेषु, 'ह्रस्वः' (7-4-59) इत्यभ्यासह्रस्वः। 'गुणो यङ्लुकोः' (7-4-82) इति गुणः। एवञ्चात्र पूर्वखण्डे ओकारः, उत्तरखण्डे औकार इति भेदो बोध्यः।

A. 'रायद्वयस्त्यानरुचौ रथेऽपि तं भक्तितिष्ठ्यापयिषुं स दृष्ट्वा।' धा. का. 2.31.
B. 'प्ररोडकानङ्गविलोलितैर्भृङ्गनान् रतावडम्भिर्ललनाजनैः कलैः॥' धा. का. 1.46.
C. 'अकद्वरिकीडनभूततोडकान् प्रहूडितान् होडदरौड्यभिक्षुकैः।' धा. का. 1.46.

श्रीगुरुभ्यो नमः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

# शोधनिका

| पुटम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 803 | 8 | दुधूनयिषयमाण:, | दुधूनयिषमाण: |
| 804 | 10 | दोधूप्यमान: | दोधूपिष्यमाण: |
| 805 | 28 | ......जनद: | ......जनदा: |
| 806 | 6 | दुधूसयिष्यन् | दुधूसयिषन् |
| ,, | 9 | ...क्षीरस्वामी। | क्षीरस्वामी। इति पुरुषकार:। (श्लो. 29) |
| 807 | 21 | ...103 | ...104 |
| 808 | 3 | धृज् | धृज |
| ,, | 17 | भौवादिधरतिकवत् | भौवादिकधरतिवत् |
| 809 | 21 | ...103 | ...104 |
| 810 | 15 | ...40 | ...90 |
| 811 | 12 | र्षिका; | र्षिका, देधिरक:-रिका; |
| 812 | 10 | इत्यात्त्वे, | इत्यात्वे (एवमुत्तरत्रापि 12, 21, 22, पङ्क्तिषु) |
| 816 | 7 | दिध्मासना, | दिध्मासा, |
| 827 | 10 | 659 | 658 |
| 828 | 18 | 391 | 394 |
| 830 | 18 | ङीप् | ङीष् |
| 831 | 7 | विपक्षयिषिष्यमाण:; | पिपक्षयिषमाण:; |
| 833 | 29 | (वा. | (काशिकायाम्-वा.) |
| 838 | 2 | पणयमान:, | पाणयमान:, |
| 839 | 17 | 5पतक: | 5पातक: |
| 841 | 7 | ...गत्यात्यस्त... | ...गतात्यस्त... |
| 848 | 18 | 4पर्प: | 3पर्प:। |
| ,, | 26 | 4पर्प्यते...... | 3पर्प्यते...... |
| 854 | 3 | पाप:, | पाय:, |
| 855 | 19 | सुरापाण: | सुरापाणा: |
| 871 | 31 | 22-2 | 2- 22. |
| 874 | 17 | पुष्यन् | पुष्यन् |
| 877 | 7 | विपविषा, | पिपविषा, |
| 878 | 11 | पुनाति | पुनती |
| 885 | 26 | इत्युत्त्वे | इत्युत्वे |
| 895 | 30 | ...दात्त्वं | :..दात्वं |
| 902 | 7 | 206 | 269 |
| 903 | 6 | 206 | 269 |
| 913 | 23 | घटित | घटक |
| 915 | 19 | ञ्झितम्। | ज्झितम्। |
| 917 | 26 | झषस्तधो: | झषस्तथो: |
| 918 | 3 | बन्धयिषयन् | बन्धयिष्यन् |

SRI AUROBINDO LIBRARY PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

| पुटम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 923 | 6 | ओष्ठ्यादि | दन्तोष्ठ्यादि |
| 924 | 15 | वेलल: | बेलक: |
| ,, | 19 | दन्त्यौष्ठ्यादिं | दन्तोष्ठ्यादिं |
| 949 | 7 | वाभाम; | वाभाम: ; |
| 966 | 14 | 3-3-94 | 3-3-108 |
| 969 | 9 | षिका, | र्षिका, |
| ,, | 16 | तस्यां | तस्य |
| 980 | 15 | इत्संज्ञ | इत्संज्ञां |
| 981 | 16 | भ्रर्ष्टा | भ्रष्टा |
| 984 | 4 | [5]वभ्राजिवान्, वभ्राजिवान्- | [5]वभ्राजिवान्, |
| 1006 | 28 | धार्यते | धारयति |
| 1008 | 19 | कशन्- | मशन्- |
| 1011 | 14 | -मज्जनौ-मज्जन:, | मज्जानौ-मज्जान:, |
| 1020 | 9 | मिमिच्छषक: | मिमिच्छिषक: |
| 1021 | 2 | मायक:-पिका, | मायक:-यिका, |
| 1026 | 15 | माण:, इत्या | माण:-मिमेलिषिष्यमाण:, इत्या- |
| 1031 | 8 | सुमय: | सुप्रमय: |
| 1041 | 19 | (4·) | (शाकुन्तले 5.20) |
| 1051 | 12 | सन्नन्ते, | शुद्धे, सन्नन्ते, |
| 1055 | 9 | चर्षति | चर्पयति |
| 1072 | 12 | इति | इति प्रकरणे 'क्विप् च' (3-2-76) इति |
| 1081 | 2 | ...षम् २, | ...षम् २–युयूषम् २ |
| ,, | 3 | ...षित्वा २, | ...षित्वा २–युयूषित्वा २ |
| 1087 | 31 | 6-4-16 | 1-2-26. |
| 1091 | 4 | रागक:-गिका, रिर... | रगक:-गिका, रिर... |
| 1092 | 22 | अय | अयं |
| 1097 | 27 | क्युने.... | क्वुने... |
| 2000 | 1 | एतदारभ्य पञ्चसु पुटेषु 1100, 1101, 1102, 1103, 1104, इत्येवं क्रमेण पुटसंख्या शोध्या । | |
| 1100 | 3 | रिङ्क्षिता | रिरङ्क्षिता |
| 1108 | 26 | शुषु | शुषि |
| 1111 | 18 | रारायमाण ; | रारायमाण:; |
| ,, | 20 | रापा ; | रापा: ; |
| ,, | 22 | गोर....शुभंर....राप, | गोर:...शुभंर:...राप:, |
| 1112 | 6 | राराय्यमानण: | राराय्यमाण: |
| ,, | 25 | राशदिभ्यां | राशतिभ्यां |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry.